# न्यायदर्शनम् ।

वात्स्यायनमुनिकृत-भाष्य-

विश्वनाथकृत वृत्तिसहितम् ।

पण्डितकुलपतिना च उपाधिधारि

श्रीमज्जीवानन्द विद्यासागर भट्टाचार्य्यात्मजाभ्यां

पण्डित श्रीआशुबोध-विद्याभूषण-

पण्डित-श्रीनित्यबोध-विद्यारत्नाभ्यां

संस्कृतं प्रकाशितञ्च ।

चतुर्थसंस्करणम् ।

कलिकातामहानगर्य्याम्

वाचस्पत्ययन्त्रे

मुद्रितम् ।

इं १९१९ ।

 [illegible] ।

प्रकाशक— पण्डित श्रीआशुबोध-विद्याभूषण
तथा
पण्डित श्रीनित्यबोध विद्यारत्न।

प्राप्तिस्थान— २नं० रमानाथ मजुमदार ष्ट्रीट आम्हार्ष्ट
ष्ट्रीट पोष्टअफिस। कलिकाता।

---

प्रिण्टर—बि, बि, मुखर्जी।

२ नं० रमानाथ मजुमदार ष्ट्रीट कलिकाता।

# न्यायदर्शनस्य सूचीपत्रम् ।

# न्यायदर्शनम् ।

## अथ प्रथमाध्यायस्य प्रथमाह्निकभाष्यम् ।

प्रमाणतोऽर्थप्रतिपत्तौ प्रवृत्तिसामर्थ्यादर्थवत् प्रमाणम् ।* प्रमाणमन्तरेण नार्थप्रतिपत्तिः । नार्थप्रतिपत्तिमन्तरेण प्रवृत्तिसामर्थ्यम् । प्रमाणेन खल्वयं ज्ञाताऽर्थमुपलभ्य तमर्थमभीप्सति जिहासति वा । तस्येप्साजिहासाप्रयुक्तस्य समीहा प्रवृत्तिरित्युच्यते सामर्थ्यं पुनरस्याः फलेनाभिसम्बन्धः । समीहमानस्तमर्थमभीप्सन् जिहासन् वा तमर्थमाप्नोति जहाति वा अर्थस्तु सुखं सुखहेतुः दुःखं दुःखहेतुश्च । सोऽयं प्रमाणार्थोऽपरिसंख्येयः प्राणभृद्भेदस्यापरिसंख्येयत्वात् । अर्थवति च प्रमाणे प्रमाता प्रमेयं प्रमितिरित्यर्थवन्ति भवन्ति । कस्मात् ? —अन्यतमापायेऽर्थस्यानुपपत्तेः । तत्र यस्येप्साजिहासाप्रयुक्तस्य प्रवृत्तिः स प्रमाता । स येनार्थं प्रमिणोति तत् प्रमाणम् ।

---

वपुर्लीलालब्धाजितमदनकोटिव्रजवधू-
जनानामानन्दं कमपि कमनीयं विरचयन् ।
स कोऽपि प्रेमाब्धिः प्रथयतु मनोमन्दिरचरं
त्रिलोकीलोकानां सजलजलदश्याममतनुः ॥ १ ॥

संयुक्ता युक्तरूपामभिनवविलसितालङ्कृताऽलङ्कृताभामा
सम्यक्पीयूषभानोरतिरुचिरतरा चन्द्रलोभामिव्याम् ।
मानव्यामीकनस्त्राच्चपुरहरशिरोरत्नभूषाविशेष
भूयो भव्यं विधातु चरणनखरुच भावयामि नवाङ्गाः ॥ २ ॥

यार्थं प्रतीयते तत् प्रमेयम्। यदर्थविज्ञानं, सा प्रमितिः। चतसृषु चैवंविधास्वर्थतत्त्वं परिसमाप्यते। किं पुनस्तत्त्वम्? सतश्च सद्भावोऽसतश्चासद्भावः। सदिति गृह्यमाणं यथाभूतमविपरीतं तत्त्वं भवति असच्चासदिति गृह्यमाणं यथाभूतमविपरीतं तत्त्वं भवति। कथमुत्तरस्य प्रमाणेनोपलब्धिरिति। सत्युपलभ्यमाने तदनुपलब्धेः प्रदीपवत्, यथा दर्शकेन दीपेन दृश्ये गृह्यमाणे तादृक् यन्न गृह्यते तन्नास्ति। यद्यभविष्यदिदमिव व्यज्ञास्यत विज्ञानाभावान्नास्तीति। एवं प्रमाणेन सति गृह्यमाणे तादृक् यन्न गृह्यते तन्नास्ति। यद्यभविष्यत् इदमिव व्यज्ञास्यत विज्ञानाभावान्नास्तीति। तदेवं सतः प्रकाशकं प्रमाणमसदपि प्रकाशयतीति। सच्च खलु षोडशधा व्यूढमुपदेक्ष्यते। तासां खल्विमाः सद्विधानाम्—

**प्रमाण प्रमेय संशय प्रयोजन दृष्टान्त-सिद्धान्ता-वयव तर्क-निर्णय वाद जल्प वितण्डा हेत्वाभास**

[illegible] ।
[illegible] ॥
श्री गुरु [illegible]
[illegible]मन्दात्मकम्
[illegible]
[illegible] ॥ ४ ॥
अल्पमतिरपि [illegible] न्यायशास्त्र
वि[illegible] ।
इति विनिहितचेताः कौशलं कर्त्तुकामो
गुरुचरणरजोऽहं कण्ठधारीकरोमि ॥ ५ ॥
विद्यानिवाससूनोः कृतिरेषा विश्वनाथस्य
विदुषामा[illegible] मुदे भवतात् ॥ ६ ॥

**च्छल-जाति-निग्रहस्थानानां तत्त्वज्ञानान्निःश्रेय-साधिगमः ॥ १ ॥**

—निर्देशे यथावचनं विग्रहः । चार्थे द्वन्द्वः समासः । प्रमाणादीनां तत्त्वमिति शैषिकी षष्ठी । तत्त्वस्य ज्ञानं निःश्रेयसस्याधिगम इति कर्मणि षष्ठ्यौ । गमकतया समासः । एतावन्तो विद्यमानार्थाः । एषामविपरीतज्ञानार्थमिहोपदेशः । सोऽयमनवयवेन तन्त्रार्थ उद्दिष्टो वेदितव्यः । आत्मादेः खलु प्रमेयस्य तत्त्वज्ञानान्निःश्रेयसाधिगमः । तच्चैतदुत्तरसूत्रेणानूद्यत इति । हेयं तस्य निर्वर्तकं हानमात्यन्तिकं तस्योपायोऽधिगन्तव्य इत्येतानि चत्वार्यर्थपदानि सम्यग्बुद्ध्वा निःश्रेयसमधिगच्छति । तत्र संशयादीनां पृथग्वचनमनर्थकम् संशयादयो यथासम्भवं प्रमाणेषु प्रमेयेषु चान्तर्भवन्तो न व्यतिरिच्यन्त इति । सत्यमेतत्, इमास्तु चतस्रो विद्याः पृथक्प्रस्थानाः प्राणभृतामनुग्रहायोपदिश्यन्ते, यासां चतुर्थीयमान्वीक्षिकी न्यायविद्या ।

प्रयोजनमन्तरेण सम्बन्धं च प्रेक्षावन्तो न प्रवर्तन्ते अतः प्रथमं प्रयोजनमभिधानीयम् तथा चाह —

सिद्धार्थं सिद्धसम्बन्धं श्रोतुं श्रोता प्रवर्तते ।
शास्त्रादौ तेन वक्तव्यः सम्बन्धः सप्रयोजनः ॥

सिद्धो ज्ञातोऽर्थः प्रयोजनं यस्य तत्तथा एवं सिद्धसम्बन्धमपि अतस्तत्प्रतिपादनाय भगवानक्षपादः प्रथमं सूत्रयति । अत्र तत्त्वज्ञाननिःश्रेयसयोः शास्त्रतत्त्वज्ञानयोश्च हेतुहेतुमद्भावः प्रमाणादितत्त्वज्ञानयोर्विषयविषयिभावः प्रमाणादेः शास्त्रस्य च प्रतिपाद्यप्रतिपादकभावः शास्त्रनिःश्रेयसयोश्च प्रयोज्यप्रयोजकभावः सम्बन्धः । तत्त्वं ज्ञायतेऽनेनेति व्युत्पत्त्या तत्त्वज्ञानं शास्त्रम् तथा च शास्त्रनिःश्रेयसयोरपि तत्त्वज्ञानद्वारको हेतुहेतुमद्भाव एव सम्बन्ध इति केचित् सम्प्रदायविदः । अत्र च समस्यमानपदानां द्वन्द्वः समासः यद्यपि भेदे द्वन्द्वविधानात्तत्र च बहूनां पदार्थानामभेदात् द्वन्द्वासम्भवः तथापि पदार्थतावच्छेदकभेदादेव द्वन्द्व इति न दोष इत्यन्यत्र विस्तरः

तस्याः पृथक्प्रस्थानाः संशयादयः पदार्थाः। तस्याः पृथग्वचनमन्तरेणाध्यात्मविद्यामात्रमियं स्यात् यथोपनिषदः। तस्मात् संशयादिभिः पदार्थैः पृथक् प्रस्थाप्यते। तत्र नानुपलब्धे न निर्णीतेऽर्थे न्यायः प्रवर्त्तते किन्तर्हि? संशयितेऽर्थे। यथोक्तम् — "विमृश्य पक्षप्रतिपक्षाभ्यामर्थावधारणं निर्णयः" इति। विमर्शः संशयः। पक्षप्रतिपक्षौ न्यायप्रवृत्तिः। अर्थावधारणं निर्णयस्तत्त्वज्ञानमिति। स चायं किंस्विदिति वस्तुविमर्शमात्रमनवधारणं ज्ञानं संशयः प्रमेयेऽन्तर्भवन्नेवमर्थं पृथगुच्यते। अथ प्रयोजनम्। येन प्रयुक्तः प्रवर्त्तते तत् प्रयोजनम्। यमर्थमभीप्सन् जिहासन् वा कर्म्मारभते तेनानेन सर्व्वे प्राणिनः सर्व्वाणि कर्म्माणि सर्व्वाश्च विद्या व्याप्ताः तदाश्रयश्च न्यायः प्रवर्त्तते। कः पुनरयं न्यायः?—प्रमाणैरर्थपरीक्षणं न्यायः। प्रत्यक्षागमाश्रितमनुमानं साऽन्वीक्षा प्रत्यक्षागमाभ्यामीक्षितस्यान्वीक्षणमन्वीक्षा तया प्रवर्त्तत इत्यान्वीक्षिकी न्यायविद्या न्यायशास्त्रम्

...च निर्णयश्च यथा वचनं तथा विग्रहः इति यथाश्रुतभाष्यानुसारिणः। प्रमाणं च प्रमेयञ्च संशयश्च प्रयोजनञ्च दृष्टान्तश्च सिद्धान्तश्च अवयवाश्च तर्कश्च निर्णयश्च वादश्च जल्पश्च वितण्डा च हेत्वाभासाश्च छलञ्च जातयश्च निग्रहस्थानानि च इति विग्रहं वर्णयन्ति। सम्प्रदायविदस्तु भाष्यस्थवचनपदं न किन्तु तस्मात् क्वचिदर्थे वच... तत्र प्रमाणे प्रमेये च मानवचनं गृह्यते सप्रयोजनत्वात् तच्च वक्ष्यते। दृष्टान्तादावेकवचनं सप्रयोजनम्। तथा च दृष्टान्ते द्विवचनम् अन्वयव्यतिरेकिभेदेन दृष्टान्तद्वैविध्यस्य वक्ष्यमाणत्वात्। संशयसिद्धान्तच्छलेषु च बहुवचनम् संशयच्छलयोस्त्रैविध्यस्य सिद्धान्तस्य चातुर्विध्यस्य वक्ष्यमाणत्वात्। अथ... जातिनिग्रहस्थानयोर्बहुत्वेन तथापि व्याहन्यते एकवचनस्यैव लक्षणसूत्रे सत्त्वात् इति वदन्ति। नव्यास्तु सर्व्वत्र प्रथमोपस्थितैकवचनेनैव विग्रहः न स्यात् बहुवचनेनैव प्रमाणादीनां ... पाराक्... तथा सति किं नाम ... न ... द्वन्द्वे... ... न विरुध्यते अत एव प्रयोजनस्यैकवचनान्तत्वेऽपि तद्विभागाकरणेऽपि सुख... तस्य बहुत्वं न विरुध्यत इति प्राहुः। अत्र

• यत् पुनरनुमानं प्रत्यक्षाऽऽगमविरुद्धं न्यायाऽऽभासः स इति। तत्र वादजल्पौ सप्रयोजनौ। वितण्डा तु परीक्ष्यते। वितण्डया प्रवर्त्तमानो वैतण्डिकः। स प्रयोजनमनुयुक्तो यदि प्रतिपद्यते सोऽस्य पक्षः सोऽस्य सिद्धान्त इति वैतण्डिकत्वं जहाति। अथ न प्रतिपद्यते नायं लौकिको न परीक्षक इत्यापद्यते। अथापि परपक्षप्रतिषेधज्ञापनं प्रयोजनं ब्रवीति एतदपि तादृगेव। यो ज्ञापयति यो जानाति येन ज्ञाप्यते यच्च प्रतिपद्यते यदि तदा वैतण्डिकत्वं जहाति। अथ न प्रतिपद्यते परपक्षप्रतिषेधज्ञापनं प्रयोजनमित्येतदस्य वाक्यमनर्थकं भवति। वाक्यसमूहश्च स्थापनाहीनो वितण्डा। तस्य यद्यभिधेयं प्रतिपद्यते सोऽस्य पक्षः स्थापनीयो भवति। अथ न प्रतिपद्यते प्रलापमात्रमनर्थकं भवति वितण्डात्वं निवर्त्तत इति। अथ दृष्टान्तः प्रत्यक्षविषयोऽर्थः यत्र लौकिकपरीक्षकाणां दर्शनं न व्याहन्यते। स च प्रमेयम्। तस्य पृथग्वचनञ्च तदाश्रयावनुमानाऽऽगमौ। तस्मिन् सति स्यातामनुमानागमावसति च न स्याताम्। तदाश्रया च न्यायप्रवृत्तिः। दृष्टान्तविरोधेन

च निर्णयस्य [illegible] पदार्थान्वितं तत्प्रामाण्यं न प्रयत्नान्तरमपेक्षते इति प्रतिपादयितुमुपक्रमः। ननु प्रमाणादयः पदार्था इति शब्दात् प्रथममुपात्ता एव। [illegible] इति चेन्न तेषां विशिष्य ज्ञानं हि तत्त्वज्ञानम्। तच्चोद्देशलक्षणपरीक्षाधीनम् [illegible] शास्त्रं हि [illegible] पदार्थो [illegible] कसमूह [illegible] तादृशप्रकरणसमूहः प्रकरणन्तु तादृशसूत्रसमूहः सूत्रन्तु तादृशवाक्यसमूहः वाक्यन्तु तादृशपदसमूहः [illegible]। अत्र समूहः [illegible] विवक्षितम् [illegible]। [illegible] यात्मक [illegible] न चाल। अत्र च [illegible] तथाऽपि प्रमाणस्य [illegible] प्राधान्यात् प्रथममुद्देशः। ततः [illegible] प्रमेयस्य [illegible] पनस्य न्यायाधानतया न्याये [illegible] सप्रयोजन [illegible] संशयस्य प्रथमम्। न च [illegible] संशयस्य

च परपक्षप्रतिषेधो वचनीयो भवति। दृष्टान्तसमाधिना च स्वपक्षः साधनीयो भवति। नास्तिकश्च दृष्टान्तमभ्युपगच्छन् नास्तिकत्वं जहाति। अनभ्युपगच्छन् किंसाधनः परमुपालभेतेति। निरुक्तेन दृष्टान्तेन शक्यमभिधातुम्। साध्यसाधर्म्यात् तद्धर्मभावी दृष्टान्त उदाहरणं तद्विपर्ययाद्विपरीतमिति। अस्त्ययमित्यनुज्ञायमानोऽर्थः सिद्धान्तः। स च प्रमेयं, तस्य पृथग्वचनं सत्सु सिद्धान्तभेदेषु वादजल्पवितण्डाः प्रवर्त्तन्ते नातोऽन्यथेति। साधनीयार्थस्य यावति शब्दसमूहे सिद्धिः परिसमाप्यते तस्य पञ्चावयवाः प्रतिज्ञादयः। समूहमपेक्ष्यावयवा उच्यन्ते। तेषु प्रमाणसमवायः आगमः प्रतिज्ञा, हेतुरनुमानम्, उदाहरणं प्रत्यक्षम्, उपनयनमुपमानं, सर्वेषामेकार्थसमवाये सामर्थ्यप्रदर्शनं निगमनमिति। सोऽयं परमो न्याय इति। एतेन वादजल्पवितण्डाः प्रवर्त्तन्ते नातोऽन्यथेति तदाश्रया च तत्त्वव्यवस्था। ते चैतेऽवयवाः शब्दविशेषाः सन्तः

न्यायाङ्गत्वम् इति वाचस्पतिमिश्राः [illegible]। यदपि [illegible] न न्यायाङ्गम् [illegible] दृष्टान्तस्य मूलत्वादनन्तरं दृष्टान्तस्य [illegible] दृष्टान्तमूलको न्यायः सिद्धान्तविषय इति [illegible] ऽनन्तरं सिद्धान्तस्य [illegible] तत्त्वैककार्य्यकारितया न्यायसहकारित्वेन [illegible] ततश्च [illegible] यस्य [illegible] यानुकूलत्वाद्वादस्य जल्पस्यापि वादकार्य्यकारित्वाद् [illegible] तत्र विजय [illegible] ककार्य्यानुकूलतया वितण्डा [illegible] कथावयवस्यापि दूषणमात्रपर्यवसिततयाऽनन्तरं दूषण [illegible] वादे [illegible] हेत्वाभाससमानत्वाच्चादौ हेत्वाभासाना [illegible] छल [illegible] न छलस्य [illegible] जाति [illegible] कथाऽवसानमित्येव [illegible] निग्रहस्थानानामिति। अत्र च प्रमेयान्त [illegible] [illegible] निग्रहस्थानान्तर्भावि [illegible] प्रतिपादन [illegible] निग्रहस्थानान्तःपातिनां हेत्वाभासानां पृथगभि [illegible] तु — वाद [illegible] हेत्वा

प्रमेयेऽन्तर्भूता एवमर्थं पृथगुच्यन्त इति। तर्को न प्रमाणसङ्गृहीतो न प्रमाणान्तरं प्रमाणानामनुग्राहकस्तत्त्वज्ञानाय कल्पते। तस्योदाहरणम्। किमिदं जन्म कृतकेन हेतुना निर्वर्त्त्यते ? आहोस्विदकृतकेन ? अथाऽऽकस्मिकमिति। एवमविज्ञातेऽर्थे कारणोपपत्त्या ऊहः प्रवर्त्तते यदि कृतकेन हेतुना निर्वर्त्त्यते हेतूच्छेदादुपपन्नोऽयं जन्मोच्छेदः। अथाकृतकेन हेतुना ततो हेतूच्छेदस्याशक्यत्वादनुपपन्नोऽयं जन्मोच्छेदः। अथाऽऽकस्मिकम्, अतोऽकस्मान्निर्वर्त्त्यमानं न पुनर्निवर्त्स्यतीति निवृत्तिकारणं नोपपद्यते, तेन जन्मानुच्छेद इति। एतस्मिंस्तर्कविषये कर्मनिमित्तं जन्मेति प्रमाणानि वर्त्तमानानि तर्केणानुगृह्यन्ते तत्त्वज्ञानविषयस्य विभागात् तत्त्वज्ञानाय कल्पते तर्क इति। सोऽयमित्थम्भूतस्तर्कः प्रमाणसहितो वादे साधनायोपालम्भाय वाऽर्थस्य भवतीत्येवमर्थं पृथगुच्यते प्रमेयान्तर्भूतोऽपीति। निर्णयस्तत्त्वज्ञानं प्रमाणानां फलम्। तदवसानो वादः। तस्य पालनार्थं

---

भासानां पृथगुपन्यास इत्युक्तम्। अत्र वार्त्तिकं — यदि वादे दर्शनीयत्वात् पृथगभिधानं तदा न्यूनाधिकापसिद्धान्तानां वादे दर्शनीयत्वात् पृथगभिधानं स्यात्। यदि पृथगभिधानाद् दर्शनीयत्वं तदा संशयादीनामपि वादे दर्शनीयत्वं स्यात्। तस्मात् आन्वीक्षिकीवार्त्तादण्डनीतिरूपविद्याप्रस्थानभेदज्ञापनार्थं संशयादिहेत्वाभासस्य च पृथग्वचनम् इति। तदप्यसत् निग्रहस्थानान्तर्गतत्वेनैव तन्निरूपणेन प्रस्थानभेदसम्भवात्। वस्तुतस्तु हेत्वाभासानां न निग्रहस्थानत्वं तथा सति सर्वत्र हेत्वाभासस्य [illegible] सर्वत्र निगृहीतत्वाऽऽपत्तेः। तस्मात् हेत्वाभासप्रयोगो निग्रहस्थानं तद्विभाजकं सूत्रस्थं हेत्वाभासपदं च तत्प्रयोगपरम्। तत्र च प्रयोगस्य न लक्षणमपेक्षणीयम् अपि तु हेत्वाभासानाम् इत्यत उक्तो हेत्वाभासा [illegible] इति वचनमुक्तम्। न च हेत्वाभासस्य [illegible]प्रवेशादेव न पृथगुपन्यासोपपत्तिरिति वाच्यम् तथा सति प्रमाणतर्कसाधनोपालम्भ इति वादलक्षणे [illegible]प्रमाणे [illegible] पृथगुपन्यासोपपत्तेरिति [illegible]मुत्पश्याम। अत्र केचित् सूत्रान्ते मङ्गलाकरणेन मङ्गलं न प्रामाण्यकम् इत्यत्र सूत्रकृता

जल्पवितण्डे। तावेतौ तत्त्वनिर्णयौ लोकयात्रां वहत इति। सोऽयं निर्णयः प्रमेयान्तर्गत एवमर्थं पृथगुद्दिष्ट इति। वादः खलु नानाप्रवक्तृकः प्रत्यधिकरणसाधनोऽन्यतराधिकरणनिर्णयावसानो वाक्यसमूहः पृथगुद्दिष्ट उपलक्षणार्थम्। उपलक्षितेन व्यवहारस्तत्त्वज्ञानाय भवतीति। तद्विशेषौ जल्पवितण्डे तत्त्वाध्यवसायसंरक्षणार्थमित्युक्तम्। निग्रहस्थानेभ्यः पृथगुद्दिष्टा हेत्वाभासा वादे चोदनीया भविष्यन्तीति। जल्पवितण्डयोस्तु निग्रहस्थानानीति। छलजातिनिग्रहस्थानानां पृथगुपदेश उपलक्षणार्थ इति। उपलक्षितानां स्ववाक्ये परिवर्जनम्। छलजातिनिग्रहस्थानानां परवाक्ये पर्यनुयोगः। जातेश्च परेण प्रयुज्यमानायाः सुलभः समाधिः स्वयञ्च सुकरः प्रयोग इति। सेयमान्वीक्षिकी प्रमाणादिभिः पदार्थैः विभज्यमाना—

प्रदीपः सर्व्वविद्यानामुपायः सर्व्वकर्म्मणाम्।
आश्रयः सर्व्वधर्म्माणां विद्योद्देशे प्रकीर्त्तिता॥

---

तात्पर्य्यं वर्णयन्ति। तदेतत् कतिपयव्याख्यानसम्भवात् विद्याभावेन [illegible] सम्भवात्। वदन्ति प्रमाणप्राणनिर्णय इति भगवन्नामग [illegible] पाणिप्रभाष्ये व्याख्यानमत्र सन्दर्भितम्। अत्र च उद्देशलक्षणपरीक्षाणां पञ्चपूर्व्वमाध्याय। [illegible] प्रथमसूत्रे अनन्तरं लक्षणम् प्रमेयादिकल्पपरीक्षा [illegible] उद्देशपदार्थलक्षणच्छलपरीक्षा प्रथमाध्याये तत्र च सप्रकरणन्यायलक्षणं प्रथमोऽध्याय इति। तत्र च प्रयोजनाभिधेयप्रतिपादकं प्रथमं तावत् शास्त्रीयं प्रकरणम् ततः प्रमाणलक्षणप्रकरणम्। प्रमेयलक्षणप्रकरणम् ततो न्यायपूर्व्वाङ्गप्रकरणम् ततो न्यायाश्रितप्रकरणम् ततो न्यायस्वरूपप्रकरणम् ततो न्यायोत्तराङ्गप्रकरणमिति प्रथमेऽध्याये सप्त प्रकरणानि। प्रमाणादिपदार्थैः [illegible] उपनयनादिवाहिका सेयमान्वीक्षिकी न्यायविद्या शास्त्र[illegible] व्यवह्रियते। तथा च न्यायो मीमांसा धर्म्मशास्त्राणि इति श्रुतिः [illegible] मीमांसा न्यायतर्कश्च उपाङ्गं परिकीर्त्तितम् इति पुराणम्। [illegible] गौतमीम्। आन्वीक्षिकी चात्मविद्या

तदिदं तत्त्वज्ञानं निःश्रेयसाधिगमार्थं यथाविद्यं वेदितव्यम्। इह त्वध्यात्मविद्यायामात्मादितत्त्वज्ञानं, निःश्रेयसाधिगमोऽपवर्गप्राप्तिः ॥ १ ॥

तत खलु निःश्रेयसं किं तत्त्वज्ञानानन्तरमेव भवति? नेत्युच्यते किं तर्हि? तत्त्वज्ञानात्—

**दुःखजन्मप्रवृत्तिदोषमिथ्याज्ञानानामुत्तरोत्तरापाये तदनन्तरापायादपवर्गः ॥ २ ॥**

तत्रात्माद्यपवर्गपर्यन्ते प्रमेये मिथ्याज्ञानमनेकप्रकारकं वर्त्तते। आत्मनि तावन्नास्तीति। अनात्मन्यात्मेति। दुःखे सुखमिति। अनित्ये नित्यमिति। अत्राणे त्राणमिति। सभये निर्भयमिति। जुगुप्सितेऽभिमतमिति। हातव्येऽप्रतिहातव्यमिति। प्रवृत्तौ नास्ति कर्म नास्ति कर्मफलमिति। दोषेषु नायं दोषनिमित्तः संसार इति। प्रेत्यभावे नास्ति जन्तुर्जीवो वा सत्त्व आत्मा वा यः प्रेत्य च भवेदिति। अनिमित्तं जन्म अनिमित्तो जन्मोपरम इत्यादिमान् प्रेत्यभावोऽनन्तश्चेति। नैमित्तिकः सन्न कर्मनिमित्तः प्रेत्यभाव इति। देहेन्द्रियबुद्धिवेदनासन्तानोच्छेदप्रतिसन्धानाभ्यां निरात्मकः प्रेत्यभाव इति

वाऽऽन्वीक्षिकी ॥ इति मनुः। तथा यस्तर्केणानुसन्धत्ते स धर्मं वेद नेतरः इत्यादि मानवम्। तर्कोपनिषदिति। पारमर्षन्तु पाथेयम्।। मद्यामि मननम् इति। एषा चान्वीक्षिकी परमा॥ इत्युपनिषदश्चान्वीक्षिक्या मार्गो एव य म ग्राह्य इत्यभिमत ॥ १ ॥

ननु निःश्रेयसस्य साक्षादेव तत्त्वज्ञानानन्तरं तत्त्वज्ञानिनामप्यनवस्थितिदर्शनात् अत क्रमाकाङ्क्षायामाह नेत्यादि। अत्र वा तर्कः — निःश्रेयसं तावद् द्विविधं परापरभेदात्। तत्रापरं जीवन्मुक्तिलक्षणं तत्त्वज्ञानानन्तरमेव तदप्यवधारिताऽऽत्मतत्त्वस्य नैरन्तर्याभ्यासापहृतमिथ्याज्ञानस्य प्रारब्धकर्मोपभुञ्जानस्य। परन्तु क्रमेण तत्र क्रमप्रदर्शनायेदं सूत्रम् इति। दुःखादीनां मध्ये यत् उत्तरोत्तरं तेषामपाये तदनन्तरस्य

अपवर्गो मोक्षः। स खल्वयं सर्व्वकार्य्योपरमः। सर्व्वविप्रयोगेऽपवर्गे बहु च भद्रकं लुप्यत इति। कथं बुद्धिमान् सर्व्वसुखोच्छेदमचैतन्यममुमपवर्गं रोचयेदिति। एतस्मान्मिथ्याज्ञानादनुकूलेषु रागः, प्रतिकूलेषु द्वेषः। रागद्वेषाधिकाराच्चासत्येर्ष्यामायालोभादयो दोषा भवन्ति। दोषैः प्रयुक्तः शरीरेण प्रवर्त्तमानो हिंसास्तेयप्रतिषिद्धमैथुनान्याचरति। वाचाऽनृतपरुषसूचनासम्बद्धानि। मनसा परद्रोहं परद्रव्याभीप्सां नास्तिक्यञ्चेति। सेयं पापात्मिका प्रवृत्तिरधर्म्माय। अथ शुभा शरीरेण दानं परित्राणं परिचरणञ्च। वाचा सत्यं हितं प्रियं स्वाध्यायञ्च। मनसा दयामस्पृहां श्रद्धाञ्च आचरति। सेयं धर्म्माय। अत्र प्रवृत्तिसाधनौ धर्म्माधर्म्मौ प्रवृत्तिशब्देनोक्तौ। यथाऽन्नसाधनाः प्राणाः अन्नं वै प्राणिनः प्राणा इति। सेयं कुत्सितस्याभिपूजितस्य च जन्मनः कारणम्। जन्म पुनः शरीरेन्द्रियबुद्धीनां निकायविशिष्टः प्रादुर्भावः। तस्मिन् सति दुःखम्। तत्पुनः प्रतिकूलवेदनीयं बाधना पीडा ताप इति। त इमे मिथ्याज्ञानादयो दुःखान्ता धर्म्मा अविच्छेदेनैव प्रवर्त्तमानाः संसार इति। यदा तु तत्त्वज्ञानान्मिथ्याज्ञानमपैति तदा मिथ्याज्ञानापाये दोषा अपयान्ति। दोषापाये प्रवृत्तिरपैति। प्रवृत्त्यपाये जन्मापैति।

तत्सन्निहितस्य पूर्व्वपूर्व्वस्यापायादपवर्गः प्रयोजकत्वं प्रयोज्यत्वं वा पञ्चम्यर्थः दुःखाभावाद्दुःखाभाव इतिवत् स्वरूपसम्बन्धविशेष एव तत्। तदयमर्थः — तत्त्वज्ञानेन विरोधितयाऽपगते मिथ्याज्ञाने कारणाभावाच्च निवृत्ते रागद्वेषाऽऽत्मके दोषे तदभावाच्च प्रवृत्तेर्धर्म्माधर्म्माऽऽत्मिकाया अनुत्पत्तौ तदभावाच्च जन्मनो विशिष्टशरीरसम्बन्धस्याभावात् दुःखाभावादपवर्गः। यद्यपि ज्ञानिनोऽपि रागादयस्तिष्ठन्ति तथाऽप्युत्कटरागाद्यभाव एव तात्पर्य्यम्। यद्यपि दोषाणां न धर्म्मादिजनकत्वं व्यभिचारात् तथाऽपि तत्तद्दोषाणां तत्तद्धर्म्मादिहेतुत्वाद्दोषापाये धर्म्माद्यपायः। वस्तुतो विनाऽपीच्छां गङ्गाजलसंयोगादितो

जन्मापाये दुःखमपैति । दुःखापाये चाऽऽत्यन्तिकोऽपवर्गो निःश्रेयसमिति । तत्त्वज्ञानन्तु खलु मिथ्याज्ञानविपर्य्ययेण व्याख्यातम् । आत्मनि तावदस्तीति । अनात्मन्यनात्मेति । एवं दुःखेऽनित्येऽत्राणे सभये जुगुप्सिते हातव्ये च यथाविषयं वेदितव्यम् । प्रवृत्तौ अस्ति कर्म्म अस्ति कर्म्मफलमिति । दोषेषु दोषनिमित्तोऽयं संसार इति । प्रेत्यभावे खल्वस्ति जन्तुर्जीवः सत्त्व आत्मा वा यः प्रेत्य भवेदिति । निमित्तवज्जन्म निमित्तवान् जन्मोपरम इत्यनादिः प्रेत्यभावोऽपवर्गान्त इति । नैमित्तिकः सन् प्रेत्यभावः प्रवृत्तिनिमित्त इति । सात्मकः सन् देहेन्द्रियबुद्धिवेदनासन्तानोच्छेदप्रतिसन्धानाभ्यां प्रवर्त्तत इति अपवर्गः शान्त । स खल्वयं सर्व्वविप्रयोगः सर्व्वोपरमोऽपवर्गः । बहु च कृच्छ्रं घोरं पापकं लुप्यत इति । कथं बुद्धिमान् सर्व्वदुःखोच्छेदं सर्व्वदुःखासंविदमपवर्गं न रोचयेदिति । तद्यथा मधुविषसम्पृक्तान्नमनादेयमिति, एवं सुखं दुःखानुषक्तमनादेयमिति ॥ २ ॥

त्रिविधा चास्य शास्त्रस्य प्रवृत्तिः उद्देशो लक्षणं परीक्षा चेति । तत्र नामधेयेन पदार्थमात्रस्याभिधानमुद्देशः । तत्रोद्दिष्टस्यातत्त्वव्यवच्छेदको धर्म्मो लक्षणम् । लक्षितस्य यथालक्षणमुपपद्यते न वेति प्रमाणैरवधारणं परीक्षा । तत्रो

धर्म्मादिसम्भवोऽभिचारः । तस्मात् मिथ्याज्ञानजवासनवान् दोषः तस्याश्च मिथ्याज्ञानेन नाशः तत्कालीनतत्त्वज्ञानजवासनातो वा नाश इत्याशयः इत्यपि वदन्ति। यद्यपि दुःखापायो नापवर्गः किन्तु स एव सः तथाऽप्यभेद एव तत्र पञ्चम्यर्थः अपवर्गपदं वा तद्व्यवहारपरम् अनन्तरपदेन जन्मान्तरमेव परामृश्यत इति तु न व्याख्यातम् दुःखपदवैयर्थ्याऽऽपत्तेः । दुःखानुत्पत्तेश्चरमदुःखध्वंसप्रयोजकत्वं कल्प्यत इत्याशयेनेदमित्यपि कश्चित् ॥ २ ॥

इति सूत्रवृत्तौ सप्रयोजनाभिधेयप्रकरणम्

दिष्टस्य प्रविभक्तस्य लक्षणमुच्यते यथा प्रमाणानां प्रमेयस्य च। उद्दिष्टस्य लक्षितस्य च विभागवचनं यथा छलस्य। 'वचनविघातोऽर्थविकल्पोपपत्त्या छलम्' 'तत् त्रिविधम्' इति। अथोद्दिष्टस्य विभागवचनम्—

## प्रत्यक्षानुमानोपमानशब्दाः प्रमाणानि ॥ ३ ॥

अक्षस्याक्षस्य प्रतिविषयं वृत्तिः प्रत्यक्षम्। वृत्तिस्तु सन्निकर्षो ज्ञानं वा। यदा सन्निकर्षस्तदा ज्ञानं प्रमितिः। यदा ज्ञानं तदा हानोपादानोपेक्षाबुद्धयः फलम्। अनुमानम्।—मितेन लिङ्गेन अर्थस्य पश्चान्मानमनुमानम्। उपमानं—सारूप्यज्ञानम्, यथा गौरेवं गवय इति। सारूप्यन्तु सामान्ययोगः। शब्दः—शब्द्यतेऽनेन अर्थ इत्यभिधीयते ज्ञाप्यते। उपलब्धिसाधनानि प्रमाणानीति समाख्यानिर्वचनसामर्थ्याद् बोद्धव्यम्। प्रमीयतेऽनेनेति करणार्थाभिधानो हि प्रमाणशब्दः, तद्विशेषसमाख्याया अपि तथैव व्याख्यानम्। किं पुनः प्रमाणानि प्रमेयमभिसंप्लवन्ते अथ प्रमेयं व्यवतिष्ठन्ते? इत्युभयथा दर्शनम्। अस्त्यात्मेत्याप्तोपदेशात् प्रतीयते, तत्रानुमानमिच्छाद्वेषप्रयत्नसुखदुःखज्ञानान्यात्मनो लिङ्गमिति। प्रत्यक्षं युञ्जानस्य योगसमाधिजमात्ममनसोः संयोगविशेषादात्मा प्रत्यक्ष इति। अग्निराप्तोपदेशात् प्रतीयते अत्राग्निरिति। प्रत्यासीदता धूमदर्शनेनानुमीयते। प्रत्यासन्नेन च प्रत्यक्षत उपलभ्यते। व्यवस्था पुनः अग्निहोत्रं जुहुयात् स्वर्गकाम (मै उ० ६।३६) इति। लौकिकस्य स्वर्गे न लिङ्गदर्शनं न प्रत्यक्षम्। स्तनयित्नुशब्दे श्रूयमाणे शब्दहेतोरनुमानम्। तत्र न प्रत्यक्षं

* अथ अथोद्देशलक्षणस्यापादितत्वात् प्रथमोद्दिष्टप्रमाणं लक्षयन् विभजते च। अन्ते त ... तत्प्रकारकत्वरूपं (प्रकर्षेणाविशिष्टज्ञानं) प्रशब्दविशिष्टं माधातुना

नाऽऽगम । पाणौ प्रत्यक्षत उपलभ्यमाने नानुमान नाऽऽगम इति । सा चेय प्रमिति प्रत्यक्षपरा । जिज्ञासितमर्थमाप्तोपदेशात् प्रतिपद्यमानो लिङ्गदर्शनेनापि बुभुत्सते । लिङ्गदर्शनानुमितञ्च प्रत्यक्षतो दिदृक्षते । प्रत्यक्षत उपलब्धेऽर्थे जिज्ञासा निवर्त्तते । पूर्वोक्तमुदाहरणम् अग्निरिति । प्रमातु प्रमातव्येऽर्थे प्रमाणाना सङ्करोऽभिसम्प्लव । असङ्करो व्यवस्थेति ॥ ३ ॥

अथ विभक्ताना लक्षणवचनमिति —

**इन्द्रियार्थसन्निकर्षोत्पन्न ज्ञानमव्यपदेश्यमव्यभिचारि व्यवसायाऽऽत्मक प्रत्यक्षम ॥ ४ ॥**

इन्द्रियस्यार्थेन सन्निकर्षादुत्पद्यते यत् ज्ञान तत् प्रत्यक्षम । न तर्हि इदानीमिद भवति, आत्मा मनसा संयुज्यते मन इन्द्रियेण, इन्द्रियमर्थेनेति । नेद कारणावधारणमेतावत प्रत्यक्षे कारणमिति, किन्तु विशिष्टकारणवचनमिति । यत्प्रत्यक्षज्ञानस्य विशिष्टकारण तदुच्यते । यत्तु समानमनुमानादिज्ञानस्य न तन्निवर्त्तत इति । मनसस्तर्हि इन्द्रियेण संयोगो वक्तव्य । भिद्यमानस्य प्रत्यक्षज्ञानस्य नाय भिद्यत इति समानत्वान्नोक्त इति । यावदर्थ वै नामधेयशब्दास्तैरर्थसम्प्रत्यय,

---

प्रत्याय्यते तत्करणत्व प्रमाणत्वम् ज्ञान चात्रानुभवो विवक्षित तेन स्मृतिकरणे नातिव्याप्ति लक्षितानां प्रमाणानां विभाग प्रत्यक्षानुमानोपमानशब्दा इति विभागस्य उद्देश एवान्तर्भूतत्वादय विशेषोद्देश । प्रत्यक्षलक्षणान वक्ष्यत ॥ ३ ॥

इति त्रिसूत्रीवृत्ति समाप्ता ।

अथ विभक्तानि यथाक्रम लक्षयितुमारभते ।—अक्ष प्रतिगतमक्ष प्रत्यक्षमिति योगादिन्द्रियवाचकत्वात प्रत्यक्षशब्दस्य प्रस्तुतत्वाच्च करणलक्षणस्य प्रमितिलक्षण यद्यप्यनुचित तथाऽपि यत इत्यध्याहारेण प्रत्यक्षप्रमाकरणलक्षणे वाच्ये तदेकदेश प्रमास्वरूपे ज्ञाते तत्करणत्वं सुज्ञेयमित्याशयेन वा सङ्गमनीयम् । आत्ममन संयोगजन्यसुखादिवारणाय ज्ञानमिति । यद्यपि तज्जन्यत्वात ज्ञानमात्रेऽतिव्याप्ति ईश्वर

अर्थसम्प्रत्ययाच्च व्यवहारः। तत्रेदमिन्द्रियार्थसन्निकर्षादुत्पन्न मर्थज्ञानं रूपमिति वा रस इत्येवं वा भवति। रूपरसशब्दाश्च विषयनामधेयम्। तेन व्यपदिश्यते ज्ञानं रूपमिति जानीते, रस इति जानीते नामधेयशब्देन व्यपदिश्यमानं सत् शाब्दं प्रसज्यते अत आह—अव्यपदेश्यमिति। यदिदमनुपयुक्ते शब्दार्थसम्बन्धेऽर्थज्ञानं तन्नामधेयशब्देन न व्यपदिश्यते, गृहीतेऽपि च शब्दार्थसम्बन्धेऽस्यायं शब्दो नामधेयमिति। यदा तु सोऽर्थो गृह्यते तदा तत् पूर्व्वस्मादर्थज्ञानान्न विशिष्यते तदर्थ-विज्ञानं तादृगेव भवति तस्य त्वर्थज्ञानस्य अन्यः समाख्याशब्दो नास्ति येन प्रतीयमानो व्यवहाराय कल्पेत न चाप्रतीयमानेन व्यवहारः। तस्य ज्ञेयस्यार्थस्य संज्ञाशब्देनेतिकरण युक्तेन निर्दिश्यते रूपमिति ज्ञानं रस इति ज्ञानमिति। तदेव मर्थज्ञानकाले स न समाख्याशब्दो व्याप्रियते व्यवहारकाले तु व्याप्रियते तस्मादशाब्दमर्थज्ञानमिन्द्रियार्थसन्निकर्षोत्पन्नमिति। ग्रीष्मे मरीचयो भौमेनोष्मणा संसृष्टाः स्पन्दमाना दूरस्थस्य चक्षुषा सन्निकृष्यन्ते, तत्रेन्द्रियार्थसन्निकर्षादुदकमिति ज्ञान मुत्पद्यते। तच्च प्रत्यक्षं प्रसज्यत इत्यत आह—अव्यभिचारीति। यदतस्मिंस्तदिति, तद्व्यभिचारि। यत्तु तस्मिंस्तदिति तदव्यभिचारि प्रत्यक्षमिति। दूराच्चक्षुषा ह्ययमर्थं पश्यन्ना-वधारयति धूम इति वा रेणुरिति वा। तदेतदिन्द्रियार्थ सन्निकर्षोत्पन्नमनवधारणज्ञानं प्रत्यक्षं प्रसज्यत इत्यत आह—व्यवसायात्मकमिति। न चैतन्मन्तव्यम् आत्ममनःसन्निकर्ष-

प्रत्यक्षे व्याख्याने तथाऽपि सविकल्पकमौत्पत्तिकव्यवसायात्मकसाधारणं जात्यवच्छिन्नं ज्ञान मिन्द्रियजन्यं तत्प्रत्यक्षम् यद्वा —इन्द्रियार्थसन्निकर्षोत्पन्नमिति सावधारणम् इन्द्रियार्थ सन्निकर्षातिरिक्तानुत्पन्नम् अतिरिक्तं चात्र ज्ञानम् तेन ज्ञानाकरणकमित्यर्थः। अव्यभिचारिव्यभिचारीति भ्रमाभिन्नमित्यर्थः इदञ्चाप्रमासाधारणमित्युक्तम् इदन्त्वत्र तु

नमेव अनवधारणज्ञानमिति। चक्षुषा ह्ययमर्थं पश्यन्नावधारयति तथा चेन्द्रियेणोपलब्धमर्थं मनसापलभते एवमिन्द्रियेण अनवधारयन् मनसा नावधारयति। यच्चैतदिन्द्रियानवधारणपूर्व्वकं मनसाऽनवधारणं तद्विशेषापेक्षं विमर्शमात्रं संशयो न पूर्व्वमिति। सर्व्वत्र प्रत्यक्षविषये ज्ञातुरिन्द्रियेण व्यवसाय पश्चात् मनसाऽनुव्यवसाय उपहतेन्द्रियाणामनुव्यवसायाभावादिति। आत्मादिषु सुखादिषु च प्रत्यक्षलक्षणं वक्तव्यम्। अनिन्द्रियार्थसन्निकर्षजं हि तदिति। इन्द्रियस्य वै सतो मनस इन्द्रियेभ्यः पृथगुपदेशो धर्म्मभेदात्। भौतिकानीन्द्रियाणि नियतविषयाणि। सगुणानाञ्चैषामिन्द्रियभाव इति। मनस्त्वभौतिकं सर्व्वविषयञ्च नास्य सगुणस्येन्द्रियभाव इति। सति चेन्द्रियार्थसन्निकर्षे सन्निधिमसन्निधिञ्चास्य युगपज्ज्ञानानुत्पत्तिकारणं वक्ष्याम इति। मनसश्चेन्द्रियभावान्न वाच्यं लक्षणान्तरमिति। तन्त्रान्तरसमाचाराच्चैतत् प्रत्येतव्यमिति। परमतमप्रतिषिद्धमनुमतमिति हि तन्त्रयुक्तिः। व्याख्यातं प्रत्यक्षम्॥ ४॥

## अथ तत्पूर्व्वकं त्रिविधमनुमानं पूर्व्ववच्छेषवत् सामान्यतो दृष्टञ्च॥ ५॥

तत्पूर्व्वकमित्यनेन लिङ्गलिङ्गिनोः सम्बन्धदर्शनं लिङ्गदर्शनञ्चाभिसम्बध्यते। लिङ्गलिङ्गिनोः सम्बद्धयोर्दर्शनेन लिङ्गस्मृतिरभिसम्बध्यते। स्मृत्या लिङ्गदर्शनेन च अप्रत्यक्षोऽर्थोऽनुमीयते।

---

सद्वति तत्प्रकारकत्वम् निर्विकल्पकस्य लक्ष्यत्वं तदभाववति तदप्रकारकत्वमथ अविभागं अव्यपदेश्यं व्यवसायात्मकमिति निर्विकल्पकं सविकल्पकञ्चेति द्विविधं प्रत्यक्षमित्यर्थः॥ ४॥

अनुमानं लक्षयति विभजते च।—आनन्तर्य्यबोधकाथशब्दो हेतुहेतुमद्भावसङ्गत्या सूचनाय। तत्पूर्व्वकं प्रत्यक्षपूर्व्वकम् प्रत्यक्षं प्रत्यक्षविशेषो व्याप्त्यादिविषयकं ननु

पूर्व्वादिति, यत्र कारणेन कार्य्यमनुमीयते। यथा मेघोन्नत्या भविष्यति वृष्टिरिति। शेषवत्तत यत्र कार्य्येण कारणमनुमीयते। पूर्व्वोदकविपरीतमुदक नद्याः पूर्णत्व शीघ्रत्वञ्च दृष्ट्वा स्रोतसा ऽनुमीयते भूता वृष्टिरिति। सामान्यतो दृष्ट व्रज्यापूर्व्वकम अन्यत्र दृष्टस्य अन्यत्र दर्शनमिति। तथा चाऽऽदित्यस्य। तस्मादस्यप्रत्यक्षाऽप्यादित्यस्य व्रज्येति। अथवा पूर्व्ववादात यत्र यथा पूर्व्व प्रत्यक्षभूतयोरन्यतरदर्शनेन अन्यतरस्य अप्रत्यक्षस्यानुमानम। यथा धूमनाग्निरिति। शेषवन्नाम परिशेष स च प्रसक्तप्रतिषधऽन्यत्र अप्रसङ्गाच्छिष्यमाण सम्प्र त्यय। यथा सदनित्यामत्येवमादिना द्रव्यगुणकर्म्मणामाव शेषेण सामान्यविशेषसमवायभ्यो विभक्तस्य शब्दस्य तस्मिन द्रव्यकर्म्मगुणसशये न द्रव्यमकद्रव्यत्वात न कर्म्म शब्दान्तरहेतु त्वात् यस्तु शिष्यत, सोऽयमिति शब्दस्य गुणत्वप्रतिपत्ति। सामान्यतो दृष्ट नाम, यत्राप्रत्यक्षे लिङ्गलिङ्गिनो सम्बन्धे केन चिदर्थेन लिङ्गस्य सामान्यादप्रत्यक्षो लिङ्गी गम्यते। यथेच्छा दिभिरात्मा। इच्छादयो गुणा। गुणाश्च द्रव्यसंस्थाना। तद्यदेषा स्थान, स आत्मेति। विभागवचनादेतत् त्रिविध मिति सिद्धे, त्रिविधवचन—महतो महाविषयस्य न्यायस्य लघी यसा सूत्रेणोपदेशात् पर वाक्यलाघव मन्यमानस्य अन्यस्मिन वाक्यलाघवेऽनादर। तथा चायमित्थम्भूतेन वाक्यविकल्पेन

---

व्याप्तिविशिष्टपक्षधर्म्मताज्ञानजन्यत्व अभ्यते। अनुमानम् अनुमिति यत इत्यध्याहारश्च कारणलक्षणम् अथवा करणलक्षणमेवेदम् तत्रानुमानमिति करणव्युटा अनुमीत करणमिति समाख्याबलादेव लब्धम् तच्च व्याप्तिज्ञान प्रत्यक्षपूर्व्वकं सहचारप्रत्यक्ष पूर्व्वकं विभजते त्रिविधमिति। पूर्व्व कारण तद्वत् तल्लिङ्गकम् यथा मेघोन्नतिविशेष वृष्ट्यनुमानम् शेष कार्य्य तल्लिङ्गक शेषवत् यथा नदीवृद्ध्या वृष्ट्यनुमानम् सामान्यतो दृष्ट कार्य्यकारणभिन्नलिङ्गकम्, यथा पृथिवीत्वेन द्रव्यत्वानुमानम् अथवा पूर्व्वम्

प्रवृत्त सिद्धान्ते छले शब्दादिषु च बहुल समाचार शास्त्र इति। सद्विषयञ्च प्रत्यक्षम्। सदसद्विषयञ्चानुमानम। कस्मात?— त्रैकाल्यग्रहणात त्रिकालयुक्ता अर्था अनुमानेन गृह्यन्ते। भविष्यतीत्यनुमीयते भवतीति च अभूदिति च। असच्च खल्वतीतमनागतञ्चेति ॥ ५ ॥

अथोपमानम—

## प्रसिद्धसाधर्म्यात् साध्यसाधनमुपमानम् ॥६॥

प्रज्ञातेन सामान्यात् प्रज्ञापनीयस्य प्रज्ञापनमुपमानमिति। यथा गौरेव गवय इति। किं पुनरत्रोपमानेन क्रियते? यदा खल्वय गवा समानधर्म प्रतिपद्यते तदा प्रत्यक्षतस्तमर्थ प्रतिपद्यत, इति समाख्यासम्बन्धप्रतिपत्तिरुपमानार्थ इत्याह। यथा गौरिव गवय इत्युपमान प्रयुक्त, गवा समानधर्ममर्थमिन्द्रियार्थ सन्निकर्षादुपलभमानोऽस्य गवयशब्द सञ्ज्ञेति सञ्ज्ञासञ्ज्ञिसम्बन्ध प्रतिपद्यत इति। यथा मुद्गस्तथा मुद्गपर्णी, यथा माषस्तथा माषपर्णीत्युपमाने प्रयुक्ते, उपमानात् सञ्ज्ञासञ्ज्ञिसम्बन्ध प्रतिपद्यमानस्तामोषधी भैषज्यायाऽऽहरति। एवमन्योऽप्युपमानस्य लोके विषयो बुभुत्सितव्य इति ॥ ६ ॥

अन्वय तन्त केवलान्वयीत्यर्थ यथा आभधेय प्रमेयत्वात इत्यादि यथा व्यतिरेक तद्वत केवलव्यतिरेकीत्यर्थ यथा पृथिवी इतरेभ्यो भिद्यत गन्धवत्त्वादित्यादि सामान्यतो दृष्टम् अन्वयव्यतिरेकि यथा वह्निमान् धूमादित्यादि ॥ ५ ॥

उपमान लक्षयति।—प्रसिद्धस्य पूर्वप्रमितस्य गवाद साधर्म्यात्सादृश्यात तज्ज्ञानात् साध्यस्य गवयादिपदवाच्यत्वस्य साधन सिद्धि उपमानमुपमिति यत इत्यध्याहारेण च करणलक्षणम् अथवा —साध्यसाधनमिति करणल्युटा करणलक्षणमेवेदम्। अत्र च वैधर्म्योपमितिमपि मन्यन्ते टीकाकृतः, यथा च अतिदीर्घग्रीवत्वादि पश्वन्तरवैधर्म्यज्ञानादुष्ट्रे करभपदवाच्यताग्रह। एवमन्योऽप्युपमानस्य विषय इति भाष्यम् यथा मुद्गपर्णीसदृशी ओषधी विषं हन्ति इत्यतिदेशवाक्यार्थे ज्ञाते मुद्गपर्णीसादृश्यज्ञाने जात इयमोषधी विषहरणीत्युपमित्या विषयीक्रियत इत्यादि ॥ ६ ॥

अथ शब्दः —

आप्तोपदेशः शब्दः ॥ ७ ॥

आप्तः खलु साक्षात्कृतधर्मा यथादृष्टस्यार्थस्य चिख्यापयिषया प्रयोक्ता उपदेष्टा। साक्षात्करणमर्थस्य आप्तिः, तया प्रवर्तत इत्याप्तः। ऋष्यार्यम्लेच्छानां समानं लक्षणम्। तथा च सर्वेषां व्यवहाराः प्रवर्तन्त इति। एवमेभिः प्रमाणैर्देवमनुष्यतिरश्चां व्यवहाराः प्रकल्प्यन्ते नातोऽन्यथेति ॥ ७ ॥

स द्विविधो दृष्टादृष्टार्थत्वात् ॥ ८ ॥

यस्येह दृश्यतेऽर्थः स दृष्टार्थः। यस्यामुत्र प्रतीयते सोऽदृष्टार्थः। एवमपि लौकिकवाक्यानां विभाग इति। किमर्थं पुनरिदम्? उच्यते — स न मन्येत दृष्टार्थ एवाऽऽप्तोपदेशः प्रमाणम् अर्थस्यावधारणादिति। अदृष्टार्थोऽपि प्रमाणम् अर्थस्यानुमानादिति ॥ ८ ॥

शब्दं लक्षयति।—शब्द इति लक्ष्यकथनम्, तदर्थः प्रमाणशब्द इति। आप्तोपदेश इति लक्षणम्। आप्तः प्रकृतवाक्यार्थयथार्थज्ञानवान् तस्योपदेश इत्यर्थः। प्रकृतवाक्यार्थयथार्थज्ञानप्रयुक्तः शब्द इति फलितार्थः। अथवा — आप्तो यथार्थ उपदेशः शाब्दबोधो यस्मात् इति बहुव्रीहिः। शाब्दत्वञ्च जातिविशेषः, तथा च यथार्थशाब्दज्ञानकरणत्वमर्थः। अत्र च विशेष्यावृत्त्यप्रकारकत्वं तद्वति तत्प्रकारकत्वादि प्रमालक्षणानामेकलक्षणे परञ्च लक्ष्यतावच्छेदके निवेशनीयम्, अतो नाभेदः ॥ ७ ॥

विभजते।—स प्रमाणशब्दः शब्दतदुपजीविप्रमाणातिरिक्तप्रमाणगम्यार्थको दृष्टार्थकः, शब्दतदुपजीविप्रमाणमात्रगम्यार्थकोऽदृष्टार्थकः। तथा च दृष्टार्थकत्वादृष्टार्थकत्वभेदात् प्रमाणशब्दस्य द्वैविध्यमित्यर्थः ॥ ८ ॥

समाप्तं प्रमाणलक्षणप्रकरणम्।

किं पुनरनेन प्रमाणेनार्थजातं प्रमातव्यमिति ? तदुच्यते—

**आत्मशरीरेन्द्रियार्थबुद्धिमनःप्रवृत्तिदोषप्रेत्यभावफलदुःखापवर्गास्तु प्रमेयम् ॥ ९ ॥**

तत्राऽऽत्मा सर्व्वस्य द्रष्टा सर्व्वस्य भोक्ता सर्व्वज्ञः, सर्व्वानुभवी। तस्य भोगाऽऽयतनं शरीरम्। भोगसाधनानीन्द्रियाणि। भोक्तव्या इन्द्रियार्थाः। भोगो बुद्धिः। सर्व्वार्थोपलब्धौ नेन्द्रियाणि प्रभवन्तीति सर्व्वविषयमन्तःकरणं मनः। शरीरेन्द्रियार्थबुद्धिसुखवेदनानां निर्वृत्तिकारणं प्रवृत्तिर्दोषाश्च। नास्येदं शरीरमपूर्व्वमनुत्तरञ्च पूर्व्वशरीराणामादिर्नास्ति उत्तरेषामपवर्गोऽन्त इति प्रेत्यभावः। ससाधनसुखदुःखोपभोगः फलम्। दुःखमिति, नेदमनुकूलवेदनीयस्य सुखस्य प्रतीतेः प्रत्याख्यानम्। किन्तर्हि ? जन्मन एवेदम्। सुखसाधनस्य दुःखानुषङ्गाद् दुःखेनाविप्रयोगाद्विविधबाधनायोगाद् दुःखमिति समाधिभावनमुपदिश्यते। समाहितो भावयति। भावयन्निर्विद्यते। निर्विण्णस्य वैराग्यम्। विरक्तस्यापवर्ग इति। जन्ममरणप्रबन्धोच्छेदः सर्व्वदुःखप्रहाणमपवर्ग इति। अस्त्यन्यदपि द्रव्यगुणकर्म्मसामान्यविशेषसमवायाः प्रमेयम्। तद्भेदेन चापरिसङ्ख्येयम्। अस्य तु तत्त्वज्ञानादपवर्गः, मिथ्याज्ञानात् संसारः, इत्यत एतदुपदिष्टं विशेषेणेति ॥ ९ ॥

प्रमेयं विभजते लक्षयति च।—अत्र तु शब्दः पुनरर्थे तथा चैतेषामेव प्रमेयत्वं न तु प्रमाविषयत्वेन सर्व्वेषामपि प्रमेयशब्दो हि वादादिशब्दवत् परिभाषाविशेषेण इहैषु प्रवर्त्तते तत्र च प्रकृष्टं मेयं प्रमेयमिति योगार्थः। प्रकर्षश्च संसारहेतुमिथ्याज्ञानविषयत्वं मोक्षहेतुधीविषयत्वं वा द्रष्टव्यः। च तावदन्यान्यत्वमथ लक्षणमपि तन्त्व प्रमेयं किम् ? इत्याकाङ्क्षायामात्मादयो दर्शिताः। इत्यतो वचनभेदेऽपि सामान्यं यद्वा प्रमाणम् इत्यादिवदुपपन्नम् अन्यथा आत्मसूत्रे विगतिः स्यात्

तत्राऽऽत्मा तावत् प्रत्यक्षतो न गृह्यते, स किमाप्तोपदेशमात्रादेव प्रतिपद्यत इति? नेत्युच्यते। अनुमानाच्च प्रतिपत्तव्य इति। कथम्?—

**इच्छाद्वेषप्रयत्नसुखदुःखज्ञानान्यात्मनो लिङ्गमिति ॥ १० ॥**

यज्जातीयस्यार्थस्य सन्निकर्षात् सुखमात्मोपलब्धवान् तज्जातीयमेवार्थं पश्यन्नुपादातुमिच्छति। सेयमादातुमिच्छा एकस्यानेकार्थदर्शिनो दर्शनप्रतिसन्धानाद् भवति लिङ्गमात्मनः। * नियतविषये हि बुद्धिभेदमात्रे न सम्भवति देहान्तरवदिति। * एवमेकस्यानेकार्थदर्शिनो दर्शनप्रतिसन्धानाद् दुःखहेतौ द्वेषः। यज्जातीयो यस्यार्थः सुखहेतुः प्रसिद्धस्तज्जातीयमर्थं पश्यन्नादातुं प्रयतते। सोऽयं प्रयत्न एकमनेकार्थदर्शिनं दर्शनप्रतिसन्धातारमन्तरेण न स्यात्। * नियतविषये बुद्धिभेदमात्रे न सम्भवति देहान्तरवदिति। * एतेन दुःखहेतौ प्रयत्नो व्याख्यातः। सुखदुःखस्मृत्या चायं तत्साधनमाददानः सुखमुपलभते दुःखमुपलभते, सुखदुःखे वेदयते पूर्वोक्त एव हेतुः। बुभुत्समानः खल्वयं विमृशति किंस्विदिति।

---

तत्र वक्ष्यते।—प्रमेयत्वेनैक्यमिति प्रतिपादनाय अन्यतमाज्ञानेऽपि साऽपवर्ग इति प्रतिपादनाय वा प्रमेयमित्येकवचनमित्यन्ये तच्चिन्त्यम्। अत्रापि आत्मा च शरीरञ्च इन्द्रियाणि च अर्थाश्च बुद्धिश्च मनश्च प्रवृत्तिश्च दोषाश्च प्रेत्यभावश्च फलञ्च दुःखञ्च अपवर्गश्चेति यथावचनं विग्रहं वर्णयन्ति। अत्र प्राधान्यात् कारणरूपप्रमेयषट्कमभिधाय कार्यरूपप्रमेयषट्कमभिहितम् तत्र पूर्वपूर्वस्य प्राधान्यात् प्रथममुद्देश इति वदन्ति ॥ ९ ॥

तत्र प्रथमोद्दिष्टमात्मानं लक्षयति।—अत्र च आत्मनः प्रत्यक्षत्वाल्लिङ्गकथनमसङ्गतम्। न च शरीरातिरिक्ताऽऽत्मव्युत्पादनार्थं तत् इति वाच्यम् अग्रिमपरीक्षावैयर्थ्यापत्तेः। लक्षणाकथनेन न्यूनत्वञ्च इति चेन्न लिङ्गपदस्य लक्षणार्थत्वात्। न च

विमृशन् जानीते इदमिति । तदिदं ज्ञानं बुभुत्साविमर्शाभ्यामभिन्नकर्तृकं गृह्यमाणमात्मलिङ्गम् । पूर्वोक्त एव हेतुरिति । तत्र देहान्तरवदिति विभज्यते । यथाऽनात्मवादिनो देहान्तरेषु नियतविषया बुद्धिभेदा न प्रतिसन्धीयन्ते तथैकदेहविषया अपि न प्रतिसन्धीयेरन् अविशेषात् । सोऽयमेकसत्त्वस्य समाचारः स्वयं दृष्टस्य स्मरणं, नान्यदृष्टस्येति । एवं खलु नानासत्त्वानां समाचारः अन्यदृष्टमन्यो न स्मरतीति । तदेतदुभयमशक्यमनात्मवादिना व्यवस्थापयितुमिति । एवमुपपन्नमस्त्यात्मेति ॥ १० ॥

तस्य भोगाधिष्ठानम्—

## चेष्टेन्द्रियार्थाऽऽश्रयः शरीरम् ॥ ११ ॥

कथं चेष्टाऽऽश्रयः ? ईप्सितं जिहासितं वाऽर्थमधिकृत्येप्साजिहासाप्रयुक्तस्य तदुपायानुष्ठानलक्षणा समीहा चेष्टा सा यत्र वर्त्तते, तच्छरीरम् । कथमिन्द्रियाऽऽश्रयः ? यस्यानुग्रहेणानुगृहीतानि उपघाते चोपहतानि स्वविषयेषु साध्व

सिद्धामन्येकवचनेन मिलितानां लक्षणत्वं प्रतीयते तच्चायुक्तं वैयर्थ्यात् इति वाच्यम् किं लक्षणम् इच्छाकाङ्क्षाशब्दिताभिच्छादीनामभिधानात् मिलितं लक्षणमिति प्रत्याख्या भावात् तथा च प्रत्येकमेव लक्षणम् अत ज्ञानेच्छाप्रयत्नानामात्ममात्रस्य लक्षणत्वं सुखदुःखयोर्या समानयोर्लक्षणत्वमिति ॥ १ ॥

क्रमप्राप्तं शरीरं लक्षयति ।—अत्र चेष्टादीनां मिलितानाम् आश्रयत्वं न लक्षणं वैयर्थ्यात् अपि त्वाश्रयपदस्य प्रत्येकमन्वयाच्चेष्टाऽऽश्रयत्वादित्रिलक्षणपरी तात्पर्य्यं चेष्टात्वञ्च प्रयत्नजन्यतावच्छेदको जातिविशेषः । न च शरीरावयवेऽतिव्याप्तिः अन्त्यावयवित्वेन विशेषणात् । न च नृसिंहशरीरेऽव्याप्तिः तादृशमानाभावात् अत एवाऽऽह इन्द्रियाऽऽश्रय इति ।—इन्द्रियाऽऽश्रयत्वञ्च अवच्छेदकताऽऽख्यस्वरूपसम्बन्धविशेषेण चक्षुष्मान् देवदत्तोऽयमित्यादिप्रतीतेः अर्थाऽऽश्रयत्वमित्यत्राऽर्थशब्दो न रूपादिपरः तदाश्रयत्वस्य घटादावतिव्याप्तेः किन्तु सुखदुःखान्यतरपरः अत एव

साधुषु वर्त्तन्ते, स एषामाश्रय तच्छरीरम्। कथमर्थाऽऽश्रय ? यस्मिन्नायतने इन्द्रियार्थसन्निकर्षात् उत्पन्नयो सुखदुःखयो प्रतिसंवेदन प्रवर्त्तते स एषामाश्रय, तच्छरीरमिति ॥११॥

भोगसाधनानि पुन —

**घ्राणरसनचक्षुस्त्वक्श्रोत्राणीन्द्रियाणि भूतेभ्य ॥१२॥**

जिघ्रत्यनेनेति घ्राण गन्ध गृह्णातीति। रसयत्यनेनेति रसन रस गृह्णातीति। चष्टेऽनेनेति चक्षु, रूप पश्यतीति। स्पृशत्यनेनेति स्पर्शन त्वक्स्थानमिन्द्रिय त्वक तदुपचार स्थानादिति। शृणोत्यनेनेति श्रोत्र शब्द गृह्णातीति। एव समाख्यानवचनसामर्थ्याद्‌बोध्य स्वविषयग्रहणलक्षणानीन्द्रियाणीति। भूतेभ्य इति नानाप्रकृतीनामेषा सता विषयनियम नैकप्रकृतीना सति च विषयनियमे स्वविषयग्रहणलक्षणत्व भवतीति ॥१२॥

---

भाष्ये यस्मिन्नायतने सुखदुःखयो प्रतिसंवेदन प्रवर्त्तते स एषामाश्रय तच्छरीरम् इति। वस्तुतस्त्वन्यतराऽऽश्रयत्वमपि न तल्लक्षण किन्तु सुखाऽऽश्रयत्व दुःखाऽऽश्रयत्वञ्चेति लक्षणे ये तात्पर्यम् शरीरस्य तदाश्रयत्वमवच्छेदकतासम्बन्धेन इत्यादिरलक्ष्यत्व तन्त्याऽवयवित्वम विशेषणीयम् स्वर्गशरीरे नारकिशरीरे प्रत्येक च सुखदुःख स्वीकारादव्याप्ति। न च तच्छेन्यवृक्षशरीरेऽव्याप्ति सुखाद्याश्रयत्वाभावादिति वृक्षस्य व्याप्यव्याप्यजातिमत्त्वस्य विवक्षितत्वात् तादृशजातिश्च मनुष्यत्वचैत्रत्वादि कल्पभेदेन न सिद्धशरीराणा भेदाभेदासिद्धत्वजातिमादाय नरसिंहशरीरे लक्षणसमन्वय इति ॥ ११ ॥

इन्द्रियं विभजते लक्षयति च।—यद्यपि मनसोऽपीन्द्रियत्वमस्त्येव तथाऽपि घ्राणेत्यादिरूपलक्षणपरत्वान्न दोष वक्ष्यमाणेन्द्रियाणीत्यस्य बाह्येन्द्रियाणीत्यर्थ। तेन भूतेभ्य इत्यस्य नासङ्गति। अत्र चेतानीन्द्रियाणीति वदता घ्राणादीन्यन्यान्यव लक्षणमिति सूचितम् प्रत्यक्षजनकताऽवच्छेदकतया इन्द्रियत्वमखण्डोपाधिरूपमित्यन्ये घ्राणत्वादिक जातिविशेषरूपम् कर्णशष्कुल्यवच्छिन्न नभ श्रोत्रम् घ्राणादीनि कि प्रकृतिकानि ? इत्याकाङ्क्षायामाह —भूतेभ्य इति। तेनेन्द्रियाणामहङ्कारप्रकृतिकत्व

कानि पुनरिन्द्रियकारणानि—

**पृथिव्यापस्तेजो वायुराकाशमिति भूतानि ॥१३॥**

संज्ञाशब्दैः पृथगुपदेशो भूतानां विभक्तानां सुवचं कार्य्यं भविष्यतीति ॥ १३ ॥

इमे तु खलु—

**गन्धरसरूपस्पर्शशब्दाः पृथिव्यादिगुणास्तदर्थाः ॥१४॥**

पृथिव्यादीनां यथाविनियोगं गुणा इन्द्रियाणां यथाक्रममर्था विषया इति ॥ १४ ॥

अचेतनस्य करणस्य बुद्धेर्ज्ञानं वृत्तिः, चेतनस्य कर्त्तुरुपलब्धिरिति युक्तिविरुद्धमर्थं प्रत्याचक्षाण इवेदमाह —

**बुद्धिरुपलब्धिर्ज्ञानमित्यनर्थान्तरम् ॥ १५ ॥**

नाचेतनस्य करणस्य बुद्धेर्ज्ञानं भवितुमर्हति, तद्धि चेतनं

मिति मन्तव्यम् । व्युत्पादयितुं चेदं कृतं व्याख्यानम् । अत एव घ्राणादीनां चतुर्णां पृथिव्यादिजन्यत्वं सम्भवति, श्रोत्रस्य कर्णशष्कुल्यवच्छिन्नाऽऽकाशस्य कर्णशष्कुल्या जन्यत्वात् न जन्यत्वमिति । अथवा आभिन्नानीति पूरयित्वा भूताभिन्नानीति व्याख्येयम् । घ्राणादीन्यर्थोपलब्धिपरत्वं तु भूतस्य इति वार्त्तिकप्रन्थ ॥ १२ ॥

भूतान्यथ कानि ? इत्याकाङ्क्षायामाह ।—कार्य्याऽऽरम्भे परस्परानपेक्षत्वसूचनाय समासाकरणं भूतत्वन्तु बाह्येन्द्रियग्रहणयोग्यविशेषगुणवत्त्वं पृथिवीत्वादयस्तु जातिविशेषा इति ॥ १३ ॥

क्रमप्राप्तमथ विभजते लक्षयति च ।—विशेषकाणां द्रव्यगुणकर्म्मत्वरूपशब्दाभिधेयत्वम् अत एव पञ्चानां गन्धादीनामेव कथं तत्त्वमिदं याऽऽशङ्कानिरासाय तदर्था इत्युक्तम् तेषामिन्द्रियाणामर्था विषया उद्दिष्टा अपि त एवेत्याशय इत्यस्य तदर्थत्वं लक्षणमिति मन्तव्यम् तच्छब्देन बाह्येन्द्रियाणि परामृश्यन्ते तथा चैकबाह्येन्द्रियमात्रग्राह्यगुणत्वम् अर्थत्वं बाह्येन्द्रियग्राह्यबाह्येन्द्रियग्राह्यगुणत्वं तदर्थ । पृथिव्यादिगुणा इति व्याख्येयम् । तत्र गुणा इत्यादि द्रव्यं गन्धे यावत् । पृथिव्यादीनां गुणा इति षष्ठीसमासो भाष्यादिसम्मतः तेन गुणानारम्भ इति नेति सूचितम् ॥ १४ ॥

बुद्धिं लक्षयितुमाह ।—अनर्थान्तरं समानार्थकं न तु साङ्ख्यानामिव बुद्धितत्त्वम्

स्यात्। एकश्चाय चेतनो देहेन्द्रियसङ्घातव्यतिरिक्त इति। प्रमेयलक्षणार्थस्यापि वाक्यस्यान्यार्थप्रकाशनमुपपत्तिसामर्थ्यादिति ॥१५॥

स्मृत्यनुमानाऽऽगमसंशयप्रतिभास्वप्नज्ञानोहा सुखाऽऽदिप्रत्यक्षमिच्छादयश्च मनसो लिङ्गानि तेषु सत्सु इदमपि—

**युगपज्ज्ञानानुत्पत्तिर्मनसो लिङ्गम् ॥ १६ ॥**

अनिन्द्रियनिमित्ता स्मृत्यादय करणान्तरनिमित्ता भवितुमर्हन्तीति। युगपच्च खलु घ्राणादीना गन्धादीनाञ्च सन्निकर्षेषु सत्सु, युगपज्ज्ञानानि नोत्पद्यन्ते। तेनानुमीयते अस्ति तत्तदिन्द्रियसंयोगिसहकारिनिमित्तान्तरमव्यापि। यस्यासन्निधेर्नोत्पद्यते ज्ञानं सन्निधेश्चोत्पद्यत इति। मन संयोगानपेक्षस्य हीन्द्रियार्थसन्निकर्षस्य ज्ञानहेतुत्वे युगपदुत्पद्येरन् ज्ञानानीति ॥ १६ ॥

क्रमप्राप्ता तु—

**प्रवृत्तिवाग्बुद्धिशरीराऽऽरम्भ ॥ १७ ॥**

मनोऽत्र बुद्धिरित्यभिप्रेत, बुध्यतेऽनेनेति बुद्धि।

---

महत्तत्त्वापरपर्यायस्य परिणामविशेषो ज्ञानम् यथा चेतस्तथा वक्ष्यते तथा च बुद्ध्यादिपदवाच्यत्वमनुभवसिद्धज्ञानत्वजातिरेव वा लक्षणमिति भाव ॥ १५ ॥

मनो लक्षयति।—युगपत् एककाले एक आत्मनीति पूरणीयम् ज्ञानानामनुत्पत्तिर्यत स एव धर्म्मो ज्ञानकरणगुणत्व मनसो लिङ्ग लक्षणमित्यर्थ। तथा हि चक्षुरादिषु विषयसम्बन्धेष्वपि यस्याऽऽसत्त्यभावादेक न ज्ञान जनयति यत्सम्बन्धादपरञ्च ज्ञान जनयति। तदेव चाणु निखिलज्ञानजनक सुखादिसाक्षात्कारासाधारणकारण तदेकमेव प्रतिशरीरमिह मन इत्यर्थ। एवमव्याख्याने च लक्षणप्रकरणे प्रमाणोपन्यासोऽसङ्गत स्यादिति। अन्ये तु सति धर्मिणि लक्षणचिन्ता इत्यतो मन साधनाय युगपदिति सूत्रम् इत्यथ च मन सिद्धौ ऽपि स्पर्शशून्यत्वादिकं लक्षण सुकरमित्याशय इति वदन्ति ॥ १६ ॥

प्रवृत्ति लक्षयति विभजते च।—अत्र च प्रवृत्तित्व रागजन्यताऽवच्छेदको जाति

सोऽयमारम्भ शरीरेण वाचा मनसा च, पुण्य पापश्च दशविधम्, तदेतत् कृतभाष्य द्वितीयसूत्र इति ॥ १७ ॥

## प्रवर्त्तनालक्षणा दोषा ॥ १८ ॥

प्रवर्त्तना प्रवृत्तिहेतुत्वम्। ज्ञातार हि रागादय प्रवर्त्तयन्ति पुण्ये पापे वा। यत्र मिथ्याज्ञान, तत्र रागद्वेषाविति। प्रत्यात्मवेदनीया ह्येमे दोषा। कस्मात लक्षणतो निर्दिश्यन्त इति? कर्म्मलक्षणा खलु रक्तद्विष्टमूढा। रक्तो हि तत्कर्म्म कुरुते, येन कर्म्मणा सुख दु ख वा भजते। तथा द्विष्टस्तथा मूढ इति। दोषा रागद्वेषमोहा इत्युच्यमाने बहुनोक्त भवतीति ॥ १८ ॥

## पुनरुत्पत्ति प्रेत्यभाव ॥ १९ ॥

उत्पन्नस्य क्वचित सत्त्वनिकाये मृत्वा या पुनरुत्पत्ति स प्रेत्यभाव। उत्पन्नस्य सम्बद्धस्य। सम्बन्धस्तु देहेन्द्रियमनो

विशेष स एव लक्षणम् ईश्वरकृतेरपि लक्ष्यत्वे यत्नत्वमेव तथा। जीवनयोनियत्ने निवृत्तौ च मानाभावात् तत्सद्भावेऽपि प्रवृत्तित्व नित्ययत्नसाधारण तद्व्यावृत्त वा तथा द्वन्द्वानन्तरश्रुताऽऽरम्भपदस्य प्रत्येकमन्वयाच्छरीरारम्भादिभेदेन त्रिविधा प्रवृत्ति। बुद्धि शब्देनात्र मनोऽभिप्रेतमिति भाष्यम्। शरीरशब्दश्च चेष्टावत्त्वेन हस्तादिसाधारण तथा च वचनानुकूलो यत्नो वागारम्भ शरीरगोचरो यत्नश्चेष्टाऽनुकूलयत्नो वा शरीराऽऽरम्भ एतद्द्वयभिन्नो यत्नो बुद्ध्यारम्भ स च ध्यानादयादेव आत्मदर्शनाद्यनुकूल पर्य्यवस्यति। प्राचस्तु सामान्यविशेषलक्षणे चादृष्टजनकत्व निवेशयन्ति। इयञ्च कारणरूपा प्रवृत्ति कार्य्यरूपा तु धर्म्माधर्म्माऽऽत्मिकेति ॥ ७ ॥

दोष लक्षयति।—दोषा इति बहुवचन रागद्वेषमोहाऽऽत्मकलक्ष्यत्रयज्ञापनार्थ प्रवर्त्तना प्रवृत्तिजनकत्व तदेव लक्षण येषाम् यद्यपीद शरीरादृष्टेश्वरेच्छादावतिव्याप्त तथाऽपि लौकिकमानसप्रत्यक्षविषयत्वे सतीति विशेषणीय यागादिगोचरप्रमावारणाय प्रमाऽन्यत्वे सतीति विशेषयन्ति ॥ १८ ॥

प्रेत्यभाव लक्षयति।—प्रेत्य मृत्वा भावी जनन प्रेत्यभाव। अत्र पुनरित्यनेनाभ्यासकथनात्, प्रागुत्पत्ति ततो मरण तत उत्पत्तिरिति प्रेत्यभावोऽयमनादिरप

बुद्धिवेदनाभि। पुनरुत्पत्ति पुनर्देहादिभि सम्बन्ध। पुन रित्यभ्यासाभिधानम्। यत्र क्वचित् प्राणभृन्निकाये वर्त्तमान पूर्वोपात्तान देहादीन जहाति, तत् प्रैति। यत् तत्रान्यत्र वा देहादीनन्यानुपादत्ते, तद्भवति प्रेत्यभावो मृत्वा पुनर्जन्म। सोऽय जन्ममरणप्रबन्धाभ्यासोऽनादिरपवर्गान्त प्रेत्यभावो वेदितव्य इति॥ १८॥

## प्रवृत्तिदोषजनितोऽर्थं फलम्॥ २०॥

सुखदुःखसंवेदन फलम्। सुखविपाक कर्म दुःखविपाकञ्च। तत्पुनर्देहेन्द्रियविषयबुद्धिषु सतीषु भवतीति सह देहादिभि फलमभिप्रेतम। तथा हि प्रवृत्तिदोषजनितोऽथ फलमेतत सर्वम्भवति। तदेतत फलमुपात्तमुपात्त हेय, त्यक्त त्यक्तमुपा देयमिति नास्य हानोपादानयोर्निष्ठा पर्य्यवसान वाऽस्ति। स खल्वय फलस्य हानोपादानस्रोतसोह्यते लोक इति॥ २०॥

अथैतदेव—

## बाधनालक्षण दुःखमिति॥ २१॥

बाधना पोड़ा ताप इति। तयाऽनुविद्धमनुषक्तमवि

नयान्त। एतज्ज्ञानञ्च वैराग्य उपयुज्यत इति प्रेत्यति न व्यःम्। तदीयमरणञ्च तन्नीयजीवनाद्दृष्टनाश त थिचरमप्राणसयोगध्वस तदीयप्राणध्वसो वा तदीयो त्पत्तिस्तु तन्नीयावज्जातीयशरीराद्यप्राणसयोग इति॥ १९॥

फल लक्षयति।—अत्र च मुख्य फल सुखदुःखोपभाग तथा च भाष्यम् — सुखदुःखसंवेदन फलम्। तत्र च धर्माधर्म्माऽऽत्मकप्रवृत्ति प्रयोजकत्वात तत्र च दोषस्य हेतुत्वात् प्रवृत्तिदोषजनित इत्युक्तम् लक्षणन्तु सुखदुःखान्यतरसाक्षात्कार इति। गौण फलन्तु शरीरादिक सर्वमेव। तथा च भाष्यम् — तत्पुनर्देहेन्द्रिय बुद्धिषु सतीषु भवति इति सह देहेन्द्रियादिभि फलमभिप्रेतम् तथ हि प्रवृत्ति दोषजनितोऽथ फलमेतत्सर्व भवति इति। इत्थञ्च जन्यत्वमेव फलत्वम् प्रवृत्ति दोषजनित इति तु निर्वेदोपयोगायोक्तम॥ २०॥

दुःख लक्षयति।—बाधना पीड़ा तदेव लक्षण स्वरूप यस्य तत्। तथा चाह

निर्भागेण वर्त्तमानं दुःखयोगाद्दुःखमिति। सोऽयं सर्वं दुःखेनानुविद्धमिहन्त्तमिति पश्यन् दुःखं जिहासुर्जन्मनि दुःखदर्शी निर्विद्यते। निर्विण्णो विरज्यते। विरक्तो विमुच्यते॥ २१॥

यत्र तु निष्ठा सोऽयं, यत्र तु पर्य्यवसानम्।—

## तदत्यन्तविमोक्षोऽपवर्गः॥ २२॥

तेन दुःखेन जन्मनाऽत्यन्तं विमुक्तिरपवर्गः। अन्यथा कथमुपात्तस्य जन्मनो हानमन्यस्य चानुपादानम्। एतामवस्थामपर्य्यन्तामपवर्गं वेदयन्तेऽपवर्गविदः। अभयमजरममृत्युपदं ब्रह्म क्षेमप्राप्तिरिति नित्यं सुखमात्मनो महत्त्ववन्मोक्षे व्यज्यते तेनाभिव्यक्तेनात्यन्तं विमुक्तः सुखी भवतीति केचित् मन्यन्ते। तेषां प्रमाणाभावादनुपपत्तिः। न प्रत्यक्षं नानुमानं नागमो वा विद्यते, नित्यं सुखमात्मनो महत्त्ववन्मोक्षेऽभिव्यज्यत इति। नित्यस्याभिव्यक्तिः संवेदनं ज्ञानमिति। तस्य हेतुर्वाच्यः, यतस्तदुपपद्यत इति। * सुखवन्नित्यमिति चेत् संसारस्थस्य मुक्तेनाऽविशेषः। * यथा मुक्तः सुखेन तत्संवेदनेन च सन्नित्येनोपपन्नः तथा संसारस्थोऽपि प्रसज्यत इति। उभयस्य नित्यत्वात्। * अभ्यनुज्ञाने च धर्माधर्मफलेन साहचर्य्यं यौगपद्यं गृह्येत। * यदिदमुत्पत्तिस्थानेषु धर्माधर्मफलं सुखं दुःखं वा संवेद्यते पर्य्यायेण, तस्य च नित्यसुखसंवेदनस्य च सहभावो यौगपद्यं गृह्येत। न सुखाभावो नानभिव्यक्तिरस्ति। उभयस्य नित्यत्वात्। * अनित्यत्वे हेतुवचनम्। अथ मोक्षे नित्यस्य सुखस्य संवेदनमनित्यम्, यत उत्पद्यते

---

भवासङ्गदुःखत्वज्ञानरूपं लक्षणम्। शरीरेन्द्रियार्थेषु दुःखसाधनत्वात् सुखं च दुःखानुषङ्गात् दुःखव्यवहारो गौण इति अत एवास्मिन्सूत्रे तत्पदेन मुख्यदुःखपरामर्शः॥ २१॥

अपवर्गं लक्षयति।—तस्य दुःखस्य, अत्यन्तविमोक्षः स्वसमानाधिकरणदुःखा

स हेतुर्वाच्य। *आत्ममनःसंयोगस्य निमित्तान्तरसहितस्य हेतुत्वम्।* आत्ममनःसंयोगो हेतुरिति चेत्, एवमपि तस्य सहकारिनिमित्तान्तरं वचनीयमिति। *धर्मस्य कारणवचनम्।* यदि धर्मो निमित्तान्तरं, तस्य हेतुर्वाच्य, यत उत्पद्यत इति। *योगसमाधिजस्य कार्य्यावसायनिरोधात् प्रचये संवेदननिवृत्तिः। यदि योगसमाधिजो धर्मो हेतुः, तस्य कार्य्यावसायनिरोधात् प्रचये संवेदनमत्यन्तं निवर्त्तेत। *असंवेदने चाविद्यमानाविशेषः।* यदि धर्मक्षयात् संवेदनोपरमः, नित्यं सुखं न संवेद्यत इति। किं विद्यमानं न संवेद्यते, अथाविद्यमानम्? इति। नानुमानं विशिष्टेऽस्तीति। *अप्रचयश्च धर्मस्य निरनुमानमुत्पत्तिधर्मकत्वात्।* योगसमाधिजो धर्मो न क्षीयते इति नास्त्यनुमानम्। उत्पत्तिधर्मकमनित्यमिति विपर्य्ययस्य तु अनुमानम्। यस्य तु संवेदनोपरमो नास्ति तेन संवेदनेन हेतुर्नित्य इत्यनुमेयम्। नित्ये च मुक्तसंसारस्थयोरविशेष इत्युक्तम्। यथा मुक्तस्य नित्यं सुखं तत्संवेदनहेतुश्च। संवेदनस्य तूपरमो नास्ति कारणस्य नित्यत्वात्, तथा संसारस्थस्यापीति। एवञ्च सति धर्माधर्मफलेन सुखदुःखसंवेदनेन साहचर्य्यं गृह्येतेति। *शरीरादिसम्बन्धः प्रतिबन्धहेतुरिति चेत् न शरीरादीनामुपभोगार्थत्वात् विपर्य्ययस्य चाननुमानात्।* स्यान्मतं संसारावस्थशरीरादिसम्बन्धो नित्यसुखसंवेदनहेतोः प्रतिबन्धकस्तेनाविशेषो नास्तीति। एतच्चायुक्तम्। शरीरादय उपभोगार्थास्ते भोगप्रतिबन्धं करिष्यन्तीत्यनुपपन्नम्। न चास्त्यनुमानमशरीरस्याऽऽत्मनो भोगः कश्चिदस्तीति। *इष्टाधिगमार्था प्रवृत्तिरिति चेत् न अनिष्टोपरमार्थत्वात्।* इष्टाधिगमार्थो मोक्षोपदेशः प्रवृत्तिश्च मुमुक्षूणां, नोभयमनर्थकमिति। एतच्चायुक्तम्।

अनिष्टोपरमार्थो मोक्षोपदेश प्रवृत्तिश्च मुमुक्षूणामिति। नेष्टमनिष्टेनाननुविद्ध सम्भवतीति इष्टमप्यनिष्ट सम्पद्यते। अनिष्टहानाय घटमान इष्टमपि जहाति। विवेकहानस्याशक्यत्वादिति। * दृष्टातिक्रमश्च देहादिषु तुल्य ।* यथा दृष्टमनित्य सुख परित्यज्य नित्य सुख कामयते, एव देहेन्द्रियबुद्धीरनित्या दृष्टा अतिक्रम्य मुक्तस्य नित्या देहेन्द्रियबुद्धय कल्पयितव्या। साधीयश्चैव मुक्तस्य चैकात्म्य कल्पित भवतीति। * उपपत्तिविरुद्धमिति चेत समानम्। * देहादीना नित्यत्व प्रमाणविरुद्ध कल्पयितुमशक्यमिति, समानम्। सुखस्यापि नित्यत्व प्रमाणविरुद्ध कल्पयितुमशक्यमिति। *आत्यन्तिके च ससारदु खाभावे सुखवचनादागमेऽपि सत्य विरोध। यद्यपि कश्चिद ागम स्यान्मुक्तस्याऽऽत्यन्तिक सुख मिति। सुखशब्द आत्यन्तिके दु खाभावे प्रयुक्त इत्येवमुपपद्यते। दृष्टो हि दु खाभावे सुखशब्दप्रयोगो बहुल लोक इति। * ।नत्य सुखरागस्याप्रहाणे मोक्षाधिगमाभावो रागस्य बन्धनसमाख्यानात्।* यद्यय मोक्षे नित्य सुखमभिव्यज्यत इति नित्यसुख ।गेण मोक्षाय घटमानो न मोक्षमधिगच्छेन्नाधिगन्तुमर्हतीति। बन्धनसमाख्यातो हि राग। न च बन्धन सत्यपि कश्चिन्मुक्त इत्युपपद्यत इति। * प्रहीणनित्यसुखरागस्याप्रतिकूलत्वम्। * अथास्य नित्यसुखराग प्रहीयते, तस्मिन प्रहीणे नास्य नित्यसुखराग प्रतिकूलो भवति। यद्येव मुक्तस्य नित्य सुख भवति, अथापि न भवति, नास्योभयो पक्षयो र्मोक्षाधिगमो विकल्पत इति ॥ २२ ॥

समानकालीनत्वध्वस तस्य च जन्मापायादव सम्भव इत्याशयेन "दु खेन जन्मनाऽत्यन्त विमुक्ति अपवर्ग इति भाष्यम्। दु खेन दु खानुषक्तिषत्यथ ॥ २२ ॥

समाप्त प्रमयलक्षणप्रकरणम्।

स्थानवत एव तर्हि संशयस्य लक्षणं वाच्यमिति तदुच्यते—

**समानानेकधर्मोपपत्तेर्विप्रतिपत्तेरुपलब्ध्यनुपलब्ध्यव्यवस्थातश्च विशेषापेक्षो विमर्शः संशयः ॥२३॥**

समानधर्मोपपत्तेर्विशेषापेक्षो विमर्शः संशय इति। स्थाणुपुरुषयोः समानं धर्ममारोहपरिणाहौ पश्यन् पूर्वदृष्टञ्च तयोर्विशेषं बुभुत्समानः किंस्विदित्यन्यतरन्नावधारयति। तदनवधारणं ज्ञानं संशयः। समानमनयोर्धर्ममुपलभे विशेषमन्यतरस्य नोपलभ इत्येषा बुद्धिरपेक्षा संशयस्य प्रवर्त्तिका वर्त्तते। तेन विशेषापेक्षो विमर्शः संशयः। अनेकधर्मोपपत्तेरिति। समानजातीयमसमानजातीयञ्चानेकम्। तस्यानेकस्य धर्मोपपत्तेः। विशेषस्योभयथा दृष्टत्वात्। समानजातीयेभ्योऽसमानजातीयेभ्यश्चार्था विशिष्यन्ते। गन्धवत्त्वात् पृथिवी अबादिभ्यो विशिष्यते गुणकर्मभ्यश्च। अस्ति च शब्दे विभागजत्वं विशेषः। तस्मिन् द्रव्यं गुणः कर्म वेति सन्देहः। विशेषस्योभयथा दृष्टत्वात्। किं द्रव्यस्य सतो गुणकर्मभ्यो विशेष आहोस्विद्गुणस्य सत ? इति, अथ कर्मणः सत ? इति, विशेषा-

---

क्रमप्राप्तं संशयं लक्षयति।—संशय इति लक्ष्यनिर्देशः विमर्श इत्यत्र विशब्दो विरोधार्थः मृशिर्ज्ञानार्थः एकस्मिन् धर्मिणीति पूरणीयम् तत्र एकधर्मिणि विरोधेन भावाभावप्रकारकं ज्ञानं संशयः। तत्र कारणमुखेन विशेषलक्षणान्याह —समानेत्यादि। उपपत्तिर्ज्ञानं तथा च समानस्य विरुद्धकोटिद्वयसाधारणधर्मस्य ज्ञानादित्यर्थः अनेकधर्मः असाधारणधर्मः तज्ज्ञानादित्यर्थः तथा च साधारणधर्मवद्धर्मिज्ञानजन्यः असाधारणधर्मवद्धर्मिज्ञानजन्यश्चेत्यर्थः विप्रतिपत्तिर्विरुद्धकोटिद्वयोपस्थापकः शब्दः तस्मादित्यर्थः। यद्यपि शब्दस्य न संशायकत्वं तथाऽपि शब्दात्कोटिद्वयोपस्थितौ मानसः संशय इति वदन्ति। उपलब्धेर्ज्ञानस्य अनुपलब्धेर्व्यतिरेकज्ञानस्य याऽव्यवस्था सद्विषयकत्वानिर्द्धारणं प्रामाण्यसंशय इति फलितोऽर्थः। अन्ये तु, उपलब्ध्यव्यवस्था प्रामाण्यसंशयः, अनुपलब्धिरुपलब्धिविरोधिधर्मत्वं तद्-

पेक्षा अन्यतमस्य व्यवस्थापकं धर्ममनुपलभे इति बुद्धिरिति। विप्रतिपत्तेरिति। व्याहतमेकार्थदर्शनं विप्रतिपत्तिः। व्याघातो विरोधोऽसहभाव इति। अस्त्यात्मेत्येकं दर्शनमाह। नास्त्यात्मेत्यपरम। न च सद्भावासद्भावौ सहैकत्र सम्भवतः। न चान्यतरसाधको हेतुरुपलभ्यते। तत्र तत्त्वानवधारणं संशय इति। उपलब्ध्यव्यवस्थातः। खल्वपि सच्चोदकमुपलभ्यते तडागादिषु। मरीचिषु वाऽविद्यमानमुदकमिति। ततः क्वचिदुपलभ्यमाने तत्त्वव्यवस्थापकस्य प्रमाणस्यानुपलब्धेः किं सदुपलभ्यते, अथासत? इति संशयो भवति। अनुपलब्ध्यव्यवस्थातः। सच्च नोपलभ्यते मूलकीलकोदकादि। असच्चानुत्पन्नं विरुद्धं वा। ततः क्वचिदनुपलभ्यमाने संशयः। किं सन्नोपलभ्यते उतासत? इति संशयो भवति। विशेषापेक्षा पूर्ववत्। पूर्वं समानोऽनेकश्च धर्मो ज्ञेयस्थः। उपलब्ध्यनुपलब्धी पुनर्ज्ञातृस्थे। एतावता विशेषेण पुनर्वचनम्। समानधर्माधिगमात समानधर्मोपपत्तावित्येवमाद्युत्तरत्र विशेषस्मृत्यपेक्षो विमर्श इति॥ २३॥

स्थानवता लक्षणवचनमिति समानम्—

## यमर्थमधिकृत्य प्रवर्त्तते, तत् प्रयोजनम् ॥२४॥

यमर्थमाप्तव्यं हातव्यं वाऽध्यवसाय तदाप्तिहानोपायमनुतिष्ठति प्रयोजनं तद्वेदितव्यं प्रवृत्तिहेतुत्वात्। इममर्थ

व्यवस्था तत्संशय इत्याह। वस्तुतस्तु प्रामाण्यसंशयस्य न संशयहेतुत्वं किन्त्वगृहीताप्रामाण्यकज्ञानस्य विरोधितया सोऽपि प्रामाण्यसंशयजज्ञानस्याविरोधितया साधारणधर्मदर्शनादित एव संशयोत्पत्तिरिति उपलब्ध्यादिकं तादृशस्थले संशयो भवतीत्येतावन्मात्रपरं चकारो व्याप्यसंशयस्य व्यापकसंशयहेतुत्वं समुच्चिनोतीति वदन्ति। विशेषापेक्ष इति। धारणसापेक्ष। वस्तुतस्तु संशयधारावाहिकत्वं स्यादत आह—विशेषेति। विशेषः विशेषदर्शनम् अपेक्षते निवर्त्तकत्वेन" तथा च विशेषदर्शननिवर्त्यत्वकथनमुखेन विशेषादर्शनजन्यसंशय इत्युक्तम॥२३॥

क्रमप्राप्तं प्रयोजनं लक्षयति।—अधिकृत्य उद्दिश्य तथा च प्रवृत्तिहेतुरिच्छा।

माप्स्यामि हास्यामि वेति व्यवसायोऽर्थस्याधिकार। एव व्यवसीयमानोऽर्थोऽधिक्रियत इति ॥ २४ ॥

**लौकिकपरीक्षकाणा यस्मिन्नर्थे बुद्धिसाम्य, स दृष्टान्त ॥ २५ ॥**

लोकसाम्यमनतीता लौकिका नैसर्गिक वैनयिक बुद्ध्यतिशयमप्राप्ता तद्विपरीता परीक्षका, तर्केण प्रमाणैरर्थ परीक्षितुमर्हन्तीति। यथा यमर्थं लौकिका बुध्यन्ते तथा परीक्षका अपि, सोऽर्थो दृष्टान्त। दृष्टान्तविरोधेन हि प्रतिपक्षा प्रतिषेद्धव्या भवन्तीति। दृष्टान्तसमाधिना च स्वपक्षा स्थापनीया भवन्तीति। अवयवेषु चोदाहरणाय कल्पत इति ॥ २५ ॥

अथ सिद्धान्त –

**तन्त्राधिकरणाभ्युपगमसंस्थिति सिद्धान्त ॥२६॥**

इदमित्यम्भूतञ्चेत्यभ्यनुज्ञायमानमर्थजात सिद्ध सिद्धस्य संस्थिति सिद्धान्त। संस्थितिरित्थम्भावव्यवस्था। धर्मनियम।

---

विषयत्व प्रयोजनत्वम् विषयत्व साध्यताऽऽख्यविषयताविशेष न तेन सुखाऽऽनिवारणम् प्रवृत्तिहेतुत्वमिति स्वरूपकथनम् तच्चकच्चडामणिसुमेवादिप्राप्तिवारक मादति केचित। अत्र च निरुपधीच्छाविषयत्वात् सुखदु खाभावयोर्मुख्यप्रयोजनत्वम् तदुपायस्य तु तदिच्छाऽधीनेच्छाविषयत्वाद्गौणप्रयोजनत्वमिति ॥ २४ ॥

क्रमप्राप्त दृष्टान्त लक्षयति।—लौकिकोऽप्राप्तशास्त्रपरिशीलनजन्यबुद्धिप्रकर्ष प्रतिपाद्य इति फलितोऽर्थ परीक्षक शास्त्रपरिशीलनप्राप्तबुद्धिप्रकर्ष प्रतिपादक इति फलितार्थ तथा च प्रतिपाद्यप्रतिपादकयोरिति पर्य्यवसन्नम् बहुवचन कथा बहुत्वमभिप्रेत्य बुद्धे साध्यसाधनोभयविषयिण्या तदभावविषयिण्या वा साम्यम् ऐकरूप्य यस्मिन्नर्थे सोऽर्थ दृष्टान्त वादिप्रतिवादिनो साध्यसाधनोभयप्रकारक तदभावद्वयप्रकारकान्यतरनिश्चयविषयो दृष्टान्त इति पर्य्यवसितोऽर्थ ॥ २५ ॥

समाप्त न्यायपूर्वाङ्गप्रकरणम्।

क्रमप्राप्त सिद्धान्त लक्षयति।—तन्त्र शास्त्र तदेवाधिकरण आश्रयतया यस्य,

● स खल्वयम्,—तन्त्रार्थसंस्थितिस्तन्त्रसंस्थिति । तन्त्रमितरेतराभिसम्बद्धस्यार्थसमूहस्योपदेश शास्त्रम् । अधिकरणानुषक्तार्था संस्थितिरधिकरणसंस्थिति । अभ्युपगमसंस्थितिरनवधारितार्थपरिग्रह तद्विशेषपरीक्षणायाभ्युपगमसिद्धान्त ॥२६॥

तन्त्रभेदात्तु खलु स चतुर्विध —

**सर्वतन्त्रप्रतितन्त्राधिकरणाभ्युपगमसंस्थित्यर्थान्तरभावात ॥ २७ ॥**

तत्रैताश्चतस्र संस्थितयोऽर्थान्तरभूता ॥ २७ ॥

तासाम—

**सर्वतन्त्राविरुद्धस्तन्त्रेऽधिकृतोऽर्थ सर्वतन्त्र-सिद्धान्त ॥ २८ ॥**

यथा घ्राणादीनीन्द्रियाणि, गन्धादय इन्द्रियार्था पृथिव्यादीनि भूतानि, प्रमाणैरर्थस्य ग्रहणमिति ॥ २८ ॥

तादृशोऽस्य योऽभ्युपगम तस्य समीचीनतयाऽसंशयरूपतया स्थिति तथा च शास्त्रतात्पर्यविषय सिद्धान्त । अत्र च अभ्युपगम्यमानोऽर्थ सिद्धान्त इति भाष्यम अभ्युपगम सिद्धान्त इति वार्त्तिकटीके न चात्र विरोध शङ्कनीय आचार्य्य पारिहृतत्वात । तथा च विमूर्त्तीनिबन्ध — अर्थाभ्युपगमयो प्राधान्यप्रधानभावस्य विवक्षा तन्त्रतन्त्रथाभ्युपगमोऽभ्युपगम्यमानो वाऽर्थ सिद्धान्त तत्र सूत्रभाष्यवार्त्तिकटीकासु न विरोध । अत्र च भाष्यानुसारात्सर्वतन्त्रप्रतितन्त्राधिकरणाभ्युपगमसिद्धान्तान्यतम सिद्धान्त इति सूत्रार्थ इति तु न युक्तम् अग्रिमसूत्रानुत्थानाऽऽपत्ते तन्त्रसिद्धान्तत्वेन रूपमनुगमय्य तन्त्राधिकरणाभ्युपगमान्यतम सिद्धान्त इति कश्चित् ॥ २६ ॥

विभजते —स चतुर्विध इति शेष सर्वतन्त्राऽऽदिसंस्थितीनामर्थान्तरभावात् भेदादित्यर्थ ॥ २७ ॥

सर्वतन्त्रसिद्धान्तं लक्षयति ।—सर्वतन्त्राविरुद्ध सर्वशास्त्राभ्युपगत इति यावत । वस्तुतो यथाश्रुत एवार्थ अन्यथा तन्त्रेऽधिकृत इत्यस्य वैयर्थ्याऽऽपत्ते अत एव जात्यादेरसदुत्तरत्वमपि सर्वतन्त्रसिद्धान्त । न च "तन्त्रेऽधिकृत इति स्पष्टार्थ लक्षणे तु न

**समानतन्त्रसिद्धः परतन्त्रासिद्धः प्रतितन्त्र-सिद्धान्तः ॥ २९ ॥**

यथा नासत आत्मलाभः न सत आत्महानं निरतिशयाश्चेतनाः, देहेन्द्रियमनःसु विषयेषु तत्तत्कारणेषु च विशेषः, इति साङ्ख्यानाम्। पुरुषकर्मनिमित्तो भूतसर्गः, कर्महेतवो दोषाः प्रवृत्तिश्च, स्वगुणविशिष्टाश्चेतनाः, असदुत्पद्यते, उत्पन्नं निरुध्यते, इति योगानाम ॥ २९ ॥

**यत्सिद्धावन्यप्रकरणसिद्धिः सोऽधिकरण-सिद्धान्तः ॥ ३० ॥**

यस्यार्थस्य सिद्धावन्येऽर्था अनुषज्यन्ते, न तैर्विना सोऽर्थः सिध्यति तेऽर्था यदधिष्ठानाः, सोऽधिकरणसिद्धान्तः । यथा देहेन्द्रियव्यतिरिक्तो ज्ञाता दर्शनस्पर्शनाभ्यामेकार्थग्रहणादिति।

---

इत्येव इति वाच्यं मनस इन्द्रियत्वस्यापि सर्वतन्त्रसिद्धान्ततापत्तेः । अन्यास्तु सर्वस्यापि लक्षणमाविलावादिप्रतिवाद्युभयाभ्युपगतः कथाऽनुकूलोऽर्थः स इति वदन्ति ॥ २८ ॥

प्रतितन्त्रसिद्धान्तं लक्षयति ।—समानशब्द एकार्थे तन्त्रैकतन्त्रसिद्ध इत्यर्थः स्वतन्त्रसिद्ध इति पर्य्यवसितोऽर्थः तथा च वादिप्रतिवाद्येकतरमात्राभ्युपगतः अन्यतरस्य प्रतितन्त्रसिद्धान्त इति फलितार्थः यथा मीमांसकानां शब्दनित्यत्वम् ॥ २९ ॥

अधिकरणसिद्धान्तं लक्षयति ।—यस्यार्थस्य सिद्धौ क्रियमाणायामेव अन्यस्य प्रकरणस्य प्रस्तुतस्य सिद्धिर्भवति सोऽधिकरणसिद्धान्त इत्यर्थः । यथा क्षित्यङ्कुरादिकं पक्षीकृत्योपादानगोचरापरोक्षज्ञानचिकीर्षाकृतिमज्जन्यत्वे साध्यमाने सर्वज्ञत्वमीशस्य। एवं हेतुबलादपि यथा दर्शनस्पर्शनाभ्यामेकार्थग्रहणादिन्द्रियादि व्यतिरिक्ते च आत्मनि साधिते इन्द्रियनानात्वम् तथा च यदर्थसिद्धिं विना योऽर्थः शब्दादनुमानाद्वा न सिध्यति सोऽधिकरणसिद्धान्त इति। वस्तुतस्तु शब्दत्वमन मानत्वव्याविवाचन प्रमाणमात्रमपाचितम् अत एव प्रत्यक्षस्य स्थूलत्वसाधनानन्तर

• अत्रानुषङ्गिणोऽर्थाः, इन्द्रियनानात्वम । नियतविषयाणीन्द्रियाणि स्वविषयग्रहणलिङ्गानि ज्ञातुर्ज्ञानसाधनानि, गन्धादिगुण व्यतिरिक्त द्रव्य गुणाधिकरणम, नियतविषयाश्चेतना इति । पूर्वार्थसिद्धावेतेऽर्थाः सिध्यन्ति, न तैर्विना सोऽर्थः सम्भव तीति ॥ ३० ॥

**अपरीक्षिताभ्युपगमात् तद्विशेषपरीक्षणमभ्युपगमसिद्धान्तः ॥ ३१ ॥**

यत्र किञ्चिदर्थजातमभ्युपगम्यते, अस्तु द्रव्य शब्द, स तु नित्योऽथानित्य इति । द्रव्यस्य सतो नित्यताऽनित्यता वा तद्विशेष परीक्ष्यते । सोऽभ्युपगमसिद्धान्तः । स्वबुद्ध्यतिशय चिख्यापयिषया परबुद्ध्यवज्ञानाञ्च प्रवर्त्तत इति ॥ ३१ ॥

— — — —

मुक्तमात्मतत्त्वविवेके — सोऽयमधिकरणसिद्धान्तन्यायेन स्थलत्वसिद्धौ क्षणभङ्गभङ्ग इति तत्र च वाक्यार्थसिद्धौ तदनुषङ्गो योऽर्थ सोऽधिकरणसिद्धान्त" इति वार्त्तिक फक्किका लिखित्वा येन केनापि प्रमाणेन वाक्यार्थस्य जन्यमानार्थो योऽन्योऽर्थ सिध्यति स तथेत्यर्थ " इति व्याख्यात दीधितिकृता । एव हेत्वादेश्च पक्षश्च वाक्यार्थ इति टीकावचने च उपलक्षणमेतदित्युक्त तत्र तत्र विशिष्टव लक्षण काय्यम् । यत्र जनकीभूतव्यापकतास्थाने व्यापककोटाविविषय प्रकृतानुमित्या व्यापककोटौ विषयीकृत शाब्दजनकपदार्थज्ञानाविषयत्वे सति शाब्दविषयश्चेति द्वयमधिकरणसिद्धान्त इति तत्र इन्द्रियनानात्वाऽऽदौ भाष्योदा हृतेऽव्याप्तिरिति ॥ ३ ॥

अभ्युपगमसिद्धान्त लक्षयति ।—अपरीक्षितस्य साक्षादसूत्रितस्य विशेषपरीक्षण विशेषधर्मकथनम् अभ्युपगमादिति ज्ञापके पञ्चमी अभ्युपगमज्ञापकमित्यर्थ विशेषपरीक्षणाज्ज्ञायते सूत्रकृतोऽभ्युपगतमिदमिति तथा च साक्षादसूत्रिताभ्युपगमो ऽभ्युपगमसिद्धान्त यथा मनस इन्द्रियत्वमिति ॥ ३१ ॥

समाप्तं न्यायसिद्धान्तलक्षणप्रकरणम् ।

अथावयवाः ।—

**प्रतिज्ञाहेतूदाहरणोपनयनिगमनान्यवयवाः ॥३२॥**

दशावयवानेके नैयायिका वाक्ये सञ्चक्षते । जिज्ञासा, संशयः शक्यप्राप्तिः, प्रयोजनं संशयव्युदास इति । ते कस्मान्नोच्यन्त इति ? तत्राप्रतीयमानेऽर्थे प्रत्ययार्थस्य प्रवर्त्तिका जिज्ञासा अप्रतीयमानमर्थं कस्माज्जिज्ञासते ? तं तत्त्वतो ज्ञातं हास्यामि वोपादास्ये वा, उपेक्षिष्ये वेति । ता एता हानोपादानोपेक्षाबुद्धयस्तत्त्वज्ञानस्यार्थं तदर्थमयं जिज्ञासते सा खल्वियमसाधनमर्थस्येति । जिज्ञासाऽधिष्ठानं संशयश्च व्याहतधर्मोपसङ्घातात् तत्त्वज्ञाने प्रत्यासन्नः । व्याहतयोर्हि धर्मयोरन्यतरत्तत्त्वं भवितुमर्हतीति स पृथगुपदिष्टोऽप्यसाधनमर्थस्येति । प्रमातुः प्रमाणानि प्रमेयाधिगमार्थानि, सा शक्यप्राप्तिर्न साधकस्य वाक्यस्य भागेन युज्यते, प्रतिज्ञाऽऽदिवदिति । प्रयोजनं तत्त्वावधारणमर्थसाधकस्य वाक्यस्य फलं नैकदेश इति । संशयव्युदासः प्रतिपक्षोपवर्णनं तत्प्रतिषेधेन तत्त्वज्ञानाभ्यनुज्ञानार्थं न त्वयं साधकवाक्यैकदेश इति । प्रकरणे तु जिज्ञासाऽऽदयः समर्था अवधारणीयार्थोपकाराः । अर्थसाधकभावात्तु प्रतिज्ञाऽऽदयः साधकवाक्यस्य भागा एकदेशा अवयवा इति ॥ ३२ ॥

क्रमप्राप्तानवयवान् लक्षयितुं विभजते ।—अनेन विभागेन प्रतिज्ञाऽऽद्यन्यतमत्वमवयवत्वमिति लक्षणं सूचितम् । अत्र च प्रतिज्ञाऽऽदीनां पञ्चानामवयवत्वकथनाद्दशावयववादो व्युदस्त इति मन्तव्यम् । ते च यथा दर्शिता भाष्ये — जिज्ञासा संशयः शक्यप्राप्तिः प्रयोजनं संशयव्युदासश्च इति एते प्रतिज्ञाऽऽदिसहिता दश । व्याख्याताश्च तात्पर्यटीकायाम् —प्रयोजनं हानाऽऽदिबुद्धयः तत्प्रवर्त्तिका जिज्ञासा तज्जनकः संशयः शक्यप्राप्तिः प्रमाणानां ज्ञानजननसामर्थ्यं संशयव्युदासस्तर्कः । अयमेवार्थो निबन्धे निष्टङ्कितः । जिज्ञासा विप्रतिपत्तिरिति कश्चित् । एतेषां च न न्यायावयवत्वं न्यायाघटकत्वात् । न च न्यायजन्यबोधानुकूलत्वेनावयवत्वम्, तर्कस्यापि तत्त्वप्रसङ्गात् प्रयोजनेऽव्याप्तेश्च ॥ ३२ ॥

तेषान्तु यथाविभक्तानाम—

**साध्यनिर्देश प्रतिज्ञा ॥ ३३ ॥**

प्रज्ञापनीयेन धर्मेण धर्मिणा विशिष्टस्य परिग्रहवचन प्रतिज्ञा साध्यनिर्देश । अनित्य शब्द इति ॥ ३३ ॥

**उदाहरणसाधर्म्यात् साध्यसाधन हेतु ॥३४॥**

उदाहरणेन सामान्यात् साध्यस्य धर्मस्य साधन प्रज्ञापन हेतु । साध्ये प्रतिसन्धाय धर्ममुदाहरणे च प्रतिसन्धाय तस्य साधनतावचन हेतु । उत्पत्तिधर्मकत्वादिति । उत्पत्तिधर्म्म-कमनित्य दृष्टमिति ॥ ३४ ॥

किमेतावद्धेतुलक्षणमिति ? नेत्युच्यते किं तर्हि ?—

**तथा वैधर्म्यात् ॥ ३५ ॥**

उदाहरणवैधर्म्याच्च साध्यसाधन हेतु । कथम ? अनित्य शब्द उत्पत्तिधर्मकत्वात्। अनुत्पत्तिधर्म्मक नित्यम् । यथा ऽऽत्मादि द्रव्यमिति ॥ ३५ ॥

---

प्रतिज्ञां लक्षयति ।—साधनीयस्यार्थस्य यो निर्देश स प्रतिज्ञा साधनीयस्य वाङ्मत्वाऽऽदिना पक्षताऽऽदि तथा च पक्षताऽवच्छेदकविशिष्टपक्ष साध्यताऽवच्छेदकावच्छिन्नविधेयबोधकशब्द इत्यर्थ निगमनवारणाय च साध्याश साध्यताऽवच्छेदकातिरिक्ताप्रकारकत्व वाच्य तदर्थश्च साध्यताऽवच्छेदकप्रकारताविलक्षणप्रकारताशून्यत्वम् तेन प्रमेयवत साध्यत्वे नासिद्धि । उदासीनवाक्यवारणाय च न्यायान्तर्गतत्वे सतीति विशेषणीयम् न्यायान्तर्गतत्वे सति प्रकृतपक्षताऽवच्छेदकावच्छिन्नपक्षक प्रकृतसाध्यताऽवच्छेदकावच्छिन्नसाध्यविषयताविलक्षणविषयताकबोधाजनकत्वे सति प्रकृतपक्षे प्रकृतसाध्यबोधजनकत्वं वत् प्रतिज्ञाऽवयवत्वादिक परिभाषाविशेषविषयत्वरूप तद्दृष्टान्तत्वरूपश्चेत्यपि वदन्ति ॥ ३३ ॥

क्रमप्राप्त हेतु लक्षयति विभजते च सूत्राभ्याम् ।—अत्र साध्यसाधन हेतुरिति सामान्यलक्षणम् साध्यसाधन साध्यसिद्ध्यनुकूलज्ञापकत्वबोधक इत्यर्थ तथा च साध्यताऽवच्छेदकावच्छिन्नसाध्यान्वितज्ञापकत्वबोधक साध्यान्वितस्वार्थबोधको वा इति फलितार्थ । तस्य द्वैविध्यमाह,—उदाहरणसाधर्म्यात् तथा

**साध्यसाधर्म्यात् तद्धर्मभावी दृष्टान्त उदाहरणम् ॥ ३६ ॥**

साध्येन साधर्म्यं समानधर्मता। साध्यसाधर्म्यात् कारणात् तद्धर्मभावी दृष्टान्त इति। तस्य धर्मस्तद्धर्मः। तस्य साध्यस्य। साध्यञ्च द्विविधम्। धर्मिविशिष्टो वा धर्मः शब्दस्यानित्यत्वम्। धर्मविशिष्टो वा धर्मी अनित्यः शब्द इति। इहोत्तरं तद्ग्रहणेन गृह्यत इति। कस्मात्? पृथग्धर्मवचनात्। तस्य धर्मस्तद्धर्मः तस्य भावस्तद्धर्मभावः स यस्मिन् दृष्टान्ते वर्त्तते, स दृष्टान्तः साध्यसाधर्म्यात् तद्धर्मभावी भवति। स चोदाहरणमिष्यते। तत्र यदुत्पद्यते तदुत्पत्तिधर्मकं, तच्च भूत्वा न भवति आत्मानं जहाति निरुध्यत इत्यनित्यम्। एवमुत्पत्तिधर्मकत्वं साधनम् अनित्यत्वं साध्यम् सोऽयमेकस्मिन् द्वयो धर्मयोः साध्यसाधनभावः साधर्म्याद् व्यवस्थित उपलभ्यते। तं दृष्टान्ते उपलभमानः शब्देऽप्यनुमिनोति। शब्दोऽप्युत्पत्तिधर्मकत्वादनित्यः। स्थाल्यादिवदित्युदाह्रियते। तेन धर्मयोः साध्यसाधनभाव इत्युदाहरणम् ॥ ३६ ॥

---

साधर्म्यमन्वयः वैधर्म्यं व्यतिरेकः ताभ्यां व्याप्तिरिति फलितार्थः। उदाहरणसाधर्म्यम् उदाहरणवृत्त्यन्वयव्याप्तिः ततोऽन्वयी हेतुर्ज्ञातव्यः उदाहरणेति स्पष्टार्थम् तथा च ज्ञातान्वयव्याप्तिकहेतुबोधको हेत्ववयवः अज्ञातव्यतिरेकव्याप्तिकहेतुबोधको हेत्ववयव इति फलितार्थः। एवमप्रतीतान्वयव्याप्तिकहेतुबोधको हेत्ववयवो व्यतिरेकी हेतुः इत्यमेव प्रतीतान्वयव्यतिरेकव्याप्तिकहेतुबोधको हेत्ववयवोऽन्वयव्यतिरेकोऽपि ज्ञातव्यमिति वदन्ति ॥ ३४ ॥ ३५ ॥

क्रमप्राप्तमुदाहरणं लक्षयति।—दृष्टान्त उदाहरणमिति लक्षणम् दृष्टान्तो दृष्टान्तवचनं दृष्टान्तकथनयोग्यावयव इत्यर्थः तेन दृष्टान्तस्य सामयिकत्वेनासाव-विकत्वेऽपि न क्षतिः योग्यताऽवच्छेदकत्वन्तु अवयवान्तरार्थानन्वितार्थकावयवत्वम्, तच्च द्विविधम् अन्वयिव्यतिरेकिभेदात्, तत्रान्वय्युदाहरणं लक्षयति, साध्यसाधर्म्यात्तद्धर्म

## तद्विपर्य्ययाद्वा विपरीतम् ॥ ३७ ॥

दृष्टान्त उदाहरणमिति प्रकृतम्। साध्यवैधर्म्यात् अतद्धर्मभावी दृष्टान्त उदाहरणमिति। अनित्य शब्द, उत्पत्तिधर्म्मकत्वात अनुत्पत्तिधर्म्मक नित्यमात्माऽऽदि। सोऽयमात्माऽऽदिर्दृष्टान्त साध्यवैधर्म्यादनुत्पत्तिधर्मकत्वादतद्धर्मभावो। योऽसौ साध्यस्य धर्मोऽनित्यत्व स तस्मिन न भवतीति। अत्राऽऽत्माऽऽदौ दृष्टान्त उत्पत्तिधर्मकत्वस्याभावादनित्यत्व न भवतीति उपलभमान शब्दे विपर्य्ययमनुमिनोति। उत्पत्तिधमकत्वस्य भावादनित्य शब्द इति। साधर्म्योक्तस्य हेतो साध्यसाधर्म्यात् तद्धर्मभावी दृष्टान्त उदाहरणम्। वैधर्म्योक्तस्य हेतो साध्यवैधर्म्यादतद्धमभावी दृष्टान्त उदाहरणम्। पूर्वस्मिन् दृष्टान्ते यौ तौ धर्मौ साध्यसाधनभूतौ पश्यति साध्येऽपि तयो साध्यसाधनभावमनुमिनोति। उत्तरस्मिन दृष्टान्ते ययोर्धर्मयोरेकस्याभावादितरस्याभाव पश्यति, तयोरेकस्याभावादितरस्याभाव साध्ये अनुमिनोतीति। तदेतद्धेत्वाभासेषु न सम्भवतीत्यहेतवो हेत्वाभासा। तदिद हेतूदाहरणयो सामर्थ्यम्परमसूक्ष्म दु खबोध पण्डितरूपवेदनीयमिति ॥ ३७ ॥

---

भावीति अन्वय्युदाहरणमिति शेष। परे तु सम्पूर्णसूत्रमन्वय्युदाहरणलक्षणमेव सामान्यलक्षणसूत्रमित्याहु। साध्यसाधर्म्यात् साध्यसहचरितधर्मात् प्रकृतसाधनादित्यर्थ तं साध्यरूप धम भावयति तथा च साधनवत्ताप्रयुक्तसाध्यवत्ताऽनुभावकोऽवयव साध्यसाधनव्याप्त्युपदर्शकोदाहरणमिति यावत् ॥ ३६ ॥

व्यतिरेक्युदाहरणं लक्षयति।—तद्विपर्य्ययात् साध्यसाधनव्यतिरेकव्याप्तिप्रदर्शनात् तथा च साध्यसाधनव्यतिरेकव्याप्त्युपदर्शकोदाहरण व्यतिरेक्युदाहरणम यथा जीवच्छरीर साऽऽत्मक, प्राणादिमत्त्वात् यन्नैव तन्नैव यथा घट इति वाऽऽकार प्रयोगमपेक्ष्य न तु वचनानुवर्त्ती तथा चान्वय्युदाहरण व्यतिरेक्युदाहरण वा प्रयोक्तव्यमित्यर्थ ॥ ३७ ॥

**उदाहरणापेक्षस्तथेत्युपसंहारो न तथेति वा साध्यस्योपनय ॥ ३८ ॥**

उदाहरणापेक्ष उदाहरणतन्त्र उदाहरणवश । वश सामर्थ्यम । साध्यसाधर्म्ययुक्ते उदाहरणे स्थाल्यादिद्रव्यमुत्पत्तिधर्मकमनित्य दृष्ट तथा शब्द उत्पत्तिधर्मक इति, साध्यस्य शब्दस्योत्पत्तिधर्मकत्वमुपसंह्रियते । साध्यवैधर्म्ययुक्ते पुनरुदाहरणे आत्माऽऽदिद्रव्यमनुत्पत्तिधर्मक नित्य दृष्ट न च तथा शब्द इति अनुत्पत्तिधर्मकत्वस्योपसंहारप्रतिषेधेनोत्पत्तिधर्मकत्वमुपसंह्रियते । तदिदमुपसंहारद्वैतमुदाहरणद्वैताद्भवति । उपसंह्रियतेऽनेनेति चोपसंहारो वेदितव्य इति । द्विविधस्य पुनर्हेतो द्विविधस्य चोदाहरणस्योपसंहारद्वैतञ्च समानम ॥ ३८ ॥

**हेत्वपदेशात् प्रतिज्ञाया पुनर्वचन निगमनम ॥ ३९ ॥**

साधर्म्योक्ते वैधर्म्योक्ते वा यथोदाहरणमुपसंह्रियते ।

---

क्रमप्राप्तमुपनय लक्षयति ।—साध्यस्य पक्षस्य उदाहरणापेक्ष उदाहरणानुसारी स उपसंहार उपन्यास प्रकृतोदाहरणोपदर्शितव्याप्तिविशिष्टहेतुविशिष्टपक्षविषयक बोधजनको न्यायावयव इत्यर्थ निगमन हेतुविशिष्टत्वेन न पक्षबोधक किन्तु पक्षविशिष्टहेतुबोधकमिति तद्भेद । अत्र चान्वयव्यतिरेकव्याप्त्योरन्यतरत्वादिना ऽनुगम कार्य्य उदाहरणापदर्शितेति तु परिचायकमात्रमिति तु न वाच्यम् उदाहरणविपरीतव्याप्तिप्रदर्शकोपनयवारकत्वात । वस्तुतोऽवयवपद न तदुपादान । स चोपनयो द्विविधोऽन्वयिव्यतिरेकिभेदात् तथेति साध्यस्योपसंहारोऽन्वय्युपनय न तथेति साध्यस्योपसंहारो व्यतिरेक्युपनय अत्र च तथाशब्दप्रयोगाऽऽवश्यकत्व न तात्पर्य्य किन्तु व्याप्तिविशिष्टहेतुमत्त्वबोधे तथा च वह्निव्याप्यधूमवांश्चायमिति वा तथा चायमिति चोपन्यास । एव व्यतिरेकिण्यपि वह्न्यभावव्यापकीभूताभावप्रतियोगि धूमवांश्चायमिति वा न तथेति चोपन्यास ॥ ३८ ॥

निगमन लक्षयति ।—हेतोर्व्याप्तिविशिष्टपक्षधर्मत्वस्य, अपदेश कथन प्रतिज्ञाया

तस्मादुत्पत्तिधर्मकत्वादनित्य शब्द इति निगमनम। निगम्यन्तेऽनेनेति प्रतिज्ञाहेतूदाहरणोपनया एकत्रेति निगमनम। निगम्यन्ते समर्थ्यन्ते सम्बध्यन्ते। तत्र साधर्म्योक्ते तावद्धेता वाक्यमनित्य शब्द इति प्रतिज्ञा। उत्पत्तिधर्मकत्वादिति हेतु। उत्पत्तिधर्मक स्थाल्यादिद्रव्यमनित्यमित्युदाहरणम। तथा चोत्पत्तिधर्मक शब्द इत्युपनय। तस्मादुत्पत्तिधर्मकत्वादनित्य शब्द इति निगमनम। वैधर्म्योक्तेऽपि अनित्य शब्द, उत्पत्तिधर्मकत्वात अनुत्पत्तिधर्मकमाऽऽत्मादिद्रव्य नित्य दृष्ट, न च तथाऽनुत्पत्तिधर्मक शब्द तस्मादुत्पत्तिधर्मकत्वाद नित्य शब्द इति। अवयवसमुदाये च वाक्ये सम्भूय इतरेतराभिसम्बन्धात प्रमाणान्यर्थं साधयन्तीति। सम्भव तावत् छब्दविषया प्रतिज्ञा आप्तोपदेशस्य प्रत्यक्षानुमानाभ्या प्रतिसन्धानादनृषेश्च स्वातन्त्र्यानुपपत्ते अनुमान हेतु। उदाहरण सादृश्यप्रतिपत्ते। तच्चोदाहरण भाष्ये व्याख्यातम प्रत्यक्ष विषयमुदाहरण दृष्टेनादृष्टसिद्धे। उपमानमुपनय, तथेत्युपसहारात न च तथेत्युपमानधर्मप्रतिषेधे विपरीतधर्मोपसहारसिद्ध। सर्वषामेकार्थप्रतिपत्तौ सामर्थ्यप्रदर्शन निगमनमिति। इतरेतराभिसम्बन्धेऽप्यसत्या प्रतिज्ञायामनाश्रया हेत्वादयो न प्रवर्त्तेरन। असति हेतौ कस्य साधनभाव प्रदर्श्यते? उदाहरणे साध्ये च कस्योपसहार स्यात? कस्य चापदेशात प्रतिज्ञाया पुनर्वचन निगमन स्यादिति? असत्युदाहरणे केन साधर्म्य वैधर्म्य वा साध्यसाधनमुपादीयेत? कस्य वा साधर्म्यवशादुपसहार प्रवर्त्तेत? उपनयञ्चान्तरेण साध्येऽनुपसहृत साधको धर्मो नार्थ साधयेत्। निगमनाभावे वाऽनभिव्यक्तसम्बन्धाना

प्रतिज्ञाऽथ　मा याविशिष्टपक्षस्य वचन निगमनम् तथा च व्याप्तिविशिष्टपक्षधर्म हेतुकथनपूर्वकमा ?विशिष्टपक्षप्रदर्शक व्याप्तिविशिष्टपक्षधर्म हेतुश्च व्यसाध्यविशिष्टपक्ष

प्रतिज्ञादीनामेकार्थे न प्रवर्त्तनम। तथेति प्रतिपादन कस्येति ? * अथावयवार्थ * साध्यस्य धर्मस्य धर्मिणा सम्बन्धोपादान प्रतिज्ञाऽर्थ। उदाहरणेन समानस्य विपरीतस्य वा धर्मस्य साधकभाववचन हेत्वर्थ। धर्मयो साध्यसाधनभावप्रदर्शन मेकत्रोदाहरणार्थ। साधनभूतस्य धर्मस्य साध्येन [illegible] सामानाधिकरण्योपप[illegible]नयार्थ। उदाहरणस्थयोर्धर्मयो साध्यसाधनभावोप[illegible] विपरीतप्रसङ्गप्रतिषेधार्थ निगमनम्। न चैतस्या [illegible]परिशुद्धौ सत्या साधर्म्य वैधर्म्याभ्या प्रत्यवस्थानस्य विकल्पाज्जातिनिग्रहस्थानबहुत्व प्रक्रमते। अव्यवस्थाप्य खलु साध्यसाधनभावमुदाहरणे जातिवादी प्रत्यवतिष्ठते। व्यवस्थिते तु खलु धर्मयो साध्य साधनभावे दृष्टान्तस्थे गृह्यमाणे साधनभूतस्य धर्मस्य हेतुत्वे नोपादान न साधर्म्यमात्रस्य न वैधर्म्यमात्रस्य वेति ॥ ३९ ॥

अत ऊर्द्ध्व तर्को लक्षणीय इति। अथेदमुच्यते—

**अविज्ञाततत्त्वेऽर्थे कारणोपपत्तितस्तत्त्वज्ञानार्थ-मूहस्तर्कः ॥ ४० ॥**

अविज्ञायमानतत्त्वेऽर्थे जिज्ञासा तावज्जायते, जानीयेम मर्थमिति। अथ जिज्ञासितस्य वस्तुनो व्याहतौ धर्मौ विभागेन विमृशति किंस्विदित्थम् ? आहोस्विन्नेत्थम् ? इति। विमृश्य मानयोर्धर्मयोरेक कारणोपपत्त्याऽनुजानाति, सम्भवत्यस्मिन्

बोधकत्वाद्दृष्टसाध्यबोधकौ वा न्यायावयवौ निगमनमिति। अस्य त्वन्वयिव्यतिरेकि भेदान्न भेद इत्याशय। व्यतिरेकिणि तु तस्मान्न तथेत्येवाऽऽकार इत्यपरे ॥ ३९ ॥

समाप्त न्यायस्वरूपप्रकरणम्।

क्रमप्राप्त तर्क लक्षयति।—तर्क इति लक्ष्यनिर्देश कारणोपपत्तित ऊह इति लक्षणम अविज्ञाततत्त्वेऽर्थ तत्त्वज्ञानार्थमिति प्रयोजनकथनम। कारण व्याप्य स्तोपपत्तिरारोप तस्मात्, ऊह आरोप, अथाव्यापकस्य, तथा च व्यापकाभाव

*कारण प्रमाण हेतुरिति। कारणोपपत्त्या स्यादेवमेतन्नेतरदिति। तत्र निदर्शनम। योऽय ज्ञाता ज्ञातव्यमर्थं जानीते तञ्च भो। जानीयेति जिज्ञासा। स किमुत्पत्तिधर्मकोऽनुत्पत्तिधर्मक इति विमर्श। विमृश्यमानेऽविज्ञाततत्त्वेऽर्थे यस्य धर्मस्याभ्यनुज्ञा कारणमुपपद्यते, तमनुजानाति। यद्ययमनुत्पत्तिधर्मक, तत स्वकृतस्य कर्मण फलमनुभ[illegible]। [illegible] मिथ्याज्ञानानामुत्तरमुत्तर पूर्वस्य पूर्वस्य कारणमुत्तरोत्तरापाये तदनन्तराभावादपवर्ग, इति स्याता ससारापवर्गौ उत्पत्तिधर्मक ज्ञातरि पुनर्न स्याताम्। उत्पन्न खलु ज्ञाता देहेन्द्रियबुद्धिवेदनाभि सम्बध्यत इति। नास्येद स्वकृतस्य कर्मण फलम। उत्पन्नश्च भूत्वा न भवतीति। तस्याविद्यमानस्य निरुद्धस्य वा स्वकृतकर्मण फलोपभोगो नास्ति। तदेवमेकस्यानेकशरीरयोग शरीरादि वियोगश्चात्यन्त न स्यादिति। यत्र कारणमनुपपद्यमान पश्यति, तन्नानुजानाति। सोऽयमेवलक्षण ऊहस्तर्क इत्युच्यते। कथ पुनरय तत्त्वज्ञानार्थ? न तत्त्वज्ञानमेवेति, अनवधारणात्। अनुजानात्ययमेकतर धर्म, कारणोपपत्त्या न त्ववधारयति न व्यवस्यति, न निश्चिनोति एवमेवेदमिति। कथ तत्त्वज्ञानार्थ इति?

*बलेन निर्णीते व्याप्यस्याऽऽहार्य्योऽऽरोपादय व्यापकस्याऽऽहार्य्योऽऽरोप स तर्क यथा निर्वह्निलाऽऽरोपाग्निधूमलाऽऽरोप निर्वह्नि स्यान्निधूम स्यादित्यादि। ह्रदो निर्वह्नि स्यान्निधूम स्यादित्यादिवारणाय व्यापकाभाववत्त्वेन निर्णीत इति। निर्वह्नि स्याद् अद्रव्य स्यादित्यादिवारणाय व्याप्यस्येति। तद्व्याप्याऽऽरोपाधीनस्तदारोप इत्यर्थलाभाय व्यापकेति। न चानुमानादितोऽर्थसिद्धेस्तर्को व्यर्थ इति वाच्यम अप्रयोजकत्वादि शङ्काकलङ्कितेन हेतुनाऽर्थस्य साधयितुमशक्यत्वात तदेतदुक्तम अविज्ञाततत्त्वेऽर्थे तत्त्व ज्ञानार्थम् इ। त।—तत्त्वनिर्णयार्थमित्यर्थ। यत्र न प्रयोजकत्वाद्याशङ्का तत्र नापेक्षा एवेति भाव। परे तु ऊह इत्येव लक्षणम् ऊहत्वञ्च मानसत्वव्याप्यो जातिविशेष तर्कयामीत्यनुभवसिद्ध। तर्क किं स्वत एव निर्णायक परम्परया वा? इत्यत आह — कारणेति।—कारणस्य व्याप्तिज्ञानादेरुपपादनद्वारेत्यर्थ, तथा च धर्मी यदि वह्नि

तत्त्वज्ञानविषयाभ्यनुज्ञालक्षणानुग्रहोद्भावितात् प्रसन्नादनन्तरं प्रमाणसामर्थ्यात तत्त्वज्ञानमुत्पद्यत इत्येवं तत्त्वज्ञानार्थ इति। सोऽयं तर्कः प्रमाणानि प्रतिसन्दधानः प्रमाणाभ्यनुज्ञानात प्रमाणसहितो वादे उपदिष्ट इत्यविज्ञाततत्त्वमनुजानातीति। यथा सोऽर्थो भवति। तस्य यथाभावस्तत्त्वमविपर्य्ययो याथातथ्यम ॥४०॥

एतस्मिंश्च तर्कविषये—

**विमृश्य पक्षप्रतिपक्षाभ्यामर्थावधारणं निर्णयः ॥४१॥**

स्थापना साधनं, प्रतिषेध उपालम्भः, तौ साधनोपालम्भौ पक्षप्रतिपक्षाऽऽश्रयौ व्यतिषक्तावनुबन्धेन प्रवर्त्तमानौ पक्षप्रतिपक्षावित्युच्येते। तयोरन्यतरस्य निवृत्तिरेकतरस्यावस्थानमवश्यम्भावि। यस्यावस्थानं तस्यावधारणं निर्णयः। नेदं पक्षप्रतिपक्षाभ्यामर्थावधारणं सम्भवतीति। एको हि प्रतिज्ञातमर्थं

व्यभिचारी स्यात वह्निजन्यो न स्यात इत्यनेन व्यभिचारशङ्कानिरास निरङ्कुशन ... प्रमाणनानुमातारेति परम्परयवास्योपयोग इत्याहुः। स चाय पञ्चविध ... ऽन्योऽन्याऽऽश्रयचक्रकानवस्थात न्यवाधितार्थप्रसङ्गभेदात। स्वस्य स्वापेक्षित्वऽनिष्टप्रसङ्ग ... श्रय। स च ज्ञप्त्यात्मस्थातजमिदार्थ तथा यथा ... घट एतद्घटजन्य स्यात तदा तद्घटानाधिकरणक्षणोत्तरवर्त्ती न स्यात। यद्यय घट एतद्घटज्ञान स्यात एतद्घटव्याप्यो न स्यात। यद्यय घट एतद्घटज्ञानाभिन्न स्यात ज्ञानसामग्रीजन्य स्यात एतद्घटाभिन्न स्यादिति वा सववाऽ पाद्यम। तदपेक्ष्यपेक्षित्वनिबन्धनोऽनिष्टप्रसङ्गोऽन्योन्याश्रय। सोऽपि पूर्ववत त्रेधा। तदपेक्ष्यपेक्षित्वनिबन्धनोऽनिष्टप्रसङ्ग चक्रकम् चतु कथाद अपि स्वस्य स्वापेक्ष्यपेक्ष्यपेक्षित्वसत्त्वाऽऽपादकम्। अस्यापि पूर्ववत् त्रैविध्यम्। अनवस्थितपरम्परारोपाधीनानिष्टप्रसङ्गोऽनवस्था यथा यदि घटत्व घटजन्यत्वव्याप्य स्यात कपालसमवेतत्वव्याप्य न स्यात। तदन्य बाधितार्थप्रसङ्गस्तु धमो यदि वाऽव्यभिचारी स्यात वह्निजन्यो न स्यादित्यादि। प्रथमोपाध्यायेषु ... लाघवगौरवादिकन्तु प्रसङ्गानात्मकत्वात् न तर्क किन्तु प्रमाणसहकारित्वरूपसाधर्म्यात् तथा व्यवहार इति सङ्क्षेप ॥ ४ ॥

क्रमप्राप्तं निर्णयं लक्षयति।—विमृश्य सन्दिह्य पक्षप्रतिपक्षाभ्यां साधनोपालम्भाभ्याम उपालम्भ परपक्षदूषणम् अर्थस्यावधारणं तदभावाप्रकारक

हेतुत स्थापयति प्रतिषिद्धश्चोद्धरतीति द्वितीयस्य द्वितीयेन स्थापनाहेतु प्रतिषिध्यते,तस्यैव प्रतिषेधहेतुश्चोद्ध्रियते,स निवर्त्तते तस्य निवृत्तौ योऽवतिष्ठते, तेनार्थावधारण निर्णय इति। उभाभ्यामेवार्थावधारणमित्याह। कया युक्त्या। एकस्य सम्भवो द्वितीयस्यासम्भव ? ताविमौ सम्भवासम्भवौ विमर्श सह निवर्त्तयत। उभयसम्भवे उभयासम्भवे त्वनिवृत्तो विमर्श इति। विमृश्येति विमर्श कृत्वा। सोऽय विमर्श पक्षप्रतिपक्षाववद्योत्य न्याय प्रवर्त्तयतीत्युपादीयत इति। एतच्च विरुद्धयोरेकधर्म्मिस्थयोर्बोद्धव्यम्। यत्र तु धर्म्मिसामान्यगतौ विरुद्धौ धर्म्मौ हेतुत सम्भवत तत्र समुच्चय हेतुतोऽर्थस्य तथाभावोपपत्ति। यथाक्रियावद्द्रव्यमिति लक्षणवचने यस्य द्रव्यस्य क्रियायोगो हेतुत सम्भवति तत क्रियावत यस्य न सम्भवति तदक्रियमिति। एकधर्म्मिस्थयोश्च विरुद्धयोरयुगपद्भाविनो कालविकल्प। यथा तदेव द्रव्य क्रियायुक्त क्रियावत, अनुत्पन्नोपरतक्रिय पुनरक्रियमिति। न चाय निर्णय नियम विमृश्यैव पक्षप्रतिपक्षाभ्यामर्थावधारण निर्णय इति। किन्त्विन्द्रियार्थसन्निकर्षोत्पन्नप्रत्यक्षेऽर्थावधारण निर्णय इति। परीक्षाविषये तु, विमृश्य पक्षप्रतिपक्षाभ्यामर्थाव धारण निर्णय, शास्त्रे वादे च विमर्शवर्जम ॥ ४१ ॥

इति वात्स्यायनीये न्यायभाष्ये प्रथमाध्यायस्य
प्रथममाह्निकम्।

तत्प्रकारकं ज्ञानम्। यद्यप्येतावदेव निर्णयसामान्यलक्षण तथाऽपि विमृश्येत्यादिकं कल्पितलक्षणीयनिर्णयमधिकृत्य तदुक्त भाष्ये—"शास्त्रे वाद च विमर्शवर्जम्" इति। एवं प्रत्यक्षत शब्दाच्च निर्णये न विमर्शपक्षप्रतिपक्षापेक्षेति ॥ ४१ ॥

सम स न्यायोत्तराङ्गप्रकरणम्।

इति श्रीविश्वनाथभट्टाचार्य्यकृतायां न्यायसूत्रवृत्तौ
प्रथमाध्यायस्य प्रथममाह्निकम्।

## प्रथमाध्यायस्य द्वितीयाऽऽह्निकम् ।

तिस्रः कथा भवन्ति, वादो जल्पो वितण्डा चेति । तासाम्—

**प्रमाणतर्कसाधनोपालम्भः सिद्धान्ताविरुद्धः पञ्चावयवोपपन्नः पक्षप्रतिपक्षपरिग्रहो वादः ॥४२॥**

एकाधिकरणस्थौ विरुद्धौ धर्मौ पक्षप्रतिपक्षौ प्रत्यनीकभावात् । अस्त्यात्मा, नास्त्यात्मेति । नानाऽधिकरणौ विरुद्धौ न पक्षप्रतिपक्षौ । यथा नित्य आत्मा, अनित्या बुद्धिरिति । परिग्रहोऽभ्युपगमव्यवस्था । सोऽयं पक्षप्रतिपक्षपरिग्रहो वादः । तस्य विशेषणं प्रमाणतर्कसाधनोपालम्भः, प्रमाणैस्तर्केण च साधनमुपालम्भश्चास्मिन् क्रियत इति । साधनं स्थापना । उपालम्भः प्रतिषेधः । एतौ साधनोपालम्भौ उभयोरपि पक्षयोर्व्यतिषक्तावनुबद्धौ च यावदेको निवृत्त एकतरो व्यवस्थित इति । निवृत्तस्योपालम्भो व्यवस्थितस्य साधनमिति । जल्पे निग्रहस्थानविनियोगा

---

प्रथमाऽऽह्निकेन सपरिकरे न्याये लक्षिते वादादिलक्षणाय द्वितीयाऽऽह्निकाऽऽरम्भः छलपरीक्षा च प्रसङ्गाद्भविष्यति तथा च छलपरीक्षासहितवादादिलक्षणं द्वितीयाऽऽह्निकार्थः । तत्र चत्वारि प्रकरणानि आदौ कथाप्रकरणं ततो हेत्वाभासप्रकरणं छलप्रकरणं दोषलक्षणप्रकरणञ्चेति । अत्र कथासामान्यस्याविशेषो वादादिः तथा च त्रिभिः सूत्रैरेकं कथाप्रकरणम् अन्यथैकसूत्रस्य प्रकरणभावाभावादसङ्गतिः स्यात् इत्याशयेनोक्तं भाष्यकृता — तिस्रः खलु कथा भवन्ति वादो जल्पो वितण्डा च इति । तत्र तत्त्वनिर्णयविजयान्यतरस्वरूपयोग्यो न्यायानुगतवचनसन्दर्भः कथा । लौकिकविवादवारणाय न्यायेत्यादि यच्चैकेन न्यायः प्रयुक्तः अपरेण तु मतपरिग्रहोऽपि न कृतः तद्वारणाय आद्यं विशेषणमिति । कथाऽधिकारिणस्तु तत्त्वनिर्णयविजयान्यतराभिलाषिणः सर्वजनसिद्धानुभवानपलापिनः श्रवणादिपटवः अकलहकारिणः कथोपयिकव्यापारसमर्था इति ।

तत्र वादं लक्षयति ।—अत्र च वाद इति लक्ष्यनिर्देशः पक्षप्रतिपक्षौ विप्रतिपत्तिकोटी तयोः परिग्रहः तत्साधनोद्देश्यकोक्तिप्रत्युक्तिरूपवचनसन्दर्भः, तावन्मात्रञ्च

द्वादे एतत्प्रतिषेध। प्रतिषेधे कस्यचिदभ्यनुज्ञानार्थं सिद्धान्ताविरुद्ध इति वचनम्। "सिद्धान्तमभ्युपेत्य तद्विरोधी विरुद्ध" इति हेत्वाभासस्य निग्रहस्थानस्याभ्यनुज्ञा वादे। पञ्चावयवोपपन्न इति हीनमन्यतमेनाप्यवयवेन न्यूनं हेतूदाहरणाधिकमधिक-मिति चैतयोरभ्यनुज्ञानार्थमिति। अवयवेषु प्रमाणतर्कान्तर्भावे पृथक् प्रमाणतर्कग्रहणं साधनोपालम्भव्यतिषङ्गज्ञापनार्थम्। अन्यथोभावपि पक्षौ स्थापनाहेतुना प्रवृत्तौ वाद इति स्यात्। अन्तरेणाप्यवयवसम्बन्धं प्रमाणान्यर्थं साधयन्तीति दृष्टम् तेनापि कल्पेन साधनोपालम्भौ वादे भवत इति ज्ञापयति। छलजातिनिग्रहस्थानसाधनोपालम्भो जल्प इति वचनाद्विनि

कथाऽन्तरसाधारणम् अत आह—प्रमाणेत्यादि। प्रमाणतर्काभ्यां तद्रूपेण ज्ञाताभ्यां साधनोपालम्भौ यत्र स। तथा च उभयत्रापि प्रमाणानि सन्त्येव सति कोटिद्वयस्यापि सिद्धिः स्यात् अतस्तद्रूपेण ज्ञाताभ्यामिति। ज्ञानमनाहार्य्यं विवक्षितम् उपालम्भो दूषणम् जल्पादौ तु प्रमाणाऽऽभासत्वादिना ज्ञाताभ्यामपि साधनोपालम्भौ भवत इति तद्वारणम्। इत्थञ्च प्रमाणाऽऽभासत्वप्रकारकज्ञानविषयकरणकसाधनोपालम्भयोग्यान्यत्वे सतीत्यर्थे तेन तादृशजल्पविशेषे नातिव्याप्तिः। तत्र च निग्रहस्थानविशेषनियमाय सिद्धान्तेत्यादिविशेषणत्रयम्। अन्ये तु तदपि लक्षणघटकमेव तदर्थश्च तावन्मात्रनिग्रहस्थानयोग्यत्वं तावदतिरिक्तनिग्रहस्थानायोग्यत्वं वा निग्रहस्थानं प्रतिज्ञाहान्यादीनामेकतमत् भूत्वा तदन्यासाधयोग्यत्वमिति निष्कर्षः। तेनोक्तजल्पविशेषवारणमित्याहुः। सिद्धान्ताविरुद्ध इत्यनेनापसिद्धान्तोद्भावनम्। पञ्चावयवोपपन्न इत्यनेन न्यूनाधिकोद्भावने अवयवाऽऽभासस्य दृष्टान्तासिद्ध्यादेश्चोद्भावनम्। प्रमाणेत्यनेन च प्रमाणाऽऽभासत्वेन हेत्वाभासानां तर्काऽऽभासस्य चोपन्यासो नियम्यते। तथा चात्र हेत्वाभासन्यूनाधिकापसिद्धान्तरूपनिग्रहस्थानचतुष्टयोद्भावनमिति वदन्ति। वस्तुतस्तु वादस्य वीतरागकथात्वेन तत्त्वनिर्णयस्योद्देश्यतया पुरुषदोषस्याविज्ञातार्थादेरिव न्यूनाधिकयोरपि नोद्भावनमुचितम्। अत एव पञ्चावयवाऽऽवश्यकत्वमपि भाष्यकारो नानुमेने हेत्वाभासाद्युद्भावनेनापि च तदैव कथाविच्छेदः यदि हेत्वन्तरेणापि साधयितुं न शक्यते इतरथा तु तद्वेतोरेव दुष्टत्वम्। इत्थञ्च पञ्चावयवोपपन्न इति प्रायिकत्वाभिप्रायेणेति तत्त्वम्। वादाधिकारिणस्तु तत्त्वबुभुत्सव

यद्दा जल्प इति मा विज्ञायि। छलजातिनिग्रहस्थानसाधनोपालम्भ एव जल्प, प्रमाणतर्कसाधनोपालम्भो वाद एवेति मा विज्ञायीत्येवमर्थं पृथक प्रमाणतर्कग्रहणमिति ॥ ४२ ॥

**यथोक्तोपपन्नश्छलजातिनिग्रहस्थानसाधनोपालम्भो जल्प ॥ ४३ ॥**

यथोक्तोपपन्न इति, प्रमाणतर्कसाधनोपालम्भ सिद्धान्ताविरुद्ध पञ्चावयवोपपन्न पक्षप्रतिपक्षपरिग्रह। छलजातिनिग्रहस्थानसाधनोपालम्भ इति। छलजातिनिग्रहस्थानै साधनमुपालम्भश्चास्मिन क्रियत इति। एवविशेषणो जल्प। न खलु वै छलजातिनिग्रहस्थानै साधन कस्यचिदर्थस्य सम्भवति। प्रतिषेधार्थश्चैषा सामान्यलक्षणस्त्व श्रूयते। वचनविघातो

प्रकृताकका अविप्रलम्भका यथाकालस्फूर्तिका अनाक्षेपका युक्तिसिद्धप्रत्यतार। अनुविधेयस्थ्य सभ्यपुरुषवती जनता सभा अनुविधयो राजा द स्थयान् मध्यस्थ धा च वादे नावश्यको वीतरागकथात्वादिति ॥ ४२ ॥

जल्प लक्षयति।—यथोक्तेषु यदुपपन्न तनोपपन्न इत्यर्थ मध्यपदलोपी समास तथा च प्रमाणतर्कसाधनोपालम्भ पक्षप्रतिपक्षपरिग्रह इत्यस्य योग्यतया परामर्श। अन्यथा जल्पस्य वादविशेषत्वाऽऽपात्त प्रमाणतर्काभ्या तद्रूपेण ज्ञाताभ्या न तु ज्ञानेऽभाहाच्यत्व विवाक्षतम् आरोपितप्रमाणाऽऽभासेऽपि जल्पनिर्वाहात। यद्यपि छलादिभिरुपालम्भ एव न तु साधन तथाऽपि साधनस्य परकीयानुमानस्य उपालम्भो यत्रेत्यर्थान्न दोष। परपक्षदूषणे सति स्वपक्षासिद्धिरित्यत साधन तदुपयोग इति। अन्ये उभयपक्षस्थापनावत्त्वन च विशेषणीयम् अतो वितण्डायामतिव्याप्ति स प्रतिपक्षस्थापनाहीन इत्युत्तरसूत्रात् प्रकृते उभयपक्षस्थापनावत्त्वलाभ स्थापनावत्त्वादेव च पञ्चावयवनियमोऽपि लभ्यत इति वदन्ति। अत्र च छलादिभि सर्वैरुपालम्भो न विशेषणम् अव्याप्ते अपि तु तद्योग्यतैव योग्यताऽवच्छेदकन्तु वादभिन्नकथात्वमेव। तत्र चातिवादत्वावच्छिन्नभेदस्तत्तद्भेदो वा विशेषणमिति छलेत्यादिना विजिगीषुकथात्वं बोध्यते विजिगीषुर्हि छलादिकं करोति तथा चोभयपक्षस्थापनावती विजिगीषुकथा जल्प इत्यर्थ, इत्यपि वदन्ति। अत्र चाय क्रम, वादिना स्वपक्षसाधनं

ऽर्थविकल्पोपपत्त्या छलमिति। साधर्म्यवैधर्म्याभ्यां प्रत्यवस्थानं जातिः। विप्रतिपत्तिरप्रतिपत्तिश्च निग्रहस्थानमिति। विशेषलक्षणेष्वपि यथास्वमिति। न चैतद्विजानीयात् प्रतिषेधार्थतयैवार्थं साधयन्तीति। छलजातिनिग्रहस्थानोपालम्भ इत्येवमप्युच्यमाने विज्ञायत एतदिति। प्रमाणैः साधनोपालम्भयोश्छलजातीनामङ्गभावो रक्षणार्थत्वात् न तु स्वतन्त्राणां साधनभावः। यत्र प्रमाणैरर्थस्य साधनं, तत्र छलजातिनिग्रहस्थानानामङ्गभावो रक्षणार्थत्वात्। तानि हि प्रयुज्यमानानि परपक्षविघातेन स्वपक्षं रक्षयन्ति। तथा चोक्तम् — तत्त्वाध्यवसायसंरक्षणार्थं जल्पवितण्डे बीजप्ररोहसंरक्षणार्थं कण्टकशाखाऽऽवरणवत् इति। यश्चासौ प्रमाणैः प्रतिपक्षस्योपालम्भः, तस्य चैतानि प्रयुज्यमानानि प्रतिषेधविघातात् सहकारीणि भवन्ति। तदेवमङ्गीभूतानां छलादीनामुपादानं जल्पे न स्वतन्त्राणां साधनभावः। उपालम्भे तु स्वातन्त्र्यमप्यस्तीति ॥ ४२ ॥

प्रयुज्य च हेत्वाभासं तल्लक्षणायोगात् इति सामान्यतो साध्यसमः इत्यादि विशेषतो वा दूषणानि निरसनीयानि। ततः स्वपक्षदूषणम् उद्धृत प्रतिवादिना स्वस्याज्ञानादिनिरासाय परोक्तमनूद्य अनुक्तग्राह्याणामपार्थकाज्ञानाननुभाषणाप्रतिभानामसम्भवादेवालाभे उच्यमानग्राह्याणामप्राप्तकालार्थान्तरानर्थकानामलाभे उक्तग्राह्याणां प्रतिज्ञाहानि प्रतिज्ञाविरोध प्रतिज्ञाऽन्तर प्रतिज्ञासंन्यास हेत्वन्तराविज्ञातार्थ विक्षेप मतानुज्ञा न्यूनाधिक पुनरुक्त निरनुयोज्यानुयोगापसिद्धान्तानामलाभे पर्यनुयोज्योपेक्षणस्य मध्यस्थोद्भाव्यत्वादेवानुपन्यासादृते यथासम्भवं हेत्वाभासेन परोक्तं दूषयित्वा स्वपक्ष उपन्यसनीयः। ततो वादिना तृतीयकक्षायामिति परोक्तमनूद्य स्वपक्षदूषणमुद्धृत्यानुक्तग्राह्योच्यमानग्राह्यहेत्वाभासातिरिक्तोक्तग्राह्याणामलाभे हेत्वाभासेन यथासम्भवं प्रतिपक्षवादिनः स्थापना दूषणीया। अन्यथा क्रमविपर्यासेऽप्राप्तकालमनवसरे दूषणोद्भावने च निरनुयोज्यानुयोगः यथा त्वद्वाक्ये चेत् प्रतिज्ञाहानिर्विशेषयसि चेद्धेत्वन्तरमित्यादि प्रतिज्ञाहान्यादिवद्धेत्वाभासानामुक्तग्राह्यत्वाविशेषेऽपि अर्थदोषत्वेन प्रधानत्वाच्चरममनुसन्धानमिति ॥ ४२ ॥

## स प्रतिपक्षस्थापनाहीनो वितण्डा ॥ ४४ ॥

स जल्पो वितण्डा भवति। किंविशेषण ?—प्रतिपक्ष स्थापनया हीन। यौ तौ समानाधिकरणौ विरुद्धौ धर्मौ पक्षप्रतिपक्षावित्युक्तौ तयोरेकतरं वैतण्डिको न स्थापयतीति। परपक्षप्रतिषेधेनैव प्रवर्त्तत इति। अस्तु तर्हि स प्रतिपक्ष हीनो वितण्डा। यद्वै खलु तत्परप्रतिषेधलक्षणं वाक्यं स वैतण्डिकस्य पक्ष। न त्वसौ साध्यं कञ्चिदर्थं प्रतिज्ञाय स्थापयतीति। तस्माद् यथान्यासमेवास्त्विति ॥ ४४ ॥

हेतुलक्षणाभावादहेतवो हेतुसामान्याद्धेतुवदाभासमाना। त इमे—

## सव्यभिचारविरुद्धप्रकरणसमसाध्यसमातीत-कालाः हेत्वाभासाः ॥ ४५ ॥

वितण्डां क्रमप्राप्तां लक्षयति।—स इति तच्छब्देन जल्पो न परामृष्टः अकृत जल्पस्य स्थापनाद्यवत्व प्रतिपक्षस्थापनाहीनत्वस्य विरुद्धत्वात् यथापि स्थापना यत्र वितण्डायां जल्पकं न परामृश्य। प्रतिपक्षा इतीयच तथा च प्रतिपक्ष स्थापना नाविजिगीषुकथा वित इति। न च कस्य स्थापनीयाभावात् कथात्वं कथा प्रतीतताम् ? इति वाच्यम् परपक्षखण्डनेन जयस्य वाद्भिमतत्वात्। पर तु — परपक्षखण्डनेनैव स्वपक्षसिद्धेरिष्टत्वेव सिद्धि तत्साधनाभावेऽपि न प्रवृत्त्यनुपपत्तिरिति वक्ति ॥ ४४ ॥

समाप्तं कथाप्रकरणम्।

क्रमप्राप्तान् हेत्वाभासान् लक्षयति विभजते च।—न च अत्र लक्षणं न प्रतीयते इति वाच्यम् हेत्वाभासशब्दस्य [illegible] हेत्वाभाससामान्यकल्पं तदनुमानात्। तथा हि पक्षसत्त्व सपक्षसत्त्व विपक्षासत्त्वाबाधितत्वासत्प्रतिपक्षितत्वोपपन्नो हेतुर्गमक तदाभास इत्यते वक्ष्यते [illegible] सति तत्सम तथा च पञ्चरूपोपपन्नत्वाभावे सति तद्वदाभासमान इति फलितार्थ। तत्र च लक्षणं [illegible] तस्यैव [illegible]साधकतायामुपयोगात्। न च असाधकतायां पक्षसत्त्वाद्येकैकाभावस्यैवोपयोगः [illegible] इति वाच्य,

तेषाम्—

**अनैकान्तिकः सव्यभिचारः ॥ ४६ ॥**

व्यभिचार एकत्राव्यवस्था। सह व्यभिचारेण वर्त्तत इति सव्यभिचारः। निदर्शनम्—नित्यः शब्दोऽस्पर्शत्वात् स्पर्शवान् कुम्भोऽनित्यो दृष्टः। न च तथा स्पर्शवान् शब्दः तस्मादस्पर्शत्वान्नित्यः शब्द इति। दृष्टान्ते स्पर्शवत्त्वमनित्यत्वञ्च धर्मौ न साध्यसाधनभूतौ दृश्येते स्पर्शवांश्चाणुर्नित्यश्चेति। आत्मादौ च दृष्टान्ते उदाहरणसाधर्म्यात् साध्यसाधनं हेतुरिति। अस्पर्शत्वादिति हेतुर्नित्यत्वं व्यभिचरति। अस्पर्शा बुद्धिरनित्या चेति। एवं द्विविधेऽपि दृष्टान्ते व्यभिचारात् साध्यसाधनभावो नास्तीति। लक्षणाभावादहेतुरिति। नित्यत्वमप्येकोऽन्तः। अनित्यत्वमप्येकोऽन्तः। एकस्मिन्नन्ते

पक्षत्वाद्यलिङ्गाभावस्य पक्षसत्त्वाभावादाश्रयासिद्धत्वेन व्याप्त्यभावात्। वस्तुतस्तु प्रागभावो इतरथा विभुत्वेन स्पर्शवत्त्वात् प्रमेयमाकाशादिवत्। सपक्षात् प्रागभावस्य ... तात्पर्यम्। परन्तु विपक्षासत्त्वसपक्षसत्त्वाभ्यां व्यभिचारितसामानाधिकरण्य-पक्षसत्त्वसहितस्य चैतस्य विरोधित्वं विभिन्नम्। तेन व्याप्तिभावापादकधर्म। विरोधित्वं चरमधर्मस्त्वनुमितिविरोधिरूपानवच्छिन्नत्वाद्यथार्थाभावादनुमितावविरोधित्वं तदानुमितितत्कारणज्ञानान्यतरविरोधित्वे पर्यवस्यति ॥ ४५ ॥

सव्यभिचारं लक्षयति।—एकस्य साध्यस्य तदभावस्य च योऽन्यः सहचारः अव्यभिचारितसहचार इत्याशयः। स चात्र व्याप्तिग्राहकः तथा चैकमात्रव्याप्तिग्राहकसहचारवाननैकान्तिकः तदन्योऽनैकान्तिकः। स च साधारणोऽसाधारणोऽनुपसंहारी चेति त्रिविधः साधारणः साध्यवत् तदन्यवृत्तिः। यथा शब्दो नित्यः निःस्पर्शत्वात्। न च विरुद्धसङ्कीर्णदोषः उपधेयसङ्करेऽप्युपाधेरसङ्करात्। असाधारणः सपक्षविपक्षव्यावृत्तः सपक्षः साध्यवत्त्वेन निश्चितविषयः यथा शब्दो नित्यः शब्दत्वात् इत्यादि। अनुपसंहारी च केवलान्वयिधर्मावच्छिन्नपक्षकः यथा सर्वं नित्यं प्रमेयत्वादित्यादि अत्र च साध्यसन्देहादुदाहरणग्रहो न भवतीत्याशयः। नन्वस्मिन् असाधारणं साध्यवदवृत्ति एतच्च साध्यसहचारग्रहप्रतिबन्धेन व्याप्तिग्रहप्रतिबन्धा

विद्यत इति ऐकान्तिकः। विपर्ययादनैकान्तिकः। उभयान्तव्यापकत्वादिति ॥ ४६ ॥

**सिद्धान्तमभ्युपेत्य तद्विरोधी विरुद्धः ॥ ४७ ॥**

तं विरुणद्धीति तद्विरोधी अभ्युपेतं सिद्धान्तं व्याहन्तीति। यथा सोऽयं विकारो व्यक्तेरपैति नित्यत्वप्रतिषेधात्। अपेतोऽप्यस्ति विनाशप्रतिषेधात्। न नित्यो विकार उपपद्यते इत्येवं हेतुर्व्यक्तेरपेतोऽपि विकारोऽस्तीत्यनेन स्वसिद्धान्तेन विरुध्यते। कथम्? व्यक्तिरात्मलाभः अपायः प्रच्युतिः यद्यात्मलाभात् प्रच्युतो विकारोऽस्ति नित्यत्वप्रतिषेधो नोपपद्यते। यद्व्यक्तेरपेतस्यापि विकारस्यास्तित्वं तत् खलु नित्यत्वमिति। नित्यत्वप्रतिषेधो नाम विकारस्याऽऽत्मलाभात् प्रच्युतेरुपपत्तिः। यदात्मलाभात् प्रच्यवते तदनित्यं दृष्टम्। यदस्ति न तदात्मलाभात् प्रच्यवते। अस्तित्वञ्चाऽऽत्मलाभात् प्रच्युतिरिति विरुद्धावेतौ न सह सम्भवत इति। सोऽयं हेतुर्यं सिद्धान्तमाश्रित्य प्रवर्त्तते, तमेव व्याहन्तीति ॥ ४७ ॥

**यस्मात् प्रकरणचिन्ता स निर्णयार्थमपदिष्टः प्रकरणसमः ॥ ४८ ॥**

विमर्शाधिष्ठानौ पक्षप्रतिपक्षावनवसितौ प्रकरणम्। तस्य

---

दूषकताबीजम्। अनुपसंहारी च केवलान्वयिसाध्यकः तस्य चात्यन्ताभावाप्रतियोगिसाध्यकत्वरूपस्य ज्ञानाद्व्यतिरेकव्याप्तिग्रहप्रतिबन्धो दूषकताबीजम् इत्याह ॥ ४६ ॥

क्रमप्राप्तं विरुद्धं लक्षयति। अत्र च सिद्धान्तः साध्यम्। प्रतिज्ञाया हि पक्षस्य सिद्धान्ते साध्यमभिधीयते तथा च साध्यमभ्युपेत्य तद्विरोधी प्रयुक्तस्तद्विरोधी साध्याभावव्याप्त इति फलितार्थः यथा वह्निमान् ह्रदत्वादिति एतस्य साध्याभावानुमितिसामग्रीत्वेन साध्यानुमितिप्रतिबन्धो दूषकताबीजम् न च सत्प्रतिपक्षाविशेषः तत्र हेत्वन्तरं साध्याभावसाधकम् इह तु हेतुरेव साध्याभावसाधकः साध्यसाधकत्वेन त्वयोपन्यस्त इत्यशक्तिविशेषाधायकत्वेन विशेषात् ॥ ४७ ॥

क्रमप्राप्तं प्रकरणसमं लक्षयति।—स हेतुः स्वसाध्यस्य परसाध्याभावस्य वा निर्णयार्थमपदिष्टः प्रयुक्तः प्रकरणसम उच्यते स च क इत्याकाङ्क्षायामाह,—यस्मात्

चिन्ता विमर्शात् प्रभृति प्राङ्निर्णयाद् यत् समीक्षणं सा जिज्ञासा यत्कृता, स निर्णयार्थं प्रयुक्त उभयपक्षसाम्यात् प्रकरणमनतिवर्त्तमानः प्रकरणसमो निर्णयाय न प्रकल्पते। प्रज्ञापनन्तु—अनित्यः शब्दो नित्यधर्मानुपलब्धेः इति अनुपलभ्यमाननित्यधर्मकमनित्यं दृष्टं स्थाल्यादि। नित्यः शब्दः अनित्यधर्मानुपलब्धेः इति अनुपलभ्यमानानित्यधर्मकं नित्यं दृष्टम् आकाशादि। यत्र समानो धर्मः संशयकारणं हेतुत्वेनोपादीयते, स संशयसमः सव्यभिचार एव। या तु विमर्शस्य विशेषापेक्षिता उभयपक्षविशेषानुपलब्धिश्च सा प्रकरणं प्रवर्त्तयति। कथम्?—विपर्य्यये हि प्रकरणनिवृत्तेः। यदि नित्यधर्मः शब्दे गृह्येत न स्यात् प्रकरणम्। यदि वा अनित्यधर्मो गृह्येत एवमपि निवर्त्तेत प्रकरणम्। सोऽयं हेतुरुभौ पक्षौ प्रवर्त्तयन्नन्यतरस्य निर्णयाय न प्रकल्पते॥ ४८॥

## साध्याविशिष्टः साध्यत्वात् साध्यसमः ॥४९॥

द्रव्यं छायेति साध्यम्, गतिमत्त्वादिति हेतुः। साध्येनाविशिष्टः साधनीयत्वात्साध्यसमः। अयमप्यसिद्धत्वात् साध्य-

प्रकरणाचिन्तात् प्रकरणं पक्षप्रतिपक्षाविति भाष्यम्, साध्यतदभाववत्तावित न च तथा च निर्णयार्थं प्रयुक्तो हेतुर्यत्र निर्णये न यतुमशक्तस्तुल्यबलेन परेण प्रतिबन्धात् किन्तु धर्मिणि साध्यवत्त्वं तदभाववत्त्वं वेति चिन्तां जिज्ञासां प्रवर्त्तयति स प्रकरणसम। य त—प्रकृष्टं करणं लिङ्गपरामर्शो वा को हेतुरनयो साधक? एतयो क परामर्शः प्रमितं वा? यत्र जिज्ञासा भवतीत्यर्थः यस्मात्तित्यादि तु वस्तुस्थितिमात्र लक्षणन्तु त ीत्त्वविरोधिपरामर्शकालीनतुल्यबलपरामर्शविषयत्व स्वसाध्यपरामर्श कालीनतुल्यबलविरोधिपरामर्शो वा। विरोधिपरामर्शस्य स्वहेतुनिष्ठत्वमकज्ञान विषयत्वसम्बन्धेन अन्यथा हेतोर्दुष्टत्वं न स्यात्। अत्र च दशाविशेष दोष इत्यत सद्धेतोरपि विरोधिपरामर्शकाले दुष्टत्वमिष्टमेवेत्यवधेयम्॥ ४८॥

क्रमप्राप्तं साध्यसमं लक्षयति।—साध्येन वह्न्यादिनाऽविशिष्टः। कुत? इत्यत आह,—साध्यत्वादिति साधनीयत्वादित्यर्थः। यथा हि साध्यं साधनीयं तथा

वत्प्रज्ञापयितव्य। साध्यं तावदेतत्,—किं पुरुषवच्छायाऽपि गच्छति? आहोस्विदावरकद्रव्ये समर्पति? आवरणसन्ताना दसन्निधिसन्तानोऽयं तेजसो गृह्यत इति। सर्पता खलु द्रव्येण ज्ञानाद यो यस्तेजोभाग आव्रियते, तस्य तस्यासन्निधिरेव अविच्छिन्नो गृह्यत इति। आवरणन्तु प्राप्तिप्रतिषेध ॥ ४८ ॥

## कालात्ययापदिष्ट कालातीत ॥ ५० ॥

कालात्ययेन युक्तो यस्यार्थस्यैकदेशोऽपदिश्यमानस्य स कालात्ययापदिष्ट कालातीत इत्युच्यते। निदर्शनम्,—नित्य

हेतुरपि चेत् साध्यसम इत्युच्यते अत एव चासिद्ध इति व्यवह्रियते। अयञ्चा ऽसिद्धो ऽपि स्वरूपासिद्धिव्याप्यत्वासिद्धिभेदात् त्रिविध। आश्रयासिद्धश्च पक्षे पक्षता ऽवच्छेदकाभाव यथा काञ्चनमय पर्वतो वह्निमानित्यादौ। स्वरूपासिद्धः पक्षे हेतुता ऽवच्छेदकावच्छिन्नस्याभाव यथा ह्रदो द्रव्य धूमादित्यादौ। व्याप्यत्वासिद्धिश्चाव्यभि चरितसामानाधिकरण्यस्याभाव न च स्वरूपासिद्ध एव सुवाक्षुष्यत्वप्रतीते लक्ष्यत्वानात वाच्य हेतोरात पद ... गमकहेतोव्याप्तिविशिष्ट पक्षधर्मस्य वाचक व्याप्तिविशिष्टपक्षधर्म इत्येव वा पृच्छताम्। तथा च तस्य किञ्चिदंशसाध्यत्वेनैव साध्यसमत्वम् अत एव साध्ये साध्यताऽवच्छेदकाभाव साधने साधनताऽवच्छेदकाभावश्च व्याप्यत्वासिद्धि। यथा पक्षताऽवच्छेदकाभाव पक्षताऽव च्छेदक ... रन्यतमत्वेना ऽऽश्रयासिद्धित्व यथा च पक्षे हेत्वभाव हेतुमद्भेदादेरन्यतम त्वेन स्वरूपासिद्धित्व तथा साध्यताऽवच्छेदकाभावादेरन्यतमत्वेन व्याप्यत्वासिद्धित्वम् वितयान्यतमत्व चासिद्धिसामान्यलक्षणम् नीलधूमत्वादेरपि व्याप्यत्वासिद्धावन्तर्भाव वदन्ति तेषामयमाशय —व्याप्तिहि साध्यसम्बन्धिताऽवच्छेदकरूपा गमकधर्मस्य साध्य सम्बन्धिताऽनवच्छेदक अतो नीलधूमत्वाद साध्यसम्बन्धित ऽनवच्छेदकत्वान्न व्याप्ति स्वरूपत्वम् तथा च साध्यताऽवच्छेदकाभावादिरेव साधनताऽवच्छेदके व्याप्यता ऽनवच्छेदकत्वमपि भवति व्याप्यत्वासिद्धिरिति ॥ ४९ ॥

क्रमप्राप्तमतीतकाल लक्षयति।—अतीतकालस्य समानार्थकत्वात् काला तीतशब्देनाहम् कालस्य साधनकालस्यात्ययेऽभावेऽपदिष्ट प्रयुक्तो हेतु एतेन साध्याभावप्रमा लक्षणार्थ इति सूचितम्। साध्याभावनिर्णये सति साधनासम्भवादयमेव बाधितसाध्यक इति गीयते तथा वह्निरनुष्ण कृतकत्वादित्यादौ। न च बाधे

शब्दः संयोगव्यङ्ग्यत्वात् रूपवत्। प्रागूर्ध्वञ्च व्यक्तेरवस्थितं रूपं प्रदीपघटसंयोगेन व्यज्यते। तथा च शब्दोऽप्यवस्थितो भेरीदण्डसंयोगेन व्यज्यते दारुपरशुसंयोगेन वा। तस्मात् संयोगव्यङ्ग्यत्वान्नित्यः शब्द इत्ययमहेतुः कालात्ययापदेशात्। व्यञ्जकस्य संयोगस्य काले न व्यङ्ग्यस्य रूपस्य व्यक्तिरत्येति। सति प्रदीपघटसंयोगे रूपस्य ग्रहणं भवति। न निवृत्ते संयोगे रूपं गृह्यते। निवृत्ते दारुपरशुसंयोगे दूरस्थेन शब्दः श्रूयते। विभागकाले सेयं शब्दव्यक्तिः संयोगकालमत्येतीति न संयोगनिमित्ता भवति। कस्मात्?—कारणाभावाद्धि कार्याभाव इति। एवमुदाहरणसाधर्म्यस्याभावादसाधनमयं हेतुर्हेत्वाभास इति।

अवयवविपर्यासवचनं न सूत्रार्थः। कस्मात्?—

यस्य येनार्थसम्बन्धो दूरस्थस्यापि तस्य सः।
अर्थतो ह्यसमर्थानामानन्तर्यमकारणम्॥

इत्येतद्वचनाद् विपर्यासेनोक्तो हेतुरुदाहरणसाधर्म्यात् तथा वैधर्म्यात् साधनं हेतुलक्षणं न जहाति। अजहद्धेतुलक्षणं न हेत्वाभासो भवतीति। अवयवविपर्यासवचनमप्राप्तकालमिति निग्रहस्थानमुक्तम्। तदेवेदं पुनरुच्यत इति, अतस्तन्न सूत्रार्थः॥ ५०॥

आवश्यकस्य व्यभिचारस्वरूपासिद्ध्यन्यतरस्यैव दोषत्वमुचितम् इति वाच्यम् तदप्रतिसन्धानेन बाधस्य दोषत्वाऽऽवश्यकत्वात् उपधेयसङ्करेऽप्युपाधेरसङ्करात् उत्पत्तिकालावच्छिन्नो घटो गन्धवान् शिखरावच्छिन्नः पर्वतो वह्निमानित्यादावसङ्कराच्च साध्याभाववत्पक्षताऽवच्छेदकावच्छिन्नपक्षत्वस्य तत्र सत्त्वात्। परन्तु घटः सकर्तृकः कार्यत्वादित्यादौ यत्र बाधज्ञानोपनीतमेकमात्रकर्तृकत्वं भासते इत्युच्यते तत्र तदभावादसङ्कीर्णोदाहरणाभाव एवालम्॥ ५ ॥

समाप्तं हेत्वाभासप्रकरणम्।

अथ छलम् —

**वचनविघातोऽर्थविकल्पोपपत्त्या छलम् ॥ ५१ ॥**

न सामान्यलक्षणे छलं शक्यमुदाहर्त्तुम्। विभागे तूदाहरणानि ॥ ५१ ॥

विभागश्च—

**तत् त्रिविधं, वाक्छलं सामान्यच्छलमुपचारच्छलञ्च ॥ ५२ ॥**

तेषाम् —

**अविशेषाभिहितेऽर्थे वक्तुरभिप्रायादर्थान्तरकल्पना वाक्छलम् ॥ ५३ ॥**

नवकम्बलोऽयं माणवक इति प्रयोगः। अत्र नवः कम्बलोऽस्येति वक्तुरभिप्रायः। विग्रहे तु विशेषः, न समासे। तत्रायं छलवादी वक्तुरभिप्रायादविवक्षितमन्यमर्थं नव कम्बला अस्येति तावदभिहितं भवतीति कल्पयति, कल्पयित्वा चासम्भवेन

---

क्रमप्राप्तं छलं लक्षयति।—परस्य वाद्यभिमतस्य यो विकल्पो विरुद्धं कल्पनं अर्थान्तरकल्पनेति यावत् तदुपपत्त्या युक्तिविशेषेण या वचनस्य वाद्युक्तस्य विघातो दूषणं तच्छलमित्यर्थः। वक्तृतात्पर्य्याविषयार्थकल्पनेन दूषणाभिधानमिति फलितम्, तात्पर्य्याविषयत्वं विशेषणे विशेष्ये संसर्गे वा। यथा नेपालादागतोऽयं नवकम्बलवत्त्वादित्यत्र नवसङ्ख्यापरत्वकल्पनयाऽसिद्ध्यभिधानम्, सर्वं प्रमेयं धर्मत्वादित्यत्र पुण्यत्वार्थकल्पनया भागासिद्ध्यभिधानम्, वह्निमान् धूमादित्यत्र धूमावयवे व्यभिचाराभिधानम् ॥ ५१ ॥

लक्षितं छलं विभजते।—तत्र वाक्छलं लक्षयति।—यत्र शक्यार्थद्वये सम्भवति एकार्थनिर्णायकविशेषाभावेनाभिप्रेतशक्यार्थकल्पनेन दूषणाभिधानं तद्वाक्छलम्। लक्षणन्तु—शक्त्या एकार्थशाब्दबोधतात्पर्य्यकशब्दस्य शक्त्याऽर्थान्तरतात्पर्य्यकत्वकल्पनया दूषणाभिधानम्। यथा नेपालादागतोऽयं नवकम्बलवत्त्वादित्युक्ते कुतोऽस्य

प्रतिषेधति—एकोऽस्य कम्बलः कुतो नव कम्बला ? इति। तादिदं सामान्यशब्दे वाचि छलं वाक्छलमिति। * अस्य प्रत्यवस्थानम्। * * सामान्यशब्दस्यानेकार्थत्वेऽन्यतराभिधान कल्पनायां विशेषवचनम्। * नवकम्बलक इत्यनेकार्थस्याभिधानम्,—नव कम्बलोऽस्य नवकम्बला अस्येति। एतस्मिन् प्रयुक्ते येयं कल्पना नव कम्बला अस्येत्येतद्भवताऽभिहितं तच्च न सम्भवतीति। एतस्यामन्यतराभिधानकल्पनायां विशेषो वक्तव्यः। यस्माद्विशेषोऽर्थविशेषेषु विज्ञायते, अयमर्थोऽनेनाभिहित इति। स च विशेषो नास्ति। तस्मान्मिथ्याऽभियोगमात्रमेतदिति। * प्रसिद्धश्च लोके शब्दार्थसम्बन्धोऽभिधानाभिधेयनियमनियोगः। अस्याभिधानस्यायमर्थोऽभिधेय इति समानः सामान्यशब्दस्य, विशेषो विशिष्टशब्दस्य। प्रयुक्तपूर्वाश्चेमे शब्दा अर्थे प्रयुज्यन्ते नाप्रयुक्तपूर्वाः। प्रयोगश्चार्थसम्प्रत्ययार्थः। अर्थप्रत्ययाच्च व्यवहार इति। तत्रैवमर्थवत्यर्थ शब्दप्रयोगसामर्थ्यात् सामान्यशब्दस्य प्रयोगनियमः। अजां ग्रामं नय, सर्पिराहर ब्राह्मणं भोजयेति सामान्यशब्दाः सन्तोऽर्थावयवेषु प्रयुज्यन्ते, सामर्थ्याद् यत्रार्थक्रियादेशना सम्भवति तत्र प्रवर्त्तन्ते, नार्थसामान्ये, क्रियादेशनाऽसम्भवात्। एवमयं सामान्यशब्दो नवकम्बलक इति योऽर्थः सम्भवति, नव कम्बलोऽस्येति, तत्र प्रवर्त्तते। यस्तु न सम्भवति नव कम्बला अस्येति, तत्र न प्रवर्त्तते। सोऽयमनुपपद्यमानार्थकल्पनया परवाक्योपालम्भस्ते न कल्पत इति ॥ ५३ ॥

---

नवसङ्ख्याका कम्बला ? इति। एवं गौर्धावतीत्युक्ते कुतो वारणस्य विषाणम् ? गजो विषाणीत्युक्ते कुतो गजस्य शृङ्गम् ? श्वेतो धावतीति श्वेतरूपवदभिप्रायेणोक्ते श्वेतो न धावतीत्यभिधानमित्यादिकमूह्यम् ॥ ५३ ॥

**सम्भवतोऽर्थस्यातिसामान्ययोगादसम्भूतार्थकल्पना सामान्यच्छलम्॥ ५४॥**

अहो खल्वसौ ब्राह्मणो विद्याऽऽचरणसम्पन्न इत्युक्ते कश्चिदाह—सम्भवति हि ब्राह्मणे विद्याऽऽचरणसम्पत् इत्यस्य वचनस्य विघातोऽर्थविकल्पोपपत्त्याऽसम्भूतार्थकल्पनया क्रियते। यदि ब्राह्मणे विद्याऽऽचरणसम्पत् सम्भवति व्रात्येऽपि सम्भवेत। व्रात्योऽपि ब्राह्मणः सोऽप्यस्तु विद्याऽऽचरणसम्पन्न इति। यद्विवक्षितमर्थमाप्नोति चात्येति च तदतिसामान्यम्। यथा ब्राह्मणत्वं विद्याऽऽचरणसम्पदं क्वचिदाप्नोति क्वचिदत्येति। सामान्यनिमित्तं छलं सामान्यच्छलमिति। * अस्य च प्रत्यवस्थानम्। * * अविवक्षितहेतुकस्य विषयानुवादः प्रशंसार्थत्वात् वाक्यस्य तत्रासम्भूतार्थकल्पनाऽनुपपत्तिः। * यथा सम्भवन्त्यस्मिन् क्षेत्रे शालय इति। अनिराकृतमविवक्षितञ्च बीजजन्म। प्रवृत्तिविषयस्तु क्षेत्रं प्रशस्यते। सोऽयं क्षेत्रानुवादो नास्मिन् शालयो विधीयन्त इति। बीजात्तु शालिनिर्वृत्तिः सती न विवक्षिता। एवं सम्भवति ब्राह्मणे विद्याऽऽचरणसम्पदिति। सम्पद्विषयो ब्राह्मणत्वं न सम्पद्धेतुः। न चात्र हेतुर्विवक्षितः। * विषयानुवादस्त्वयं प्रशंसार्थत्वाद्वाक्यस्य। * सति ब्राह्मणत्वे सम्पद्धेतुः समर्थ इति विषयञ्च प्रशंसता वाक्येन यथा हेतुतः फलनिर्वृत्तिर्न प्रत्याख्यायते। तदेवं सति वचनविघातोऽसम्भूतार्थकल्पनया नोपपद्यत इति॥ ५४॥

सामान्यच्छलं लक्षयति।—सामान्याविशिष्टसम्भवदर्थाभिप्रायेणोक्तस्य अतिसामान्ययोगादसम्भवदर्थकत्वकल्पनया दूषणाभिधानं सामान्यच्छलम्। यथा ब्राह्मणोऽयं विद्याऽऽचरणसम्पन्न इत्युक्ते ब्राह्मणत्वेन विद्याऽऽचरणसम्पदं साधयतीति कल्पयित्वा परो वदति कुतो ब्राह्मणत्वेन विद्याऽऽचरणसम्पत्? व्रात्ये व्यभिचारात्॥ ५४॥

धर्मविकल्पनिर्देशेऽर्थसद्भावप्रतिषेध उपचारच्छलम् ॥ ५५ ॥

अभिधानस्य धर्मो यथाऽर्थप्रयोगः। धर्मविकल्पोऽन्यत्र दृष्टस्यान्यत्र प्रयोगः तस्य निर्देशे धर्मविकल्पनिर्देशे। यथा—मञ्चाः क्रोशन्तीति। अर्थसद्भावेन प्रतिषेधः। मञ्चस्थाः पुरुषाः क्रोशन्ति न तु मञ्चाः क्रोशन्ति। का पुनरत्रार्थविकल्पोपपत्तिः? अन्यथा प्रयुक्तस्यान्यथाऽर्थकल्पनम्। भक्त्या प्रयोगे प्राधान्येन कल्पनम्। उपचारविषयं छलम् उपचारच्छलम् उपचारो नीतार्थः। सहचरणादिनिमित्तेनातद्भावे तद्वदभिधानमुपचार इति। अत्र समाधिः प्रसिद्धाप्रसिद्धे प्रयोगे वक्तुर्यथाऽभिप्रायं शब्दार्थयोरनुज्ञा प्रतिषेधो वा न छन्दतः। प्रधानभूतस्य शब्दस्य भाक्तस्य च गुणभूतस्य प्रयोग उभयोर्लोकसिद्धः। सिद्धे प्रयोगे यथा वक्तुरभिप्रायः तथा शब्दार्थावनुज्ञेयौ,प्रतिषेध्यौ वा, न छन्दतः। यदि वक्ता प्रधानशब्दं प्रयुङ्क्ते यथा भूतस्याभ्यनुज्ञा, प्रतिषेधो वा न छन्दतः। अथ गुणभूतं तदा गुणभूतस्य। यत्र तु वक्ता गुणभूतं शब्दं प्रयुङ्क्ते प्रधानभूतमभिप्रेत्य परः प्रतिषेधति, स्वमनीषया प्रतिषेधोऽसौ भवति, न परोपालम्भ इति ॥ ५५ ॥

उपचार एव भवतीति।—शब्दस्यार्थेन सम्बन्धः तस्य विकल्पो विविधं कल्पः शक्तेर्भेदादन्यतरकल्पः तथा च शक्तिलक्षणयोरेकतरवृत्त्या प्रयुक्ते शब्दे तदपरवृत्त्या यः प्रतिषेधः स उपचारच्छलम् यथा मञ्चाः क्रोशन्ति नीलो घट इत्यादौ मञ्चस्थाः एव क्रोशन्ति न तु मञ्चाः एव घटस्य कथं नीलरूपाभेदः। एवम् अनित्य इति शक्त्या प्रयुक्ते अमुम्... कथं नित्य? इति प्रतिषेधोऽप्युपचारच्छलम् वाऽभिप्रेतार्थस्यादूषणेन छलस्यास्य तरलम्। न च शिष्टलोकाचारकप्रयोगादिदं एवापराधः स्यात् इति वाच्यम् तन्नेदमबोधकतया प्रसिद्धस्य शब्दस्य प्रयोगे वादिनो ऽनपराधात्। अन्यथा पर्वतो वह्निमानित्युक्ते पर्वतोऽयं कथमवह्निमान्? इत्यादिदूषणेनानुमानादेश्छेदः स्यात् ॥ ५५ ॥

**वाक्छलमेवोपचारच्छलं तदविशेषात् ॥ ५६ ॥**

न वाक्छलादुपचारच्छलं भिद्यते तस्याप्यर्थान्तरकल्पनाया अविशेषात। इहापि स्थान्यर्थो गुणशब्दः प्रधानशब्दः स्थानार्थ इति कल्पयित्वा प्रतिषिध्यत इति ॥ ५६ ॥

**न तदर्थान्तरभावात् ॥ ५७ ॥**

न वाक्छलमेवोपचारच्छलम तस्यार्थसद्भावप्रतिषेधस्यार्थान्तरभावात। कुत ?—अर्थान्तरकल्पनातोऽन्यार्थान्तरसद्भावकल्पना अन्यार्थसद्भावप्रतिषेध इति ॥ ५७ ॥

**अविशेषे वा किञ्चित्साधर्म्यादेकच्छलप्रसङ्गः ॥५८॥**

छलस्य द्वित्वमभ्यनुज्ञाय त्रित्वं प्रतिषिध्यते किञ्चित्साधर्म्यात। यथा चायं हेतुस्त्रित्वं प्रतिषेधति, तथा द्वित्वमप्यनुज्ञातं प्रतिषेधति। विद्यते हि किञ्चित्साधर्म्यं द्वयोरपीति। अथ द्वित्वं किञ्चित्साधर्म्यान्न निवर्त्तते त्रित्वमपि न निवर्त्स्यतीति ॥ ५८ ॥

प्रसङ्गाच्छलं परीक्षितुं पूर्वपक्षयति। शब्दस्यार्थान्तरकल्पनाऽविशेषाद्वाक्छलमेवोपचारच्छलं स्यात इति छलस्य द्वित्वमेव न तु त्रित्वमिति शङ्काऽर्थः ॥ ५६ ॥

समाधत्ते।—उपचारच्छलस्य वाक्छलाभेदो न तयोरर्थान्तरभावात भिन्नत्वात भिन्नतया प्रमाणसिद्धत्वादिति फलितार्थः पूर्वोक्तभेदकधर्मेण भेदसम्भवेऽपि यत्किञ्चिद्धर्मेणाभेदे सामान्यधर्मेणाभेदस्य सर्वत्र सम्भवात् विभागं कुत्रापि न स्यादिति ॥ ५७ ॥

विपक्षे बाधकमभिप्रेत्याऽऽह।—यत्किञ्चिद्धर्मादविशेषे किञ्चित्साधर्म्याच्छलत्वादिरूपाच्छलस्यैक्यं स्यात् न तु त्वदाभिमतं द्वित्वमपीति भावः ॥ ५८ ॥

समाप्तं छलप्रकरणम्।

अत ऊर्ध्वम् —

**साधर्म्यवैधर्म्याभ्यां प्रत्यवस्थानं जातिः ॥ ५९ ॥**

प्रयुक्ते हि हेतौ यः प्रसङ्गो जायते स जातिः। स च प्रसङ्गः साधर्म्यवैधर्म्याभ्यां प्रत्यवस्थानमुपालम्भः प्रतिषेध इति। उदाहरणसाधर्म्यात् साध्यसाधनं हेतुरित्यस्योदाहरणसाधर्म्येण प्रत्यवस्थानम्। उदाहरणवैधर्म्यात् साध्यसाधनं हेतुरित्यस्योदाहरणवैधर्म्येण प्रत्यवस्थानम्। प्रत्यनीकभावाज्जायमानोऽर्थो जातिरिति ॥ ५९ ॥

**विप्रतिपत्तिरप्रतिपत्तिश्च निग्रहस्थानम् ॥ ६० ॥**

विपरीता कुत्सिता वा प्रतिपत्तिर्विप्रतिपत्तिः। विप्रतिपद्यमानः पराजयं प्राप्नोति, निग्रहस्थानं खलु पराजयप्राप्तिः। अप्रतिपत्तिस्त्वारम्भविषये न प्रारम्भः। परेण स्थापितं न प्रतिषेधति प्रतिषेधं वा नोद्धरति। असमासाच्च नैते एव निग्रहस्थाने इति ॥ ६० ॥

क्रमप्राप्तां जातिं लक्षयति।—साधर्म्यवैधर्म्याभ्यामिति सावधारणो निर्देशः तेन व्याप्तिनिरपेक्षाभ्यां साधर्म्यवैधर्म्याभ्यां प्रत्यवस्थानं दूषणाभिधानं जातिरित्यर्थः। यद्युभाभ्यां प्रत्यवस्थानस्य प्रत्येकप्रत्यवस्थानेऽव्याप्तिः एकप्रत्यवस्थानस्य लक्षणत्वे ऽपरप्रत्यवस्थानेऽव्याप्तिः न वाऽन्यतरप्रत्यवस्थानं नियतं सर्वत्र जातावभावात् तथाऽपि व्याप्तिनिरपेक्षतया दूषणाभिधानमित्येव वाच्यं तत्र च सन्दर्भेण दूषणासमर्थत्वं स्वव्याघातकत्वं वा दर्शितं तथा च छलादिभिन्नदूषणासमर्थमुत्तरं स्वव्याघातकमुत्तरं वा जातिरिति सूचितं साधर्म्यसमादिचतुर्विंशत्यन्यान्यत्वं तदर्थ इत्यपि वदन्ति ॥ ५९ ॥

क्रमप्राप्तं निग्रहस्थानं लक्षयति।—निग्रहस्य खलीकारस्य स्थानम् तच्च विप्रतिपत्तिरप्रतिपत्तिश्च। विप्रतिपत्तिर्विरुद्धा प्रतिपत्तिः अप्रतिपत्तिः प्रकृताज्ञानम् यद्यप्येतदन्यतरत् परनिष्ठं नोद्भावयितुमर्हं प्रतिज्ञाहान्यादिनिग्रहस्थानत्वानुपपत्तिश्च तथाऽपि विप्रतिपत्त्यप्रतिपत्त्यन्यतरानुमापकधर्मवत्त्वं तदर्थः उद्देश्यानुगुणसम्यग्ज्ञानाभाववल्लिङ्गत्वं प्रतिज्ञाहान्याद्यन्यतमत्वं वा लक्षणमित्यपि वदन्ति ॥ ६० ॥

किं पुनर्दृष्टान्तवज्जातिनिग्रहस्थानयोरभेद ? अथ सिद्धान्तवद्भेद ?—इत्यत आह —

**तद्विकल्पाज्जातिनिग्रहस्थानबहुत्वम ॥ ६१ ॥**

तस्य साधर्म्यवैधर्म्याभ्यां प्रत्यवस्थानस्य विकल्पाज्जातिबहुत्वम। तयोश्च विप्रतिपत्त्यप्रतिपत्त्योर्विकल्पान्निग्रहस्थानबहुत्वम। नानाकल्पो विकल्प विविधो वा कल्पो विकल्प। तत्राननुभाषणमज्ञानमप्रतिभा विक्षेपो मतानुज्ञा पर्य्यनुयोज्योपेक्षणमित्यप्रतिपत्तिर्निग्रहस्थानम। शेषस्तु विप्रतिपत्तिरिति। इमे प्रमाणादय पदार्था उद्दिष्टा यथोद्देशं लक्षिता यथालक्षणं परीक्षिष्यन्त इति त्रिविधाऽस्य शास्त्रस्य प्रवृत्ति र्वेदितव्येति ॥ ६१ ॥

इति वात्स्यायनीये न्यायभाष्ये प्रथमाध्यायस्य द्वितीयमाह्निकम।

समाप्तश्चायं प्रथमोऽध्याय ॥ १ ॥

जातिनिग्रहस्थानयोर्विभागो नास्तीति भ्रमो मा भूदित्यत आह।—तद्विकल्पात् साधर्म्यादिना प्रत्यवस्थानस्य विप्रतिपत्त्यादिनिग्राहकव्यापारस्य च विकल्पाद्भेदान्नानाप्रकारत्वादिति यावत्। इत्थञ्च तयोर्बहुत्वेऽपि प्रमाणादिपरीक्षाविषयकाकाङ्क्षानिवृत्त्यर्थं प्रतिबन्धे सत्यग्रे तद्विभागः क्रियत इति भाव ॥ ६१ ॥

समाप्तं पुरुषाशक्तिलिङ्गदोषसामान्यलक्षणप्रकरणम्।

प्रथमाध्यायस्य द्वितीयमाह्निकम् ॥ २ ॥

इति श्रीविश्वनाथभट्टाचार्यकृतन्यायसूत्रवृत्तौ प्रथमाध्याय

वृत्तिः समाप्ता ॥ १ ॥

## द्वितीयाध्यायस्य प्रथमाऽऽह्निकम।

अत ऊर्द्ध प्रमाणादिपरीक्षा, सा च विमृश्य पक्षप्रति पक्षाभ्यामर्थावधारणं निर्णय इत्यग्रे विमर्श एव परीक्ष्यते।

**समानानेकधर्म्माध्यवसायादन्यतरधर्म्माध्यवसायाद्वा न संशय ॥ १ ॥**

समानस्य धर्मस्याध्यवसायात संशय न धर्ममात्रात। अथवा समानमनयोधर्ममुपलभे इति धर्मधर्मिग्रहणे संशयाभाव इति। अथवा समानधर्माध्यवसायादर्थान्तरभूते धार्मणि

प्रमाण प्रथि दीभाववान्पु परीक्षित।

इति द्वितीयमध्याय भासमानमह भर्ज ॥ १ ॥

अथ प्रमाणादिषु लक्षितेषु परीक्षणीयेषु संशय विना परीक्षाया असम्भवात् । संशय एव परीक्षणीय शिष्यजिज्ञासाऽनुसारात सूचीकटाहन्यायाच्च अत संशयपरीक्षाया प्रमाणादिपरीक्षापयोगित्वात् प्रमाणपरीक्षया सार्थाथ इति वदन्ति। स्त तन्तु कलस्य परीक्षितत्वात तृतीयचतुर्था प्रमेयस्य पञ्चमे च जाति परीक्षणस्य सत्वात तदतिरिक्तयावत्य थपरीक्षाध्यायाथ। प्रयोजनादिपरीक्षाया अप्यवातदर्शन कारणमात्रत्वात् तत्र विभागसापेक्षप्रमाणपरीक्षाऽतिरिक्तोक्तयावत्पदार्थ परीक्षा प्रथमाऽऽह्निकाथ तत्र च नव प्रकरणानि तत्राऽऽदौ संशयपरीक्षाप्रकरणम अन्यानि यथायथ वक्ष्यन्ते तत्र संशयपरीक्षणाय पूर्वपक्षसूत्रम्।

अत्र सूत्रकृता संशयस्यादर्शनात् संशयपरीक्षाया संशयो नाङ्गम अनवस्थाभयात इत्याशय सूत्रकृतो वर्णयन्ति तदसत्। न ह्यत्र संशयस्वरूप परीक्ष्यते येनानवस्था स्यात अपि तु लक्षणसूत्रोक्त संशयकारणम। तथा च संशय समानधर्मदर्शनादिजन्या न वेति संशय सम्भवत्येव। परन्तु सूत्रकृतो निर्णयसत्त्वात् पूर्वपक्षनिरास मात्रस्यापेक्षणात् संशयो न दर्शित एवमेव प्रमाणादिपरीक्षायामपि अत एवा भिहित च — शास्त्र वादे च विमर्षवर्जम इति। तत्र समानादिधर्मदर्शनान्न संशय प्रत्यक्ष व्यभिचारात अन्यतरत्वेनानुपलब्धितत्त्वदर्शनादपि न संशय न हि स्थाणुत्वमसमानधर्मोऽयं पुरुषधर्मसमानधर्मोऽयमिति वा जानन स्थाणुर्न वेति सन्दिग्ध समानत्वस्य भेदगर्भत्वात्, भिन्नधर्मत्वेन ज्ञाते तद्भेदग्रहस्यैव सम्भवात्। यद्वा —

संशयोऽनुपपन्न इति। न जातु रूपस्यार्थान्तरभूतस्याध्यवसायादर्थान्तरभूते स्पर्शे संशय इति। अथवा नाध्यवसायादर्थावधारणादनवधारणज्ञानं संशय उपपद्यते, कार्य्यकारणयोः सारूप्याभावादिति। एतेनानेकधर्माध्यवसायादिति व्याख्यातम्। अन्यतरधर्माध्यवसायाच्च संशयो न भवति। ततो ह्यन्यतरावधारणमेवेति ॥ १ ॥

## विप्रतिपत्त्यव्यवस्थाऽध्यवसायाच्च ॥ २ ॥

न विप्रतिपत्तिमात्रादव्यवस्थामात्राद्वा संशयः। किं तर्हि? विप्रतिपत्तिमुपलभमानस्य संशयः। एवमव्यवस्थायामपीति। अथवाऽस्त्यात्मेत्येके नास्त्यात्मेत्यपरे मन्यन्त इत्युपलब्धेः कथं संशयः स्यादिति। अथोपलब्धिरव्यवस्थिता अनुपलब्धिश्चाव्यवस्थितेति विभागेनाध्यवसिते संशयो नोपपद्यत इति ॥ २ ॥

## विप्रतिपत्तौ च सम्प्रतिपत्तेः ॥ ३ ॥

याञ्च विप्रतिपत्तिं भवान् संशयहेतुं मन्यते, सा सम्प्रतिपत्तिः। सा हि द्वयोः प्रत्यनीकधर्म्मविषया। तत्र यदि विप्रतिपत्तेः संशयः, सम्प्रतिपत्तेरेव संशय इति ॥ ३ ॥

---

समानानेकधर्मोपपत्तेरिति लक्षणसूत्रे उपपत्तिपदं स्वरूपपरमिति भ्रान्तस्येयं शङ्का तथा चायमर्थः न संशयः समानधर्मादितः स्वरूपत इति शेषः यत्र समानधर्मादेरध्यवसायादन्यतरत्वेनानुगतीकृततदध्यवसायाद्वा संशयः अन्यथा संशयस्य सार्वत्रिकत्वाऽऽपत्तेः ॥ १ ॥

विप्रतिपत्त्यादिजन्यसंशयस्य प्रतिक्षिपति।—न संशय इत्यनुवर्त्तते विप्रतिपत्तेरुपलब्ध्यव्यवस्थाया अनुपलब्ध्यव्यवस्थायाश्च न संशयजनकत्वम् प्रत्येकं व्यभिचारादित्यर्थः यद्वा —स्वरूपसद्विप्रतिपत्त्यादितो न संशयः किन्तु तदध्यवसायादित्यर्थः ॥ २ ॥

विप्रतिपत्तिजसंशयमात्रप्रतिक्षेपाय सूत्रान्तरम्। विप्रतिपत्तौ न संशयहेतुत्वम् सम्प्रतिपत्तेः निश्चयात् वादिनोर्मध्यस्थस्य च निश्चयसत्त्वात् सति च निश्चये संशयानुदयादिति भावः ॥ ३ ॥

**अव्यवस्थाऽऽत्मनि व्यवस्थितत्वाच्चाव्यवस्थाया ॥ ४ ॥**

न संशय । यदि तावदियमव्यवस्था आत्मन्येव व्यवस्थिता व्यवस्थानादव्यवस्था न भवतीत्यनुपपन्न संशय । अथाव्यवस्थाऽऽत्मनि न व्यवस्थिता एवमतादात्म्यादव्यवस्था न भवतीति संशयाभाव इति ॥ ४ ॥

**तथाऽत्यन्तसंशयस्तद्धर्मसातत्योपपत्ते ॥ ५ ॥**

येन कल्पेन भवान् समानधर्मोपपत्त संशय इति मन्यते तेन खल्वत्यन्तसंशय प्रसज्यते । समानधर्मोपपत्तेरनुच्छेदात् संशयानुच्छेद । नायमतद्धर्मा धर्मी विमृश्य(श्य)मानो गृह्यते । सततन्तु तद्धर्मा भवतीति ॥ ५ ॥

अस्य प्रतिषेधप्रपञ्चस्य संक्षेपेणोद्धार —

**यथोक्ताध्यवसायादेव तद्विशेषापेक्षात् संशये नासंशयो नात्यन्तसंशयो वा ॥ ६ ॥**

संशयानुपपत्ति संशयानुच्छेदश्च न प्रसज्यते । कथम् ?—

उपपत्त्यनुपपत्त्यव्यवस्थात संशयहेतोरनिरासाय सूत्रम् । उपलब्ध्यव्यवस्थाया अनुपलब्ध्यव्यवस्थाया संशयजनकत्वं तदा स्यात् यदि स्वात्मन्यप्यव्यवस्थितत्वं स्यात् न त्वेवम् तथा च स्वात्मनि व्यवस्थिताऽव्यवस्था कथमव्यवस्थात्वमित्यर्थ ॥ ४ ॥

ननु अव्यवस्था प्रामाण्यसंशय तस्य च न स्वसंशयरूपत्वम् संशयस्य विषयव्यभिचरितत्वात् तस्य चान्यसंशयजनकत्वं न विरुद्धम् । अतो दूषणान्तरमाह —तथेत्यादि । तथा सति अव्यवस्थाया हेतुत्वे सति तथाशब्दोऽयं न सूत्रान्तर्गत इत्यपि न भाष्यस्थ इत्यन्ये अत्यन्तसंशय संशयानुच्छेद स्यात् तद्धर्मस्य तज्जनकस्य ज्ञानत्वादि साधारणधर्मज्ञानस्य सातत्योपपत्ते सर्वदा सम्भवात् अथ ज्ञानत्वादिसाधारणधर्मदर्शनेऽपि कारणान्तरविलम्बान्न सर्वत्र प्रामाण्यसंशय इति यदि ब्रूयात् तदा सर्वत्र विषयसंशयेऽपि हेतुत्वमस्त्विति किं प्रामाण्यसंशयस्य साधारणधर्मदर्शनादेवा संशयहेतुत्वेन इति भाव ॥ ५ ॥

सिद्धान्तमाह ।—यथोक्ताध्यवसायात् साधारणादिधर्मदर्शनात् तस्य पुरुष

यत्तावत्समानधर्माध्यवसाय: संशयहेतुर्न समानधर्ममात्रमिति।* एवमेतत् कस्मादेव नोच्यत इति?—विशेषापेच इति वचनात् सिद्धे। विशेषस्यापेक्षाऽऽकाङ्क्षा सा चानुपलभ्यमाने विशेषे समर्था न चोक्तं समानधर्मापेच इति, समाने च धर्मे कथमाकाङ्क्षा न भवेत् यद्ययं प्रत्यक्ष: स्यात्। एतेन सामर्थ्येन विज्ञायते समानधर्माध्यवसायादिति * उपपत्तिवचनाद्वा * समानधर्मोपपत्तेरित्युच्यते। न चान्या सद्भावसंवेदनादृते समानधर्मोपपत्तिरस्ति। अनुपलभ्यमानसद्भावो हि समानो धर्मो विद्यमानवद्भवतीति। * विषयशब्देन वा विषयिणः प्रत्ययस्याभिधानम्। यथा लोके धूमेनाग्निरनुमीयत इत्युक्ते धूमदर्शनेनाग्निरनुमीयत इति ज्ञायते, कथम्? दृष्ट्वा हि धूममग्निमनुमिनोति, नादृष्ट्वा। न च वाक्ये दर्शनशब्द: श्रूयते। अनुजानाति च वाक्यस्यार्थप्रत्यायकत्वम्। तेन मन्यामहे विषयशब्देन विषयिणः प्रत्ययस्याभिधानं बोद्धाऽनुजानाति। एवमिहापि समानधर्मशब्देन समानधर्माध्यवसायमाहेति। यदुक्तं समानमनयोर्धर्ममुपलभत इति धर्मधर्मिग्रहणे संशयाभाव इति। पूर्वदृष्टविषयमेतत्। * यावहमर्थौ पूर्वमद्राक्षं, तयो: समानं धर्ममुपलभे विशेषं नोपलभे इति कथं नु विशेषं पश्येयं, ये(त)नान्यतरमवधारयेयम्? इति। न चैतत्समानधर्मोपलब्धौ धर्मधर्मिग्रहणमात्रेण निवर्त्तत इति। यच्चोक्तं नार्थान्तराध्यवसायादन्यत्र संशय इति। यो ह्यर्थान्तराध्यवसायमात्रं संशयहेतुमुपाददीत, स एवं वाच्य इति। यत्पुनरेतत्कार्य्यकारणयो: सारूप्याभावादिति। * कारणस्य भावाभावयो: कार्य्यस्य भावाभावौ कार्य्यकारणयो: सारूप्यम् यस्योत्पादात् यदुत्पद्यते,

त्वादि …ना विशेष इतरत्वावतको धम त… पगत इत्… तत विशेषादशना दित्यर्थ। तथा च विशेषानुपलम्भसहितसाधारणधर्मदर्शनादेत संशय स्वीकृत न

यस्य चानुत्पादात् यन्नोत्पद्यते तत्कारणं कार्य्यमितरत् इत्येतत साकल्यम्। अस्ति च संशयकारणे संशये चैतदिति। एतेनानेक धर्माध्यवसायादिति प्रतिषेधः परिहृत इति। यत्पुनरेतदुक्तं विप्रतिपत्त्यव्यवस्थाऽध्यवसायाच्च न संशय इति। पृथक्प्रवादयो-र्व्याहतमर्थमुपलभे, विशेषञ्च न जानामि नोपलभे येनान्य तरमवधारयेयम। तत कोऽत्र विशेषः स्यात् येनैकतरमव धारयेयम ? इति संशयो विप्रतिपत्तिजनितोऽयं(ऽर्थः) न शक्या विप्रतिपत्तिः सम्प्रतिपत्तिमात्रेण निवर्त्तयितुमिति। एवमुप लब्ध्यनुपलब्ध्यव्यवस्थाकृते संशये वेदितव्यमिति। यत पुनरेतत विप्रतिपत्तौ च सम्प्रतिपत्तेरिति। * विप्रतिपत्तिशब्दस्य योऽर्थः तदध्यवसायो विशेषापेक्षः संशयहेतु, तस्य च समा ख्याऽन्तरेण न निवृत्तिः * समानेऽधिकरणे व्याहतार्थौ प्रवादौ विप्रतिपत्तिशब्दस्यार्थः तदध्यवसायश्च विशेषापेक्षः संशयहेतु न चास्य सम्प्रतिपत्तिशब्दे समाख्याऽऽन्तरे योज्यमाने संशय हेतुत्वं निवर्त्तते। तदिदमकृतबुद्धिसम्मोहनमिति। यत्पुन रव्यवस्थाऽऽत्मनि व्यवस्थितत्वाच्चाव्यवस्थाया इति। संशयहेतो रर्थस्याप्रतिषेधादव्यवस्थाऽभ्यनुज्ञानाच्च निमित्तान्तरेण शब्दा न्तरकल्पना व्यर्था। * अव्यवस्था खलु व्यवस्था न भवति, अव्यवस्थाऽऽत्मनि व्यवस्थितत्वादिति। नानयोरुपलब्ध्यनुपलब्ध्यो सदसद्विषयत्वं विशेषापेक्षं संशयहेतुर्न भवतीति प्रतिषिध्यते। यावता चाव्यवस्थाऽऽत्मनि व्यवस्थिता न तावताऽऽत्मानं जहाति। तावता ह्यनुज्ञाता भवत्यव्यवस्था। एवमियं क्रियमाणाऽपि शब्दान्तरकल्पना नार्थान्तरं साधयतीति। यत्

कारणाभावादसंशयः न वा यात्किञ्चित्का धर्मत्वादत्यन्तसंशय इत्यर्थः साधारणधर्म दर्शनादेश्च संशयविशेषे जनकत्वात् संशयलाभा-न्यत्र प्र त व्यभिचारऽपि न क्षति विप्रतिपत्तौ च व दिशाक्याभ्यां मध्यस्थस्यैव संशयोपगमात। यत्रोक्तं समानधर्मादेश

पुनरेतत तथाऽत्यन्तसंशयस्तद्धर्मसातत्योपपत्तेरिति। नाय समानधर्मादिभ्य एव संशय किं तर्हि ?—तत्तद्विषयाध्यव सायाद्विशेषस्मृतिमर्हितादित्यतो नात्यन्तसंशय इति। अन्यतर धर्माध्यवसायाद्वा न संशय इति तच्च युक्तम, विशेषापेक्षा विमर्श संशय इति वचनात। विशेषश्चान्यतरधर्मे न च तस्मिन्नध्यवसीयमाने विशेषापेक्षा सम्भवतीति ॥ ६ ॥

## यत्र संशयस्तत्रैवमुत्तरोत्तरप्रसङ्ग ॥ ७ ॥

यत्र यत्र संशयपूर्विका परीक्षा शास्त्रे कथायां वा तत्र तत्रैव संशये परेण प्रतिषिद्ध समाधिवाच्य इति। अत सर्व परीक्षाव्यापित्वात प्रथम संशय परीक्षित इति ॥ ७ ॥

अथ प्रमाणपरीक्षा,—

## प्रत्यक्षाऽऽदीनामप्रामाण्य त्रैकाल्यासिद्धे ॥८॥

प्रत्यक्षाऽऽदीना प्रमाणत्व नास्ति त्रैकाल्यासिद्ध पूर्वापरसह भावानुपपत्तेरिति ॥ ८ ॥

नाति कथ संशय ? समानत्वस्य भ्रमकत्वादिति तदापि न न हि समानधर्मत्वेन तज्ज्ञान हेतु अपि तु उभयसहचारितधर्मवत्ज्ञान तथात्वेऽक्तदोषाभावात् ॥ ६ ॥

सम्प्रति संशयपरीक्षावत् परेषां पदार्थाना परीक्षामतिदिशन्नाह।—एवमुक्तरीत्या उत्तरोत्तरेषु प्रयोजनादिषु प्रसङ्ग प्रकृष्ट सङ्ग परीक्षायां सम्बन्धो बोद्धव्य तात्क प्रयोजनमपि परीक्षणीयम् ? नेत्याह—यत्र संशय इति। यादृ तल्लक्षणादिषु संशय तदा तदपि परीक्षणीयम्। अथवा—उत्तरोत्तरम् उक्तप्रत्युक्तरूप यः प्रसङ्ग तद्रूपा परीक्षा संशयितस्यैव कर्त्तव्येत्यर्थ ॥ ७ ॥

समाप्त संशयपरीक्षाप्रकरणम्।

इदानीमवसरत प्रमाणसामान्यपरीक्षणाय पूर्वपक्षयति।—कालत्रयेऽपि प्रमाणात् प्रमायां असिद्धत्वकमपरकत्वात प्रत्यक्षाऽऽदीनां न प्रामाण्यमित्यर्थ ॥ ८ ॥

अस्य सामान्यवचनस्यार्थविभाग —

**पूर्वं हि प्रमाणसिद्धौ नेन्द्रियार्थसन्निकर्षात् प्रत्यक्षोत्पत्ति ॥ ९ ॥**

गन्धाऽऽदिविषयक ज्ञान प्रत्यक्ष तदयदि पूर्वं, पश्चाद्गन्धाऽऽदीना सिद्धि नद गन्धाऽऽदिसन्निकर्षादुत्पद्यत इति ॥ ९ ॥

**पश्चात् सिद्धौ न प्रमाणेभ्य प्रमेयसिद्धि ॥१०॥**

असति प्रमाणे कन प्रमीयमाणोऽर्थ प्रमेय स्यात ? प्रमाणेन खलु प्रमीयमाणोऽर्थं प्रमेयमित्येतत सिध्यति ॥ १ ॥

**युगपत्सिद्धौ प्रत्यर्थनियतत्वात क्रमवृत्तित्वाभावो बुद्धीनाम ॥ ११ ॥**

यदि प्रमाण प्रमेयञ्च युगपद्भवत , एवमपि गन्धाऽऽदिष्विन्द्रियार्थेषु ज्ञानानि प्रत्यर्थनियतानि युगपत्सम्भवन्तीति ज्ञानाना प्रत्यर्थनियतत्वात क्रमवृत्तित्वाभाव । या इमा बुद्धय क्रमेणार्थेषु

त्रिसूत्र्या वकान्यासिद्धत्व व्युत्पादयति ।—प्रमाणस्य पूवत्व तावन्न सम्भवात हि यत प्रमाया पूव प्रमाणसिद्धौ प्रमाणसत्ते इन्द्रियार्थसन्निकर्षात् प्रत्यक्ष सिध्यतीति न स्यात प्रत्यक्षप्रमाणात पूवमेव प्रमाया सत्वात प्रमाणत्व हि प्रमाकरणत्वम् पूव प्रमाया अभावे प्रमाकरणत्वमपि कथ स्यात? पूवमेव प्रमाया सिद्धरूपेयति कथम् ? इन्द्रियार्थसन्निकर्षात् इन्द्रियार्थसन्निकर्षादित प्रत्यक्षोत्पत्ति प्रत्यक्षाद्युत्पत्ति । परे तु प्रत्यक्ष प्रति करणत्वे खण्डिते तद्रीत्या करणान्तरमपि खण्डनीयमित्याशय सूत्रकृता वर्णयन्ति प्रमाणस्य प्रमावाप्रत्याभाव प्रमाणामात ज्ञातऽपि प्रमावाप्रत्यसम्भव स्यादिति भाव ॥ ९ ॥

प्रमाणस्य प्रमात पश्चात् सिद्धौ विषयस्य प्रमेयत्व प्रमाणात् पूवमेव सिद्धमिति न प्रमाणात प्रमाया उत्पत्ति प्रमेयस्य च ज्ञातरिति ॥ १ ॥

इद सूत्रत्रयम् अनुमानाद्यभिप्रायेण च त्रीवादे प्रमाऽनन्तर प्रमासमकाल वा सत्त्वस्यष्टत्वात उत्पत्ते श्राद्धतुमप्यशक्यत्वात तदयमथ —प्रमाणप्रमेययोर्युगपत्सत्त्व युगपदुत्पत्तौ बुद्धीनामर्थविशेषानियतत्वात् यत् क्रमवृत्तित्व तन्न स्यात् पदज्ञान इ

प्रवर्त्तन्ते, तासा क्रमवृत्तित्व न सम्भवतीति। व्याघातश्च युगपज्ज्ञानानुत्पत्तिर्मनसो लिङ्गमिति। एतावांश्च प्रमाणप्रमेययो सद्भावविषय, स चानुपपन्न इति तस्मात् प्रत्यक्षाऽऽदीना प्रमाणत्व न सम्भवतीति। * अस्य समाधि * उपलब्धिहेतोरुपलब्धिविषयस्य चार्थस्य पूर्वापरसहभावानियमाद् यथादर्शन विभागवचनम * क्वचिदुपलब्धिहेतु पूर्व पश्चादुपलब्धिविषय। यथाऽऽदित्यस्य प्रकाश। उत्पद्यमानाना क्वचित् पूर्वमुपलब्धिविषय, पश्चादुपलब्धिहेतु। यथाऽवस्थिताना प्रदीप। क्वचिदुपलब्धिहेतुरुपलब्धिविषयश्च सह सम्भवत। यथा धूमेनाग्नेर्ग्रहणमिति। उपलब्धिहेतुश्च प्रमाण, प्रमेयन्तूपलब्धिविषय। एव प्रमाणप्रमेययो पूर्वापरसहभावेऽनियते यथाऽर्थो दृश्यते तथा विभज्य वचनीय इति। तत्रैकान्तेन प्रतिषेधानुपपत्ति। सामान्येन खलु विभज्य प्रतिषेध उक्त इति। समाख्याहेतोस्त्रैकाल्ययोगात तथाभूता समाख्या। यत्पुनरिद, पश्चात सिद्धे च प्रमाणे, न प्रमीयमाणोऽर्थ प्रमेयमिति विज्ञायत इति। * प्रमाणमित्येतस्या समाख्याया उपलब्धिहेतुत्व निमित्तम तस्य त्रैकाल्ययोग, * उपलब्धिमकार्षीत उपलब्धि करोति उपलब्धि करिष्यतीति समाख्याहेतोस्त्रैकाल्ययोगात् समाख्या तथाभूता। प्रमितोऽनेनार्थ प्रमीयते प्रमास्यते इति प्रमाणम्। प्रमित प्रमीयते, प्रमास्यत इति च प्रमेयम्। एव सति भविष्यत्यस्मिन हेतुत उपलब्धि प्रमास्यतेऽयमर्थ, प्रमेयमिदमित्येतत् सर्वं भवतीति।

शब्दविषयक श्रावणप्रत्यक्षरूपम् शाब्दबोधश्च पदार्थविषयक परोक्षरूपी (परि + ईक्ष) विजातीय इत्यनयोर्न यौगपद्य सम्भवति कार्य्यकारणभावसत्त्वात् क्रमिकत्वेनैव सिद्धेरत एवक्रमेव ज्ञानमभयविषयकमित्यपि नाशङ्कनीयं सङ्करप्रसङ्गाच्च एवं व्याप्तिज्ञानानुमित्यादावपि द्रष्टव्यम् परे तु प्रमाणप्रमेययोर्न युगपत सिद्धिर्न युगपज्ज्ञानम्

त्रैकाल्यानभ्यनुज्ञाने च व्यवहारानुपपत्तिः । यश्चैव नाभ्यनुजानीयात् तस्य पाचकमानय पक्ष्यति लावकमानय लविष्यतीति व्यवहारो नोपपद्यत इति । प्रत्यक्षाऽऽदीनामप्रामाण्यं त्रैकाल्यासिद्धेरित्येवमादिवाक्यं प्रमाणप्रतिषेधः । तत्राय प्रष्टव्यः,—अथानेन प्रतिषेधेन भवता किं क्रियते ? इति । किं सम्भवो निवर्त्यते ? अथासम्भवो ज्ञाप्यते ? इति । तद्यदि सम्भवो निवर्त्यते, सति सम्भवे प्रत्यक्षाऽऽदीनां प्रतिषेधानुपपत्तिः । अथासम्भवो ज्ञाप्यते प्रमाणलक्षणं (क) प्राप्तस्तर्हि प्रतिषेधः । प्रमाणासम्भव( ख )स्योपपत्त्यर्थहेतुत्वादिति ॥ ११ ॥

किञ्चातः —

त्रैकाल्यासिद्धेः प्रतिषेधानुपपत्तिः ॥ १२ ॥

अस्य तु विभागः—पूर्वं हि प्रतिषेधसिद्धावसति प्रतिषेध्ये किमनेन प्रतिषिध्यते । पश्चात् सिद्धौ प्रतिषेध्यासिद्धिः प्रतिषेधाभावादिति । युगपत्सिद्धौ प्रतिषेध(ध्य)सिद्ध्यभ्यनुज्ञानादनर्थकः प्रतिषेध इति । प्रतिषेधलक्षणे च वाक्येऽनुपपद्यमाने सिद्धं प्रत्यक्षाऽऽदीनां प्रामाण्यमिति ॥ १२ ॥

बुद्धीनामर्थविशेषनियतत्वात् क्रमवर्तित्वम् तथा सति तन्न स्यात् तथा हि चक्षुषो ज्ञानमनुमित्याद्यपि रूपम् घटादेश्च प्रत्यक्षा दृष्टपम् न चानयोर्यौगपद्यं सम्भवतीत्यत इत्याह ॥ ११ ॥

सिद्धान्तमतम् ।—यदि त्रैकाल्यासिद्ध्या प्रमाणात् प्रमेयासाद्धिर्नोपपद्यते तदा तर्हीत्या त्वदीय प्रतिषेधोऽप्यनुपपन्न इति जात्यन्तरमतादिति भाव ॥ १२ ॥

---

(क) अत्र षष्ठीसमास प्रमाणस्य लक्षण प्राप्त प्रमाणलक्षणाक्रान्त ।

(ख) प्रमाणसिद्ध्यसम्भवस्येति यावत् ।

सर्वप्रमाणप्रतिषेधाच्च प्रतिषेधासिद्धि ॥ १३ ॥ १

कथ त्रैकाल्यासिद्धेरित्यस्य हेतोर्यद्युदाहरणमुपादीयते हेत्वर्थस्य साधकत्व दृष्टान्ते दर्शयितव्यम ? इति। न च तर्हि प्रत्यक्षाऽऽदीनामप्रामाण्यम। अथ प्रत्यक्षाऽऽदीनामप्रामाण्यम। उपादीयमानमप्युदाहरण नार्थं साधयिष्यतीति। सोऽय सर्वं प्रमाणैर्व्याहतो हेतुरहेतु। "सिद्धान्तमभ्युपेत्य तद्विरोधी विरुद्ध" इति। वाक्यार्थो ह्यस्य सिद्धान्त स च वाक्यार्थ प्रत्यक्षाऽऽदीनि नार्थं साधयन्तीति। इदञ्चावयवानामुपादानमर्थस्य साधनायेति। अथ नोपादीयते अप्रदर्शितहेत्वर्थस्य (ग) दृष्टान्ते न साधकत्व मिति निषेधो नोपपद्यते हेतुत्वासिद्धेरिति ॥ १३ ॥

तत्प्रामाण्ये वा न सर्वप्रमाणप्रतिषेध ॥१४॥

प्रतिषेधलक्षणे स्ववाक्ये तेषामवयवाऽऽश्रितानां प्रत्यक्षाऽऽदीनं प्रामाण्येऽभ्यनुज्ञायमाने परवाक्येऽप्यवयवाऽऽश्रितानां प्रामाण्य प्रसज्यते अविशेषादिति। एवञ्च न सर्वाणि प्रमाणानि प्रतिषिध्यन्त इति। विप्रतिषेध इति वीत्ययमुपसर्ग सम्प्रतिपत्त्यर्थे, न व्याघाते अर्थाभावादिति ॥ १४ ॥

त्रैकाल्यप्रतिषेधश्च शब्दादातोद्यसिद्धिवत्तत् सिद्धे ॥ १५ ॥

किमर्थं पुनरिदमुच्यते ?—पूर्वोक्तनिबन्धनार्थम। यत्तावत्

---

१कश्च —सर्वप्रमाणप्रतिषेधे प्रतिषेधक प्रमाणमपि नाभ्युपगन्तव्यम्। तथा च कथ प्रतिषेधासिद्धिरित्याह ॥ १३ ॥

यदि च प्रतिषेधक प्रमाणमुपयते तदा कथ सर्वप्रमाणप्रतिषेध इत्याह। १४ ॥

ननु मन्यते वस्तुसिद्धनापेक्षिता विश्वस्य शून्यत्वात् प्रमाणप्रमेयभावोऽपि न वास्तविक त्वन्मते च त्रैकाल्यासिद्धिरुक्तेत्यतस्तदुद्धरति —त्रैकाल्येय प्रतिषेध उक्त

(ग) सप्तम्यर्थो निष्ठत्वम्।

पूर्वोक्तमुपलब्धिहेतोरुपलब्धिविषयस्य चार्थस्य पूर्वापरसहभावानियमाद् यथादर्शनं विभागवचनमिति । तदिदं समुत्थानं यथा विज्ञायेत । अनियमदर्शी खल्वयमृषिर्नियमेन प्रतिषेधं प्रत्याचष्टे त्रैकाल्यस्य चायुक्तः प्रतिषेध इति । तत्रैकां विधामुदाहरति । शब्दादातोद्यसिद्धिवदिति । यथा पश्चात्सिद्धेन शब्देन पूर्वसिद्धमातोद्यमनुमीयते, साध्यञ्चातोद्यं साधनञ्च शब्दः । अन्तर्हिते ह्यातोद्ये स्वनतोऽनुमानं भवतीति । वीणा वाद्यते वेणुः पूर्यत इति स्वनविशेषेण आतोद्यविशेषं प्रतिपद्यते । तथा पूर्वसिद्धमुपलब्धिविषयं पश्चात्सिद्धेनोपलब्धिहेतुना प्रतिपद्यत इति । निदर्शनार्थत्वाच्चास्य शेषयोर्विधयो-र्यथोक्तमुदाहरणं वेदितव्यमिति । कस्मात् पुनरिह तन्नोच्यते पूर्वोक्तमुपपाद्यत इति । सर्वथा तावदयमर्थः प्रकाशयितव्यः, सह इह वा प्रकाश्येत तत्र वा न कश्चिद्विशेष इति ॥ १५ ॥

यदा चोपलब्धिविषयः कस्यचिदुपलब्धिसाधनं भवति तदा * प्रमाणं प्रमेयमिति नैकोऽर्थोऽभिधीयते । * अस्यार्थस्याविद्योतनायेदमुच्यते —

**प्रमेयता च तुलाप्रामाण्यवत् ॥ १६ ॥**

गुरुत्वपरिमाणज्ञानसाधनं तुला प्रमाणम् । ज्ञानविषयो गुरुद्रव्यं सुवर्णाऽऽदि प्रमेयम् । यदा तु सुवर्णाऽऽदिना तुलाऽन्तरं

---

सत्त्वेन सम्भवात् कुतः ? यत आह शब्दादिति ।—यथा शब्दात् पश्चाद्भाविनः पूर्वसिद्धस्याऽऽतोद्यस्य मृदङ्गादेः सिद्धिः यथा वा पूर्वसिद्धात् पदार्थादनन्तरकालीनवह्निप्रकाशेन यथा वा वह्निसमकालीनात् धूमाद् वह्निसिद्धिः तथाऽत्रापि प्रमासत्त्वे प्रमाणादनन्तरभावित्वेऽपि प्रमाणस्य चक्षुरादेः प्रमातः पूर्वभावित्वमस्त्येव पूर्वप्रमाविशेष्यान्त तस्य नापद्यते यदा कदाचित् प्रमासम्बन्धेनैव प्रमाणत्वसम्भवात्, यथा कदाचित् पाकसम्बन्धेनैव पाचकमानत्वादिव्यवहार इति भावः । अथ चकारान्तं न सूत्रान्तर्गतमिति तत्त्वालोके वस्तुतष्टीकादर्शनात् सूत्रान्तर्गतमेव ॥ १५ ॥

नन्वनियतत्वादेव प्रमाणप्रमेयव्यवहारो न पारमार्थिकः रज्जौ सर्पादिव्यवहारवदित्याशङ्कायामाह —यथा हि तुलायां सुवर्णादिगुरुत्वपरिच्छेदक

व्यवस्थाप्यते तदा तुलान्तरप्रतिपत्तौ सुवर्णादि प्रमाणम् तुला-
ऽन्तरं प्रमेयमिति। एवमनवयवेन तन्त्रार्थ उद्दिष्टो वेदितव्यः।
आत्मा तावदुपलब्धिविषयत्वात् प्रमेये परिपठितः। उपलब्धौ
स्वातन्त्र्यात् प्रमाता। बुद्धिरुपलब्धिसाधनत्वात् प्रमाणम्।
उपलब्धिविषयत्वात्तु प्रमेयम्। उभयाभावात्तु प्रमितिः। एव-
मर्थविशेषे समाख्यासमावेशो योज्यः। तथा च कारकशब्दा
निमित्तवशात् समावेशेन वर्त्तन्त इति। वृक्षस्तिष्ठतीति
स्वस्थितौ स्वातन्त्र्यात् कर्त्ता। वृक्षं पश्यतीति दर्शनेनाऽऽप्तुमिष्य-
माणतमत्वात् कर्म। वृक्षेण चन्द्रमसं ज्ञापयतीति ज्ञापकस्य
साधकतमत्वात् करणम्। वृक्षायोदकमासिञ्चतीत्यासिच्य-
मानेनोदकेन वृक्षमभिप्रैतीति सम्प्रदानम्। वृक्षात् पर्णं
पततीति ध्रुवमपायेऽपादानमित्यपादानम्। वृक्षे वयांसि
सन्तीत्याधारोऽधिकरणमित्यधिकरणम्। एवञ्च सति न द्रव्य-
मात्रं कारकं न क्रियामात्रम्। किं तर्हि?—क्रियासाधनं
क्रियाविशेषयुक्तं कारकम्। यत् क्रियासाधनं स्वतन्त्रं स
कर्त्ता न द्रव्यमात्रं न क्रियामात्रम्। क्रियया व्याप्तुमिष्य-
माणतमं कर्म न द्रव्यमात्रं न क्रियामात्रम्। एवं साधक-
तमादिष्वपि। एवञ्च कारकान्वाख्यानं यथैवोपपत्तित एवं
लक्षणतः। कारकान्वाख्यानमपि न द्रव्यमात्रेण न क्रियया
वा। किं तर्हि?—क्रियासाधने क्रियाविशेषे युक्ते इति। कारक-
शब्दश्चायं प्रमाणं प्रमेयमिति, स च कारकधर्मं न हातुमर्हति।
अस्ति च भोः! कारकशब्दानां निमित्तवशात् समावेशः।
प्रत्यक्षादीनि च प्रमाणानि उपलब्धिहेतुत्वात् प्रमेयञ्चोपलब्धि-

त्वात् प्रमेयम्। [illegible] च [illegible] परिच्छेद्य च प्रमेयव्यवहार
तथा निमित्तसमावेशान्न्यायैरपि प्रमाणप्रमेयव्यवहार इति। यद्वा —प्रमाणता
प्रमेयता च प्रमात्रभिप्रायादिति यत्प्रागाशङ्कितं, तत्राऽऽह प्रमेय। चेति, यथा कदाचित्

विषयत्वात्। सन्ति चेमानि प्रत्यक्षादीनि। प्रत्यक्षेणोपलभे अनुमानेनोपलभे, उपमानेनोपलभे आगमेनोपलभे प्रात्यक्षिकं मे ज्ञानम् आनुमानिकं मे ज्ञानम् औपमानिकं मे ज्ञानम् आगमिकं मे ज्ञानमिति ज्ञानविशेषा गृह्यन्ते। लक्षणतश्च ज्ञाप्यमानानि ज्ञायन्ते विशेषेण इन्द्रियार्थसन्निकर्षोत्पन्नं ज्ञानमित्येवमादिना ॥ १६ ॥

सेयमुपलब्धिः प्रत्यक्षादिविषया किं प्रमाणान्तरतः ? अथान्तरेण प्रमाणान्तरमसाधना ? इति। कश्चात्र विशेषः ?-

**प्रमाणतः सिद्धेः प्रमाणानां प्रमाणान्तरसिद्धिप्रसङ्गः ॥ १७ ॥**

यदि प्रत्यक्षादीनि प्रमाणेन उपलभ्यन्ते। येन प्रमाणेनोपलभ्यन्ते तत्प्रमाणान्तरसद्भावः प्रसज्यत इति। अनवस्थामाह। तस्याप्यन्यत्तस्याप्यन्यदिति। न चानवस्था शक्याऽनुज्ञातुमनुपपत्तेरिति ॥ १७ ॥

अस्तु तर्हि प्रमाणान्तरमन्तरेण निःसाधनेति।

**तद्विनिवृत्तेर्वा प्रमाणान्तरसिद्धिवत् प्रमेयसिद्धिः ॥ १८ ॥**

यदि प्रत्यक्षाद्युपलब्धौ प्रमाणान्तरं निवर्त्तते आत्माद्युपलब्धावपि प्रमाणान्तरं निवर्त्स्यत्यविशेषात् ॥ १८ ॥

गुरुत्वप्रतीतिपरिच्छेदकत्वात् तुलायां प्रमाणव्यवहारः तथान्यद्रव्यघटादेरपि प्रमाणप्रमेयव्यवहार इति ॥ १६ ॥

अनवस्थया प्रत्यवस्थानपरं पूर्वपक्षसूत्रम्। प्रमाणानां प्रमाणतः सिद्धेः स्वीकारे प्रमाणान्तरस्वीकारः स्यात्, तथा हि प्रमाणस्य तावन्न स्वतःसिद्धिः आत्माऽऽश्रयाऽऽपत्तेः अतः प्रमाणान्तरं स्वीकार्य्यम्, तयोश्च परस्परसाधकत्वेऽन्योन्याऽऽश्रयाऽऽपत्तेः अतस्तत्रापि प्रमाणान्तरमङ्गीकार्य्यमित्येवमनवस्थेति भावः ॥ १७ ॥

ननु प्रमाणसिद्धिः प्रमाणं विनैव स्यान्न वाऽऽह।—यदि च प्रमाणं वानवस्थितप्रमाणव्यतिरेकात् प्रमाणसिद्धिः स्वीक्रियते तदा तद्वदेव तत्सिद्धिः स्वीक्रियताम्

एवञ्च सर्वप्रमाणविलोप इत्यत आह —

**न प्रदीपप्रकाशवत् तत्सिद्धेः ॥ १९ ॥**

यथा प्रदीपप्रकाशः प्रत्यक्षाङ्गत्वाद् दृश्यदर्शने प्रमाणं स च प्रत्यक्षान्तरेण चक्षुषः सन्निकर्षेण गृह्यते। प्रदीपभावाभावयोर्दर्शनस्य तथा भावाद्दर्शनहेतुरनुमीयते। तमसि प्रदीपमुपाददीथा इत्याप्तोपदेशेनापि प्रतिपद्यते। एवं प्रत्यक्षादीनां यथादर्शनं प्रत्यक्षादिभिरेवोपलब्धिः। इन्द्रियाणि तावत् स्वविषयग्रहणेनैवानुमीयन्ते। अर्थाः प्रत्यक्षतो गृह्यन्ते। इन्द्रियार्थसन्निकर्षास्तु आवरणेन लिङ्गेनानुमीयन्ते। इन्द्रियार्थसन्निकर्षोत्पन्नं ज्ञानमात्ममनसोः संयोगविशेषादात्मसमवायाच्च सुखादिवद् गृह्यते। एवं प्रमाणविशेषो विभज्य वचनीयः। यथा च दृश्यः सन् प्रदीपप्रकाशो दृश्यान्तराणां दर्शनहेतुः

---

किं प्रमाणान्तरकारणं तथा च अप्रत्यक्षमेव जगत् स्यादिति शून्यतायां पर्यवसानमिति भावः ॥ १८ ॥

सिद्धान्तसूत्रम्। यथा हि प्रदीपाऽऽलोको घटादिप्रकाशः तथा प्रमाणानां प्रमेयप्रकाशकत्वम् अन्यथा प्रदीपस्य घटप्रकाशकत्वं प्रदीपप्रकाशकं चक्षुः तज्ज्ञापकमन्यदित्यनवस्थाभयात् प्रदीपोऽपि न घटप्रकाशकः स्यात्। यदि च घटप्रत्यक्षे तत्प्रकाशकानामापद्यते नानवस्थेत्युच्यते तदा प्रकृतेऽपि तुल्यम्। न हि प्रमाणात् प्रमेयासिद्धौ प्रमाणसिद्धिरपेक्षिता यदा च प्रमाणसिद्धिरपेक्षिता तदा तत्रापि प्रमाणमपेक्ष्यताम्? तच्चानुमानादिकमेवेति न प्रमाणान्तरकल्पना न वाऽनवस्था सर्वत्र प्रमाणसिद्धेरनपेक्षितत्वात् क्वचिद्बीजाङ्कुरवदपेक्षायामपि न क्षतिकरीति भावः। प्रदीपस्य प्रदीपान्तरं विना प्रकाशकत्ववत् प्रमाणानामपि प्रमाणमन्तरेणैव प्रमेयप्रकाशकत्वमिति सूत्रार्थः। केचन मन्यन्ते तान् प्रत्याह भाष्यकारः। क्वचिन्निवृत्तिदर्शनादनिवृत्तिदर्शनाच्च क्वचिदनैकान्तः" क्वचित् प्रदीपादौ प्रमाणान्तरानिवृत्तिदर्शनात् क्वचिद् घटादौ प्रमाणान्तरानिवृत्तिदर्शनात् प्रमाणान्तरापेक्षादर्शनात् त्वदीयो हेतुरनैकान्तिकोऽनियतः। तथा च प्रदीपदृष्टान्तात् प्रमाणान्तरापेक्षानिवृत्तिः साध्यते घटदृष्टान्तेन प्रमाणान्तरापेक्षैव किं न साध्यते?

रिति दृश्यदर्शनव्यवस्था लभते। एवं प्रमेयं सत् किञ्चिदर्थजातमुपलब्धिहेतुत्वात् प्रमाणप्रमेयव्यवस्थां लभते। सेयं प्रत्यक्षादिभिरेव प्रत्यक्षादीनां यथादर्शनमुपलब्धिर्न प्रमाणान्तरतो न च प्रमाणमन्तरेण निःसाधनेति। तेनैव तस्याग्रहणमिति चेत् न अर्थभेदस्य लक्षणसामान्यात् प्रत्यक्षादीनां प्रत्यक्षादिभिरेव ग्रहणमित्ययुक्तम्। अन्येन ह्यन्यस्य ग्रहणं दृष्टमिति न अर्थभेदस्य लक्षणसामान्यात् प्रत्यक्षलक्षणेनानेकोऽर्थः सङ्गृहीतः। तत्र केनचित् कस्यचिद् ग्रहणमित्यदोषः। एवमनुमानादिष्वपीति। यथोद्धृतेनोदकेनाऽऽशयस्थस्य ग्रहणमिति। ज्ञातृमनसोश्च दर्शनात्। अहं सुखी अहं दुःखी चेति तेनैव ज्ञात्रा तस्यैव ग्रहणं दृश्यते। युगपज्ज्ञानानुत्पत्तिर्मनसो लिङ्गमिति च तेनैव मनसा तस्यानुमानं दृश्यते। ज्ञातृज्ञेययोरभेदो ग्रहणस्य ग्राह्यस्य चाभेद इति। निमित्तभेदोऽस्तीति चेत् समानम्। न निमित्तान्तरेण विना ज्ञाताऽऽत्मानं जानीते न च निमित्तान्तरेण विना मनसा मनो गृह्यत इति। समानमेतत्। प्रत्यक्षाऽऽदिभिः प्रत्यक्षाऽऽदीनां ग्रहणमित्यत्राप्यर्थभेदो न गृह्यत इति। प्रत्यक्षाऽऽदीनाञ्चाविषयस्यानुपपत्तेः। यदि स्यात् किञ्चिदर्थजातं प्रत्यक्षाऽऽदीनामविषयः, यत् प्रत्यक्षाऽऽदिभिर्न शक्यं ग्रहीतुं तस्य ग्रहणाय प्रमाणान्तरमुपादीयेत। तत्तु न शक्यं केनचिदुपपादयितुमिति। प्रत्यक्षाऽऽदीनां यथादर्शनमेवेदं सच्चासच्च सर्वं विषय इति। केचित्तु दृष्टान्तमपरिगृहीतं हेतुना विशेषहेतुमन्तरेण साध्यसाधनायोपाददते।

तथा च दृष्टान्तसमा जातिरयमिति भावः। तद्व्याख्याने कथं नानैकान्त इत्यत्राऽऽह भाष्यकारः —"विशेषहेतुपरिग्रहे सत्युपसंहाराभ्यनुज्ञानादप्रतिषेधः"। तन्मते

यथा प्रदीपप्रकाशः प्रदीपान्तरप्रकाशमन्तरेण गृह्यते, तथा प्रमाणानि प्रमाणान्तरमन्तरेण गृह्यन्त इति । * स चायं क्वचिन्निवृत्तिदर्शनादनिवृत्तिदर्शनाच्च क्वचिदनैकान्तः । यथा चायं प्रसङ्गो निवृत्तिदर्शनात् प्रमाणसाधनायोपादीयते एवं प्रमेयसाधनायाप्युपादेयोऽविशेषहेतुत्वात् । यथा स्थाल्यादिरूपग्रहणे प्रदीपप्रकाशः प्रमेयसाधनायोपादीयते एवं प्रमाणसाधनायाप्युपादेयो विशेषहेत्वभावात् । सोऽयं विशेषहेतुपरिग्रहमन्तरेण दृष्टान्त एकस्मिन् पक्षे उपादेयो न प्रतिपक्ष इत्यनेकान्तः । अनेकस्मिंश्च पक्षे दृष्टान्त इत्यनैकान्तो विशेषहेत्वभावादिति । विशेषहेतुपरिग्रहे सति उपसंहाराभ्यनुज्ञानादप्रतिषेधः । * विशेषहेतुपरिगृहीतस्तु दृष्टान्त एकस्मिन् पक्षे उपसंह्रियमाणो न शक्योऽननुज्ञातुम् । * एवञ्च सत्यनैकान्त इत्ययं प्रतिषेधो न भवति । प्रत्यक्षादीनां प्रत्यक्षादिभिरुपलब्धावनवस्थेति चेत् न संविद्विषयनिमित्तानामुपलब्ध्या व्यवहारोपपत्तेः । प्रत्यक्षेणार्थमुपलभे अनुमानेनार्थमुपलभे उपमानेनार्थमुपलभे आगमेनार्थमुपलभे इति । प्रत्यक्षं मे ज्ञानम् आनुमानिकं मे ज्ञानम् औपमानिकं मे ज्ञानम् आगमिकं मे ज्ञानमिति । संविद्विषयनिमित्तञ्चोपलभमानस्य धर्मार्थसुखापवर्गप्रयोजनस्तत्प्रत्यनीकपरिवर्जनप्रयोजनश्च व्यवहार उपपद्यते । सोऽयं तावत्येव निवर्त्तते न चास्ति व्यवहारान्तरमनवस्थासाधनीयं येन प्रयुक्तोऽनवस्थामुपाददीतेति ॥ १९ ॥

विशेषहेतुः व्याप्तिपक्षधर्मता तस्य परिग्रहे सति । उपसंहारस्य साधनस्य अभ्यनुज्ञानात् उक्तानैकान्तोऽयं प्रतिषेधो न भवति ॥ १९ ॥

समाप्तं प्रमाणसामान्यपरीक्षाप्रकरणम् ।

सामान्येन प्रमाणानि परीक्ष्य विशेषेण परीक्ष्यन्ते। तत्र —

**प्रत्यक्षलक्षणानुपपत्तिरसमग्रवचनात् ॥ २० ॥**

आत्ममनःसन्निकर्षो हि कारणान्तरं नोक्तमिति। न चासंयुक्ते द्रव्ये संयोगजस्य गुणस्योत्पत्तिरिति ज्ञानोत्पत्ति दर्शनादात्ममनःसन्निकर्षः कारणम्। मनःसन्निकर्षानपेक्षस्य चेन्द्रियार्थसन्निकर्षस्य ज्ञानकारणत्वे युगपदुत्पद्येरन् बुद्धय इति मनःसन्निकर्षोऽपि कारणम्। तदिदं सूत्रं पुरस्तात् कृतभाष्यम् ॥ २० ॥

**नाऽऽत्ममनसोः सन्निकर्षाभावे प्रत्यक्षोत्पत्तिः ॥ २१ ॥**

आत्ममनसोः सन्निकर्षाभावे नोत्पद्यते प्रत्यक्षम् इन्द्रियार्थसन्निकर्षाभाववदिति। सति चेन्द्रियार्थसन्निकर्षे ज्ञानोत्पत्ति दर्शनात् कारणभावं ब्रवीत ॥ २१ ॥

प्रमाणसामान्यपरीक्षानन्तरं प्रमाणविशेषेषु परीक्षणीयेषु प्रथमोद्दिष्टं प्रत्यक्षं परीक्षणीयम्। तत्र च फलेन विकल्पेन लक्षणं पूर्वमुक्तम्, अथ फललक्षणमाशङ्कते पूर्वपक्षी। प्रत्यक्षस्य यल्लक्षणमिन्द्रियार्थसन्निकर्षोत्पन्नत्वं तन्नोपपद्यतेऽसमग्रवचनात्। अयमर्थः — प्रत्यक्षस्य कारणघटितं लक्षणमभिहितं तत्र कारणकलापघटिताया सामग्र्या विनिवेशमसमर्थत्वात् ... नाभिहितम् असमग्रम् इन्द्रियार्थसन्निकर्ष... ... नाभिहितम् तथा चात्ममनःसंयोगरूपो ... ... ॥ २० ॥

... कारणत्वमेव ... आह।—शरीरावच्छिन्नात्ममनसोः सन्निकर्षस्य अभावे न प्रत्यक्षोत्पत्तिरित्यत आत्ममनःसंयोगस्य कारणत्वमावश्यकम्। ... प्रकृते ... नोत्पत्तिरिति विवरणम् ॥ २१ ॥

दिग्देशकालाऽऽकाशेष्वप्येवं प्रसङ्गः ॥ २२ ॥

दिगादिषु सत्सु ज्ञानाभावात् तान्यपि कारणानीति । * अकारणभावेऽपि ज्ञानोत्पत्तिर्दिगादीनामपरिवर्जनीयत्वात् । * यदाऽप्यकारणं दिगादीनि ज्ञानोत्पत्तौ तदाऽपि सत्सु दिगादिषु ज्ञानेन भवितव्यम् । न हि दिगादीनां सान्निध्यं शक्यं परिवर्जयितुमिति । तत्र कारणभावे हेतुवचनम् एतस्माद्धेतोर्दिगादीनि ज्ञानकारणानीति ॥ २२ ॥

आत्ममनःसन्निकर्षस्तर्ह्युपसङ्ख्येय इति । तदिदमुच्यते —

ज्ञानलिङ्गत्वादात्मनो नानवरोधः ॥ २३ ॥

ज्ञानमात्मनो लिङ्गं तद्गुणत्वात् । न चासंयुक्ते द्रव्ये संयोगजस्य गुणस्योत्पत्तिरस्तीति ॥ २३ ॥

तदयौगपद्यलिङ्गत्वाच्च न मनसः ॥ २४ ॥

अनवरोध इति वर्त्तते । युगपज्ज्ञानानुत्पत्तिर्मनसो लिङ्गमित्युच्यमाने सिध्यत्येतत् मनःसन्निकर्षापेक्ष इन्द्रियार्थसन्निकर्षो ज्ञानकारणमिति । * प्रत्यक्षनिमित्तत्वाच्चेन्द्रियार्थयोः सन्निकर्षस्य स्वशब्देन वचनम् प्रत्यक्षानुमानोपमानशब्दानां निमित्तमात्ममनःसन्निकर्षः प्रत्यक्षस्यैवेन्द्रियार्थसन्निकर्ष इत्यसमानः ।

---

नन्वेवं दिगादीनामपि कारणत्वं स्यादित्याशङ्कते । — यथाकथञ्चित् पौर्व्वापर्य्यस्य तत्रापि सत्त्वात् तेषामन्यथासिद्धिरित्येतत् प्रसञ्जते ऽप्येवम् ॥ २२ ॥

अतोत्तरमभिधातुमाह ।—आत्मनो नावरोधोऽसङ्ग्रहः कारणत्वेनोक्त न कृत —ज्ञानलिङ्गत्वात् —ज्ञानं लिङ्गं यस्य तत्तथा ज्ञानं हि भावकार्य्यं समवायिकारणमाक्षिपति तच्च परिशेषादात्मेव दिगादीनाञ्च कारणत्वे न मानमिति भावः इत्थञ्च समवायिकारणस्याऽऽत्मनो मनसा संयोगोऽसमवायिकारणमित्यर्थात् सिद्धम् ॥ २३ ॥

आत्मशरीरादिसंयोगस्य कुतो नासमवायिकारणत्वम् ? इत्यतो मनस प्राधान्ये युक्तिमाह ।—नानवरोध इत्यनुवर्त्तते इन्द्रियमनोयोगद्वारा ज्ञानायौगपद्यनियाम-

असमानत्वात तस्य ग्रहणम। २ सुप्तव्यासक्तमनसाश्चेन्द्रियार्थयो सन्निकर्षनिमित्तत्वादिन्द्रियार्थसन्निकर्षस्य ग्रहण नाऽऽत्ममनसो सन्निकर्षस्येति। एकदा खल्वय प्रबोधकाल प्रणिधाय सुप्त प्रणिधानवशात प्रबुध्यत। यदा तु तीव्रौ ध्वनिस्पर्शौ प्रबोध कारण भवत, तदा प्रसुप्तस्येन्द्रियार्थसन्निकर्षनिमित्त प्रबोध ज्ञानमुत्पद्यते। तत्र न ज्ञातुमनसश्च सन्निकर्षस्य प्राधान्य भवति किं तर्हि इन्द्रियार्थयो सन्निकर्षस्य? न ह्यात्मा जिज्ञासमान प्रयत्नेन मनस्तदा प्रेरयतीति। एकदा खल्वय विषयान्तराऽऽसक्तमना सङ्कल्पवशाद्विषयान्तर जिज्ञासमान प्रयत्नप्रेरितेन मनसेन्द्रिय संयोज्य तत्तद्विषयान्तर जानाति। यदा तु खल्वस्य निःसङ्कल्पस्य निर्जिज्ञासस्य च व्यासक्तमनसो बाह्यविषयोपनिपातनाज्ज्ञानमुत्पद्यते तदेन्द्रियार्थसन्निकर्षस्य प्राधान्यम। न ह्यत्रासौ जिज्ञासमान प्रयत्नेन मन प्रेरयतीति प्राधान्याच्चेन्द्रियार्थसन्निकर्षस्य ग्रहण कार्य्यम्। गुणत्वात नाऽऽत्ममनसो सन्निकर्षस्येति ॥ २४ ॥

प्राधान्ये च हेत्वन्तरम —

**प्रत्यक्षनिमित्तत्वाच्चेन्द्रियार्थयो सन्निकर्षस्य पृथग्वचनम् ॥ २४ ॥ क**

सक्तत्वान्मनसोऽपि इन्द्रियविषयकामिति शरीरमनोयोगादेश्च न साधारणकत्वमिति भाव इत्यत्राऽऽत्ममन संयोगसमवायिकारणत्व युक्तम ॥ २४ ॥

सिद्धान्तसूत्रम्। प्रत्यक्षाणामसत्वात प्रत्यक्षासाधारणकारणत्वात्। अयमत्र — प्रत्यक्षेतर इन्द्रियार्थसन्निकर्षाभिधान हि न कारणाभिधित्सया यनाऽऽत्मम योगादेन मधानेन न्यूनत्वम् अपि तु लक्षणाभिप्रायेण तत्र च साम ग्रीघटकस्यैव असाधारणकारणघटितस्यापि लक्षणस्य सुवचत्वात इन्द्रियार्थसन्निकर्षस्य चासाधारणत्वे न पृथग्वचनम् आत्ममन संयोगादिसाधारणकारणाद् व्यवच्छिद्य लक्षण घटकतया वचन युक्तम्। अय भाव — इन्द्रियार्थसन्निकर्षत्वावच्छिन्नकारणताप्रति योगिककार्यताश्रयत्विलक्ष्य इन्द्रियत्वावच्छिन्नकारणताप्रतियोगिककार्यताश्रयत्वलक्ष

**सुप्तव्यासक्तमनसां चेन्द्रियार्थयोः सन्निकर्षनिमित्तत्वात् ॥ २८ ॥ ख**

**तैश्चापदेशो ज्ञानविशेषाणाम् ॥ २५ ॥**

तैरिन्द्रियैरर्थैश्च व्यपदिश्यन्ते ज्ञानविशेषाः । कथम्?— घ्राणेन जिघ्रति चक्षुषा पश्यति रसनया रसयतीति घ्राणविज्ञानं चक्षुर्विज्ञानं रसनाविज्ञानमिति गन्धविज्ञानं रूपविज्ञानं रसविज्ञानमिति च इन्द्रियविषयविशेषाच्च पञ्चधा बुद्धिर्भवति । अतः प्राधान्यमिन्द्रियार्थसन्निकर्षस्येति ॥ २५ ॥

यदुक्तमिन्द्रियार्थसन्निकर्षग्रहणं कार्यं न आत्ममनसोः सन्निकर्षस्येति, कस्मात्? सुप्तव्यासक्तमनसामिन्द्रियार्थयोः सन्निकर्षस्य ज्ञाननिमित्तत्वादिति । सोऽयम्,—

**व्याहतत्वादहेतुः ॥ २६ ॥**

यदि तावत् क्वचिदात्ममनसोः सन्निकर्षस्य ज्ञानकारणत्वं नेष्यते तदा युगपज्ज्ञानानुत्पत्तिर्मनसो लिङ्गमिति व्याह

वा नेवणास्य मम्यक्त क्रतमात्ममनोयोगानुपवर्णनात् परिष्कृत चरमधक्तात । ६८ न सूत्रं किन्तु भाष्यमिति केचित् । इति वार्त्तिकसम्मतम् आधिकसूत्रम् ॥२४॥ क

समाधानान्तरमाह ।—नानस्यात शेष । सुप्तानां व्यासक्तमनसाञ्च घनगर्जितादि । ना आत्ममनःसन्निकर्षो ज्ञानादिना त्वक्सन्निकर्षाच्च द्रागेव ज्ञानोत्पत्तेरिन्द्रियार्थसन्निकर्षस्य प्राधान्यम् । इति वार्त्तिकसम्मतम् अधिकसूत्रम् ॥ २४ ॥ ख

युक्त्यन्तरमाह ।—ज्ञानविशेषाणां तैरिन्द्रियार्थसन्निकर्षैरपदेशो विशेषेण व्यावृत्ति आत्ममनोयोगादिकं हि न व्यावर्त्तकम् तज्जन्यत्वस्य ज्ञानान्तरसाधारणत्वात् । एवं इन्द्रियमनोयोगजत्वमपि न नियतं मानसेऽव्याप्तेः । परन्तु —तैरिन्द्रियैर्ज्ञानविशेषाणां प्रत्यक्षविशेषाणामपदेशो भाषणं च । तेनेन्द्रियार्थसन्निकर्षस्य प्राधान्यम् भाषन्ते हि चाक्षुषं प्रत्यक्षं रासनं प्रत्यक्षमित्यादि । नव्यास्तु —प्रत्यक्षविशेषाणामिन्द्रियैरपदेशो यतः अतश्चाक्षुषादिघटितविशेषलक्षणान्यपि सम्भवन्ति चाक्षुषवृत्त्यनुमित्यवृत्तिजातिमत्त्वादीनि लक्षणान्तराण्यपि द्रष्टव्यानीत्याशय वर्णयन्ति ॥ २५ ॥

इन्द्रियार्थसन्निकर्षो न हेतुः अन्यव्यभिचारादित्याशयेन शङ्कते ।—गौत

त्येत। इदानीं मनसः सन्निकर्षे, मा भूदिन्द्रियार्थसन्निकर्षोऽप्युच्यते। मनःसंयोगानपेक्षत्वाच्च युगपज्ज्ञानोत्पत्तिप्रसङ्गः ॥ २६ ॥

अथ मा भूद् व्याघात इति सर्वविज्ञानानामात्ममनसोः सन्निकर्षः कारणमुच्यते तद्वचनमवदं भवति। ज्ञानकारणत्वा-दात्ममनसोः सन्निकर्षस्य ग्रहणं कार्य्यमिति।—

## नार्थविशेषप्राबल्यात् ॥ २७ ॥

नास्ति व्याघातः। न ह्यात्ममनःसन्निकर्षस्य ज्ञानकारणत्वं व्यभिचरति। इन्द्रियार्थसन्निकर्षस्य प्राधान्यमुपादीयते। अर्थविशेषप्राबल्याद्धि सुप्तव्यासक्तमनसां ज्ञानोत्पत्तिरेकदा भवति। अर्थविशेषः कश्चिदेवेन्द्रियार्थः, तस्य प्राबल्यं तीव्रतापटुते, तच्चार्थविशेषप्राबल्यमिन्द्रियार्थसन्निकर्षविषयं नाऽऽत्ममनसोः सन्निकर्षविषयम्। तस्मादिन्द्रियार्थसन्निकर्षः प्रधानमिति। असति प्रणिधाने सङ्कल्पे चासति सुप्तव्यासक्तमनसां यदिन्द्रियार्थसन्निकर्षादुत्पद्यते ज्ञानं तत्र मनःसंयोगोऽपि कारणमिति। मनसि क्रिया कारणं वाच्यमिति। यथैव ज्ञातुः खल्वयमिच्छाजनितः प्रयत्नो मनसः प्रेरक आत्मगुणः, एवमात्मनि गुणान्तरं सर्वस्य साधकं प्रवृत्तिदोषजनितमस्ति, येन प्रेरितं मन इन्द्रियेण सम्बध्यते, तेन ह्यप्रेर्य्यमाणे मनसि संयोगाभावात्

सूत्र ।।। काले चक्षुर्घटसंयोगादौ ज्ञानमपि चाक्षुषादव्याहतत्वं इन्द्रियार्थसंयोगा न हेतुरित्यर्थः ॥ २६ ॥

समाधत्ते।—अर्थविशेषस्य गीता प्राबल्यात् शुभाशुभत्वाद्गीता अत एव तथा च गीतशब्दश्रवणाधिकारेषु प्राबल्यात् प्राबल्यकाभावस्य च कार्य्यजनकत्वं तस्य कारं चेन्द्रियार्थसन्निकर्षस्य हेतुत्वं पूर्वपक्षी न युक्तं इति। परन्तु— इन्द्रियार्थसन्निकर्षस्य हेतुत्वमपि आत्ममनोयोगादहेतुत्वमिति भ्रान्त आहत व्याहतत्वादहेतुः।—इन्द्रियार्थसन्निकर्षस्यैव हेतुत्वमित्यत आहतुरुक्तं सा न युक्तं कुत ?—व्याहतत्वात्—इन्द्रियमनोयोगादहेतुतायां अभ्युपगमात्तद्व्याघाताऽऽपत्तेः,

ज्ञानानुत्पत्तौ सर्वार्थताऽस्य निवर्त्तेत। एषितव्यश्चास्य गुणान्तरस्य द्रव्यगुणकर्मकारणत्वम् अन्यथा हि चतुर्विधानामणूनां भूतसूक्ष्माणां मनसश्च ततोऽन्यस्य क्रियाहेतोरसम्भवात् शरीरेन्द्रियविषयाणामनुत्पत्तिप्रसङ्गः ॥ २७ ॥

## प्रत्यक्षमनुमानमेकदेशग्रहणादुपलब्धेः ॥ २८ ॥

यत्तदिन्द्रियार्थसन्निकर्षादुत्पद्यते ज्ञानं वृक्ष इति एतत् किल प्रत्यक्षम् तत् खल्वनुमानमेव। कस्मात्?—एकदेशग्रहणात् वृक्षस्योपलब्धेः। अर्वाग्भागमयं गृहीत्वा वृक्षमुपलभते। न चैकदेशो वृक्षः। तत्र यथा धूमं गृहीत्वा वह्निमनुमिनोति तादृगेव तद्भवति। किं पुनर्गृह्यमाणादेकदेशादर्थान्तरमनुमेयं मन्यसे। अवयवसमूहपक्षे अवयवान्तराणि। द्रव्योत्पत्तिपक्षे तानि चावयवी चेति। अवयवसमूहपक्षे तावत् एकदेशग्रहणाद् वृक्षबुद्धेरभावः। नागृह्यमाणमेकदेशान्तरं वृक्षः गृह्यमाणैकदेशवदिति। अथैकदेशग्रहणादेकदेशान्तरानुमाने समुदायप्रतिसन्धानात् तत्र वृक्षबुद्धिः न तर्हि वृक्षबुद्धिरनुमानमेवं सति भवितुमर्हतीति। द्रव्यान्तरोत्पत्तिपक्षे नावयव्यनुमेयः। अस्यैकदेशसम्बन्धस्याग्रहणात् एकदेशसम्बन्धस्याग्रहणे चाविशेषादनुमेयत्वाभावः। तस्माद् वृक्षबुद्धिरनुमानं न भवति ॥ २८ ॥

---

भम खण्डयति नार्थविशेषप्राबल्यात् नास्ति व्याघातः कुतः?—अर्थविशेषस्य इन्द्रियार्थसन्निकर्षस्य प्राबल्यात् तथा चेन्द्रियार्थसन्निकर्षप्राधान्यार्थं इह पूर्वसूत्रे न विस्तरनिषेधोऽनीत ॥ २७ ॥

ननु सति प्रत्यक्षस्य प्रमाणान्तरत्वे तल्लक्षणपरीक्षा सङ्गच्छते तदेव तु नास्तीत्याशङ्कते। प्रत्यक्षत्वेनाभिमतं घटादिज्ञानम् अनुमानमनुमिति एकदेशस्य पुरोभागस्य ग्रहणानन्तरमुत्पन्नत्वात् तथा चक्षुरादिग्रहणाऽऽत्मकाख्यज्ञानजन्यत्वाद् वृक्षादिज्ञानम् अनुमानात्मकम् ॥ २८ ॥

एकदेशग्रहणमाश्रित्य प्रत्यक्षस्यानुमानत्वमुपपाद्यते । तच्च—

**न प्रत्यक्षेण यावत्तावदप्युपलम्भात् ॥ २९ ॥**

न प्रत्यक्षमनुमानम् । कस्मात् ?—प्रत्यक्षेणैवोपलम्भात् । यत्तदेकदेशग्रहणमाश्रीयते प्रत्यक्षेणासावुपलम्भः न चोपलम्भो निर्विषयोऽस्ति यावच्चार्थजातं तस्य विषयः तावदभ्यनुज्ञायमानं प्रत्यक्षव्यवस्थापकं भवति । किं पुनस्ततः अन्यदर्थजातम् अवयवी समुदायो वा । न चैकदेशग्रहणमनुमानं भावयितुं शक्यं हेत्वभावादिति । * अन्यथाऽपि च प्रत्यक्षस्य नानुमानत्वप्रसङ्गस्तत्पूर्वकत्वात् * प्रत्यक्षपूर्वकमनुमानं सम्बद्धावग्निधूमौ प्रत्यक्षतो दृष्टवतो धूमप्रत्यक्षदर्शनादग्नावनुमानं भवति । यच्च सम्बद्धयोर्लिङ्गलिङ्गिनो प्रत्यक्षं यच्च लिङ्गमात्रप्रत्यक्षग्रहणं नैतदन्तरेणानुमानस्य प्रवृत्तिरस्ति । न चैतदनुमानमिन्द्रियार्थसन्निकर्षजत्वात् । न चानुमेयस्येन्द्रियेण सन्निकर्षादनुमानं भवति । सोऽयं प्रत्यक्षानुमानयोर्लक्षणभेदो महानाश्रयितव्य इति ॥ २९ ॥

**न चैकदेशोपलब्धिरवयविसद्भावात् ॥ ३० ॥**

न चैकदेशोपलब्धिमात्रम्, किं तर्हि ?—एकदेशोपलब्धिस्तत्सहचरितावयव्युपलब्धिश्च । कस्मात् ? -अवयविसद्भावात् । अस्ति ह्ययमेकदेशव्यतिरिक्तोऽवयवी तस्यावयवस्थानस्योपलब्धिकारणप्राप्तस्यैकदेशोपलब्धावनुपलब्धिरनुपपन्नेति । * अकृत्स्न

समाधत्ते ।—प्रत्यक्षमनुमानमिति न प्रत्यक्षत्वावच्छेदेनानुमितत्वं नन्वथ । यावत्तावदुपलम्भात् यावत्तावताऽपि यस्य कस्यचिद् भागस्य प्रत्यक्षेणैवेन्द्रियेणोपलम्भात् उपलम्भस्य वराऽप्यभ्युपगमात् इदमुपलक्षणम् शब्दगन्धादिप्रत्यक्षस्यावारणात् न प्रत्यक्षमात्रं पक्ष इत्यपि बोध्यम् ॥ २९ ॥

यदपि वृक्षादिज्ञानस्यानुमितत्वमिति तदपि दूषयति ।—न चेति । न चैकदेशस्यैवोपलब्धिरित्यपि युक्तम् अवयविसद्भावात् यतो हि अवयव्यपि भवतद

अग्रहणादिति चेत् न कारणतोऽन्यस्यैकदेशस्याभावात् न चावयवाः कृत्स्ना गृह्यन्ते अवयवैरेवावयवान्तरव्यवधानात् । नावयवी कृत्स्नो गृह्यत इति नायं गृह्यमाणेष्ववयवेषु परिसमाप्त इति । सेयमेकदेशोपलब्धिरनिवृत्तेति । कृत्स्नमिति वै खल्वशेषतायां सत्यां भवति । अकृत्स्नमिति शेषे सति । तच्चैतदवयवेषु बहुत्वास्ति । अव्यवधाने ग्रहणात् व्यवधाने चाग्रहणादिति । अङ्ग तु भवान् पृष्टो व्याचष्टां गृह्यमाणस्यावयविनः किमगृहीतं मन्यसे येनैकदेशोपलब्धिः स्यादिति । न ह्यस्य कारणेभ्योऽन्ये एकदेशा भवन्तीति । तत्रावयववृत्तं नोपपद्यत इति । इदं तस्य वृत्तम् —येषामिन्द्रियार्थसन्निकर्षात् ग्रहणमवयवानाम् । तैः सह गृह्यते । येषामवयवानां व्यवधानादग्रहणं तैः सह न गृह्यते । न चैतत्कृतोऽस्ति भेद इति । * समुदायोऽप्यशेषता वा समुदायो वृक्षः स्यात् तत्प्राप्तिर्वा उभयथाग्रहणभावः । * मूलस्कन्धशाखापलाशादीनाम् अशेषता वा समुदायो वृक्ष इति स्यात् प्राप्तिर्वा समुदायिनामिति उभयथा समुदायभूतस्य वृक्षस्य ग्रहणं नोपपद्यत इति । अवयवैः तावदवयवान्तरस्य व्यवधानादशेषग्रहणं नोपपद्यते । प्राप्तिग्रहणमपि नोपपद्यते, प्राप्तिमतामग्रहणात् । सेयमेकदेशग्रहणसहचरिता वृक्षबुद्धिर्द्रव्यान्तरोत्पत्तौ कल्पते न समुदायमात्र इति ॥ ३ ॥

## साध्यत्वादवयविनि सन्देहः ॥ ३१ ॥

यदुक्तमवयविसद्भावात् प्राप्तमतामयमहेतुः साध्यत्वात् ।

अवयवप्रत्यक्षे । एवञ्चावयविनोऽपि प्रत्यक्षं न व्याहतम् तेनापि सह चक्षुः संयोगाभिसत्त्वादिति भावः ॥ ३ ॥

समाप्तं प्रत्यक्षपरीक्षाप्रकरणम् ।

अवयविसद्भावादिति हेतुसाधनायोपोद्घातसङ्गत्याऽवयविप्रकरणमारभते ।—साध्यत्वादवयविनि सन्देहः साध्यत्वादिति यथाश्रुतार्थो न सङ्गच्छते वृक्षादौ व्यभि

साध्यन्तावदेतत्कारणेभ्यो द्रव्यान्तरमुत्पद्यत इति। अनुप पान्तिमेतत। एवञ्च सति विप्रतिपत्तिमात्रम्भवति विप्रति पत्तेश्चावयविनि संशय इति॥ ३१॥

## सर्वाग्रहणमवयव्यसिद्धेः॥ ३२॥

यद्यवयवी नास्ति सर्वस्य ग्रहणं नोपपद्यते। किं तत्सर्वम् - द्रव्यगुणकर्मसामान्यविशेषसमवायाः। कथं कृत्वा ?—परमाणू समवस्थानं तावद्दर्शनविषयो न भवतीत्यतीन्द्रियत्वादणूनां। द्रव्यान्तरञ्चावयविभूतं नास्ति। दर्शनविषयस्थाश्चेमे द्रव्यादयो गृह्यन्ते। तेन निरधिष्ठाना न गृह्येरन्। गृह्यन्ते तु कुम्भोऽयं श्यामः एको महान् संयुक्तः स्पन्दते अस्ति मृन्मयश्चेति। सन्ति चेमे गुणादयो धर्मा इति। तेन सर्वस्य ग्रहणात् पश्यामोऽस्ति द्रव्यान्तरभूतोऽवयवीति॥ ३२॥

चारात्तस्मादयमर्थः —अवयविनि साध्यत्वादसिद्धत्वात् सन्देहः स्ववधावसद्भावादि को हेतौ तथा च सन्दिग्धासिद्धो हेत्वाभास भाव। तत्र च स्थूलत्व स्वभावत्वा भावत्वन्याय्य न वैत्यान्या विप्रतिपत्तय। तत्र च सकम्पत्वाकम्पत्वरक्तत्वारक्तत्वाऽऽवृत त्वानावृतत्वाद्यनेकविरुद्धधर्माध्यासादेकोऽवयवी न सम्भवति तथा हि —शाखाव च्छेदेन कम्प मूलावच्छेदेन तदभावोऽप्युपलभ्यते न चैकस्मिन्नेव द्रव्ये एकदैव विरुद्ध धर्मद्वयसमावेश सम्भवति तस्मादवयवा एव तथाभूता न त्वन्योऽवयवी मानाभावात् एवं महारजतरक्तकन्दुकस्याैकस्य देशोऽवच्छेदनाऽऽरक्तत्वोपलम्भात् एवमावृतप्रदेश तनावृतत्वोपलम्भादवसेयम् इति बौद्धानां पूर्वपक्ष अत्र च बौद्धानां पूर्वपक्षसमर्था वार्त्तिककृत् लोखतात्र च विस्तरभयान्न लिख्यन्ते॥ ३१॥

सिद्धान्तसूत्रम्। अवयविनोऽसिद्धौ तद्गुणकर्मादीनां सर्वेषामग्रहणम् तथा च सकम्पाकम्पत्वरक्तारक्तत्वादिकमपि न सुग्रह परमाणुगतत्वात् प्रत्यक्षे महत्त्वस्य हेतुत्वात्॥ ३२॥

## धारणाऽऽकर्षणोपपत्तेश्च ॥ ३३ ॥ 1

अवयव्यर्थान्तरभूत इति । सङ्ग्रहकारिते वै धारणाऽऽकर्षणे । सङ्ग्रहो नाम संयोगसहचरितं गुणान्तरम् । स्नेहद्रवत्वकारितम् अपां संयोगादामे कुम्भे अग्निसङ्गात् पक्वे यदि त्ववयवकारिते अभविष्यतां पांशुराशिप्रभृतिष्वप्यज्ञास्येताम् । द्रव्यान्तरानुत्पत्तौ च तृणोपलकाष्ठादिषु जतुसङ्गृहीतेष्वपि नाभविष्यतामिति । अथावयविनं प्रत्याचक्षाणको मा भूत् प्रत्यक्षलोप इत्यणुसञ्चयं दर्शनविषयं प्रतिजानानः किमनुयोक्तव्य इति । एकमिदं द्रव्यमित्येकबुद्धिर्विषयं पर्यनुयोज्यः । किमेकबुद्धिरभिन्नार्थविषया आहोस्वित् नानाऽर्थविषयेति । अभिन्नार्थविषयेति चेत् अर्थान्तरानुज्ञानादवयविसिद्धिः । नानाऽर्थविषयेति चेत् भिन्नेष्वेकदर्शनानुपपत्तिः । अनेकस्मिन्नेक इति व्याहता बुद्धिर्न दृश्यत इति ॥ ३३ ॥

## सेनावनवद्ग्रहणमिति चेन्नातीन्द्रियत्वादणूनाम् ॥ ३४ ॥

यथा सेनाऽङ्गेषु वनाङ्गेषु च दूरादगृह्यमाणपृथक्त्वेष्वेकमिदमित्युपपद्यते बुद्धिः । एवं परमाणुषु सञ्चितेष्वगृह्यमाणपृथक्त्वेष्वेकमिदमित्युपपद्यते बुद्धिरिति । यथा गृह्यमाणपृथक्त्वानां खलु सेनावनाङ्गानामारात् कारणान्तरतः पृथक्त्वस्याग्रहणम् । यथा गृह्यमाणजातीनां पलाश इति वा खदिर इति वा नाराज्जातिग्रहणं भवति । गृह्यमाणस्पन्दानामारात् स्पन्दाग्रहणम् । गृह्यमाणे चार्थजाते पृथक्त्वस्याग्रहणादेकमिति

---

1 हेत्वन्तरमाह ।—अवयव्यवयवेभ्योऽतिरिच्यते तथा सति धारणाऽऽकर्षणे उपपद्येते अन्यथा परमाणुपुञ्जत्वे चैकदेशधारणेन सकलधारणमेकदेशाऽऽकर्षणेन सकलाऽऽकर्षणञ्च न स्यादित्यर्थः ॥ ३३ ॥

इदमवधेयम् —नौकाऽऽकर्षणेन नौस्थाऽऽकर्षणवत् कुम्भधारणेन कुम्भस्थदधि

भाक्त प्रत्ययो भवति। न त्वणूना गृह्यमाणपृथक्त्वाना कारणात
पृथक्त्वस्याग्रहणात भाक्त एकप्रत्ययोऽतीन्द्रियत्वादणूनामिति।
इदमेव च परीक्ष्यते।—किमेकप्रत्ययोऽणुसञ्चयविषय आहो
स्विन्नेति? अणुसञ्चय एव सेनावनाङ्गानि न च परीक्ष्यमाण
मुदाहरणमिति युक्तम। साध्यत्वादिति। दृष्टमिति चेन्न
तद्विषयस्य परीक्षोपपत्तेः। यदपि मन्यते दृष्टमिदं सेना
वनाङ्गाना पृथक्त्वस्याग्रहणादभेदेनैकमिति ग्रहणम। न च
दृष्ट शक्य प्रत्याख्यातुमिति। तच्च नैवम तद्विषयस्य परीक्षो
पत्ते [illegible] दर्शनविषय एवायं परीक्ष्यते। योऽयमेकमिति प्रत्ययो
दृश्यते स परीक्ष्यते किं द्रव्यान्तरविषयो वाऽथाणुसञ्चयविषय
इति अत्र दर्शनमन्यतरस्य साधक न भवति। नानाभावे
चाणूना पृथक्त्वस्याग्रहणादभेदेनैकमिति ग्रहणम अतस्मिं
[illegible]ति प्रत्ययः। यथा स्थाणौ पुरुष इति। तत किम [illegible]
स्मादात प्रत्ययस्य प्रधानापेक्षितत्वात प्रधानसिद्धिः। [illegible]
पुरुष इति प्रत्ययस्य किं प्रधानम? योऽसौ पुरुषे पुरुष
तस्मिन सति पुरुषसामान्यग्रहणात स्थाणौ पुरुषोऽयमिति।
एव नानाभूतेष्वेकमिति प्रामाण्यग्रहणात प्रधान सति [illegible]
मर्हति। प्रधानञ्च सर्वस्याग्रहणादिति नोपपद्यते, तस्मादि [illegible]
एवायमभेदप्रत्यय एकमिति। इन्द्रियान्तरविषयेष्वभेदप्रत्ययः
प्रधानमिति चेत न विशेषहेत्वभावात दृष्टान्ताव्यवस्था।
श्रोत्रादिविषयेषु शब्दादिष्वभिन्नेष्वेकप्रत्यय प्रधानमनेकस्मिन्नेक
प्रत्ययस्येति। एवञ्च सति दृष्टान्तोपादान न व्यवतिष्ठ
विशेषहेत्वभावात। अपि षु साध्वनेष एकप्रत्ययः किमतस्मि
स्तत्प्रत्यय स्थाणौ पुरुषप्रत्ययवत। अथ शस्य तथाभू
तस्मिस्तदिति प्रत्यय यथा शब्दस्येकत्वादि एक शब्द इति

धारणाकर्षणोपपत्ते [illegible] विजातीयसंयोगविलक्षणवाचकभावाभावोपपत्ते च।

विशेषहेतुपरिग्रहणमन्तरेण दृष्टान्तो संशयमापादयत इति। कुम्भवत् सञ्चयमात्रं गन्धादयोऽपीत्यनुदाहरणं गन्धादय इति। एवं परिमाणसंयोगस्पन्दजातिविशेषप्रत्यया अप्यनुयोक्तव्यास्तथा चैव प्रसङ्ग इति। एकत्वबुद्धिस्तावदेकस्मिन्नेक इति प्रत्यय इति विशेषहेतुरर्थान्तरमिति प्रत्ययेन सामानाधिकरण्यात् एकमिदं महच्चेति एकविषयौ प्रत्ययौ समानाधिकरणौ भवतः। तेन विज्ञायते यन्महत् तदेकमिति। अणुसमूहेऽतिशयग्रहणं महत्प्रत्यय इति चेत् सोऽयमसत्स्वणुषु महत्प्रत्ययोऽतस्मिंस्तदिति प्रत्ययो भवतीति। किञ्चातः अतस्मिंस्तदिति प्रत्ययस्य प्रधानापेक्षित्वात् प्रधानसिद्धिरिति भवितव्यं सत्येव महत्प्रत्ययेन। अणुः शब्दो महानिति च व्यवसायात् प्रधानसिद्धिरिति चेत् न मन्दतीव्रताग्रहणमेतावत्त्वानवधारणात् यथा द्रव्ये। अणुः शब्दोऽल्पो मन्द इत्यर्थस्य ग्रहणं महान् शब्दः पटुस्तीव्र इत्यर्थस्य ग्रहणम्। कस्मात्? इयत्ताऽनवधारणात्। न ह्ययं महान् शब्द इति व्यवस्यन्नियानयमित्यवधारयति। यथा बदरामलकबिल्वादीनि। संयुक्ते इमे इति च द्वित्वसमानाश्रयप्राप्तिग्रहणम्। द्वौ समुदायावाश्रयः संयोगस्येति चेत् कोऽयं समुदायः? प्राप्तिरनेकस्य अनेका वा प्राप्तिरेकस्य समुदाय इति चेत् प्राप्तिग्रहणं प्राप्त्याश्रितायाः। संयुक्ते इमे वस्तुनी इति नात्र द्वे प्राप्ती संयुक्ते गृह्येते, अनेकसमूहः समुदाय इति चेन्न द्वित्वेन समानाधिकरणस्य ग्रहणात्* द्वाविमौ संयुक्ताविति ग्रहणे सति नानेकसमुदायाश्रयः संयोगो गृह्यते। न च द्वयोरणुग्रहणमस्ति। तस्मान्महती द्वित्वाश्रयभूते द्रव्ये संयोगस्य स्थानमिति। * प्रत्यासत्ति

पूर्वोक्ता ५ नामन सा धो ध्वो गन्धमानत्व परोक्त समाधानमा ... दर्शयति। आतदूर स्थकमनुष्यस्तम्भादि असत्यत्वेऽपि सनातनादित्यवत् एकपरमाणा असत्यत्वेऽपि

प्रतिघातावसानो संयोगो नार्थान्तरमिति चेत् न, अर्थान्तरहेतुत्वात् संयोगस्य शब्दरूपादिस्पन्दानां हेतुः संयोगः। न च द्रव्ययोर्गुणान्तरोपजननमन्तरेण शब्दे रूपादिषु स्पर्शे च कारणत्वं गृह्यते। तस्मात् गुणान्तरं प्रत्ययविषयश्चार्थान्तरं तत्प्रतिषेधो वा कुण्डली गुरुः अकुण्डलश्छात्र इति संयोगबुद्धेश्च यद्यर्थान्तरं न विषयः। अर्थान्तरप्रतिषेधस्तात्र विषयः। तत्र प्रतिषिध्यमानवचनम्। संयुक्ते द्रव्ये इति यदर्थान्तरमन्यत्र दृष्टमिह प्रतिषिध्यते। तद्वक्तव्यमिति। इयमेकतागाश्रितस्य ग्रहणान्नाणवाश्रय इति जातिविशेषस्य प्रत्ययानुवृत्तिलिङ्गस्या प्रत्याख्यानम्। प्रत्याख्याने वा प्रत्ययव्यवस्थानुपपत्तिः। व्याव कारणस्याभिव्यक्त्यधिकरणवचनम्। अणुसमवस्थानं विषय इति चेत् प्राप्ताप्राप्तसामर्थ्यवचनम्। किम्प्राप्ते अणुसमवस्थाने तदाश्रयो जातिविशेषो गृह्यते अथ प्राप्ते इति।

अप्राप्ते ग्रहणमिति चेत् व्यवहितस्याणुसमवस्थानस्याप्युपलब्धिप्रसङ्गः। न व्यवहितेऽणुसमवस्थाने तदाश्रयो जातिविशेषो गृह्यते। प्राप्ते ग्रहणमिति चेत् मध्यपरभागयोरप्राप्तौ वर्णाभिव्यक्तिः यावत् प्राप्तं भवति तावत्यभिव्यक्तिरिति चेत् तावतोऽधिकरणत्वमणुसमवस्थानस्य। यावति प्राप्ते जातिविशेषो गृह्यते, तावदस्याधिकरणमिति प्राप्तं भवति। तत्रैकसमुदाये प्रतीयमानेऽर्थभेदः। एवञ्च सति योऽयमणुसमुदायो वृक्ष इति प्रतीयते तत्र वृक्षबहुत्वं प्रतीयेत। यत्र यत्र ह्यणुसमुदायस्य भागे वृक्षत्वं गृह्यते स स वृक्ष इति। तस्मात् समुदितोऽणुसमवस्थानस्यार्थान्तरस्य जातिविशेषस्याभिव्यक्तिविषयत्वादवयव्यर्थान्तरभूत इति ॥ ३४ ॥

१ समू रूपा ... प्रा ... चेन्न ... अनिन्द्रियत्वात् प्रत्यक्षं म... त्वात् महत्त्वात् सनाथेनाप्रत्यक्षं युज्यते न त्वणूनां महत्त्वाभावादिति भावः ॥ ५॥

समाप्तमवयविपरीक्षाप्रकरणम्।

परीक्षितं प्रत्यक्षम् अनुमानमिदानीं परीक्ष्यते,—

**रोधोपघातसादृश्येभ्यो व्यभिचारादनुमान-मप्रमाणम् ॥ ३५ ॥**

अप्रमाणमिति। एकत्राप्यर्थस्य न प्रतिपादकमिति। रोधादपि नदी पूर्णा गृह्यते तदा चोपरिष्टाद् वृष्टो देव इति मिथ्यानुमानम्। नीडोपघातादपि पिपीलिकाण्डसञ्चारो भवति तदा च भविष्यति वृष्टिरिति मिथ्यानुमानमिति। पुरुषोऽपि मयूरवाशितमनुकरोति तदापि शब्दसादृश्यान्मिथ्यानुमानं भवति ॥ ३५ ॥

**नैकदेशत्राससादृश्येभ्योऽर्थान्तरभावात् ॥ ३६ ॥**

नायमनुमानव्यभिचारः। अननुमाने तु खल्वयमनुमानाभिमानः। कथम्?—नाविशिष्टो लिङ्गं भवितुमर्हति। पूर्णा

अप्रमाण[illegible] [illegible]नुमानं परीक्षितुं पूर्वपक्षयति।—अनुमानस्य [illegible] प्रत्यक्षस्य [illegible] अप्रमाणमित्यस्य [illegible] अनुमानमप्रमाणं [illegible] न प्रमाणं प्रमितिकरणं व्यभिचारिहेतुकत्वात् तत्र [illegible] व्यभिचारं [illegible] [illegible] न [illegible]—न [illegible] [illegible] कतेन च [illegible]नुमानं [illegible] न सम्भवति [illegible] [illegible] [illegible] पिपीलिकाण्डसञ्चारेण [illegible] [illegible] व्यभिचारात् पिपीलिका[illegible] [illegible]भिप्रायेणेदम् अथवा [illegible] पूर्वकः। [illegible] [illegible]नुमापक[illegible] [illegible]नुमापक सामान्यतो दृष्ट [illegible] [illegible] [illegible] [illegible] [illegible]नुमापकत्वं न सम्भवति [illegible] पिपीलिकाण्डसञ्चारेण [illegible]नुमानं [illegible] [illegible]नुमानं तस्य च [illegible] [illegible]। [illegible] व्यभिचारशङ्का [illegible] [illegible] तत्प्रामाण्यं न सम्भवति [illegible] ॥ ३५ ॥

समाधत्ते।—अनुमानाप्रामाण्यं न युक्तम् एकदेशत्रासादीनां[illegible]

दकविशिष्टं खलु वर्षोदकं शीघ्रतरत्वं स्रोतसो बहुतरफेनफल-
पर्णकाष्ठाऽऽदिवहनञ्चोपलभमानः पूर्णत्वेन नद्या उपरि वृष्टो
देव इत्यनुमिनोति नोदकवृद्धिमात्रेण। पिपीलिकाप्रायस्याण्ड-
सञ्चारे भविष्यति वृष्टिरित्यनुमीयते न कासाञ्चिदिति। नेदं
मयूरवाशितं तत्सदृशोऽयं शब्द इति विशेषापरिज्ञानान्मिथ्या-
ऽनुमानमिति। यस्तु सदृशाद् विशिष्टाच्छब्दाद्विशिष्टं मयूर-
वाशितं गृह्णाति तस्य विशिष्टोऽर्थो गृह्यमाणो लिङ्गम्। यथा
सर्पाऽऽदीनामिति। सोऽयमनुमातुरपराधो नानुमानस्य योऽर्थ-
विशेषेणानुमेयमर्थमविशिष्टार्थदर्शनेन बुभुत्सत इति। ॥ ३६॥

त्रिकालविषयमनुमानं त्रैकाल्यग्रहणादित्युक्तम् अत्र च —

**वर्त्तमानाभावः पततः पतितपतितव्यकालोप-
पत्तेः ॥ ३७ ॥**

वृन्तात् प्रच्युतस्य फलस्य भूमौ प्रत्यासीदतो यदूर्द्ध्वं स
पतितोऽध्वा तत्संयुक्तः कालः पतितकालः। योऽधस्तात् स
पतितव्योऽध्वा तत्संयुक्तः कालः पतितव्यकालः। नेदानीं
तृतीयोऽध्वा वर्त्तते यत्र पततीति वर्त्तमानः कालो गृह्येत।
तस्माद्वर्त्तमानः कालो न विद्यते इति ॥ ३७ ॥

लिङ्गं। पिपीलिकासञ्चारादिरूपस्य तत्सदृशत्वात् लिङ्गीभूतानां नदीवृद्ध्यादीनां भिन्नत्वात् वि-
न च सर्वत्र व्यभिचारशङ्का तत्रापि तस्याः तर्केण तदपनयनान्न दोष इत्याशयः ॥३६॥

समाप्तमनुमानपरीक्षाप्रकरणम्।

अनुमानस्य त्रिकालविषयत्वमभिमतं तन्न युक्तम् वर्त्तमानाभावेन तदघीन-
सिद्धीनां तयोरभावेन कालत्रयाऽत्मकविषयाभावादित्याशयेन वर्त्तमान-
परीक्षाप्रकरणमारभमाणो वर्त्तमानमाक्षिपति। वर्त्तमानाभावः अतीतानागतभिन्न-
कालत्वाभावः व्यत्यास्यति पततः इति। —पततः फलादवच्छावधिकः कः न दृश्य-
पतितोऽध्वा भूम्यवधिकः कश्चन पतितव्योऽध्वा न तु वर्त्तमानस्य प्रसङ्गोऽपीति
भावः ॥ ३७ ॥

## तयारप्यभावो वर्त्तमानाभावे तदपेक्षत्वात् ॥३८॥

नाध्वव्यङ्ग्यः कालः किं तर्हि?—क्रियाव्यङ्ग्यः पततीति। यदा पतनक्रिया व्युपरता भवति स कालः पतितकालः। यदोत्पत्स्यते स पतितव्यकालः। यदा द्रव्ये वर्त्तमाना क्रिया गृह्यते स वर्त्तमानः कालः। यदि चायं द्रव्ये वर्त्तमानं पतनं न गृह्णाति कस्योपरममुत्पत्स्यमानतां वा प्रतिपद्यते। पतितः काल इति भूता क्रिया पतितव्यः काल इति चोत्पत्स्यमाना क्रिया उभयोः कालयोः क्रियाहीनं द्रव्यमधः पततीति क्रियासम्बद्धम। सोऽयं क्रियाद्रव्ययोः सम्बन्धं गृह्णातीति वर्त्तमानः कालः। तदाश्रयौ चेतरौ कालौ तदभावे न स्यातामिति ॥३८॥

अथापि —

## नातीतानागतयोरितरेतरापेक्षा सिद्धिः ॥३९॥

यद्यतीतानागतावितरेतरापेक्षौ सिध्यतः प्रतिपद्येमहि वर्त्तमानविलोपम। नातीतापेक्षाऽनागतसिद्धिः। नाप्यनागतापेक्षा अतीतसिद्धिः। कया युक्त्या?—केन कल्पनाऽतीतः? कथमतीतापेक्षाऽनागतसिद्धिः?—कया युक्त्या?—केन च कल्पनानागतः?—कथमनागतापेक्षाऽतीतसिद्धिः?—नैतच्छक्यं निर्वक्तुम। अव्याकरणीय एष वर्त्तमानलोपः। यच्च मन्येत ह्रस्वदीर्घयोः स्थलनिम्नयोश्छायाऽऽतपयोश्च यथेतरेतरापेक्षया सिद्धिः। एवमतीतानागतयोरिति। तन्नोपपद्यते, विशेषहेत्वभावात्। दृष्टान्तवत् प्रतिदृष्टान्तोऽपि प्रसज्यते। यथा रूपस्पर्शौ गन्धरसौ नेतरेतरापेक्षौ सिध्यतः एवमतीतानागताविति।

---

समाधत्ते।—वर्त्तमानाभावे तयोरतीतानागतयोरप्यभावः स्यात् तयास्तदपेक्षत्वात् वर्त्तमानध्वंसप्रतियोगित्वं ह्यतीतत्वं वर्त्तमानप्रागभावप्रतियोगित्वञ्चानागतत्वमिति भावः ॥ ३८ ॥

नतरेतरापेक्षा कस्यचित् सिद्धिरिति। यस्मादेकाभावेऽन्यतराभावादुभयाभावः। यद्येकस्यान्यतरापेक्षा सिद्धिः अन्यतरस्येदानीं किमपेक्षा? यद्यन्यतरस्यैकापेक्षा सिद्धिः एकस्येदानीं किमपेक्षा? एवमेकस्याभावेऽन्यतरन्न सिध्यतीत्युभयाभावः प्रसज्यते ॥ ३९ ॥

अर्थसद्भावव्यङ्ग्यश्चायं वर्त्तमानः कालः विद्यते द्रव्यं विद्यते गुणः विद्यते कर्मेति। यस्य चायं नास्ति तस्य —

**वर्त्तमानाभावे सर्वाग्रहणं प्रत्यक्षानुपपत्तेः ॥ ४० ॥**

प्रत्यक्षमिन्द्रियार्थसन्निकर्षजम्। न चाविद्यमानमसदिन्द्रियेण सन्निकृष्यते। न चायं विद्यमानं सत् किञ्चिदनुजानाति। प्रत्यक्षनिमित्तं प्रत्यक्षविषयं प्रत्यक्षज्ञानं सर्वन्नोपपद्यते। प्रत्यक्षानुपपत्तौ च तत्पूर्वकत्वात् अनुमानागमयोरनुपपत्तिः। सर्वप्रमाणविलोपे सर्वग्रहणं न भवतीति। उभयथा च वर्त्तमानः कालो गृह्यते क्वचिदर्थसद्भावव्यङ्ग्यः यथा—द्रव्यं द्रव्यमिति। क्वचित् क्रियासन्तानव्यङ्ग्यः यथा—पचति छिनत्तीति। नानाविधा चैकार्था क्रिया क्रियासन्तानः क्रियाऽभ्यासश्च। नानाविधा चैकार्था क्रिया पचतीति। स्थाल्यधिश्रयणमुदकसेचनं तण्डुलावपनमेधोऽपसर्पणमग्न्यभिज्वालनं दर्वीघट्टनं मण्डस्रावणमधोऽवतारणमिति। छिनत्तीति क्रियाऽभ्यासः उद्यम्योद्यम्य परशुं दारुणि निपातयन् छिनत्तीत्युच्यते ॥ ४ ॥

ननु तयोः परस्परापेक्षयैव सिद्धिः न वर्त्तमानापेक्षेत्यत आह। अन्योऽन्याऽऽश्रयादिति भावः ३९ ॥

तत्र्यभावे का क्षतिः?—अत आह सूत्रकारः।—वर्त्तमानाभावे प्रत्यक्षं नोपपद्यते प्रत्यक्षस्य वर्त्तमानविषयत्वात् अत एवोक्तं — सम्बद्धं वर्त्तमानञ्च गृह्यते चक्षुरादिना इति। प्रत्यक्षाभावे च सर्वमेव ग्रहणं ज्ञानं न स्यात् प्रत्यक्षमूलकत्वादितरज्ञानानामिति भावः ॥ ४ ॥

यच्चेदं पच्यमानं छिद्यमानञ्च तत् क्रियमाणम्। तस्मिन् क्रियमाणे —

**कृतताकर्त्तव्यतोपपत्तेस्तूभयथा ग्रहणम् ॥ ४१ ॥**

क्रियासन्तानोऽनारब्धश्चिकीर्षितोऽनागतः कालः पक्ष्यतीति। प्रयोजनावसानः क्रियासन्तानोपरमोऽतीतः कालः अपाक्षीदिति। आरब्धक्रियासन्तानो वर्त्तमानः कालः पचतीति। तत्र या उपरता सा कृतता। या चिकीर्षिता सा कर्त्तव्यता। या विद्यमाना सा क्रियमाणता। तदेवं क्रियासन्तानस्थस्त्रैकाल्यसमाहारः पचति पच्यत इति वर्त्तमानग्रहणेन गृह्यते। क्रियासन्तानस्य ह्यत्राविच्छेदो विधीयते नारम्भो नोपरम इति। सोऽयमुभयथा वर्त्तमानो गृह्यते अपवृक्तो व्यपवृक्तश्च अतीतानागताभ्याम्। स्थितिव्यङ्ग्यो विद्यते द्रव्यमिति। क्रियासन्तानाविच्छेदाभिधायी च त्रैकाल्यान्वितः पचति छिनत्तीति। अन्यश्च प्रत्यासत्तिप्रभृतेरर्थस्य (च) विवक्षायां तदभिधायी बहुप्रकारो लोकेषूत्प्रेक्षितव्यः। तस्मादस्ति वर्त्तमानः काल इति ॥ ४१ ॥

**अत्यन्तप्रायैकदेशसाधर्म्यादुपमानासिद्धिः ॥ ४२ ॥**

अत्यन्तसाधर्म्यादुपमानं न सिध्यति। न चैवं भवति, यथा गौरेवं गौरिति। प्रायःसाधर्म्यादुपमानं न सिध्यति। न हि

न चादौ वर्त्तमानध्वंसप्रतियोगित्वमतीतत्वं वर्त्तमानप्रागभावप्रतियोगित्वञ्च भविष्यत्त्वं तत्। वर्त्तमान एव घटे कथं श्यामः पाको न, भविष्यतीति धीः कथं स्यादिति चेत्।—वर्त्तमानेऽपि घटे श्यामरक्तरूपादीनां कृतताकर्त्तव्यतयाऽतीतता भविष्यत्ताचोपपत्तेश्च तदपेक्षयाऽतीतानागतत्वम् व्यवहारः परम्परासम्बन्धादित्यर्थः ॥ ४१ ॥

समाप्तं वर्त्तमानपरीक्षाप्रकरणम्।

अथावसरप्राप्तमुपमानं परीक्षितुं पूर्वपक्षयति।—प्रसिद्धसाधर्म्यादुपमानं उक्तं तन्न युक्तम्, यतः साधर्म्यमात्यन्तिकं प्रायिकमैकदेशिकं वा न सम्भवति न

भवति यथाऽनड्वानेव महिष इति। एकदेशसाधर्म्यादुपमानं न सिध्यति न हि सर्वेण सर्वमुपमीयत इति ॥ ४२ ॥

**प्रसिद्धसाधर्म्यादुपमानसिद्धेर्यथोक्तदोषानुपपत्तिः ॥ ४३ ॥**

न साधर्म्यस्य कृत्स्नप्रायाल्पभावमाश्रित्योपमानं प्रवर्त्तते। किं तर्हि?—प्रसिद्धसाधर्म्यात् साध्यसाधनभावमाश्रित्य प्रवर्त्तते? यत्र चैतदस्ति न तत्रोपमानं प्रतिषेद्धुं शक्यम्। तस्माद्यथोक्तो दोषो नोपपद्यत इति ॥ ४३ ॥

अस्तु तर्ह्युपमानमनुमानम् —

**प्रत्यक्षेणाप्रत्यक्षसिद्धेः ॥ ४४ ॥**

यथा धूमेन प्रत्यक्षेणाप्रत्यक्षस्य वह्नेर्ग्रहणमनुमानम् एवं गवा प्रत्यक्षेणाप्रत्यक्षस्य गवयस्य ग्रहणमिति नेदमनुमानाद्विशिष्यते ॥ ४४ ॥

न हि आत्यन्तिकसाधर्म्येण गौरिव गौरित्युपमानं प्रवर्त्तते न वा प्रायिकसाधर्म्येण गौरिव महिष इति न च यत्किञ्चित् साधर्म्येण मेरुरिव सर्षप इति साधर्म्यस्य चोपलक्षणत्वाद्वैधर्म्योपमानमप्येवं खण्डनीयम् ॥ ४२ ॥

समाधत्ते।—प्रसिद्धं प्रकृष्टं सादृश्यादि यस्य तस्मात् सिद्धिः स्यात् यत् साधर्म्यं तज्ज्ञानस्योपमितिकरणत्वान्न दोषः साधर्म्यस्य प्रकर्षादनुमानेन क्वचित् सिद्धाभावात् ॥ ४३ ॥

अनुमानेन चरितार्थं नोपमानं प्रमाणान्तरमिति एकदेशिमतमाशङ्कते।—प्रत्यक्षेण गोसादृश्यविशिष्टेन अप्रत्यक्षस्य गवयपदवाच्यत्वस्यानुमितत्वान्नोपमानं मानान्तरमिति ॥ ४४ ॥

विशिष्यत इत्याह कया युक्त्या ?—

**नाप्रत्यक्षे गवये प्रमाणार्थमुपमानस्य पश्याम इति ॥ ४५ ॥**

यदा ह्ययमुपयुक्तोपमानो गोदर्शी गवय गोसमानमर्थं पश्यति तदाऽयं गवय इत्यस्य सञ्ज्ञाशब्दस्य व्यवस्था प्रतिपद्यते। न चैवमनुमानमिति। परार्थञ्चोपमानम्। यस्य ह्युपमानमप्रसिद्धं तदर्थं प्रसिद्धोभयेन क्रियत इति। * परार्थमुपमानमिति चेत्? न स्वयमध्यवसायात्। * भवति च भोः! स्वयमध्यवसाय यथा गौ एवं गवय इति। नाध्यवसाय प्रतिषिध्यते। उपमानन्तु तन्न भवति। प्रसिद्धसाधर्म्यात् साध्यसाधनमुपमानम्। न च यस्योभय प्रसिद्धं तं प्रति साध्यसाधनभावो विद्यत इति ॥ ४५ ॥

अथापि —

**तथेत्युपसंहारादुपमानसिद्धेर्नाविशेष ॥ ४६ ॥**

तथेति समानधर्मोपसंहारादुपमानं सिध्यति नानुमानम्। अयञ्चानयोर्विशेष इति ॥ ४६ ॥

समाधत्ते।—अप्रत्यक्षे अप्रत्यक्षतया प्रत्यक्षत्वेन प्रमाणार्थं प्रमाणीजनकमुपमानस्य न पश्याम इत्यर्थः अथवा गवये ... अप्रत्यक्षे गवये ... उपमानस्य प्रमाणार्थं प्रमाम् उपमानजन्यां प्रमाम् अनुमानत्वेन न पश्याम इत्यर्थः ... प्रमाणाभावादिति भावः ॥ ४५ ॥

ननु ... यथा ... कल्प्यतामित्याशङ्क्य युक्त्यन्तरमाह।—अनुमानादुपमानस्य ... तथेत्युपसंहारेत् यथा गौ तथा गवय इति ज्ञानादुपमानासिद्धेरुपमानाधीनसिद्धत्वपालत तथा च ... ज्ञानादिपेक्षसादृश्यज्ञानाधीनोपमिति ... किञ्च नानुमानमिति ... अनुव्यवसायसिद्धोपमिति ... प्रकृत ... ॥ ४६ ॥

समाप्तमुपमानप्रामाण्यपरीक्षाप्रकरणम्।

**शब्दोऽनुमानम्, अर्थस्यानुपलब्धेरनुमेयत्वात् ॥ ४७ ॥**

शब्दोऽनुमानं न प्रमाणान्तरम्। कस्मात्?—शब्दार्थस्यानुमेयत्वात्। कथमनुमेयत्वम्?—प्रत्यक्षतोऽनुपलब्धेः, यथाऽनुपलभ्यमानो लिङ्गी मितेन लिङ्गेन पश्चान्मीयत इति अनुमानम् एवं मितेन शब्देन पश्चान्मीयतेऽर्थोऽनुपलभ्यमान इत्यनुमानं शब्दः ॥ ४७ ॥

इतश्चानुमानं शब्दः।—

**उपलब्धेरद्विप्रवृत्तित्वात् ॥ ४८ ॥**

प्रमाणान्तरभावे द्विप्रवृत्तिरुपलब्धिः। अन्यथा ह्युपलब्धिरनुमाने अन्यथोपमाने। तद्व्याख्यातम्—शब्दानुमानयोस्तूपलब्धिरद्विप्रवृत्तिः यथाऽनुमाने प्रवर्तते तथा शब्देऽपि। विशेषाभावादनुमानं शब्द इति ॥ ४८ ॥

**सम्बन्धाच्च ॥ ४९ ॥**

शब्दोऽनुमानमिति वर्त्तते। सम्बद्धयोश्च शब्दार्थयोः सम्बन्धप्रसिद्धौ शब्दोपलब्धेरर्थग्रहणम्। यथा सम्बद्धयोर्लिङ्गलिङ्गिनोः सम्बन्धप्रतीतौ लिङ्गोपलब्धौ लिङ्गिग्रहणमिति ॥ ४९ ॥

क्रमप्राप्तं शब्दं परीक्षितुं पूर्वपक्षयति।—शब्दोऽनुमानमित्यस्य शाब्दबोधोऽनुमितिरिति पर्यवसितार्थः तथा च शब्दो लिङ्गविधयाऽनुमितिकरणम् अर्थस्य शब्दप्रतिपाद्यस्य अनुपलब्धेः अप्रत्यक्षत्वात् अनुमेयत्वादिति तथा च शाब्दज्ञानमनुमितिरप्रत्यक्षविषयत्वात् प्रत्यक्षभिन्नत्वाद्वेत्यर्थः तात्पर्यम् ॥ ४७ ॥

हेत्वन्तरमाह—उपलब्धेः शाब्दबोधत्वाभिमताया अनुमितित्वाभिमतायाश्च अद्विप्रवृत्तित्वं अद्विप्रकारत्वात् अनुमितित्वं शाब्दत्वञ्च न जातिद्वयम् शब्दस्य लिङ्गविधया बोधकत्वाल्लिङ्गान्तरजन्यज्ञानवद्विजातीयत्वाभावात् ॥ ४८ ॥

हेत्वन्तरमाह।—सम्बन्धात् ज्ञायमानादिति शेषः शब्दो हि व्याप्तिपक्षधर्मतापेक्षो बोधयति तेन शाब्दबोधोऽनुमितिरिति भावः ॥ ४९ ॥

यत्तावदर्थस्यानुमेयत्वादिति तन्न ।—

**आप्तोपदेशसामर्थ्याच्छब्दादर्थे सम्प्रत्यय ॥ ५० ॥**

स्वर्ग अप्सरस उत्तरा कुरव, सप्त द्वीपा समुद्र, लोक सन्निवेश इत्येवमादेरप्रत्यक्षस्यार्थस्य न शब्दमात्रात प्रत्यय । किं तर्हि ?—आप्तैरयमुक्त शब्द इत्यत सम्प्रत्यय । विपर्य्ययेण सम्प्रत्ययाभावात । न त्वेवमनुमानमिति । यत पुनरुपलब्धे रद्विप्रवृत्तित्वादिति । अयमेव शब्दानुमानयोरुपलब्धे प्रवृत्ति भेद । तत्र विशेषे सत्यहेतुर्विशेषाभावादिति । यत्तु पुनरिद सम्बन्धाच्चेति । अस्ति शब्दार्थयो सम्बन्धोऽनुज्ञात । अस्ति च प्रतिषिद्ध । अस्येदमिति षष्ठीविशिष्टस्य वाक्यस्यार्थविशेषोऽनु ज्ञात । प्राप्तिलक्षणस्तु शब्दार्थयो सम्बन्ध प्रतिषिद्ध ॥ ५० ॥

कस्मात् ?—

**प्रमाणतोऽनुपलब्धे ॥ ५१ ॥**

प्रत्यक्षतस्तावच्छब्दार्थप्राप्ते र्नोपलब्धि अतीन्द्रियत्वात । येनेन्द्रियेण गृह्यते शब्द, तस्य विषयभावमतिवृत्तोऽर्थो न गृह्यते । अस्ति चातीन्द्रियविषयभूतोऽप्यर्थ । समानेन चेन्द्रि येण गृह्यमाणयो प्राप्तिगृह्यत इति । प्राप्तिलक्षणे च गृह्यमाणे शब्दार्थयो शब्दान्तिके वाऽर्थ स्यात, अर्थान्तिके वा शब्द स्यात् उभय वोभयत ॥ ५१ ॥

---

सिद्धान्तसूत्रम ।—आप्तस्य भ्रमा दशून्यस्य च उपदेश शब्द तत्र य सामर्थ्य आकाङ्क्षा योग्यतादिमत्त्व तत । अथवा आप्त प्राप्त उपदेशसामर्थ्यम् आकाङ्क्षादि सत्त्व तत तस्माद्धकारात सावधारणार्थ निर्देश तेन व्याप्तिज्ञान पक्षधर्माकाङ्क्षादि ज्ञानादर्थ सम्प्रत्यय शाब्दबोध सम्भवतीति नानुमानान्तर्भाव शब्दस्येत्यर्थ शब्दा दनुमेय प्रत्यासे न त्वनुमानमानीत्यनुभवादिति भाव ॥ ५ ६

अथ खल्वयम —

## पूरणप्रदाहपाटनानुपलब्धेश्च सम्बन्धाभाव ॥५२॥

स्थानकरणाभावादिति चार्थ। न चायमनुमानतोऽप्युपलभ्यते शब्दान्तिकेऽर्थ इति। एतस्मिन् पक्षेऽप्यास्य स्थानकरणोच्चारणीय शब्द तदन्तिकेऽर्थ इति। अन्नाग्न्यसिशब्दोच्चारणे पूरणप्रदाहपाटनानि गृह्येरन। न च गृह्यन्ते। अग्रहणान्नानुमेय प्राप्तिलक्षण सम्बन्ध अर्थान्तिके शब्द इति स्थानकरणासम्भवादनुच्चारणम। स्थान कण्ठादय करण प्रयत्नविशेष तस्यार्थान्तिकेऽनुपपत्तिरिति। उभयप्रतिषेधाच्च नोभयम। तस्मान्न शब्देनार्थ प्राप्त इति ॥ ५२ ।

## शब्दार्थव्यवस्थानादप्रतिषेध ॥ ५३ ॥

शब्दार्थप्रत्ययस्य व्यवस्थादर्शनादनुमीयते अस्ति शब्दार्थसम्बन्धो व्यवस्थाकारणम। असम्बन्धे हि शब्दमात्रादर्थमात्रे प्रत्ययप्रसङ्ग। तस्मादप्रतिषेध सम्बन्धस्येति ॥ ५३ ॥

शब्दार्थयो सम्बन्धाभाव इत्यप्याह।—शब्देन सहार्थस्य सम्बन्धाभाव व्याप्तिभावमनुमाह पूरणेति।—यदि शब्दस्यार्थेन व्याप्ति स्यात तदाऽग्न्यसिशब्दैर्मुखपूरणमुखप्रदाहमुखपाटनानि स्यु शब्दस्य व्याप्यस्य सत्त्वेनार्थस्यापि सत्त्वात ॥ ५२ ॥

तत् किं शब्दोऽसम्बद्ध एवार्थं प्रत्याययति? तथा सत्यतिप्रसङ्ग इत्याशङ्कते। —अप्रतिषेध इत्यादि। सम्बन्धप्रतिषेधो न शब्दार्थयो सम्बन्धस्य व्यवस्थितत्वात। कश्चिदेव हि शब्द कञ्चिदेवार्थं बोधयति न सर्व सर्वं इति इत्यस्ति सम्बन्ध सोऽस्ति तत्र सम्बन्धेन व्याप्तिरप्यावश्यकी स च सम्बन्धो न मुखपूरणादिनियामक इति भाव ॥५३॥

अत्र समाधि ।—

**न सामयिकत्वाच्छब्दार्थसम्प्रत्ययस्य ॥ ५४ ॥**

न सम्बन्धकारित शब्दार्थव्यवस्थानम । कि तर्हि ?—समयकारित यत तदवोचाम ,—अस्येदमिति षष्ठीविशिष्टस्य वाक्यस्यार्थविशेषोऽनुज्ञात शब्दार्थयो सम्बन्ध इति । समय तमवोचामेति । क पुनरय समय ? अस्य शब्दस्येदमर्थजातमभिधेयम इत्यभिधानाभिधेयनियमनियोग । तस्मिन्नुपयुक्ते शब्दादर्थसम्प्रत्ययो भवति । विपर्यये हि शब्दश्रवणेऽपि प्रत्ययाभाव । सम्बन्धवादिनाऽपि चायमवर्जनीय इति । प्रयुज्यमानग्रहणाच्च समयोपयोगो लौकिकानाम । समयपालनार्थ चेद पदलक्षणाया वाचोऽन्वाख्यान व्याकरणम । वाक्यलक्षणाया वाचोऽर्थो लक्षणम पदसमूहो वाक्यमर्थपरिसमाप्ताविति । तदेव प्राप्तिलक्षणस्य शब्दार्थसम्बन्धस्यार्थजुषोऽप्यनुमान हेतुर्न भवतीति ॥ ५४ ॥

**जातिविशेषे चानियमात ॥ ५५ ॥**

सामयिक शब्दादर्थसम्प्रत्यय न स्वाभाविक । ऋष्यार्य्य म्लेच्छाना यथाकाम शब्दविनियोगोऽर्थप्रत्यायनाय प्रवर्त्तते । स्वाभाविके हि शब्दस्यार्थप्रत्यायकत्वे यथाकाम न स्यात् ।

उत्तरयति ।—सम्मतेऽपि शब्दार्थयोरव्यवस्था न शब्दाधीनस्यार्थसम्प्रत्ययस्य सामयिकत्वात शक्तिग्रहाधीनत्वात शक्तिरूपसम्बन्धेन च न व्याप्ति तस्मान्नियामकसम्बन्धाधीनत्वादिति भाव ॥ ५४ ॥

शब्दस्यार्थेन सह न स्वाभाविक सम्बन्ध जातिविशेषेऽनियमात शब्दस्यानियतार्थकत्वदर्शनात आर्य्या हि यवशब्दाद्दीर्घशूकविशेष प्रतियन्ति म्लेच्छास्तु

यथा तैजसस्य प्रकाशस्य रूपप्रत्ययहेतुत्व न जातिविशेष व्यभिचरतीति ॥ ५५ ॥

## तदप्रामाण्यमनृतव्याघातपुनरुक्तदोषेभ्य ॥ ५६ ॥

पुत्रकामेष्टिहवनाभ्यासेष। तस्येति शब्दविशेषमेवाधिकुरुत भगवानृषि । शब्दस्य प्रमाणत्व न सम्भवति । कस्मात ?—अनृत दोषात्। पुत्रकामेष्टौ पुत्रकाम पुत्रेष्ट्या यजेतेति नेष्टौ संस्थिताया पुत्रजन्म दृश्यते। दृष्टार्थस्य वाक्यस्यानृतत्वात् अदृष्टार्थमपि वाक्यम अग्निहोत्र जुहुयात् स्वर्गकाम (मैत्री उप० ६।३६) इत्याद्यनृतमिति ज्ञायत। विहित व्याघातदोषाच्च। हवन—उदित होतव्यम अनुदिते होतव्य समयाध्युषित होतव्यम इति विधाय विहित व्याहन्ति - श्यावोऽस्याऽऽहुतिमभ्यवहरति य उदित जुहोति शबलो ऽस्याऽऽहुतिमभ्यवहरति योऽनुदिते जुहोति श्यावशबला वस्याऽऽहुतिमभ्यवहरत य समयाध्युषिते जुहोति"। व्याघाताच्चान्यतरान्मथ्येति पुनरुक्तदोषाच्च। अभ्यासे देश्य मान— त्रि प्रथमामन्वाह त्रिरुत्तमाम" इति पुनरुक्तदोषो

कद्दामति नियम तु सव सव प्रतीयात्। आपाततश्चेदम् —नानाशक्तावपि यत्र यस्य शक्तिग्रह तस्य तदर्थोपस्थित ॥ ५५ ॥

समाप्त शब्दसामान्यप रीक्षाप्रकरणम्।

शब्दस्य दृष्टादृष्टार्थकत्वेन द्वैविध्यमुक्तम् तत्र चादृष्टार्थकशब्दस्य वेदस्य प्रामाण्य परीक्षित पूर्वपक्षयति।—तस्य दृष्टार्थकव्यतिरिक्तशब्दस्य वेदस्य अप्रामाण्यम्। कुत ?—अनृतत्वाददोषात्। तत्र च पुत्रेष्टिकारी यागादौ क्वचित् फलानुत्पत्तिदर्शना दनृतत्वम्। व्याघात पूर्वापरविरोध । यथा — उदित जुहोति अनुदित जुहोति समयाध्युषित जुहोति श्याव ऽस्याऽऽहुतिमभ्य हरति य उदित जुहोति शबलो ऽस्याऽऽहुतिमभ्यवहरति योऽनुदिते जुहोति श्यावशबलावस्याऽऽहुतिमभ्यवहरत य समयाध्युषित जुहोति । अत्र चोदितादिवाक्याना निन्दाऽनुमिताानिष्टसाधनताबोधक वाक्येन सह विरोध। पौनरुक्त्यादप्रामाण्यम्। यथा,— त्रि प्रथमामन्वाह

भवति। पुनरुक्तञ्च प्रमत्तवाक्यमिति। तस्मादप्रमाणं शब्दोऽनृत व्याघातपुनरुक्तदोषेभ्य इति ॥ ५६ ॥

## न कर्मकर्तृसाधनवैगुण्यात् ॥ ५७ ॥

नानृतदोषः पुत्रकामेष्टौ। कस्मात्? — कर्मकर्तृसाधन वैगुण्यात्। इष्ट्या पितरौ संयुज्यमानौ पुत्रं जनयत इति इष्टिः करणं साधनम्, पितरौ कर्त्तारौ संयोगः कर्म, त्रयाणां गुण योगात् पुत्रजन्म वैगुण्याद्विपर्य्ययः। इष्ट्याश्रयं तावत्कर्म वैगुण्यं — समीहाभ्रेषः। कर्तृवैगुण्यम् — अविद्वान् प्रयोक्ता कपूयाऽऽचरणश्च। साधनवैगुण्यं, — हविरसंस्कृतमुपहतमिति। मन्त्रा न्यूनाधिकाः स्वरवर्णहीना इति। दक्षिणा दुरागता हीना निन्दिता चेति। अथोपजनाश्रयं, कर्मवैगुण्यं — मिथ्यासम्प्रयोगः। कर्तृवैगुण्यं — योनिव्यापादः, वीजोपघात श्चेति। साधनवैगुण्यम् — इष्टावभिहितम्। लोके चाग्निकामो दारुणी मथ्नीयादिति विधिवाक्यम्। तत्र कर्मवैगुण्यं मिथ्याऽभिमन्थनम्। कर्तृवैगुण्यं प्रज्ञाप्रयत्नगतः प्रमादः। साधनवैगुण्यम् — आर्द्रं सुषिरं दार्विति। तत्र फलं न निष्प द्यत इति नानृतदोषः। गुणयोगेन फलनिष्पत्तिदर्शनात्। न चेदं लौकिकाद्भिद्यते पुत्रकामः पुत्रेष्ट्या यजेतेति ॥ ५७ ॥

---

निरुक्तमाम इत्येवंविधमत्तस्य प्रथमत्वापर्य्यवसानेऽपि विकथनेन पौनरुक्त्यम्। एतेषामप्रामाण्ये तद्दृष्टान्तेन तदेककर्तृकत्वेन तदेकजातीयत्वेन वा सर्ववेदाप्रामाण्यं साधनीयमिति भावः ॥ ५६ ॥

सिद्धान्तसूत्रम्। — न वेदाप्रामाण्यं कर्मकर्तृसाधनवैगुण्यात् फलाभावोपपत्ते कर्मणः क्रियाया वैगुण्यम् अयथाविधित्वादि कर्तुर्वैगुण्यम् अविद्वत्त्वादि साधनस्य हविरादेः वैगुण्यम् अप्रोक्षितत्वादि यथोक्तकर्मणः फलाभाव ह्यनृतत्वं न चैवमस्तीति भावः ॥ ५७ ॥

**अभ्युपेत्य कालभेदे दोषवचनात् ॥ ५८ ॥**

न व्याघातो हवन इत्यनुवर्त्तते। योऽभ्युपगतं हवनकालं भिनत्ति ततोऽन्यत्र जुहोति तत्रायमभ्युपगतकालभेदे दोष उच्यते। श्यावोऽस्याऽऽहुतिमभ्यवहरति, य उदिते जुहोति तदिदं विधिभ्रंशे निन्दावचनमिति ॥ ५८ ॥

**अनुवादोपपत्तेश्च ॥ ५९ ॥**

पुनरुक्तदोषोऽभ्यासे नेति प्रकृतम्। अनर्थकोऽभ्यासः पुनरुक्तम्। अर्थवानभ्यासोऽनुवादः। योऽयमभ्यासः,- "त्रिः प्रथमामन्वाह त्रिरुत्तमाम्" इत्यनुवाद उपपद्यते अर्थवत्त्वात्। त्रिर्वचनेन हि प्रथमोत्तमयोः पञ्चदशत्वं सामिधेनीनां भवति। तथा च मन्त्राभिवादः —"इदमहं भ्रातृव्यं पञ्चदशारेण वाग्वज्रेणावबाधे योऽस्मान् द्वेष्टि यञ्च वयं द्विष्मः" इति। पञ्चदशसामिधेनीर्वज्रं मन्त्रोऽभिवदति तदभ्यासमन्तरेण न स्यादिति ॥ ५९ ॥

**वाक्यविभागस्य चार्थग्रहणात् ॥ ६० ॥**

प्रमाणं शब्दः यथा लोके ॥ ६० ॥

व्याघातं परिहरति।—न व्याघात इति शेषः अग्न्याधानकाले उदितहोमादिकमभ्युपेत्य स्वीकृत्य अनुदितहोमादिकरणे पूर्वोक्तदोषकथनान्न व्याघात इत्यर्थः ॥ ५८ ॥

पौनरुक्त्यं परिहरति।—च पुनरर्थे अनुवादोपपत्तेः पुनर्न पौनरुक्त्यम्। निष्प्रयोजनत्वे हि पौनरुक्त्यं दोषः उक्तः स्यात्, त्वनुवादस्य उपपत्तेः प्रयोजनस्य सम्भवात्। एकादशसामिधेनीनां प्रथमोत्तमयोः त्रिरभिधाने हि पञ्चदशत्वसम्भवात् तथा च पञ्चदशत्वं श्रूयते — इममहं भ्रातृव्यं पञ्चदशारेण वाग्वज्रेणावबाधे योऽस्मान् द्वेष्टि यञ्च वयं द्विष्म इति ॥ ५९ ॥

अनुवादस्य साफल्ये साकाङ्क्षमित्याह।—वाक्यविभागस्य अनुवादत्वेन विभक्तवाक्यस्य अर्थग्रहणात् प्रयोजनस्वीकारात् शिष्टैरिति शेषः। शिष्टा हि विधाय

विभागश्च ब्राह्मणवाक्यानां त्रिविधः —

**विध्यर्थवादानुवादवचनविनियोगात् ॥ ६१ ॥**

त्रिधा खलु ब्राह्मणवाक्यानि विनियुक्तानि — विधिवचनानि अर्थवादवचनानि अनुवादवचनानीति ॥ ६१ ॥

तत्र —

**विधिर्विधायकः ॥ ६२ ॥**

यद्वाक्यं विधायकं चोदकं स विधिः। विधिस्तु नियोगो ऽनुज्ञा वा, यथा 'अग्निहोत्रं जुहुयात् स्वर्गकामः' (मैत्रा उप ६।३६) इत्यादि ॥ ६२ ॥

**स्तुतिर्निन्दा परकृतिः पुराकल्प इत्यर्थवादः ॥६३॥**

विधेः फलवादलक्षणा या प्रशंसा सा स्तुतिः सम्प्रत्ययार्थम्। स्तूयमानं श्रद्दधीतेति प्रवर्त्तिका च। फलश्रवणात् प्रवर्त्तते। सर्वजिता वै देवाः सर्वमजयन् सर्वस्याऽऽप्त्यै सर्वस्य जित्यै सर्वमेवैतेनाऽऽप्नोति सर्वं जयते इत्येवमादि।

कानुवादकाद्भेदेन वाक्यं विभज्यानुवादकस्यापि सप्रयोजनत्वं मन्यन्ते वेदेऽप्यत्र मिति भावः ॥ ६ ॥

वेदवाक्यविभागं दर्शयति।—मन्त्रब्राह्मणभेदेन द्विधा वेदः तत्र ब्राह्मणस्य त्रिविभागः —विधिवचनत्वेनार्थवादवचनत्वेनानुवादवचनत्वेन च त्रयाणां विनियोगात् विभजनात् अथवा विनियोगानां भेदात् तथा च विध्यादिभेदात् ब्राह्मणभागस्त्रैविध्यमिति ॥ ६१ ॥

तत्र विधिलक्षणमाह।—इष्टसाधनताबोधकप्रत्ययसमभिव्याहृतवाक्यं विधिः "अग्निहोत्रं जुहुयात् स्वर्गकामः" इत्यादि ॥ ६२ ॥

अर्थवादः अर्थस्य प्रयोजनस्य वदनं विध्यर्थप्रशंसापरं वचनमित्यर्थः अर्थवादो हि स्तुत्यादिद्वारा विध्यर्थं शीघ्रं प्रवृत्तये प्रशंसति। तत्र स्तुत्यादिभेदादर्थवादं विभजते।— स्तुतिः साक्षाद्विध्यर्थस्य प्रशंसाऽर्थकं वाक्यम् यथा सर्वजिता वै देवाः सर्वमजयन्

अनिष्टफलवादो निन्दा वर्जनार्थम्, निन्दितं न समाचरेदिति। —"एष वाव प्रथमो यज्ञानां यज्ज्योतिष्टोमः एतेनानिष्ट्वाऽन्येन यजते स गर्त्ते पतत्ययमेवैतज्जीर्य्यते प्रमीयते" इत्येवमादि। अन्यकर्त्तृकस्य व्याहतस्य विधेर्वादः परकृतिः।—"हुत्वा वपामेवाग्रेऽभिघारयन्ति अथ पृषदाज्यं तदु ह चरकाध्वर्य्यवः पृषदाज्यमेवाग्रेऽभिघारयन्त्यग्नेः प्राणाः पृषदाज्यस्तोममित्येवमभिदधति" इत्येवमादि। ऐतिह्यसमाचरितो विधिः पुराकल्प इति। तस्माद्वा एतेन पुरा ब्राह्मणा बहिष्पवमानं सामस्तोममस्तौषन् योनेर्यज्ञं प्रतनवामहे इत्येवमादि। कथं परकृतिपुराकल्पौ अर्थवादाविति? स्तुतिनिन्दावाक्येनाभिसम्बन्धाद्विध्याश्रयस्य कस्यचिदर्थस्य द्योतनादर्थवाद इति ॥ ६३ ॥

## विधिविहितस्यानुवचनमनुवादः ॥ ६४ ॥

विध्यनुवचनञ्चानुवादो विहितानुवचनञ्च। पूर्वः शब्दानुवादः, अपरोऽर्थानुवादः। यथा पुनरुक्तं द्विविधम् एवमनुवादोऽपि। किमर्थं पुनर्विहितमनूद्यते?—अधिकारार्थम्। विहित

सर्वस्य आप्त्यै सर्वस्य जित्यै सर्वमेवैतेनाऽऽप्नोति सर्वं जयति इत्यादि। अनिष्टबोधनद्वारा विध्यर्थप्रवर्त्तक निन्दा — एष वाव प्रथमो यज्ञानां यज्ज्योतिष्टोमः एतेनानिष्ट्वा अन्येन यजते स गर्त्ते पतत्ययमेवैतज्जीर्य्यते प्रमीयते इत्यादि। पुरुषविशेषनिष्ठमिथोविरुद्धकथनं परकृतिः यथा —"हुत्वा वपामेवाग्रेऽभिघारयन्त्यथ पृषदाज्यं तदु ह चरकाध्वर्य्यवः पृषदाज्यमेवाग्रेऽभिघारयन्त्यग्नेः प्राणाः पृषदाज्यस्तोमामित्येवमभिदधति" इत्यादि। ऐतिह्यसमाचरिततया कीर्त्तनं पुराकल्पः यथा — तस्माद्वा एतेन पुरा ब्राह्मणा बहिष्पवमानं सामस्तोममस्तौषन् योनेर्यज्ञं प्रतनवामहे" इत्यादि ॥ ६३ ॥

अनुवादलक्षणमाह।—प्राप्तस्य अनु पश्चात् कथनं सप्रयोजनमनुवाद इति सामान्यलक्षणम् तद्विशेषौ विधिविहितस्येति विध्यनुवादो विहितानुवादश्च।

मधिकृत्य स्तुतिर्वोच्यते निन्दा वा विधिशेषो वाऽभिधीयते। विहितानन्तरार्थोऽपि चानुवादो भवति। एवमन्यदप्युत्प्रेक्षणीयम्। लोकेऽपि च विधिरर्थवादोऽनुवाद इति च त्रिविधं वाक्यम्। ओदनं पचेदिति विधिवाक्यम्। अर्थवादवाक्यम् —आयुर्वर्चो बलं सुखं प्रतिभानञ्चान्ने प्रतिष्ठितम्। अनुवादः,—पचतु पचतु भवानित्यभ्यासः क्षिप्रं पच्यतामिति वा। अङ्ग। पच्यतामित्यध्येषणार्थम्। पच्यतामेवेति वाऽवधारणार्थम्। यथा लौकिके वाक्ये विभागेनार्थग्रहणात् प्रमाणत्वम्, एवं वेदवाक्यानामपि विभागेनार्थग्रहणात् प्रमाणत्वं भवितुमर्हतीति ॥ ६४ ॥

**नानुवादपुनरुक्तयोर्विशेषः शब्दाभ्यासोपपत्तेः ॥६५॥**

पुनरुक्तमसाधु साधुरनुवाद इति अयं विशेषो नोपपद्यते। कस्मात्?—उभयत्र हि प्रतीतार्थः शब्दोऽभ्यस्यते। चरितार्थस्य शब्दस्याभ्यासादुभयमसाध्विति ॥ ६५ ॥

**शीघ्रतरगमनोपदेशवदभ्यासान्नाविशेषः ॥ ६६ ॥**

नानुवादपुनरुक्तयोरविशेषः। कस्मात्? अर्थवदभ्यासस्यानुवादभावात्। समानेऽभ्यासे पुनरुक्तमनर्थकम्। अर्थवानभ्यासोऽनुवादः। शीघ्रतरगमनोपदेशवत्। शीघ्रं शीघ्रं गम्यतामिति शीघ्रतरं गम्यतामिति क्रियातिशयोऽभ्यासेनैवोच्यते। उदाहरणार्थञ्चेदम् एवमन्योऽप्यभ्यासः। पचति पचतीति क्रिया

अत्र चार्थवादानुवादविभागो विधिसमभिव्याहृतवाक्यानां म[illegible] तेन भूतार्थवादरूपाणां वेदान्तवाक्यानामपरिग्रहान्न न्यूनता ॥ ६४ ॥

शङ्कते।—शब्दस्य बोधितार्थकशब्दस्य योऽभ्यासः पुनः प्रयोगः तस्योपपन्नत्वात् अनुवादः पुनरुक्तान्न भिद्यत इत्यर्थः ॥ ६५ ॥

समाधत्ते।—अनुवादस्य पुनरुक्तादविशेषः अभ्यासात् अभ्यासस्य सप्रयोजन

नुपरम । ग्रामो ग्रामो रमणीय इति व्याप्ति । परिपरि त्रिगर्त्तेभ्यो वृष्टो देव इति परिवर्जनम । अध्यधि कुड्य निषस-मिति सामीप्यम । तिक्त तिक्तमिति प्रकार । एवमनुवादस्य स्तुतिनिन्दाशेषविधिष्वधिकारार्थता विहितार्थता चेति ॥६६॥

कि पुन प्रतिषेधहेतूद्धारादेव शब्दस्य प्रमाणत्व सिध्यति ? न । अतश्च —

**मन्त्राऽऽयुर्वेदप्रामाण्यवच्च तत्प्रामाण्यमाप्त-प्रामाण्यात ॥ ६७ ॥**

कि पुनरायुर्वेदस्य प्रामाण्यम ? यत्तदायुर्वेदेनोपदिश्यते — इद कृत्वेष्टमधिगच्छति, इद वर्जयित्वाऽनिष्ट जहाति तस्यानुष्ठीयमानस्य तथाभाव सत्यार्थताऽविपर्यय । मन्त्रपदानाञ्च विषभूताशनिप्रतिषेधार्थाना प्रयोगेऽर्थस्य तथाभाव । एतत प्रामाण्यम । कि कृतमेतत् ?—आप्तप्रामाण्यकृतम । कि पुनराप्ताना प्रामाण्यम ?—साक्षात्कृतधर्मता भूतदया यथाभूतार्थ-चिख्यापयिषेति । आप्ता खलु साक्षात्कृतधर्माण इद हातव्यम अयमस्य हानिहेतु इदमस्याधिगन्तव्यम अयमस्याधिगमहेतुरिति भूतान्यनुकम्पन्ते । तेषा खलु वै प्राणभृता स्वयमनवबुध्यमानाना नान्यदुपदेशादवबोधकारणमस्ति । न चानवबोधे समीहा वर्जन वा, न वाऽकृत्वा स्वस्तिभाव, नाप्यस्यान्य उपकारकोऽप्यस्ति । हन्त । वयमेभ्यो यथादर्शन यथाभूतमुपदिशाम , त इम श्रुत्वा प्रतिपद्यमाना हेय हास्य

न्तीति । त दृष्टान्तमाह शीघ्रेति ।—यथा लोके गम्यतामित्युक्त्वा पुनर्गम्यतां गम्यताम् इत्यादिकमविलम्बादिविधायकमुच्यते तथा प्रकृतेऽपीति ॥ ६६ ॥

एवमप्रामाण्यसाधक निरस्य प्रामाण्य साधयति ।—आप्तस्य वेदकर्त्तु प्रामाण्यात् यथार्थोपदेशकत्वात् वेदस्य तदुक्तत्वमर्थाल्लब्धं तेन हेतुना वेदस्य प्रामाण्यम्

स्याधिगन्तव्यमेवाधिगमिष्यन्तीति एवमाप्तोपदेशः । एतेन त्रिविधेनाऽऽप्तप्रामाण्येन परिगृहीतोऽनुष्ठीयमानोऽर्थस्य साधको भवति । एवमाप्तोपदेशः प्रमाणम्, एवमाप्ताः प्रमाणम्। दृष्टार्थेनाऽऽप्तोपदेशेनाऽऽयुर्वेदेनादृष्टार्थो वेदभागोऽनुमातव्यः प्रमाणमिति। आप्तप्रामाण्यस्य हेतोः समानत्वादिति। अस्यापि चैकदेशो ‘ग्रामकामो यजेत’ इत्येवमादिर्दृष्टार्थः तेनानुमातव्यमिति। लोके च भूयानुपदेशाऽऽश्रयो व्यवहारः । लौकिकस्याप्युपदेष्टुरुपदेष्टव्यार्थज्ञानेन परानुजिघृक्षया यथाभूतार्थचिख्यापयिषया च प्रामाण्यम्। तत्परिग्रहादाप्तोपदेशः प्रमाणमिति। * द्रष्टृप्रवक्तृसामान्याच्चानुमानम्। * य एवाऽऽप्ता वेदार्थानां द्रष्टारः प्रवक्तारश्च त एवाऽऽयुर्वेदप्रभृतीनाम् इत्यायुर्वेदप्रामाण्यवद्वेदप्रामाण्यमनुमातव्यमिति। नित्यत्वाद्वेदवाक्यानां प्रमाणत्वे तत्प्रामाण्यमाप्तप्रामाण्यादित्ययुक्तम्। शब्दस्य वाचकत्वादर्थप्रतिपत्तौ प्रमाणत्वं न नित्यत्वात्। नित्यत्वे हि सर्वस्य सर्वेण वचनाच्छब्दार्थव्यवस्थाऽनुपपत्तिः। * नानित्यत्वे वाचकत्वमिति चेत्? न, लौकिकेष्वदर्शनात्। * * तेऽपि नित्या इति चेत्? न अनाप्तोपदेशादर्थविसंवादोऽनुपपन्नः। * नित्यत्वाद्धि शब्दः प्रमाणमिति अनित्यः स इति चेत्? अविशेषवचनम्। अनाप्तोपदेशा लौकिका न नित्या इति कारणं वाच्यमिति। यथानियोगञ्चार्थस्य प्रत्यायनान्नामधेयशब्दानां लोके प्रामाण्यं नित्यत्वात्प्रामाण्यानुपपत्तिः। यत्रार्थे नामधेयशब्दा नियुज्यन्ते, लोके तस्य नियोगसामर्थ्यात् प्रत्यायको भवति न नित्यत्वात्। मन्व

---

अनुमेयम्। तत्र दृष्टान्तमाह मन्त्राऽऽयुर्वेदप्रामाण्यवदिति।—मन्त्रो विषादिनाशकः, आयुर्वेदभागश्च वेदस्य एव तत्र संवादेन प्रामाण्यग्रहात् तद्दृष्टान्तेन वेदत्वावच्छेदेन

न्तरयुगान्तरेषु चातीतानागतेषु सम्प्रदायाभ्यासप्रयोगाविच्छेदो वेदानां नित्यत्वम्। आप्तप्रामाण्याच्च प्रामाण्यम् लौकिकेषु शब्देषु चैतत् समानमिति ॥ ६७ ॥

इति वात्स्यायनीये न्यायभाष्ये द्वितीयाध्यायस्याद्यमाह्निकम्।

## द्वितीयाध्यायस्य द्वितीयाह्निकम्।

अयथार्थः प्रमाणोद्देश इति मत्वाऽऽह।—

**न चतुष्ट्वमैतिह्यार्थाऽऽपत्तिसम्भवाभावप्रामाण्यात् ॥ १ ॥**

न चत्वार्य्येव प्रमाणानि। किं तर्हि?—ऐतिह्यम् अर्थाऽऽपत्तिः सम्भवः अभावः इत्येतान्यपि प्रमाणानि। इति होचुरित्यनिर्दिष्टप्रवक्तृकम्प्रवादपारम्पर्य्यमैतिह्यम्। अर्थादापत्तिरर्थाऽऽपत्तिः। आपत्तिः प्राप्तिः प्रसङ्गः। यत्राभिधीयमानेऽर्थे

प्रामाण्यम् अनुमेयम्, आप्तः गृहीतः प्रमाणं यत्र स वेदस्तादृशत्वेन वेदत्वेन प्रामाण्यमनुमेयमिति केचित् ॥ ६७ ॥

समाप्तं शब्दावान्तरपरीक्षाप्रकरणम्।

इति श्रीविश्वनाथभट्टाचार्य्यकृतायां न्यायसूत्रवृत्तौ विभागपरीक्षा निरपेक्षसाङ्गप्रमाणपरीक्षणं नाम द्वितीयाध्यायस्याद्यमाह्निकम् ॥ १ ॥

---

अथ विभागसापेक्षप्रमाणपरीक्षणं तदेव चाऽऽह्निकार्थः। चत्वारि चात्र प्रकरणानि तत्राऽऽदौ चतुष्ट्वपरीक्षाप्रकरणम्। अन्यानि च तत्र तत्र वक्ष्यन्ते तत्राऽऽद्यसूत्रम्। प्रमाणानां न चतुष्ट्वम् प्रमाणत्वं नोक्तचतुष्कान्यतमत्वव्याप्यम् उक्तान्यवृत्तित्वात् तत्रान्यवृत्तित्वं व्युत्पादयति ऐतिह्येत्यादि।—ऐतिह्यम् इति होचुरित्यनेन प्रकारेण यदुच्यते तद्धि अनिर्दिष्टप्रवक्तृक परम्पराऽऽगतं वाक्यम् यथा—वटे

योऽन्यार्थे प्रसज्यते सोऽर्थाऽऽपत्ति, यथा—मेघेष्वसत्सु वृष्टिर्न भवतीति किमत्र प्रसज्यते ? सत्सु भवतीति। सम्भवो नाम—अविनाभाविनोऽर्थस्य सत्ताग्रहणादन्यस्य सत्ताग्रहणम् यथा—द्रोणस्य सत्ताग्रहणादाढकस्य सत्ताग्रहणम्। आढकस्य सत्ताग्रहणात् प्रस्थस्येति। अभावो विरोधी, अभूत भूतस्य। अविद्यमान वर्षकर्म विद्यमानस्य वाय्वभ्रसंयोगस्य प्रतिपादकम्। विधारके हि वाय्वभ्रसंयोगे गुरुत्वादपां पतनकर्म न भवतीति ॥ १ ॥

सत्यमेतानि प्रमाणानि न तु प्रमाणान्तराणि प्रमाणान्तरञ्च मन्यमानेन प्रतिषेध उच्यते सोऽयम्—

**शब्द ऐतिह्यानर्थान्तरभावादनुमानेऽर्थाऽऽपत्ति-सम्भवाभावानर्थान्तरभावाच्चाप्रतिषेध ॥ २ ॥**

अनुपपन्न प्रतिषेध। कथम्? "आप्तोपदेश शब्द" इति न च शब्दलक्षणमैतिह्याद्व्यावर्त्तते। सोऽयं भेद सामान्यात् सङ्गृह्यत इति। प्रत्यक्षेणाप्रत्यक्षस्य सम्बद्धस्य प्रतिपत्तिरनुमानम्। तथा चार्थाऽऽपत्तिसम्भवाभावा। वाक्यार्थसम्प्रत्ययेनानभिहितस्यार्थस्य

---

वटे यक्ष इत्यादि तस्य चाऽऽप्तोक्तत्वानिश्चयान्न शब्देऽन्तर्भाव इति भाव। अर्थाऽऽपत्ति रनुपपद्यमानार्थेनोपपादककल्पनम् यथा—वृष्ट्या मेघज्ञानं वृष्ट्या सह मेघस्य वैयधिकरण्यान्न व्याप्तिरिति नानुमानेऽन्तर्भाव। सम्भवो भूय सहचराधीनज्ञानम् यथा—सम्भवति ब्राह्मणे विद्या। सम्भवति सहस्रे शतम् अत्र च व्याप्तेरनुपात्ततत्त्वाशय। अभावस्तु विरोध्यभावज्ञानाधीनापरोऽन्तरकल्पनम् यथा—नकुलाभावज्ञानेन नकुलविरोधिनो व्यालस्य कल्पनम् अत्रापि व्याप्तिनापेक्षितत्वाशय अथवा कारणाभावादिना कार्याभावानुज्ञानम् अभाव भावनिरूप्यत्वात्प्रत्यानुमानाद्भिन्नत्वाशय ॥ १ ॥

सिद्धान्तसूत्रम्।—न प्रमाणचतुष्टयस्य प्रतिषेध शब्द ऐतिह्यस्यानर्थान्तरभावादन्तर्भावात् सामान्यत आप्तोक्तत्वज्ञानसम्भवात् इत्युत आप्तोक्तत्वज्ञानं न शाब्द

प्रत्यनीकभावाद् ग्रहणमर्थापत्तिरनुमानमेव। अविनाभाववृत्त्या च सम्बद्धयोः समुदायसमुदायिनोः समुदायेनेतरस्य ग्रहणं सम्भवः। तदप्यनुमानमेव। अस्मिन् सतीदं नोपपद्यत इति विरोधित्वे प्रसिद्धे कार्यानुत्पत्त्या कारणस्य प्रतिबन्धकमनुमीयते। सोऽयं यथार्थ एव प्रमाणोद्देश इति। सत्यमेतानि प्रमाणानि न तु प्रमाणान्तराणीत्युक्तम् ॥ २ ॥

अत्रार्थापत्तेः प्रमाणभावाभ्यनुज्ञा नोपपद्यते तथा हीयम्—

**अर्थाऽऽपत्तिरप्रमाणमनेकान्तिकत्वात् ॥ ३ ॥**

असत्सु मेघेषु वृष्टिर्न भवतीति। सत्सु भवतीत्येतदर्थादापद्यते। सत्स्वपि चैकदा न भवति। सेयमर्थाऽऽपत्तिरप्रमाणमिति ॥ ३ ॥

**अनर्थाऽऽपत्तावर्थाऽऽपत्त्यभिमानात् ॥ ४ ॥**

नानेकान्तिकत्वमर्थाऽऽपत्तेः। असति कारणे कार्यं नोत्पद्यत इति वाक्यात् प्रत्यनीकभूतोऽयं सति कारणे कार्यमुत्पद्यत इत्यर्थादापद्यते। अभावस्य हि भावः प्रत्यनीक इति। सोऽयं कार्योत्पादः सति कारणेऽर्थादापद्यमानो न कारणस्य

---

कारणं किन्तु आकाङ्क्षादिज्ञानम्। योग्यताप्रमाऽपेक्षिता च शाब्दप्रमाते अर्थाऽऽप- त्तेरनुमानेऽन्तर्भावः। उपपादककल्पनं हि विना व्याप्तिं न सम्भवति वृष्टित्वावच्छि- न्नस्यापि मेघजन्यत्वव्याप्तिरस्त्येव सम्भवोऽपि व्याप्तिमूलकत्वादनुमानम्। व्याप्त्यनुपाधित्वे च व्यभिचारादप्रमाणम्। एवमभावो व्याप्तिरपि नोऽनुमानम्। अभावादिव्याप्तिरनु- मानाङ्गत्वेन विरोधः प्रतिभाति ॥ २ ॥

अन्यथा किं प्रामाण्यं बाह्यभावाभावाभ्यनुज्ञा तत्त्वं नु नाशितं तटस्थ शङ्कते —असति मेघे वृष्टिर्न भवतीत्यनेन सति मेघे वृष्टिर्भवतीत्यर्थाऽऽपत्तिरपि तत्र च न प्रामाण्यं सत्यपि मेघे वृष्ट्यभावे व्यभिचारितत्वादिति ॥ ३ ॥

समाधत्ते।—अनर्थाऽऽपत्तावनैकान्तिकत्वमिति अपि असत्सु मेघेषु न वृष्टिरित्य- नेन सति मेघे वृष्टिरिति। तत्र च वृष्ट्या सम्बन्धनियमाभिमतम् यत्र च मेघेन हि

सत्ता व्यभिचरति। न खल्वसति कारणे कार्य्यमुत्पद्यते। तस्मान्नानैकान्तिको। यत्तु सति कारणे निमित्तप्रतिबन्धात् कार्य्यं नोत्पद्यत इति, कारणधर्म्मोऽसौ न त्वर्थाऽऽपत्ते प्रमेयम्। किं तर्ह्यस्या प्रमेयम? सति कारणे कार्य्यमुत्पद्यत इति। योऽसौ कार्य्योत्पादः कारणस्य सत्ता न व्यभिचरति एतदस्या प्रमेयम्। एवन्तु सति अनर्थाऽऽपत्तावर्थाऽऽपत्त्यभिमानं कृत्वा प्रतिषेध उच्यते इति। दृष्टश्च कारणधर्मो न शक्यः प्रत्याख्यातु मिति॥ ४॥

प्रतिषेधाप्रामाण्यञ्चानैकान्तिकत्वात्॥ ५॥

अर्थाऽऽपत्तिर्न प्रमाणमनैकान्तिकत्वादिति वाक्यं प्रतिषेधः। तेनानेनार्थाऽऽपत्ते प्रमाणत्वं प्रतिषिध्यते न सद्भावः। एवमनै कान्तिको भवति। अनैकान्तिकत्वादप्रमाणेनानेन न कश्चिदर्थः प्रतिषिध्यते इति॥ ५॥

अथ मन्यसे नियतविषयेष्वर्थेषु स्वविषये व्यभिचारो भवति, न च प्रतिषेधस्यासद्भावो विषय। एवं तर्हि —

तत्प्रामाण्ये वा नार्थाऽऽपत्त्यप्रामाण्यम्॥ ६॥

अर्थाऽऽपत्तेरपि कार्य्योत्पादेन कारणसत्ताया अव्यभिचारो

---

ज्ञानं तत्रानर्थाऽऽपत्तावर्थाऽऽपत्तिभ्रम। न चैतावता प्रामाण्यविरोधः व्याप्यादिभ्रमात् भ्रमानुमितिदर्शनादनुमानस्याप्यप्रामाण्याऽऽपत्ते न नैकान्तिकत्वमर्थाऽऽपत्तेरिति भाष्यस्यावतरणिका सूत्रादौ केचिल्लिखन्ति॥ ४॥

प्रतिबन्दिमप्याह।—त्वदुक्तरीत्या त्वदीयप्रतिषेधस्याप्यप्रामाण्यं स्यात् अप्रामाण्य सम्भवेऽनैकान्तिकत्वात् यत्र कुत्रचिदनैकान्तिकत्वस्य प्रतिषेधासाधकत्वादनैकान्त्य स्यात्॥ ५॥

यत्र यत्र कुत्रचिदनैकान्तिकत्वं न दोषाय। किन्तु स्वविषये इति यदि तदाऽर्था

विषय , न च कारणधर्मो निमित्तप्रतिबन्धात् कार्य्यानुत्पादत्व मिति ॥ ६ ॥

अभावस्य तर्हि प्रमाणभावाभ्यनुज्ञा नोपपद्यते। कथमिति ?—

## नाभावप्रामाण्य प्रमेयासिद्धे ॥ ७ ॥

अभावस्य भूयसि प्रमेये लोकसिद्धेर्वैयात्यादुच्यते नाभाव प्रामाण्य प्रमेयासिद्धेरिति ॥ ७ ॥

अथायमर्थबहुत्वादर्थैकदेश उदाह्रियते —

## लक्षितेष्वलक्षणलक्षितत्वादलक्षिताना तत् प्रमेयासिद्धे ॥ ८ ॥

तस्याभावस्य सिध्यति प्रमेयम। कथम ?—लक्षितेषु वासस्सु अनुपादेयेषु उपादेयानामलक्षितानामलक्षणलक्षितत्वात लक्षणाभावेन लक्षितत्वादिति। उभयसन्निधावलक्षितानि वासास्यानयेति प्रयुक्तो येषु वासस्सु लक्षणानि न भवान्त तानि लक्षणाभावेन प्रतिपद्यते प्रतिपद्य चाऽऽनयति। प्रतिपत्तिहेतुश्च प्रमाणमिति ॥ ८ ॥

---

ऽऽपत्तरपि नाप्रामाण्यामत्याह।—अनैकान्तिकत्वस्य स्वविषय साधकत्वाद यदि स्वहृता प्रामाण्य मन्यसे तदाऽथाऽऽपत्तरपि स्वावषये प्रामाण्यमिति ॥ ६ ॥

अभावस्य न प्रमाणऽन्तर्भाव इति तटस्थ शङ्कत।—अभावनामक प्रमाण तदा स्यात् यदि तस्य प्रमेय सिध्येत् तदेव तु नास्ति। अभावस्य तुच्छत्वान्न तत्र प्रमाणप्रवृत्तिरिति भाव ॥ ७ ॥

सिद्धान्तसूत्रम्।—तस्याभावप्रमाणस्य प्रमेयसिद्धि भावप्रधानो निर्देश। कि तत्प्रमेयम ? इत्य ऽऽऽह लक्षितषु इति।—लक्षितेषु घटादिषु सत्सु अलक्षिताना तत्प्रमेयत्वसिद्धि। अलक्षिताना कथ प्रमेयत्वम् ? अत आह अलक्षणलक्षितत्वा दि।त।—यद्यप्यभावस्य गुणकर्मादिभिर्लक्षण न सम्भवति तथाऽप्यलक्षणेनैव तल्लक्षित भवति। अनीलमानयेत्युक्ते नीलाभावो हि इतरव्यावर्त्तकतया लक्षणम्, अतोऽभावा नाप्रामाणिक इति भाव ॥ ८ ॥

**असत्यर्थे नाभाव इति चेन्नान्यत्र लक्षणोपपत्तेः ॥९॥**

यत्र भूत्वा किञ्चिन्न भवति, तत्र तस्याभाव उपपद्यते। अलक्षितेषु च वासःसु लक्षणानि भूत्वा न भवन्ति (घ) तस्मात् तेषु लक्षणाभावोऽनुपपन्न इति चेत्? न अन्यलक्षणोपपत्तेः। यथाऽयमन्येषु वासःसु लक्षणानामुपपत्तिं पश्यति नैवमलक्षितेषु। सोऽयं लक्षणाभावं पश्यन्नभावेनार्थं प्रतिपद्यत इति ॥९॥

**तत्सिद्धेरलक्षितेष्वहेतुः ॥ १० ॥**

तेषु वासःसु लक्षितेषु सिद्धा विद्यमानता येषां भवति न तेषामभावो लक्षणानाम्। यानि च लक्षितेषु विद्यन्ते लक्षणानि तेषामलक्षितेष्वभाव इत्यहेतुः यानि खलु भवन्ति तेषामभावो व्याहत इति ॥ १० ॥

**न लक्षणावस्थितापेक्षसिद्धेः ॥ ११॥**

न ब्रूमो यानि लक्षणानि भवन्ति, तेषामभाव इति। किन्तु केषुचिल्लक्षणान्यवस्थितानि अनवस्थितानि केषुचित् अपेक्षमाणो येषु लक्षणानां भावं न पश्यति तानि लक्षणाभावेन प्रतिपद्यत इति ॥ ११ ॥

आक्षिप्य समाधत्ते।—अभावे प्रतियोगिन्यभावो वक्तुं न शक्यते सति च प्रतियोगिनि कथं तदभावः? इति चेत् न अन्यत्र लक्षणेन सत्त्वनाधानात् प्रतियोगिन उपपत्तेः अभावव्यवहारोपपत्तेः। न हि तत्रैव प्रतियोगिनः सत्त्वमपेक्षितम् ॥ ९ ॥

शङ्कते।—लक्षितेषु लक्षणस्य तत्सिद्धेः व्यावर्त्तकस्यासिद्धेः अलक्षितेषु अभावेषु अहेतुः अहेतुत्वं व्याहत्यहेतुत्वम्। अभावस्य लक्षणाभावाभिन्नस्वरूपस्य न व्यावर्त्तकत्वमिति भावः ॥ १० ॥

समाधत्ते।—पूर्वपक्षो न युक्तः। प्रतियोगिनो लक्षणस्य यदवस्थितमवस्थानं तस्यापेक्षया यत्र तादृशसिद्धेः। अयमर्थः—प्रतियोगिस्वरूपज्ञानादेवाभावस्वरूपनिरूपणसम्भवान्नाभावलक्षणापेक्षेति भावः ॥ ११ ॥

---

(घ) लक्षितेषु वासःसु भूत्वा इति यावत्।

## प्रागुत्पत्तेरभावोपपत्तेश्च ॥१२॥

अभावद्वैतं खलु भवति। प्राक् चोत्पत्तेरविद्यमानता उत्पन्नस्य चाऽऽत्मनो हानादविद्यमानता। तत्रालक्षितेषु वाससां प्रागुत्पत्तेरविद्यमानतालक्षणो लक्षणानामभावो नेतर इति ॥१२॥

आप्तोपदेशः शब्द इति प्रमाणभावे विशेषणं ब्रुवता नानाप्रकारः शब्द इति ज्ञाप्यते। तस्मिन् सामान्येन विचारः — किं नित्योऽथानित्यः? इति —

## विमर्शहेत्वनुयोगे च विप्रतिपत्तेः संशयः ॥ १३ ॥

आकाशगुणः शब्दो विभुर्नित्योऽभिव्यक्तिधर्मक इत्येके। गन्धादिसहवृत्तिर्द्रव्येषु सन्निविष्टो गन्धादिवदवस्थितोऽभिव्यक्तिधर्मक इत्यपरे। आकाशगुणः शब्द उत्पत्तिनिरोधधर्मको बुद्धिवदित्यपरे। महाभूतसंक्षोभजः शब्दोऽनाश्रित उत्पत्तिधर्मको निरोधधर्मक इत्यन्ये। अतः संशयः — किमत्र तत्त्वम्? इति ॥ १३ ॥

अनित्यः शब्द इत्युत्तरम्। कथम्?—

## आदिमत्त्वादैन्द्रियकत्वात् कृतकवदुपचाराच्च ॥१४॥

आदिर्योनिः कारणम् आदीयतेऽस्मादिति। कारणवदनित्यं दृष्टम्। संयोगविभागजश्च शब्दः कारणवत्त्वादनित्य इति।

—

प्रमेयसिद्धिरिति सप्तकप्रश्नोऽनुवर्तते। प्रतियोगिनः उत्पत्तेः प्राक् अभावस्य उपपत्तेः उपलम्भात् घटो भविष्यतीत्यादिप्रागभावविषयकप्रत्ययस्य सार्वलौकिकत्वादिति भावः। चकारेण ध्वंसादेरपि प्रत्यक्षसिद्धत्वं समुच्चीयते। चेष्टाया निर्व्यापृतत्वेन न प्रामाण्यं वस्तुतो लिप्यादिवत् साङ्केतिकत्वात् तस्याप्यनुमाने शब्दे वाऽन्तर्भाव इति ॥ १२ ॥

समाप्तं प्रमाणचतुष्टप्रकरणम्।

वेदस्य प्रामाण्यमाप्तप्रामाण्यात् सिद्धम्। न चेद युज्यते वर्णस्यानित्यत्वादित्याशङ्क्या

का पुनरियमर्थदेशना कारणवदिति? उत्पत्तिधर्मकत्वादनित्यः शब्द इति। भूत्वा न भवति विनाशधर्मक इति। सांशयिकमेतत्—किमुत्पत्तिकारणं संयोगविभागौ शब्दस्य आहोस्विदभिव्यक्तिकारणम्? इत्यत आह—ऐन्द्रियकत्वात्, इन्द्रियप्रत्यासत्तिग्राह्य ऐन्द्रियः। किमयं व्यञ्जकेन समानदेशोऽभिव्यज्यते रूपादिवत्? अथ संयोगजाच्छब्दाच्छब्दसन्ताने सति श्रोत्रप्रत्यासन्नो गृह्यत इति? * संयोगनिवृत्तौ शब्दग्रहणान्न व्यञ्जकेन समानदेशस्य ग्रहणम्। * दारुव्रश्चने दारुपरशुसंयोगनिवृत्तौ दूरस्थेन शब्दो गृह्यते न च व्यञ्जकाभावे व्यङ्ग्यस्य ग्रहणं भवति तस्मान्न व्यञ्जकः संयोगः। उत्पादके तु संयोगे संयोगजाच्छब्दाच्छब्दसन्ताने सति श्रोत्रप्रत्यासन्नस्य ग्रहणमिति। इतश्च शब्द उत्पद्यते नाभिव्यज्यते कृतकवदुपचारात् तीव्रं मन्दमिति कृतकमुपचर्य्यते तीव्रं सुखं मन्दं सुखं तीव्रं दुःखं, मन्दं दुःखमिति। उपचर्य्यते च तीव्रः शब्दः, मन्दः शब्द इति। * व्यञ्जकस्य तथाभावात् ग्रहणस्य तीव्रमन्दता रूपवदिति चेत्? न अभिभवोपपत्तेः। * संयोगस्य व्यञ्जकस्य तीव्रमन्दतया शब्दग्रहणस्य तीव्रमन्दता भवति न तु शब्दो भिद्यते यथा प्रकाशस्य तीव्रमन्दतया रूपग्रहणस्येति। तच्च नैवम् अभिभवोपपत्तेः। तीव्रो भेरीशब्दो मन्दं तन्त्रीशब्दमभि

वर्णानामानन्त्यत्वात् कथं तत्समुदायरूपस्य वेदस्य नित्यत्वम्? अतस्तेन शब्दानित्यत्वप्रकरणमारभते। तत्र सिद्धान्तसूत्रम्।—शब्दोऽनित्य इत्यादि पूरणीयम्। आदिमत्त्वात् सकारणकत्वात्। ननु न सकारणकत्वं कण्ठताल्वाद्यभिघातादेर्व्यञ्जकत्वेनाप्युपपत्तेरत आह ऐन्द्रियकत्वादिति।—सामान्यवत्त्वे सति बाह्येन्द्रियजन्यलौकिकप्रत्यक्षविषयत्वादित्यर्थः। परे तु ऐन्द्रियकत्वं लौकिकप्रत्यक्षविशेष्यत्वं सामान्यसमवाययोस्तु न तथात्वम् जातित्वादिना विशेष्यत्वसम्भवेऽपि जातित्वादेरप्रत्यक्षत्वान्न व्यभिचारः। मनस इन्द्रियत्वाभावाच्च नाऽऽत्मनि व्यभिचारः आत्मन ऐन्द्रियकत्वाभावादित्याहुः।

भवति न मन्दः न च शब्दग्रहणमभिभावकम, शब्दश्च न भिद्यते शब्दे तु भिद्यमाने युक्तोऽभिभव तस्मादुत्पद्यते शब्दो नाभिव्यज्यत इति । * अभिभवानुपपत्तिश्च व्यञ्जकसमानदेशस्याभिव्यक्तौ प्राप्त्यभावात् * व्यञ्जकेन समानदेशोऽभिव्यज्यते शब्द इति एतस्मिन् पक्षे नोपपद्यतेऽभिभवः न हि भेरीशब्देन तन्त्रीस्वनः प्राप्त इति । * अप्राप्ते अभिभव इति चेत् ? शब्दमात्राभिभवप्रसङ्गः । * अथ मन्येतासत्यां प्राप्तावभिभवो भवति इति ? एवं सति यथा भेरीशब्दः कश्चित्तन्त्रीस्वनमभिभवति, एवं सन्निकृष्टस्योपादानमिव दवीयस्थोपादानानामपि तन्त्रीस्वनानाभिभवेत् अप्राप्तेरविशेषात् । तत्र क्वाचदेव भेर्या प्रणादितायां सर्वलोकेषु समानकालास्तन्त्रीस्वना न श्रूयेरन् इति । नानाभूतेषु शब्दसन्तानेषु सत्सु श्रोत्रप्रत्यासत्तिभावेन कस्यचिच्छब्दस्य तीव्रेण मन्दस्याभिभवो युक्त इति । क पुनरयमभिभवो नाम ?—ग्राह्यसमानजातीयग्रहणकृतमग्रहणमभिभवः यथोल्काप्रकाशस्य ग्रहणार्हस्याऽऽदित्यप्रकाशेनेति ॥ १४ ॥

## न घटाभावसामान्यनित्यत्वात् नित्येष्वप्यनित्यवदुपचाराच्च ॥ १५ ॥

न खलु आदिमत्त्वादनित्यः शब्दः । कस्मात् ?—व्यभिचारात् । आदिमतः खलु घटाभावस्य दृष्टं नित्यत्वम् । कथमादिमान् ?—

अप्रयोजकत्वमाशङ्कयाऽऽह कृतकेति ।—कृतके घटादौ यथा उपचारो ज्ञानं तथैव काम्यत्वप्रकारकप्रत्यक्षविषयत्वादित्यर्थः तथा च काम्यत्वेनानाहार्यसार्वलौकिकप्रत्यक्षबला नित्यत्वमेव सिध्यति । केचित्तु उपचा इत्यनाशित्वात् कृतकवत् इति दृष्टान्त इति । परे तु कृतकवदुपचारात् कृतकसुखदुःखादिवद्व्यवहारात् । यथा हि सुखादौ तीव्रमन्दादिव्यवहार शब्देऽप्येव न तु नित्ये तथेत्याहुः ॥ १४ ॥

प्रयाश्रते हेतूनां व्यभिचारमाशङ्कते ।—नीत्या इतव घटाभावस्य घटध्वंस

कारणविभागेभ्यो हि घटो न भवति। कथम् अस्य (ङ) नित्यत्वम् ? याऽसौ कारणविभागेभ्यो न भवति न तस्य (च) अभावो भावेन कदाचिन्निवर्त्यत इति। यदप्यैन्द्रियकत्वात् तदपि व्यभिचरति। ऐन्द्रियकञ्च सामान्यं नित्यञ्चेति। यदपि कृतकवदुपचारादिति तदपि व्यभिचरति नित्येष्वनित्यवदुपचारो दृष्ट यथा हि भवति वृक्षस्य प्रदेशः कम्बलस्य प्रदेश एव माकाशस्य प्रदेश आत्मनः प्रदेश इति भवतीति ॥ १५ ॥

## तत्त्वभाक्तयोर्नानात्वविभागादव्यभिचारः ॥ १६ ॥

नित्यमित्यत्र किं तावत्तत्त्वम् ? आत्मान्तरस्यानुत्पत्ति धर्मकस्याऽऽत्महानानुपपत्तिर्नित्यत्वम्। तच्चाभावे नोपपद्यते भाक्तन्तु भवति यत् तत्राऽऽत्मानमहासीत् यद्भूत्वा न भवति न भातु तत्पुनर्भवति तत्रानित्य इव नित्यो घटाभाव इत्ययं पदार्थ इति। तत्र यथाजातीयकः शब्दः न तथाजातीयकं कार्य्यं किञ्चिन्नित्यं दृश्यत इत्यव्यभिचारः ॥ १६ ॥

नित्यत्वादविनाशित्वात् आः मन्व व्यभिचारः ऐन्द्रियकत्वं सामान्ये व्यभिचारः नित्येष्वनित्यवदुपचारात् यथा — घटाऽऽकाशमुत्पन्नम् अहं सुखी जात इत्यादि ॥ १५ ॥

प्रथमे व्यभिचारं परिहरति —तत्त्वस्य पारमार्थिकस्य भाक्तस्य च नानात्वस्य भेदस्य विभागात् । वैकात न व्यभिचारः । ध्वंस हि त्पत्तिमत्त्वलक्षणम् अनित्य मत्र एकान्तिकत्वरूपानित्यत्वाभावरूपञ्चानित्यत्वमस्य नाविनाशित्वान्नित्यत्वमौपचारिकम् अतो न व्यभिचारः । उत्पत्तिमत्त्वं प्रागभावावच्छिन्नमत्त्वं न चैतदभावे इति भावः ॥ १६ ॥

---

(ङ) ध्वंसस्य ।

(च) विनष्टस्य वस्तुनः ।

यदपि सामान्यनित्यत्वादिति इन्द्रियप्रत्यासत्तिग्राह्य मैन्द्रियकमिति न तु इन्द्रियजन्यप्रतीतिविषयत्वम्—

**सन्तानानुमानविशेषणात् ॥ १७ ॥**

नित्येष्वव्यभिचार इति प्रकृतम्। नेन्द्रियग्रहणसामर्थ्याच्छब्दस्यानित्यत्वम्, किं तर्हि? इन्द्रियप्रत्यासत्तिग्राह्यत्वात् सन्तानानुमानं तेनानित्यत्वमिति ॥ १७ ॥

यदपि नित्येष्वप्यनित्यवदुपचारादिति नैवम्।—

**कारणद्रव्यस्य प्रदेशशब्देनाभिधानान्नित्येष्वप्यव्यभिचार इति ॥ १८ ॥**

आकाशप्रदेश आत्मप्रदेश इति नात्राऽऽकाशाऽऽत्मनोः कारणद्रव्यमभिधीयते यथा कृतकस्य। कथं ह्यविद्यमानमभिधीयते? अविद्यमानता च प्रमाणतोऽनुपलब्धेः, किं तर्हि तत्राभिधीयते? संयोगस्याव्याप्यवृत्तित्वम्, परिच्छिन्नेन द्रव्येणाऽऽकाशस्य संयोगो नाऽऽकाशं व्याप्नोति, अव्याप्य वर्त्तत इति, तदस्य कृतकेन द्रव्येण सामान्यं न ह्यामलकयोः संयोग आश्रयं व्याप्नोति सामान्यकृता च भक्तिराकाशस्य प्रदेश इति। अनेनाऽऽत्मप्रदेशो व्याख्यातः। संयोगवच्च शब्दबुद्ध्यादीनाम् अव्याप्यवृत्तित्वमिति। परीक्षिता च तीव्रमन्दता शब्दतत्त्वं न भक्तिकृतेति। कस्मात् पुनः सूत्रकारस्यास्मिन्नर्थे सूत्रं न श्रूयत इति?—शीलमिदं भगवतः सूत्रकारस्य बहुष्वधिकरणेषु

द्वितीयं व्यभिचारमुद्धरति।—सन्तानस्यानुमानेऽनुमितिकरणे लिङ्गे विशेषणात् सन्तानं सन्तन्यमानं एकधर्मावच्छिन्नत्वेन ज्ञायमानं तेन सामान्यवत्त्वे सतीति विशेषणीयमिति ॥ १७ ॥

तृतीयं व्यभिचारं वारयति।—आकाशं हतनाश्येव आकाशं प्रादेशिक व्यवहारस्तु गौणः प्रदेशशब्देन कारणद्रव्यस्य कारणवतो द्रव्यस्याभिधानात् न

द्वौ पक्षौ न व्यवस्थापयति तत्र शास्त्रसिद्धान्तात् तत्त्वावधारणं प्रतिपत्तुमर्हतीति मन्यते। शास्त्रसिद्धान्तस्तु न्यायसमाख्यातमनुमतं बहुशाखमनुमानमिति ॥ १८ ॥

अथापि खल्विदमस्ति इदं नास्तीति कुत एतत् प्रतिपत्तव्यमिति? प्रमाणत उपलब्धेरनुपलब्धेश्चेति। अविद्यमानस्तर्हि शब्दः?—

**प्रागुच्चारणादनुपलब्धेरावरणाद्यनुपलब्धेश्च ॥ १९ ॥**

प्रागुच्चारणान्नास्ति शब्दः। कस्मात्?—अनुपलब्धेः। सतोऽनुपलब्धिरावरणादिभ्य, एतन्नोपपद्यते। कस्मात्?—आवरणादीनामनुपलब्धिकारणानामग्रहणात्। अनेनाऽऽवृतः शब्दो नोपलभ्यते असन्निकृष्टश्चेन्द्रियव्यवधानात् इत्येवमादि अनुपलब्धिकारणं न गृह्यत इति सोऽयमनुच्चारितो नास्तीति। उच्चारणमस्य व्यञ्जकं तदभावात् प्रागुच्चारणादनुपलब्धिरिति। किमिदमुच्चारणं नामेति? विवक्षाजनितेन प्रयत्नेन कोष्ठस्य वायोः प्रेरितस्य कण्ठताल्वादिप्रतिघातः यथास्थानं प्रतिघाताद्वर्णाभिव्यक्तिरिति। संयोगविशेषो वै प्रतिघातः प्रतिषिद्धञ्च संयोगस्य व्यञ्जकत्वम्, तस्मान्न व्यञ्जकाभावादग्रहणम् अपि त्वभावादेवेति। सोऽयमुच्चार्यमाणः श्रूयते श्रूयमाणश्चाभूत्वा भवतीति अनुमीयते, ऊर्द्ध्वञ्चोच्चारणान्न श्रूयते स भूत्वा न भवतीति अभावान्न श्रूयत इति। कथम्?—आवरणाद्यनुपलब्धेरित्युक्तम्, तस्मादुत्पत्तितिरोभावधर्मकः शब्द इति ॥ १९ ॥

नाऽऽकाशे तान्त्रिकम् नित्यत्वं वा सामान्यवत्त्वान्न व्यभिचारः। एवं सुखो जात इत्यादौ सुखादिव्यक्तावेव विषय इति भावः ॥ १८ ॥

न चोक्तहेतूनामप्रयोजकत्वं विपक्षबाधकसत्त्वादित्याह।—शब्दो यदि नित्यः स्यात् उच्चारणात् प्रागप्युपलभ्येत इन्द्रियसन्निकर्षसत्त्वात् न चात्र प्रतिबन्धकमस्तीत्याह आवरणादीति।—आवरणादेः प्रतिबन्धकस्यानुपलब्ध्या अभावनिश्चयात्। दृष्टान्तर

एवञ्च सति तत्त्वं पांशुभिरिवावकिरन्निदमाह —

**तदनुपलब्धेरनुपलम्भादावरणोपपत्तिः ॥ २० ॥**

यद्यनुपलम्भादावरणं नास्ति आवरणानुपलब्धिरपि तर्ह्यनुपलम्भान्नास्तीति, तस्या अभावादप्रतिषिद्धमावरणमिति। कथं पुनर्जानीते भवान्नाऽऽवरणानुपलब्धिरुपलभ्यत इति? किमत्र ज्ञेयं प्रत्यात्मवेदनीयत्वात् समानम्। अयं खल्वावरणमनुपलभमानः प्रत्यात्ममेव संवेदयते नाऽऽवरणमुपलभे इति। यथा कुड्येनाऽऽवृतस्याऽऽवरणमुपलभमानः प्रत्यात्ममेव संवेदयते सेयमावरणोपलब्धिवदावरणानुपलब्धिरपि संवेद्यैवेति। एवञ्च सत्यपहृतविषयमुत्तरवाक्यमस्तीति ॥ २० ॥

अभ्यनुज्ञावादेन तूच्यते जातिवादिना।—

**अनुपलम्भादप्यनुपलब्धिसद्भाववन्नाऽऽवरणानुपपत्तिरनुपलम्भात् ॥ २१ ॥**

यथाऽनुपलभ्यमानाऽप्यावरणानुपलब्धिरस्ति एवमनुपलभ्यमानमप्यावरणमस्तीति। यद्यभ्यनुजानाति भवाननुपलभ्यमानाऽप्यावरणानुपलब्धिरस्ति, एवमनुपलभ्यमानमप्यावरणमस्तीति। यद्यभ्यनुजानाति न चानुपलभ्यमाना नाऽऽवरणानुपलब्धिरस्तीति अभ्यनुज्ञाय च वदति, नास्त्यावरणमनुपलम्भादिति। एतस्मिन्नप्यभ्यनुज्ञावादे प्रतिपत्तिनियमो नोपपद्यत इति ॥ २१ ॥

ममनन्तु शब्दस्यामूर्त्तत्वान्न सम्भाव्यते। अतीन्द्रियानन्तप्रतिबन्धकत्वकल्पनामपेक्ष्य शब्दानित्यत्वकल्पनं लघीयसीति भावः ॥ १९ ॥

भाष्ये पूर्वपक्षपरं सन्दर्भम्।—यथा त्वया आवरणस्यानुपलब्ध्या अभाव इष्यते तथा आवरणानुपलब्धेरनुपलम्भात् तदभावे आवरणोपलब्धिरेव स्यात्। यदि वा आवरणानुपलब्धेरनुपलम्भेऽपि नाऽऽवरणानुपलब्धेरभावः तदा आवरणस्यानुपलम्भादपि नाऽऽवरणस्यानुपपत्तिरित्यर्थः ॥ २ ॥ २१ ॥

## अनुपलम्भाऽऽत्मकत्वादनुपलब्धेरहेतुः ॥ २२ ॥

यदुपलभ्यते तदस्ति यन्नोपलभ्यते तन्नास्तीति। अनुपलम्भाऽऽत्मकमसदिति व्यवस्थितम्। उपलब्ध्यभावश्चानुपलब्धिरिति। सेयमभावत्वान्नोपलभ्यते सच्च खल्वावरणं तस्योपलब्ध्या भवितव्यम् न चोपलभ्यते तस्मान्नास्तीति। तत्र यदुक्तं — नाऽऽवरणानुपपत्तिरनुपलम्भादित्ययुक्तमिति ॥ २२॥

अथ शब्दस्य नित्यत्वं प्रतिजानानः कस्माद्धेतोः प्रतिजानाति?

## अस्पर्शत्वात् ॥ २३ ॥

अस्पर्शमाकाशं नित्यं दृष्टमिति तथा च शब्द इति ॥ २३ ॥

सोऽयमुभयतः सव्यभिचारः स्पर्शवांश्चाणुर्नित्यः अस्पर्शञ्च कर्मानित्यं दृष्टम्। अस्पर्शत्वादित्येतस्य साध्यसाधर्म्येणोदाहरणम्।—

## न कर्मानित्यत्वात् ॥ २४ ॥

साध्यवैधर्म्येणोदाहरणम् —

## नाणुनित्यत्वात् ॥ २५ ॥

उभयस्मिन्नुदाहरणे व्यभिचारान्न हेतुः ॥ २५ ॥

---

सिद्धान्तसूत्रम्।—आवरणानुपलब्धेरनुपलम्भादावरणोपलब्धिरिति जात्युत्तरमहेतुः। न सम्मतप्रतिषेधसाधनम्। अनुपलब्धेरावरणानुपलब्धेः अनुपलम्भाऽऽत्मकत्वादुपलम्भाभावाऽऽत्मकत्वात् तस्य च मनसैव सुग्रहत्वान तदनुपलब्धिरासद्धेति भावः ॥ २२ ॥

सत्प्रतिपक्षमाशङ्कते।—शब्दो नित्यः अस्पर्शत्वाद्गगनवदिति भावः ॥ २३ ॥

न सत्प्रतिपक्षत्वं तृतीयहेतोरनैकान्तिकत्वादित्याह।—अस्पर्शत्वं न शब्दानित्यत्वसाधकं कर्मणि व्यभिचारात् ॥ २४ ॥

अनैकान्तिकमपि साधकं स्यादत आह।—अनैकान्तिकस्य साधकत्वेऽणौ परमाणौ नित्यत्वं न स्यात् रूपवत्त्वादिना तत्रानित्यत्वानुमानाऽऽपत्तेरित्यर्थः ॥ २५ ॥

अथ तर्हि हेतु,—

**सम्प्रदानात् ॥ २६ ॥**

सम्प्रदीयमानमवस्थितं दृष्टं सम्प्रदीयते च शब्द आचार्य्येणान्तेवासिने, तस्मादवस्थित इति ॥ २६ ॥

**तदन्तरालानुपलब्धेरहेतु ॥ २७ ॥**

येन सम्प्रदीयते यस्मै च तयोरन्तरालेऽवस्थानमस्य केन लिङ्गेनोपलभ्यते? सम्प्रदीयमानो ह्यवस्थितः सम्प्रदातुरपैति सम्प्रदानञ्च प्राप्नोतीत्यवर्जनीयमेतत् ॥ २७ ॥

**अध्यापनादप्रतिषेध ॥ २८ ॥**

अध्यापनं लिङ्गम् असति सम्प्रदानेऽध्यापनं न स्यादिति ॥ २८ ॥

शङ्कते।—गुरुणा शिष्याय विद्यायाः सम्प्रदानात् तथा च शब्दस्य प्राक् न सिद्धम् शिष्ये च — तावत्कालं स्थिरं चेत् क पश्चान्नाशमायास्यति इति न्यायाच्च नित्यत्वमस्य भाव ॥ २६ ॥

सिद्धान्तसूत्रम्।—शिष्ये उपसन्ने गुरुरध्यापयति यदि च शब्दो नित्यः स्यात् तदा शिष्याऽऽगमनानन्तरमध्यापनात् पूर्वमपि शब्द उपलभ्येतेत्यनुपलब्ध्या च नास्ति शब्द इत्यतस्त्वदुक्तो न हेतु ॥ २७ ॥

पूर्वपक्षसूत्रम्।—मदीयहेतौ प्रतिषेधो न युक्तः कुतः —अध्यापनात्। यदि अन्तरालकाले शब्दो न स्यात् कथमध्यापनं घटेत? अनुपलब्धिस्तु शब्दस्य कण्ठताल्वाद्यभिघातरूपव्यञ्जकाभावादुपपद्यत इति भाव। आचार्य्यास्तु सूत्रद्वयमेव प्रचक्षते विभक्तिव्यत्यासाद्धेतौ तदन्तरालानुपलब्धेरहेतुस्तथा च हेतौ व्यवस्थाभावात् तदन्तरालस्य स्वलक्षणस्यानुपलब्धिः अतो न दानमित्यर्थ। प्रतिषेधो न युक्तः। न हि दानं ममाभिप्रेतं किन्त्वध्यापनम् तच्च विद्यमानस्य शब्दस्यैवेति भाव ॥ २८ ॥

**उभयो पक्षयोरन्यतरस्याध्यापनादप्रतिषेध ॥२८॥**

समानमध्यापनमुभयो पक्षयो संशयानतिवृत्त किमाचार्य्यस्थ शब्दोऽन्तेवासिनमापद्यते तदध्यापनम ? आहोस्विन्नृत्योपदेशवद्गृहीतस्यानुकरणमध्यापनमिति ? एव मध्यापनमलिङ्ग सम्प्रदानस्येति ॥ २८ ॥

अथ तर्हि हेतु --

**अभ्यासात् ॥ ३० ॥**

अभ्यस्यमानमवस्थितं दृष्टम पञ्चकृत्व पश्यतीति रूप मवास्थत पुन पुनदृश्यते। भवति च शब्देऽभ्यास दशकृत्वो ऽधीतोऽनुवाको विंशतिकृत्वोऽधीत इति तस्य अवस्थितस्य पुन पुनरुच्चारणमभ्यास इति ॥ २ ॥

**नान्यत्वेऽप्यभ्यासस्योपचारात् ॥ ३१ ॥**

अनवस्थानेऽप्यभ्यासस्याभिधान भवति। द्विनृत्यतु भवान् त्रिनृत्यतु भवानिति द्विरनृत्यत त्रिरनृत्यत द्विरग्निहोत्र जुहोति द्विर्भुङ्क्त एव व्यभिचारात् प्रतिषेधहेतौ (क) अन्यशब्दस्य प्रयोग प्रतिषिध्यते ॥ ३१ ॥

सि द्धान्तसूत्रम्।—अन्यतरस्य पक्षस्यानित्यत्वसाधकस्याध्यापनाख्य प्रतिषेध स न सम्भवति। उभयो पक्षय अध्यापनस्य समानत्वादिति भाव। अध्यापनं हि गुरूच्चारणानूच्चारणं शिष्योच्चारणानुकूलोच्चारणं वा तच्च स्थैर्य्यास्थैर्य्यपक्षयोस्तुल्यम्। न शब्दनित्यतायां साधकं विधातुमन्न न चाध्यापनं दानं यत स्व स्वत्वध्वंसपरस्वत्वोत्पादनाय तच्च स्थैर्य्यमाकाङ्क्षतीत्यम्। न वा दानं सम्भवति। यद्वा नामकदा स्वत्व विरोधात परस्वत्वासम्भवाच्च। अपि तु नृत्याध्यापनादाविवोपदेशमात्रमिति भाव ॥२८॥

पूर्वपक्षसूत्रम्—यद्धि स्थिर तदभ्यस्यमानं दृष्टम् यथा—पञ्चकृत्वो रूप पश्यति एव शतकृत्वो नुवाकमधीत इत्यभ्यासात् स्थैर्य्यं शब्दस्येति भाव ॥ ३ ॥

उत्तरयति।—पूर्वपक्षो न युक्त। कुत ? अन्यत्व भेदेऽपि शब्दानाम्

(क) षष्ठ षष्ठीसमास।

अन्यदन्यस्मादनन्यत्वादनन्यदित्यन्यताऽभाव ॥३२॥

यदिदमन्यदिति मन्यसे तत स्वार्थेनानन्यत्वादन्यन्न भवति, एवमन्यताया अभाव। तत्र यदुक्तम्—"अन्यत्वेऽप्यभ्यासस्योपचारात" इति एतदयुक्तमिति ॥ ३२ ॥

शब्दप्रयोग प्रतिषेधत शब्दान्तरप्रयोग प्रतिषिध्यते।—

तदभावे नास्त्यनन्यता तयोरितरेतरापेक्ष सिद्धे ॥ ३३ ॥

अन्यस्मादनन्यतामुपपादयति भवान्, उपपाद्य चान्यत प्रत्याचष्टे, अनन्यदिति च शब्दमनुजानाति, प्रयुङ्क्ते चानन्य दिति। एतत समासपदम्, अन्यशब्दोऽय प्रतिषेधेन सह समस्यते। यदि चात्रोत्तर पद नास्ति, कस्याय प्रतिषेधेन सह समास? तस्मात् तयोरनन्यान्यशब्दयोरितरोऽनन्यशब्द इतरमन्यशब्दमपेक्षमाण सिध्यतीति। तत्र यदुक्तम "अन्यताया अभाव इति एतदयुक्तमिति ॥ ३३ ॥

अस्तु तर्हीदानी शब्दस्य नित्यत्वम्?—

विनाशकारणानुपलब्धे ॥ ३४ ॥

यदनित्य, तस्य विनाश कारणाद्भवति, यथा,—लोष्टस्य

अन्यत्वेऽभ्यासस्य उपचारात् सम्भवात् न ह्यभ्यास स्वस्य साधयति द्विजहाति विनत्यतीत्यादौ भेदेऽप्यभ्यासदर्शनादिति भाव ॥ ३१ ॥

अन्यतव अर्गति नास्तीति कथमन्यत्वेऽप्यभ्यासोपपत्ति? इति तटस्थ आशङ्कते।—यदन्यस्मादन्यदुच्यते तत् स्वस्मादनन्यादभिन्नम्, तत्कथमन्यद्भेदाभेदयोर्विरोधादिति भाव। स्वाभेदस्याऽऽवश्यकत्वमिति हृदयम् ॥ ३२ ॥

समाधत्ते।—तदभावेऽन्यत्वस्याभावे अनन्यता पि नास्ति तयोर्भेदाभेदयो सह परस्परसापेक्षत्वात् वस्तुतस्तु तयोमध्य इतरस्य एकतरस्य अनन्यत्वस्, इतरापेक्षसिद्ध इतरत्वस्य भेदस्य ज्ञानापेक्षासिद्धियस्य तादृशत्वादित्यर्थ ॥ ३३ ॥

कारणद्रव्यविभागात। शब्दश्चेदनित्य तस्य विनाशो यस्मात कारणाद्भवति तदुपलभ्येत, न चोपलभ्यते, तस्मान्नित्य इति ॥ ३४ ॥

**अश्रवणकारणानुपलब्धे सततश्रवणप्रसङ्ग ॥ ३५ ॥**

यथा विनाशकारणानुपलब्धेरविनाशप्रसङ्ग, एवमश्रवणकारणानुपलब्धे सततश्रवणप्रसङ्ग। व्यञ्जकाभावादश्रवणमिति चेत? प्रतिषिद्ध व्यञ्जकम। अथ विद्यमानस्य निर्निमित्तम श्रवणमिति विद्यमानस्य निर्निमित्तो विनाश इति समानश्च दृष्टविरोधो निमित्तमन्तरेण विनाशे चाश्रवणे चेति ॥ ३५ ॥

**उपलभ्यमाने चानुपलब्धेरसत्त्वादनपदेश ॥ ३६ ॥**

अनुमानाच्चोपलभ्यमाने शब्दस्य विनाशकारणे विनाशकारणानुपलब्धेरसत्त्वादित्यनपदेश। यस्माद्विषाणी, तस्मादश्व इति। किमनुमानमिति चेत सन्तानोपपत्ति उपपादित शब्दसन्तान संयोगविभागजाच्छब्दाच्छब्दान्तरम्, ततोऽप्यन्यत् ततोऽप्यन्यादिति। तत्र कार्य्य शब्द कारणशब्दं निरुणद्धि प्रतिघातिद्रव्यसंयोगस्त्वन्त्यस्य शब्दस्य निरोधक। दृष्टं हि तिर प्रतिकुड्यमन्तिकस्थेनाप्यश्रवणं शब्दस्य श्रवणञ्च दूरस्थेनाप्यसति व्यवधान इति। घण्टायामभिहन्यमानायां तारस्तारतरो मन्दो मन्दतर इति श्रुतिभेदं नानाशब्दसन्तानोऽविच्छेदेन श्रूयते, तत्र नित्ये शब्दे। घण्टास्थमन्यगतं वाऽवस्थित सन्तानवृत्त्याभिव्यक्तिकारणं वाच्य येन श्रुतिसन्तानो भवतीति।

शङ्कते।— शब्दो नित्य इत्याह ॥ ३४ ॥

अनुपलब्धिरप्रत्यक्षमप्रमाणं वा। आद्य प्रतिबन्दीमाह।—यद्यप्रत्यक्षत्वादभावसिद्धि तदा श्रवणकारणस्याप्रत्यक्षत्वादश्रवण न स्यादिति सततश्रवणप्रसङ्ग इत्यर्थ ॥ ३५ ॥

द्वितीय त्वाह।—अनुमानादिना उपलभ्यमाने विनाशकारणे अनुपलब्ध

शब्दभेदश्चासति श्रुतिभेद उपपादयितव्य इति। अनित्ये तु शब्दे घण्टास्थं सन्तानवृत्ति संयोगसहकारि निमित्तान्तरं संस्कारभूतं पटु मन्दमिति वर्त्तते तस्यानुवृत्त्या शब्दसन्तानानुवृत्तिः। पटुमन्दभावाच्च तीव्रमन्दता शब्दस्य, तत्कृतश्च श्रुतिभेद इति ॥३६॥

न वै निमित्तान्तरं संस्कार उपलभ्यते, अनुपलब्धेर्नास्तीति चेत्?—

**पाणिनिमित्तप्रश्लेषाच्छब्दाभावे नानुपलब्धिः ॥ ३७॥**

पाणिकर्मणा पाणिघण्टाप्रश्लेषो भवति, तस्मिंश्च सति शब्दसन्तानो नोपलभ्यते अतः श्रवणानुपपत्तिः। तत्र प्रतिघातिद्रव्यसंयोगः शब्दस्य निमित्तान्तरं संस्कारभूतं निरुणद्धीत्यनुमीयते। तस्य च निरोधाच्छब्दसन्तानो नोत्पद्यते अनुत्पत्तौ श्रुतिविच्छेदः। यथा,—प्रतिघातद्रव्यसंयोगादिषोः क्रियाहेतौ संस्कारे निरुद्धे गमनाभाव इति, कम्पसन्तानस्य स्पर्शनेन्द्रियग्राह्यस्य चोपरमः कांस्यपात्रादिषु पाणिसंश्लेषो लिङ्गं संस्कारसन्तानस्येति। तस्मान्निमित्तान्तरस्य संस्कारभूतस्य नानुपलब्धिरिति ॥ ३७ ॥

अभावात् ल ोग हेतुरनपदेशः असाधकः आसङ्गत्वात्। अन्यथा वत्वन विनाशकल्पनमिति भावः ॥ ३६ ॥

सिद्धान्तिनः मतान्तरम्।—शब्दायमाने कांस्यादौ पाणिरूपनिमित्तस्य प्रश्लेषात् संयोगाच्छब्दाभावे उपलभ्यमाने शब्दाभावकारणस्य नानुपलब्धिरिति। यथाश्रुतानुयायिनः परे तु पाणिरूपनिमित्तस्य प्रश्लेषः सम्बन्धो यत्र स पाणिजः शब्दः तथा च उत्तरशब्दः तत्र शब्दाभावे शब्दध्वंसे सति न विनाशकारणानुपलब्धिरित्यर्थ इत्याहुः। अन्ये तु पूर्वसूत्रे शब्दस्य तावद्वेगाऽऽत्मकः संस्कारविशेषो हेतुस्तस्य तीव्रतीव्रतरमन्दमन्दतरत्वाच्छब्दोऽपि तादृशः। तत्र चोत्तरोत्तरशब्दानां पूर्वपूर्वशब्दनाशकत्वं कल्प्यत इत्यर्थः। ननु तादृशसंस्कार एव नास्तीत्यत आह पाणीति।—नानुपलब्धिः संस्कारस्येति शेषः। पाणिनिमित्तस्य प्रश्लेषात् घण्टादिसंयोगात् संस्काररूपकारणाभावे तदा शब्दाभावे शब्दानुत्पत्तौ नानुपलब्धिः संस्कारस्येत्यर्थ इत्याहुः ॥३७॥

**विनाशकारणानुपलब्धेश्चावस्थाने तन्नित्यत्व-प्रसङ्ग ॥ ३८ ॥**

यदि यस्य विनाशकारण नोपलभ्यते, तदवतिष्ठते, अवस्थानाच्च तस्य नित्यत्व प्रसज्यते। एव यानि खल्विमानि शब्दश्रवणानि शब्दाभिव्यक्तय इति मत न तेषा विनाशकारण भवतोपपाद्यते अनुपपादनादवस्थानम्, अवस्थानात् तेषा नित्यत्व प्रसज्यत इति। अथ नैवम् तर्हि न विनाशकारणानुपलब्धे शब्दस्यावस्थानान्नित्यत्वमिति ॥ ३८ ॥

कम्पसमानाऽऽश्रयस्य चानुनादस्य पाणिप्रश्लेषात् कम्पवत् कारणोपरमादभाव, वैयधिकरण्ये हि प्रतिघातिद्रव्यप्रश्लेषात् समानाधिकरणस्यैवोपरम स्यादिति—

**अस्पर्शत्वादप्रतिषेध ॥ ३९ ॥**

यादृशमाकाशगुण शब्द इति प्रतिषिध्यते अयमनुपपन्न प्रतिषेध अस्पर्शत्वाच्छब्दाऽऽश्रयस्य रूपादिसमानदेशस्याग्रहणे शब्दसन्तानोपपत्तेरस्पर्शव्यापिद्रव्याऽऽश्रय शब्द इति ज्ञायते न कम्पसमानाऽऽश्रय इति ॥ ३९ ॥

प्रतिद्रव्य रूपादिभि सह सन्निविष्ट शब्द समानदेशो व्यज्यत इति नोपपद्यते, कथम?—

**विभक्त्यन्तरोपपत्तेश्च समासे ॥ ४० ॥**

सन्तानोपपत्तेश्चेति चार्थ तद्व्याख्यानम्। यदि रूपादय शब्दाश्च प्रतिद्रव्य समस्ता समुदिता तस्मिन् समासे समुदाये

ननु घण्टादिपाणिसंयोगस्य शब्दनिवृत्तिकाले घण्टाद्याश्रय एव शब्द स्यादित्याशङ्कायामाह।—उक्त प्रतिषेधो न सम्भवति अस्पर्शत्वात् शब्दाऽऽश्रयस्येति शेष। शब्द हि न स्पर्शवद्विशेषगुण अग्निसंयोगासमवायिकारणकत्वाभाववदकारणगुणपूर्वकत्वाभ्यत्वादित्याशय ॥ ३९ ॥

यो यथाजातीयक सन्निविष्ट, तस्य तथाजातीयस्यैव ग्रहणम भवितव्यम्, शब्दे रूपादिवत। तत्र योऽय विभाग एकद्रव्ये नाना रूपा भिन्नश्रुतयो विधमाण शब्दा अभिव्यज्यमाना श्रूयन्ते यच्च विभागान्तर सरूपा समानश्रुतय मधम्माण शब्दास्तीव्रमन्द धर्म्मतया भिन्ना श्रूयन्ते तदुभय नोपपद्यत। नानाभूताना मुत्पद्यमानानामय धर्म, नैकस्य व्यज्यमानस्येति। अस्ति चाय विभागो विभागान्तरञ्च तेन विभागोपपत्तेमन्यामहे, न प्रतिद्रव्य रूपादिभि सह शब्द सन्निविष्टो व्यज्यत इति ॥ ४० ॥

द्विविधश्चाय शब्दो वर्णाऽऽत्मका ध्वानमात्रश्च, तत्र वर्णा ऽऽत्मनि तावत,—

## विकाराऽऽदेशोपदेशात् सशय ॥ ४१ ॥

दध्यत्रेति कचिदिकार इत्व हित्वा यत्वमापद्यत इति विकार मन्यन्त। केचिदिकारस्य प्रयोगे विषयकृत यदिकार स्थान जहाति तत्र यकारस्य प्रयोग ब्रुवत। सहिताया विषत्र इकारो न प्रयुज्यत, तस्य स्थान यकार प्रयुज्यत स आदेश इति। उभयमिदमुपदिश्यत, तत्र न ज्ञायत किं तत्त्वम ? इति। आदेशोपदशस्तत्त्वम। * विकारापदश ह्यन्वयस्या ग्रहणाद्विकारानुमानम – सत्यन्वये किञ्चिन्निवर्त्तत,किञ्चिदुप-

एत एव व्युत्पादयितुमाह।—समासे स्पर्शादिसमुदाये साहत्यन शब्दा वर्त्तत इति न युक्तम् विभक्त्यन्तरस्य विभागान्तरस्य तारमन्दान उपपत्त। अयमर्थ — एकस्मिन्नेव शङ्खे तारमन्दादि नानाशब्दा जायन्त यस्माऽऽदयस्तु वनाऽग्निसयोग न परावर्त्तन्त इति भाव ॥ ४ ॥

समाप्त शब्दानित्यत्वप्रकरणम्।

प्रसङ्गाच्छब्दपरिणामवाद दूषयि त सशय प्रदर्शयति।—"इको यणचि" इत्यादिना इकारादविकारी यकारादिरिति केचित सार दा व्याचक्षते पर तु इकारे प्रयोक्तव्ये यकार प्रयोक्तव्य इत्यादिशमादिश्चवि अतस्य वर्णा विकारिणो न वेति सशय।

जायत इति शक्येत विकारोऽनुमातु, न चान्वयो गृह्यते, तस्माद्विकारो नास्तीति। भिन्नकरणयोश्च वर्णयोरप्रयोगे प्रयोगापपत्ति। विवृतकरण इकार ईषत्स्पृष्टकरणो यकार। ताविमौ पृथक करणाऽऽख्येन प्रयत्नेनोच्चारणीयौ तयोरकस्या प्रयागेऽन्यतरस्य प्रयाग उपपन्न इति। * अविकारे चाविशेष।* यत्रमाविकारयकारौ न विकारभूतौ—यतत यच्छति प्रायस्त इति, इकार इदमिति। यत्र च विकारभूतौ—इष्ट्वा दध्याहरेति। उभयत्र प्रयोक्तुरविशेषो यत्न श्रोतुश्च श्रुतिरित्यादेशोपपत्ति। *प्रयुज्यमानाग्रहणाच्च* न खल्विकार प्रयुज्यमानो यकारता मापद्यमाना गृह्यते कि तर्हि?—इकारस्य प्रयोगे यकार प्रयुज्यत तस्मादाविकार इति। * अविकारे च न शब्दान्वाख्यानलोप न विक्रियन्ते वर्णा इति।* न चैतस्मिन पक्षे शब्दान्वाख्यानस्यासम्भव येन वर्णविकार प्रतिपद्येमहीति। न खलु वर्णस्य वर्णान्तर कार्य न ह्यीकाराद् यकार उत्पद्यते यकाराद्विकार। पृथकस्थानप्रयत्नोत्पाद्या ह्यीम वर्णास्तेषा मन्याऽन्यस्य स्थान प्रयुज्यत इति युक्तम। एतावच्चेतत पार णामा विकार स्यात् कार्यकारणभावो वा उभयञ्च नास्ति। तस्मान्न सन्ति वर्णविकारा। * वर्णसमुदायविकारानुपपत्ति वच्च वर्णविकारानुपपत्ति * 'अस्तेर्भू" ब्रुवो वचि' इति यथा वर्णसमुदायस्य धातुलक्षणस्य क्वचिद्विषये वर्णान्तर समुदायो न परिणामो न कार्य्यम, किन्तु शब्दान्तरस्य स्थाने शब्दान्तर प्रयुज्यत, तथा वर्णस्य वर्णान्तरमिति॥ ४१॥

विकारश्च स्वरूपस्य विनाशऽविनाश वा द्रव्यान्तराऽऽरम्भकत्वम् यथा—दध्यादेरारम्भकत्व सौत्रात्रवाद्यारम्भकत्वञ्च। सुवर्णादरपि लौहाद्यातन्याववव यथा। ग्रात अवयावनो नाशे सत्यव कुण्डलारम्भकत्वम् कपालादश्च स्वरूपविनाशेन घटाद्यारम्भकत्वम्॥ ४१॥

इतश्च न सन्ति वर्णविकाराः —

**प्रकृतिविवृद्धौ विकारविवृद्धेः ॥ ४२ ॥**

प्रकृत्यनुविधानं विकारेषु दृष्टम्। यकारे ह्रस्वदीर्घानुविधानं नास्ति येन विकारत्वमनुमीयत इति ॥ ४२ ॥

**न्यूनसमाधिकोपलब्धेर्विकाराणामहेतुः ॥ ४३ ॥**

द्रव्यविकारा न्यूनाः समा अधिकाश्च गृह्यन्ते तद्वदयं विकारो न्यूनः स्यादिति। द्विविधस्यापि हेतोरभावादसाधनं दृष्टान्तः। अत्र नोदाहरणसाधर्म्याद्धेतुरस्ति न वैधर्म्यात्, अनुपसंहृतश्च हेतुना दृष्टान्तो न साधक इति। प्रतिदृष्टान्ते चानियमः प्रसज्येत। यथाऽनडुहः स्थानेऽश्वो वोढुं नियुक्तो न तद्विकारो भवति एवमिवर्णस्य स्थाने यकारः प्रयुक्तो न विकार इति। न चात्र नियमहेतुरस्ति दृष्टान्तः साधकः, न प्रतिदृष्टान्त इति ॥ ४३ ॥

तत्र विकारनिराकरणाय सूत्रम्।—न यथा विकारित्वे तथा सति तत्प्रकृतेरुपादानत्वाभिमतस्य विवृद्ध्या विकारस्यापि विवृद्ध्यापत्तेः। महदल्पावयवाऽऽरब्धावयविनो महदल्पत्ववत् ह्रस्वेकाराऽऽरब्धयकारापेक्षया दीर्घकाराऽऽरब्धयकारस्य विवृद्धिः स्यादित्यर्थः। तस्मादादेशपक्षः श्रेयानिति भावः ॥ ४२ ॥

आक्षिपति।—उक्तो हेतुर्न युक्तः विकाराणां प्रकृत्यपेक्षया न्यूनत्वस्य समत्वस्याधिकत्वस्य चोपपत्तेर्दर्शनात्। यथा तूलकपरिमाणापेक्षया तद्विकारस्तन्तुरल्पपरिमाणः। यथा वा न्यग्रोधबीजादल्पिष्ठेन नारिकेलबीजेन न्यग्रोधादल्पो नारिकेलो जन्यते। कनकादिसमपरिमाणं कटकादि च। यथा वा न्यूनाधिकनारिकेलबीजाभ्यां समौ वृक्षौ। न्यूनपरिमाणाच्च वटबीजात् महान् वटतरुरिति ॥ ४३ ॥

द्रव्यविकारोदाहरणाच्च —

**नातुल्यप्रकृतीनां विकारविकल्पात् ॥ ४४ ॥**

अतुल्यानां द्रव्याणां प्रकृतिभावो विकल्पते विकाराश्च प्रकृतीरनुविधीयन्ते न तु इवर्णमनुविधीयते यकारः तस्मादनुदाहरणं द्रव्यविकार इति ॥ ४४ ॥

**द्रव्यविकारे वैषम्यवद्वर्णविकारविकल्पः ॥४५॥**

यथा द्रव्यभावेन तुल्यायाः प्रकृतेर्विकारवैषम्यम् एवं वर्णभावेन तुल्यायाः प्रकृतेर्विकारविकल्प इति ॥ ४५ ॥

**न विकारधर्मानुपपत्तेः ॥ ४६ ॥**

अयं विकारधर्मो द्रव्यसामान्ये यदात्मकं द्रव्यं मृद्वा सुवर्णं वा तस्याऽऽत्मनोऽन्वये पूर्वो व्यूहो निवर्त्तते व्यूहान्तरञ्चोपजायते तं विकारमाचक्षते। न वर्णसामान्ये कश्चिच्छब्दाऽऽत्माऽन्वयी य इत्वं जहाति यत्वञ्चाऽऽपद्यते तत्र यथा सति द्रव्यभावे विकारवैषम्ये नानडुहोऽश्वो विकारो विकारधर्मानुपपत्ते एवमिवर्णस्य न यकारो विकारो विकारधर्मानुपपत्तेरिति ॥ ४६ ॥

समाधत्ते।—नेति। समाधानं युक्तम्। अतुल्यप्रकृतेः भिन्नप्रकृतीनां हि विकाराणां विकल्पः तत्र हेतुः म...भावः न हि बीजात् क्रमेण दधिजन्म ...क्रमः। प्रकृतिभेदेऽनुविधानमपि तु तथाविधं ...। च न हि रूपधारणीमात्रभाव ॥ ४४ ॥

आक्षिपति — प्रत्यवस्थाने ... प्रकृतीनां ... विकार ... यथा एवमेव ... तुल्यायाः अपि ... विकाराः यकारस्तद्वत् अविकल्पः एकस्य ... नुपपन्नमित्यर्थः ॥ ४५ ॥

समाधत्ते।—नेति द्रव्यविकारतुल्यता विकाराणां हि ... धर्मौ प्रकृतेरनु ... तदभेद इति। प्रकृते तदनुपपत्तिः। इत्वं वदीर्घत्वादिना प्रकृतिभेदेऽपि ... भेदाभावात् ॥ ४६ ॥

इतश्च न सन्ति वर्णविकाराः —

## विकारप्राप्तानामपुनरापत्तेः ॥ ४७ ॥

अनुपपन्ना पुनरापत्तिः। कथम्?—पुनरापत्तेरननुमाना दिति। इकारो यकारत्वमापन्नः पुनरिकारो भवति न पुनरिकारस्य स्थाने यकारस्य प्रयोगोऽप्रयोगश्चेत्यत्रानुमानं नास्ति ॥ ४७ ॥

## सुवर्णादीनां पुनरापत्तेरहेतुः ॥ ४८ ॥

अननुमानादिति न। इदं ह्यनुमानम् सुवर्णं कुण्डलत्वं हित्वा रुचकत्वमापद्यते रुचकत्वं हित्वा पुनः कुण्डलत्वमापद्यते एवमिकारोऽपि यकारत्वमापन्नः पुनरिकारो भवतीति व्यभिचारादननुमानम् ॥ ४८ ॥

यथा पयो दधिभावमापन्नं पुनः पयो भवति किम्? एवं वर्णानां न पुनरापत्तिः। अथ सुवर्णवत्पुनरापत्तिरिति। सुवर्णोदाहरणोपपत्तिश्च न —

## तद्विकाराणां सुवर्णभावाव्यतिरेकात् ॥ ४९ ॥

अवस्थितं सुवर्णं हीयमानेनोपजायमानेन धर्मेण धर्मि भवति नैवं कश्चिच्छब्दात्मा हीयमानेनत्वेनोपजायमानेन यत्वेन धर्मी गृह्यते। तस्मात् सुवर्णोदाहरणं नोपपद्यत इति ॥ ४९ ॥

—

इतश्च न विकार इत्याह।—विकारप्राप्तस्य न पुनः प्रकृतिरूपता दृष्टा न खलु दधि क्षीरतां पुनरापद्यते कारस्तु यकारतां प्राप्तः पुनरिकारतामापद्यते न चैवं दुग्धं पुनरपि दधि भवेत्यच्यत एवेति भावः ॥ ४७ ॥

आक्षिपति।—उक्तो हेतुन युक्तः सुवर्णादिकं हि कटकीभावं विहाय कुण्डलतामापन्नं पुनः कटकतामापद्यत एवेति भावः ॥ ४८ ॥

निराकरोति।—सुवर्णविकारस्थले हि सुवर्णत्वादिना प्रकृतिता न तु कटक

**वर्णत्वाव्यतिरेकाद्वर्णविकाराणामप्रतिषेधः ॥५०॥**

वर्णविकारा अपि वर्णत्वं न व्यभिचरन्ति—यथा सुवर्णविकारः सुवर्णत्वमिति ॥ ५० ॥

**सामान्यवतो धर्मयोगो न सामान्यस्य ॥ ५१ ॥**

कुण्डलरुचकौ सुवर्णस्य धर्मौ न सुवर्णत्वस्य एवमिकारयकारौ कस्य वर्णात्मनो धर्मौ । वर्णत्वं सामान्यं न तस्येमौ धर्मौ भवितुमर्हतः न च निवर्त्तमानो धर्म उपजायमानस्य प्रकृतिः तत्र निवर्त्तमान इकारो न यकारस्योपजायमानस्य प्रकृतिरिति ॥ ५१ ॥

इतश्च वर्णविकारानुपपत्तिः —

**नित्यत्वेऽविकारादनित्यत्वे चानवस्थानात् ॥५२॥**

नित्या वर्णा इत्येतस्मिन् पक्षे इकारयकारौ वर्णौ इत्युभयोर्नित्यत्वाद्विकारानुपपत्तिः । नित्यत्वेऽविनाशित्वात् कः कस्य विकार ? इति । अथानित्या वर्णा इति पक्षः एवमप्यनवस्थानं वर्णानाम् । किमिदमनवस्थानं वर्णानाम् ? उत्पद्य निरोधः । उत्पद्य निरुद्धे इकारे यकार उत्पद्यते यकारे चोत्पद्य निरुद्धे इकार उत्पद्यते इति कः कस्य विकारः । तदेतदवगृह्य सन्धाने सन्धाय चावग्रहे वेदितव्यमिति ॥ ५२ ॥

त्वान्निर्त्ता तन्नोभयमपि सुवर्णं न जहाति यदि हि सुवर्णतामपहाय कटकतामापन्नस्य पुनः सुवर्णता भवेत् तदा व्यभिचारः स्यादिति न चैवम् प्रकृते तु इकारतां हित्वा यकारतां प्राप्तस्यापीकारताऽऽपात्तस्य्यत्वात दोषा दष्परिहर इति भावः ॥ ४९ ॥

अत्रकार मूलयुक्तिमाह ।—वर्णानां नित्यत्वे विकारासम्भवादनित्यत्वे चास्थिरत्वात् । त्वनेकारध्वंसानन्तरमिकारनाशादिकारानुपपत्तिरित्यर्थः ॥ ५२ ॥

नित्यपक्षे तु तावत्समाधिः।—

**नित्यानामतीन्द्रियत्वात्तद्धर्मविकल्पाच्च वर्णविकाराणामप्रतिषेधः ॥ ५३ ॥**

नित्या वर्णा न विक्रियन्त इति विप्रतिषेधः। यथा नित्यत्वे सति किञ्चिदतीन्द्रियं किञ्चिदिन्द्रियग्राह्यम् इन्द्रियग्राह्याश्च वर्णाः। एवं नित्यत्वे सति किञ्चिन्न विक्रियते वर्णास्तु विक्रियन्त इति। *विरोधादहेतुस्तद्धर्मविकल्पः।* नित्यं नोपजायते नापैति अनुपजनापायधर्मकम्। अनित्यं पुनरुपजनापाययुक्तम्। न चान्तरेणोपजनापायौ विकारः सम्भवति। तद्यदि वर्णा विक्रियन्ते नित्यत्वमेषां निवर्त्तते अथ नित्या विकारधर्मत्वमेषां निवर्त्तते। सोऽयं विरुद्धो हेत्वाभासो धर्मविकल्प इति ॥ ५३ ॥

अनित्यपक्षे समाधिः।—

**अनवस्थायित्वे च वर्णोपलब्धिवत्तद्विकारोपपत्तिः ॥ ५४ ॥**

यथाऽनवस्थायिनां वर्णानां श्रवणं भवति एवमेषां विकारो भवतीति। *असम्बन्धादसमर्था अर्थप्रतिपादिका वर्णोपलब्धिर्न* विकारेण सम्बन्धादसमर्था या गृह्यमाणा वर्णविकारमनुपपादयेदिति। तत्र यादृगिदं गन्धगुणा पृथिवी एवं शब्दसुखादिगुणाऽपीति, तादृगेतद्भवतीति। न च वर्णोप

---

अत्र विकारवादी नित्यत्वमतमालम्ब्य परिहरति।—विकाराणां प्रतिषेधो न युक्तः नित्यानां धर्मविकल्पाद्धर्मस्य नानाविधत्वादतीन्द्रियत्वम् चकारेणैन्द्रियकत्वं समुच्चीयते यथा हि नित्यानामाकाशादीनामतीन्द्रियत्वम् ऐन्द्रियकत्वमपि गोत्वादीनां नित्यत्वम् एवमन्येषां नित्यानामविकारित्वेऽपि वर्णानां विकारित्वं स्यादिति ॥ ५३ ॥

लब्धिवर्णानहृत्तौ वर्णान्तरप्रयोगस्य निवर्त्तिका योऽयमि वर्णानहृत्तौ यकारस्य प्रयोग इत्यय वर्णोपलब्ध्या निवर्त्तत तदा तत्रोपलभमान इवर्णा यत्वमापद्यत इति गृह्यत। तस्माद्वर्णोप लब्धिरहेतुर्वर्णविकारस्यति ॥ ५४ ॥

विकारधर्मित्वे नित्यत्वाभावात् कालान्तर विकारोपपत्तेश्चाप्रतिषेध ॥ ५५ ॥

तद्भावकल्पानित न युक्त प्रतिषध । न खलु विकार धर्मक किञ्चित नित्यमुपलभ्यत इति। वर्णोपलब्धिरिति न युक्त प्रतिषध। अवग्रि इह दधि अत्र इति प्रयुज्य चिर स्थित्वा तत सहिताया प्रयुङ्क्त इत्यत्र इति चिरानवृत्त चास्मिवर्ण यकार प्रयुज्यमान तस्य विकार इति प्रतीयत? कारणाभावात कार्याभाव इत्यनुयोग प्रसज्यत इति ॥ ५५ ॥

इतश्च वर्णविकारानुपपत्ति।—

प्रकृत्यनियमाद्वर्णविकाराणाम ॥ ५६ ॥

इकारस्थान यकार श्रूयत, दृश्यत। यकारस्थान खल्वि कारो विधीयते, विध्यति। तद् यदि स्यात् प्रकृतिविकारभावो

आनित्यत्वमालम्ब्य स आह।—अनवस्थ नित्य प वर्णाना यथा प्रत्यक्ष भवति एव विकारोऽपि स्यादिति भाव ॥ ५४ ॥

उभयवादिनमर्यति —उक्त प्रतिषधो युक्तो विकारधर्मित्व नित्यत्वासम्भवात। विकारो ह्यत स्वरूपपरित्यागेन रूपान्तरा पा। तत्र च नित्यत्वविरोधात् न हि धर्मा कपालादापादनत्वस्य प्रकृत सम्भव त यक रकाल इकारानुपलम्भ। आनित्यत्वपक्षऽपि प्रतिषधो न युक्तो प्रत्यन हि वर्णस्य स्थितिनियमा युज्यत विकारस्तु कालान्तर यो न युज्यत इत्योति अन्त्यानन्तरभवत्वाद अत्यन्त तस्य नाशादिति भा ॥ ५५ ॥

च विकारानुपपत्तिरित्य ह।—विकाराणा हि प्रकृतिनियम यथा क्षीरस्यो

वृणाना, तस्य प्रकृतिनियम स्यात। दृष्टो विकारधर्मित्व प्रकृतिनियम इति ॥ ५६ ॥

## अनियमे नियमान्नानियम ॥ ५७ ॥

योऽय प्रकृतेरनियम उक्त, स नियतो यथाविषय व्यवस्थित, नियतत्वान्नियम इति भवति एव सत्यनियमो नास्ति तत्र यदुक्त — प्रकृत्यनियमात् इत्यतदयुक्त मिति ॥ ५७ ॥

## नियमानियमविरोधादनियमे नियमाच्चा प्रतिषेध ॥ ५८ ॥

नियम इत्यत्राथाभ्यनुज्ञा अनियम इति तस्य प्रतिषेध अनुज्ञातनिषिद्धयोश्च व्याघातादनर्थान्तरत्व न भवति। अनियमश्च नियतत्वान्नियमो न भवतीति। नात्रार्थस्य तथाभाव प्रतिषिध्यते, किं तर्हि?—तथाभूतस्यार्थस्यानियमशब्देनाभिधीयमानस्य नियतत्वान्नियमशब्द एवोपपद्यते सोऽय नियमा दनियमे प्रतिषेधो न भवतीति ॥ ५८ ॥

प्रकृतिविकारभाव न तु वपरीत्यम्। प्रकृते तु दध्यत्रेत्यादौ इकार यकारप्रकृति विध्वतीत्यादौ तु यकार इकारप्रकृतिरिति भाव ॥ ५६ ॥

अत्र कश्चिद्दोषमाह।—अनियमो य उक्त स न युक्त। कुत — अनियतत्वस्य नियमादित्यर्थ ॥ ५७ ॥

समाधत्ते।—नानियमे नियमात यत्त्वयाऽनियमप्रतिषेध कृत स न युक्त। कुत ?—नियमानियमयोर्विरोधात। अनियमो हि नियमाभाव तस्मिन् सति नियमासम्भवादिति भाव ॥ ५८ ॥

न चेयं वर्णविकारोपपत्तिः परिणामात् कार्य्यकारणभावाद्वा। किं तर्हि ?—

**गुणान्तराऽऽपत्त्युपमर्दह्रासवृद्धिलेशश्लेषेभ्यस्तु विकारोपपत्तेर्वर्णविकारः ॥ ५९ ॥**

स्थान्यादेशभावादप्रयोगे प्रयोगो विकारशब्दार्थः, स भिद्यते, गुणान्तराऽऽपत्तिः उदात्तस्यानुदात्तभाव इत्येवमादि। उपमर्दो नाम एकरूपनिवृत्तौ रूपान्तरोपजनः। ह्रासो दीर्घस्य ह्रस्वः। वृद्धिर्ह्रस्वस्य दीर्घः। तयोर्वा प्लुतः। लेशो लाघवं स्तु इत्यस्तेर्विकारः। श्लेष आगमः प्रकृतेः प्रत्ययस्य वा। एत एव विशेषा विकारा इति। एत एवाऽऽदेशाः एते चेद्विकारा उपपद्यन्ते तर्हि वर्णविकारा इति ॥ ५९ ॥

**ते विभक्त्यन्ताः पदम् ॥ ६० ॥**

यथादर्शनं विकृता वर्णा विभक्त्यन्ताः पदसंज्ञा भवन्ति। विभक्तिर्द्वयी—नामिक्याख्यातिकी च "ब्राह्मणः पचति" इत्युदाहरणम्। उपसर्गनिपातास्तर्हि न पदसंज्ञा लक्षणान्तरं

तदेवं वर्णानां प्रकृतिविकारभावं निरस्य स्वपक्षे विकारव्यवहारमुपपादयति।— तुशब्दः पुनरर्थे एतेभ्यः पुनर्वर्णविकारोपपत्तेर्वर्णविकारस्य एकवर्णप्रयोगे वर्णान्तरप्रयोगस्य उपपत्तेर्वर्णविकार इति व्यवह्रियत तानेवाऽऽह गुणान्तरेति।—गुणान्तराऽऽपत्तिः—धर्मिणि सत्येव धर्मान्तराऽऽपत्तिः यथोदात्तस्यानुदात्तत्वम्। उपमर्दः—धर्मिनिवृत्तौ धर्म्यन्तरप्रयोगः यथा अस्तेर्भूः। ह्रासः—दीर्घस्य ह्रस्वत्वम्। वृद्धिः—ह्रस्वस्य दीर्घत्वम्। लेशः—अल्पः यथाऽस्तेरकारलोपः। श्लेषः—आगमः। एत कारणविकारव्यवहार इति ॥ ५९ ॥

समाप्तं शब्दपरिणामप्रकरणम्।

शाब्दबोधे पदजन्यपदार्थोपस्थितेर्हेतुत्वात् तदुपपादनाय पदार्थं निरूपणीयं पदादौ निरूपयति।—ते वर्णा विभक्त्यन्ताः पदम्। बहुत्वमविवक्षितम्। विभक्तेश्च सत्त्वमनपेक्षितम्। विभक्तिश्च सुप्तिङरूपा। वस्तुतस्तु नेदं पदं शाब्दबोधोपयोगि,

वाच्यमिति स्मर्यते च खलु नामिक्या विभक्तेरव्ययाल्लोपः तयोः पदसंज्ञार्थमिति। पदेनार्थसम्प्रत्यय इति प्रयोजनं, नामपदं चाधिकृत्य परीक्षा, गौरिति पदं खल्विदमुदाहरणम् ॥ ६० ॥

**तदर्थे व्यक्त्याकृतिजातिसन्निधावुपचारात् संशयः ॥ ६१ ॥**

अविनाभाववृत्तिः सन्निधिः। अविनाभावेन वर्त्तमानासु व्यक्त्याकृतिजातिषु गौरिति प्रयुज्यते तत्र न ज्ञायते किमन्यतमः पदार्थ उत सर्व इति ॥ ६१ ॥

शब्दस्य प्रयोगसामर्थ्यात् पदार्थावधारणं तस्मात् —

**याशब्दसमूहत्यागपरिग्रहसङ्ख्यावृद्ध्यपचयवर्णसमासानुबन्धानां व्यक्तावुपचाराद्व्यक्तिः ॥ ६२ ॥**

व्यक्तिरेव पदार्थः। कस्मात्?—याशब्दप्रभृतीनां व्यक्तावुपचारात्। उपचारः प्रयोगः। या गौस्तिष्ठति, या गौर्निषण्णेति। नेदं वाक्यं जातेरभिधायकमभेदात्, भेदात्तु द्रव्याभिधायकम्।

किन्तु इदमाकाङ्क्षास्वरूपम्। अथवा विभक्तिरन्ते सम्बन्धस्तेन ... पदत्वमिति। इत्थञ्च पदं निरूप्य तदर्थनिरूपणं सङ्गच्छते। यत्तु प्रसङ्गात् पदार्थनिरूपणमिति तन्न पदार्थनिरूपणस्यासङ्गतत्वात् एकसूत्रस्य प्रकरणत्वाभावाच्च ॥ ६० ॥

तत्र पदं निरूप्य तदन्यत्वं पदार्थत्वं निरूपितम्। तत्रापि धात्वाद्यर्थस्य निर्विवादत्वाद्विवादास्पदपदार्थं निरूपयितुमाह।—व्यक्तिर्गवादिः आकृतिरवयवसंस्थानविशेषः जातिर्गोत्वादिः तासां सन्निधिः सामीप्यं मेलनम् तत्र सति उपचारात् ज्ञानात्। तथा च त्रयाणां युगपत्प्रत्ययात् किमेतासां प्रत्येकं पदार्थः? उत समस्त इति संशय इत्यर्थः। इदं भाष्यमिति केचित्। वस्तुतस्तु वार्त्तिकादिस्वरसात् सूत्रमेव। तदर्थे इत्यंशस्तु भाष्यकृत्पूरणमिति प्रतिभाति ॥ ६१ ॥

तत्र व्यक्तिशक्तिवादिनो मतमाह।—पदार्थ इति शेषः। उक्तानाम् उपचारात् व्यवहारात् अनुबन्धः प्रजननम् यथा गौर्जनयतीत्यादि व्यवहारो व्यक्तावेव

गवां समूह इति भेदात् द्रव्याभिधानं न जातेरभेदात्। वैद्याय गां ददातीति द्रव्यस्य त्यागः न जातेरमूर्त्तत्वात्। प्रतिक्रमानुक्रमानुपपत्तेश्च। परिग्रहः स्वत्वेनाभिसम्बन्धः कौण्डिन्यस्य गौर्ब्राह्मणस्य गौरिति। द्रव्याभिधाने द्रव्यभेदात् सम्बन्धभेद इति उपपन्नम्। अभिन्ना तु जातिरिति। सङ्ख्या—दश गावो विंशतिर्गाव इति। भिन्नं द्रव्यं सङ्ख्यायते न जातिरभेदादिति। वृद्धिः कारणवतो द्रव्यस्यावयवोपचयः अवर्द्धत गौरिति। निरवयवा तु जातिरिति। एतेनापचयो व्याख्यातः। वर्णः—शुक्ला गौः कपिला गौरिति। द्रव्यस्य गुणयोगो न सामान्यस्य। समासः,—गोहितं गोसुखमिति। द्रव्यस्य सुखादियोगो न जातेरिति। अनुबन्धः सरूपप्रजननसन्तानः—गौर्गां जनयतीति। तदुत्पत्तिधर्मत्वाद्‌द्रव्ये युक्तं न जातौ विपर्य्ययादिति। द्रव्यं व्यक्तिरिति हि नार्थान्तरम्॥६२॥

अस्य प्रतिषेधः।—

## न तदनवस्थानात्॥ ६३ ॥

न व्यक्तिः पदार्थः। कस्मात्?—अनवस्थानात्। यागञ्च प्रभृतिभिर्यो विशिष्यते स गोशब्दार्थः यो गौस्तिष्ठति यो गौर्निषसति न द्रव्यमात्रमविशिष्टं जात्या विनाऽभिधीयते। किं तर्हि? जातिविशिष्टम्; तस्मान्न व्यक्तिः पदार्थः। एवं समूहादिषु द्रष्टव्यम्॥ ६३ ॥

जात्याकृत्योरमूर्त्तत्वात्। एवं गवां समूहः गां ददाति गां प्रतिगृह्णाति दश गावः गौर्वर्द्धते कृशा गौः कपिला गौः गोहितं गौः प्रसूता इत्यादिव्यवहाराणां व्यक्तावेव सम्भवात्। समासः सम्यगासनं सम्बन्धोऽनुबन्धः इत्यर्थः गाराम्भः गोसमत्व मित्युदाहरणीयम्॥ ६२ ॥

तदपवादः।—न व्यक्तौ शक्तिः व्यक्तिमात्रस्यानवस्थानात् अव्यवस्थानात्॥ ६३ ॥

यदि न व्यक्तिः पदार्थः, कथं तर्हि व्यक्तावुपचारः ? इति। निमित्तादतद्भावेऽपि तदुपचारो दृश्यते खलु।—

**सहचरणस्थानतादर्थ्यवृत्तमानधारणसामीप्ययोगसाधनाऽऽधिपत्येभ्यो ब्राह्मणमञ्चकटराजशक्तुचन्दनगङ्गाशाटकान्नपुरुषेष्वतद्भावेऽपि तदुपचारः ॥ ६४ ॥**

अतद्भावेऽपि तदुपचार इति अतच्छब्दस्य तेन शब्देनाभिधानमिति। सहचरणात्—यष्टिकां भोजयति, यष्टिकासहचरितो ब्राह्मणोऽभिधीयत इति। स्थानात्—मञ्चाः क्रोशन्तीति, मञ्चस्थाः पुरुषा अभिधीयन्ते। तादर्थ्यात्—कटार्थेषु वीरणेषु व्यूह्यमानेषु कटं करोतीति। वृत्तात्—यमो राजा कुबेरो राजेति तद्वद्वर्तत इति। मानात्—आढकेन मिताः सक्तव आढकसक्तव इति। धारणात् तुलया धृतं चन्दनं, तुलाचन्दनमिति। सामीप्यात्—गङ्गायां गावश्चरन्तीति

व्यक्तिमात्रस्य शक्यत्वे। गवादिपदात् यत्किञ्चिद्गोरूपाद्युपस्थितिः स्यात् अतो गोविशिष्टा व्यक्तिर्वाच्या। तथा च नागृहीतविशेषणा बुद्धिर्विशिष्टमुपसङ्क्रामति इति न्यायात् जातावेव शक्तिरस्तु कथं तर्हि व्यक्तिबोधः ? इत्यत्र सूत्रम्। व्यक्तौ अतद्भावेऽपि तत्पदाशक्यत्वेऽपि तदुपचारः तच्छब्दव्यपदेशः। यथा सहचरणादितो ब्राह्मणादौ यष्ट्यादिपदप्रयोगः। सहचरणात् संयोगविशेषात् यष्टिं भोजयेत्यत्र यष्टिधरब्राह्मणे यष्टिशब्दप्रयोगः। एवं स्थानान्मञ्चाः क्रोशन्तीति मञ्चस्थपुरुषे। तादर्थ्यात् कटं करोतीति कटार्थकवीरणे कटस्यासत्त्वेन कारकत्वायोगात्। यमस्य वृत्तादनुशासनादेः राजनि यम इति। मानात् आढकेन मिताः सक्तव आढकसक्तव इति। धारणात् तुलया धृतं चन्दनं तुलाचन्दनमिति। सामीप्याद्गङ्गायां गावश्चरन्तीति। कृष्णद्रव्ययोगात् कृष्णः शाटक इत्युदाहरणीयम्। प्राणसाधनादन्नं प्राणा इति। आधिपत्यादाजवास्य कुलमिति कुलाधिपतिः प्रतीयते। तथा च यथा

देशोऽभिधीयते सन्निकृष्टः। योगात्—कृष्णेन रागेण युक्तः शाटकः, कृष्ण इत्यभिधीयते। साधनात्—अन्नं प्राणा इति। आधिपत्यात्—अयं पुरुषः कुलम् अयं गोत्रमिति। तत्रायं सहचरणाद्योगाद्वा जातिशब्दो व्यक्तौ प्रयुज्यत इति ॥ ६४ ॥

यदि गौरित्यस्य पदस्य न व्यक्तिरर्थः अस्तु तर्हि,—

**आकृतिस्तदपेक्षत्वात् सत्त्व-व्यवस्थानसिद्धेः ॥६५॥**

आकृतिः पदार्थः। कस्मात्?—तदपेक्षत्वात् सत्त्वव्यवस्थानसिद्धेः। सत्त्वावयवानां तदवयवानाञ्च नियतो व्यूह आकृतिः तस्यां गृह्यमाणायां सत्त्वव्यवस्थानं सिध्यति अयं गौरयमश्व इति, नागृह्यमाणायाम्। यस्य ग्रहणात् सत्त्वव्यवस्थानं सिध्यति तं शब्दोऽभिधातुमर्हति सोऽस्यार्थ इति। नैतदुपपद्यते यस्य जात्या योगस्तदत्र जातिविशिष्टमभिधीयते गौरिति। न चावयवव्यूहस्य जात्या योगः, कस्य तर्हि?—नियतावयवव्यूहस्य द्रव्यस्य तस्मान्नाऽऽकृतिः पदार्थः ॥ ६५ ॥

गङ्गापदाद्गङ्गातीरत्वाद्विना बोधः तथा गोपदाद्गोत्वविशिष्टस्य व्यक्तेर्लक्षणया बोधः। एतेन युगपद्वृत्तिद्वयविरोधः एकपदार्थयोः परस्परानन्वयश्च प्रत्युक्तः। गोत्वत्वेन रूपेण आकृतिग्रहात् तयोर्वाच्यत्वात् अतो निष्कारणपदार्थोपस्थितिरपि नास्तीति मन्तव्यम् ॥ ६४ ॥

आकृतिरेव शक्येति मतमुपन्यस्यति।—आकृतिः पदार्थः कुतः?—सत्त्वस्य प्राणिनो गवादेः व्यवस्थानसिद्धेः व्यवस्थितत्वसिद्धेः तदपेक्षत्वादाकृत्यपेक्षत्वात् अयमश्वो गौरयमित्यादिव्यवहारस्याऽऽकृत्यपेक्षत्वादाकृतिरेव शक्येत्यर्थः ॥ ६५ ॥

अस्तु तर्हि जातिः पदार्थः ?—

**व्यक्त्याकृतियुक्तेऽप्यप्रसङ्गात्प्रोक्षणादीनां मृद्गवके जातिः ॥ ६६ ॥**

जातिः पदार्थः। कस्मात् ?—व्यक्त्याकृतियुक्तेऽपि मृद्गवके प्रोक्षणादीनामप्रसङ्गादिति। गां प्रोक्षय गामानय गां देहीति नैतानि मृद्गवके प्रयुज्यन्ते। कस्मात् ?— जातेरभावात्। अस्ति हि तत्र व्यक्तिः अस्त्याकृतिः यदभावात् तत्रासम्प्रत्ययः स पदार्थ इति ॥ ६६ ॥

**नाऽऽकृतिव्यक्त्यपेक्षत्वाज्जात्यभिव्यक्तेः ॥ ६७ ॥**

जातेरभिव्यक्तिराकृतिव्यक्ती अपेक्षते नागृह्यमाणायामाकृतौ व्यक्तौ जातिमात्रं शुद्धं गृह्यते तस्मान्न जातिः पदार्थ इति ॥६७॥

न वै पदार्थेन न भवितुं शक्यं कः खल्विदानीं पदार्थः ? इति।—

**व्यक्त्याकृतिजातयस्तु पदार्थः ॥ ६८ ॥**

तुशब्दो विशेषणार्थः। किं विशिष्यते ?—प्रधानाङ्गभावस्य अनियमेन पदार्थत्वमिति। यदा हि भेदविवक्षा विशेषगतिश्च

केवलजातिपक्षं दूषयति।—मृद्गवके व्यक्त्याकृतियुक्तेऽपि प्रोक्षणादीनामप्रसङ्गाज्जातिः पदार्थः इतरथा मृद्गवकस्यापि व्यक्तित्वादाकृतिसत्त्वाच्च वधप्रोक्षणादिप्रसङ्गादिति भावः ॥६६॥

केवलव्यक्त्याकृतिशक्तिपक्षं निराकृत्य केवलजातिपक्षं निराकरोति।—न—जातिमात्रं न पदार्थः जात्यभिव्यक्तेर्जातिशाब्दबोधस्य आकृतिव्यक्त्यपेक्षत्वात् आकृतिव्यक्तिविषयकत्वनियमात् तयोरपि वाच्यत्वमावश्यकं शक्तिं विना तज्ज्ञानासम्भवात्। न च जातिप्रकारकताऽऽक्षेपाऽऽकृतिविशिष्टशाब्दत्वस्य कार्यताऽवच्छेदकत्वात्तज्ज्ञानमिति वाच्यम् तथा सति गवादिपदस्य घटत्वादावपि शक्तिप्रसङ्गात् तस्मात् पदं स्ववाच्यमेवोपस्थापयति ॥ ६७ ॥

इत्थञ्च त्रयाणामपि वाच्यत्वं सिद्धमित्याह।—तुशब्देनैकमात्रपदार्थत्वव्यव

तदा व्यक्ति प्रधानम अङ्गन्तु जात्याकृती। यदा तु भेदोऽविवक्षित सामान्यगति तदा जाति प्रधानम अङ्गन्तु व्यक्त्याकृती स्वीकृते। तदेतद्बहुल प्रयोगेषु आकृतेस्तु प्रधानभाव उत्प्रेक्षितव्य ॥ ६८ ॥

कथ पुनर्ज्ञायते नाना व्यक्त्याकृतिजातय ? इति।— लक्षणभेदात तत्र तावत् —

व्यक्तिर्गुणविशेषाऽऽश्रयो मूर्त्तिः ॥ ६९ ॥

व्यज्यत इति व्यक्तिरिन्द्रियग्राह्येति न सर्व द्रव्य व्यक्ति। यो गुणविशेषाणा स्पर्शान्ताना गुरुत्वघनत्वद्रवत्वसंस्काराणाम अव्यापिन परिमाणस्याऽऽश्रयो यथासम्भव तद्द्रव्यम मूर्त्ति मूर्च्छितावयवत्वादिति ॥ ६९ ॥

क्वचि। पदार्थ इत्येकवचनन्तु त्रिष्वप्येकैव शक्तिरिति सूचनाय विभज्य शक्तौ कदाचित कस्याश्चित्पार्थक्ये स्यात्। आकृतेस्तु अन्यत्वेऽपि व्यक्तिविशेष्यत्वात प्राधान्यम् तत्रैव तात्पर्यात्। न चाऽऽकृत्यादिसाधारणशक्यतावच्छेदकाभावान्न शक्यैकमिति वाच्यम तथानियमे मानाभावात्। इद गवादिपदमभिप्रेत्य तेन पश्वादिपदस्य जातिवाचकत्वेऽपि न क्षति। जातिपद वा धर्मपर तथैव लक्षणस्य वक्ष्यमाणत्वात् ॥ ६८ ॥

तत्र के व्यक्त्यादय इत्याकाङ्क्षायामाह।—यद्यपि जात्यादेरपि व्यक्तत्वात् प्रमेयत्वमेव व्यक्तित्व तथाऽपि जात्याकृतिशक्तिविषयव्यक्तेरिद लक्षणम् तथा च गुणविशेषा जात्याकृतिसमानाधिकरणो गुण सङ्ख्यादिभिन्न तदाश्रय मूर्त्ति व्यक्तिरिति समानार्थकमित्यर्थ। परे तु — गुणा रूपादय विशेषा अविशेषा उत्क्षेपणादय तै सहित आश्रय द्रव्य तेन जात्याश्रयो व्यक्तिरित्याशय। विशेषलक्षणमाह मूर्त्तिरिति।—मूर्त्ति संस्थानविशेष तद्वान्” इत्याहु। एवं च मध्यपदलोपी समास इत्याशय। अन्ये तु — व्यक्तिलक्षण मूर्त्तिरिति। सा च का ? इत्याह गुणविशेषाऽऽश्रय इति।—गुणविशेषस्यावच्छिन्नपरिमाणस्य आश्रय इत्यर्थ” इत्याहु ॥ ६९ ॥

## आकृतिर्जातिलिङ्गाऽऽख्या ॥ ७० ॥

यया जातिर्जातिलिङ्गानि च प्रख्यायन्ते तामाकृतिं विद्यात्। सा च नानासत्त्वानां तदवयवानाञ्च नियताद्व्यूहादिति। नियतावयवव्यूहाः खलु सत्त्वावयवा जातिलिङ्गम्। शिरसा पादेन गामनुमिन्वन्ति। नियते च सत्त्वावयवानां व्यूहे सति गोत्वं प्रख्यायत इति। अनाकृतिव्यङ्ग्यायां जातौ मृत् सुवर्णं रजतमित्येवमादिष्वाकृतिर्निवर्त्तते, जहाति पदार्थत्वमिति ॥७० ॥

## समानप्रसवाऽऽत्मिका जातिः ॥ ७१ ॥

या समानां बुद्धिं प्रसूते भिन्नेष्वधिकरणेषु यया बहूनीतरेतरतो न व्यावर्त्तन्ते योऽर्थोऽनेकत्र प्रत्ययानुवृत्तिनिमित्तं तत् सामान्यम्। यच्च केषाञ्चिद्भेदं कुतश्चिद्भेदं करोति तत् सामान्यविशेषो जातिरिति ॥ ७१ ॥

इति वात्स्यायनीये न्यायभाष्ये द्वितीयाध्यायस्य द्वितीयमाह्निकम्।

समाप्तश्चायं द्वितीयोऽध्यायः।

आकृतिं लक्षयति।—जातिलिङ्गमित्याख्या। यथा जातेर्गोत्वादेर्हि सास्नादिसंस्थानविशेषो लिङ्गं तस्य च परम्परया द्रव्यवृत्तित्वम्। "जातिद्रव्यसमवायिकारणताऽवच्छेदिका लिङ्गं धर्मो यस्याः सेत्यर्थः" इति कश्चित् ॥ ७० ॥

जातिं लक्षयति।—समानाऽऽकारकः प्रसवो बुद्धिजननम् आत्मा स्वरूपं यस्याः सा तथा च समानाऽऽकारबुद्धिजननयोग्यत्वमर्थः। समानाऽऽकारबुद्धिजननयोग्यो धर्मविशेषो नित्यानेकसमवेतरूपोऽर्थ इत्यपि वदन्ति। इदन्तु बोध्यम् —एवं सत्याकृत्यविषयकाद् गवादिपदात् न शाब्दबोधः अनुभवबलेन तथैव कार्यकारणभावकल्पनात् अन्यथा लाघवाद्गोपदस्य गोत्वविशिष्टे शक्तिरेव स्यादिति ॥ ७१ ॥

समाप्तं शब्दशक्तिपरीक्षाप्रकरणम्।

द्वितीयाध्यायस्य द्वितीयमाह्निकम् ॥ २ ॥

इति श्रीविश्वनाथभट्टाचार्यकृता न्यायसूत्रवृत्तौ विभागपरीक्षाद्वारकसाङ्ग-प्रमाणपरीक्षणं नाम द्वितीयाध्यायवृत्तिः समाप्ता ॥ २ ॥

# तृतीयाध्यायस्य प्रथमाह्निकम् ।

---

परीक्षितानि प्रमाणानि, प्रमेयमिदानीं परीक्ष्यते तच्चा ऽऽत्मादि इत्यात्मा विविच्यते । किं देहेन्द्रियमनोबुद्धिवेदना सङ्घातमात्रमात्मा ? आहोस्वित्तद्व्यतिरिक्तः ? इति । कुत संशयः ?—व्यपदेशस्योभयथासिद्धेः । क्रियाकरणयोः कर्त्रा सम्बन्धस्याभिधानं व्यपदेशः । स द्विविधः,—अवयवेन समुदायस्य —मूलैर्वृक्षस्तिष्ठति स्तम्भैः प्रासादो ध्रियते इति । अन्येनान्यस्य व्यपदेशः —परशुना वृश्चति प्रदीपेन पश्यति । अस्ति चायं व्यपदेशः —चक्षुषा पश्यति मनसा विजानाति बुद्ध्या विचारयति शरीरेण सुखदुःखमनुभवतीति । तत्र नावधार्यते किमवयवेन समुदायस्य देहादिसङ्घातस्य ? अथान्येनान्यस्य तद्व्यतिरिक्तस्य वा ? इति । अन्येनायमन्यस्य व्यपदेशः । कस्मात् ? -

## दर्शनस्पर्शनाभ्यामेकार्थग्रहणात् ॥ १ ॥

दर्शनेन कश्चिदर्थो गृहीतः स्पर्शनेनापि सोऽर्थो गृह्यते यमहमद्राक्षं चक्षुषा तं स्पर्शनेनापि स्पृशामीति । यञ्चास्प्राक्षं स्पर्शनेन तं चक्षुषा पश्यामीति । एकविषयाविमौ प्रत्ययावेक कर्त्तृकौ प्रतिसन्धीयेते । न च सङ्घातकर्त्तृकौ नान्द्रियेणैक

तर्कप्रभातितुल्यतां भवति यत्कृपामन्तरा ।
यदीयकरुणाकणात्तरति मोहजालं जनः ।
विधाय हृदयाम्बुजे रुचिरवाक्प्रचाराय तां
नमामि परदेवतां सततमेव वाणीमहम् ॥

अथावसरतः प्रमेयेषु परीक्षणीयेषु प्रथमोद्दिष्टमात्मादिषट्कं तृतीये परीक्षणीयम् तेनाऽऽत्मादिषट्कपरीक्षाध्यायोऽयम् । तत्राऽऽत्मादिचतुष्कपरीक्षा प्रथमाऽऽह्निके ।

कर्त्तृकौ। तद्‌यौऽसौ चक्षुषा त्वगिन्द्रियेण चैकार्थस्य ग्रहीता भिन्ननिमित्तावनन्यकर्त्तृकौ प्रत्ययौ समानविषयौ प्रतिसन्दधाति सोऽर्थान्तरभूत आत्मा। कथं पुनरिन्द्रियैककर्त्तृकौ?—इन्द्रियं खलु स्व स्व विषयग्रहणमनन्यकर्त्तृकं प्रतिसन्धातुमर्हति नेन्द्रियान्तरस्य विषयान्तरग्रहणमिति। कथं न सङ्घातकर्त्तृकौ?— एकः खल्वयं भिन्ननिमित्तौ स्वाऽऽत्मकर्त्तृकौ प्रत्ययौ प्रतिसंहितौ वेदयते, न सङ्घातः कस्मात्?—अनिवृत्तं हि सङ्घाते प्रत्येकम् विषयान्तरग्रहणस्याप्रतिसन्धानमिन्द्रियान्तरेणेवेति ॥ १ ॥

## न विषयव्यवस्थानात् ॥ २ ॥

न देहादिसङ्घातादन्यश्चेतनः। कस्मात्?—विषयव्यवस्थानात्। व्यवस्थितविषयाणीन्द्रियाणि। चक्षुष्यसति रूपं न गृह्यते सति च गृह्यते। यच्च यस्मिन्नसति न भवति सति भवति तस्य तदिति विज्ञायते। तस्माद्रूपग्रहणं चक्षुषः चक्षू रूपं पश्यति। एवं घ्राणादिष्वपीति। तानीन्द्रियाणीमानि स्वस्वविषयग्रहणाच्चेतनानि इन्द्रियाणां भावाभावयोर्विषयग्रहणस्य तथाभावात्। एवं सति किमन्येन चेतनेन?—सन्दिग्धत्वादहेतुः। योऽयमिन्द्रियाणां भावाभावयोर्विषयग्रहणस्य तथाभावः, स किं चेतनत्वा

---

तत्र च त्रीणि प्रकरणानि। तत्राऽऽदाविन्द्रियभेदप्रकरणम्। तत्रेन्द्रियाणामेव चेतनत्वं सम्भवे करणत्वेन सिद्धानामिन्द्रियाणां चैतन्यमस्तु लाघवात् तथा चाऽऽत्मनोऽन्यस्य मानाऽभावः। इन्द्रियाणामभौतिकत्वाद्वा न साङ्ख्यमितीन्द्रियचैतन्यवादी। तन्निराकरणाय सूत्रम्।—एकस्यैव दर्शनस्पर्शनाभ्यामर्थस्य ग्रहणात् दर्शनस्पर्शनसमानविषयौ (तृतीया च प्रकारे)। तत्र चाक्षुषस्पार्शनोभयवत्त्वेनैकस्य धर्मिणः प्रतिसन्धानादित्यर्थः। तथा च योऽहं घटमद्राक्षं सोऽहं स्पृशामीत्यनुभवादात्मा इन्द्रियव्यतिरिक्त एक इति ॥ १ ॥

दाहोस्विच्चेतनोपकरणानां ग्रहणानामकर्तृत्वादिति सन्दिह्यते चेतनोपकरणत्वेऽपीन्द्रियाणां ग्रहणानामकर्तृत्वाद्भवितुमर्हति ॥२॥

यच्चोक्तं विषयव्यवस्थानादिति—

**तद्व्यवस्थानादेवाऽऽत्मसद्भावादप्रतिषेधः ॥३॥**

यदि खल्वेकमिन्द्रियमव्यवस्थितविषयं सर्वज्ञं सर्वविषयग्राहि चेतनं स्यात् कस्ततोऽन्यं चेतनमनुमातुं शक्नुयात्? यस्मात्तु व्यवस्थितविषयाणीन्द्रियाणि तस्मात्तेभ्योऽन्यश्चेतनः सर्वज्ञः सर्वविषयग्राही विषयव्यवस्थितिमतीतोऽनुमीयते। तत्रेदमभिज्ञानमप्रत्याख्येयं चेतनवृत्तमुदाह्रियते रूपदर्शी खल्वयं रसं गन्धं वा पूर्वगृहीतमनुमिनोति गन्धप्रतिसंवेदी च रूपरसावनुमिनोति। एवं विषयशेषेऽपि वाच्यम्। रूपं दृष्ट्वा गन्धं जिघ्रति घ्रात्वा च गन्धं रूपं पश्यति तदेवमनियतपर्यायं सर्वविषयग्रहणमेकचेतनाधिकरणमनन्यकर्तृकं प्रतिसन्धत्ते प्रत्यक्षानुमानाऽऽगमसंशयान् प्रत्ययांश्च नानाविषयान् स्वाऽऽत्मकर्तृकान् प्रतिसन्धाय वेदयते सर्वार्थविषयञ्च शास्त्रं प्रतिपद्यते अर्थमविषयभूतं श्रोत्रस्य क्रमभाविनो वर्णान् श्रुत्वा पदवाक्यभावं प्रतिसन्धाय शब्दार्थव्यवस्थाञ्च बुध्यमानोऽनेकविषयमर्थजातमग्रहणीयमेकैकेनेन्द्रियेण गृह्णाति सेयं सर्वज्ञस्य ज्ञेयाव्यवस्थाऽनुपदं न शक्या परिक्रमितुम्। आकृति

अत्र शङ्कते।—चक्षुस्त्वगादीनां रूपस्पर्शादिनियतविषयत्वाच्च रादिग्राहिणां समवायित्वम् इत्यत्राभिप्रायो भाति इति भावः ॥२॥

समाधत्ते।—उक्तप्रतिषेधो न युक्तः उक्तविषयव्यवस्थानादेवाऽऽत्मसद्भावात्। अतिरिक्तात्मकल्पनाग्रन्थस्यायं भावः —इन्द्रियाणां तत्तद्विषयकप्रत्यक्षं प्रति समवायित्वं वाच्यं न तु प्रत्यक्षत्वावच्छिन्नं प्रति अनात्मत्वादजनकत्वं तु विभिन्नात्मकाभावः तेन जन्यज्ञानत्वावच्छिन्नजनकताऽवच्छेदकमात्मत्वम् चक्षुरादेरनित्यत्वा

मात्मनस्तूपाहृतम् । तत्र यदीन्द्रियचैतन्ये सति किमन्येन चेतनेन ? तदयुक्तं भवति ॥ ३ ॥

इतश्च देहादिव्यतिरिक्त आत्मा न देहादिसङ्घातमात्रम् ।—

## शरीरदाहे पातकाभावात् ॥ ४ ॥

शरीरग्रहणेन शरीरेन्द्रियबुद्धिवेदनासङ्घातः प्राणिभूतो गृह्यते । प्राणिभूतं शरीरं दहतः प्राणिहिंसाकृतं पापं पातकमित्युच्यते । तस्याभावः, तत्फलेन कर्त्तुरसम्बन्धात् अकर्त्तुश्च सम्बन्धात् । शरीरेन्द्रियबुद्धिवेदनाप्रबन्धे खल्वन्यः सङ्घात उत्पद्यतेऽन्यो निरुध्यते उत्पादनिरोधसन्ततिभूतः प्रबन्धो नान्यत्वं बाधते देहादिसङ्घातस्यान्यत्वाधिष्ठानत्वात् अन्यत्वाधिष्ठानो ह्यसौ प्रख्यायत इति । एवं सति यो देहादिसङ्घातः प्राणिभूतां हिंसां करोति नासौ हिंसाफलेन सम्बध्यते, यश्च सम्बध्यते, न तेन हिंसा कृता । तदेवं सत्त्वभेदे कृतहानमकृताभ्यागमः प्रसज्यते सति च सत्त्वोत्पादे सत्त्वनिरोधे चाकर्म्मनिमित्तः सत्त्वसर्गः प्राप्नोति तत्र मुक्त्यर्थो ब्रह्मचर्य्यवासो न स्यात् । तद्यदि देहादिसङ्घातमात्रं स्यात् शरीरदाहे पातकं न भवेत्, अनिष्टञ्चैतत् तस्माद्देहादिसङ्घातव्यतिरिक्त आत्मा नित्य इति ॥ ४ ॥

दात्मनश्च नित्यताया वक्ष्यमाणत्वाच्च । ... नाप्यन्यस्मादपि कारणाच्चक्षुरेव ... प्रतीत नान्यथाऽऽत्मवादो युज्यत इति ॥ ३ ॥

समाप्तमिन्द्रियभेदप्रकरणम् ।

ननु गौरोऽहं जानामीत्यादि प्रतीतेरस्तु शरीरमात्मेत्याशङ्कां दूषयति ।— पातकाभावात् ... प्रसङ्गात् । तथा ... न स्यादिति ... । — ... तथा च शरीरनाशे ... शरीरं विनष्टं पातकं न स्यात् ... भूतचैतन्यवादिनां पातकादिकं नापद्यते तथाऽपि तस्य प्रसाध्यत्वात् ... पूर्वपक्षवादी ... ॥ ४ ॥

## तदभावः सात्मकप्रदाहेऽपि तन्नित्यत्वात् ॥ ५ ॥

यस्यापि नित्यनाऽऽत्मना सात्मकं शरीरं दह्यते, तस्यापि शरीरदाहे पातकं न भवद्दग्धुः कस्मात् ?—नित्यत्वादात्मनः न जातु कश्चिन्नित्यं हिंसितुमर्हति। अथ हिंस्यते, नित्यत्वमस्य न भवति। सेयमेकस्मिन पक्षे हिंसा निष्फला अन्यस्मिंस्त्वनुपपन्नेति ॥ ५ ॥

## न कार्य्याऽऽश्रयकर्त्तृवधात ॥ ६ ॥

न ब्रूमो नित्यस्य सत्त्वस्य वधो हिंसा अपि त्वनुच्छित्तिधर्मकस्य सत्त्वस्य कार्य्याऽऽश्रयस्य शरीरस्य स्वविषयोपलब्धेश्च कर्त्तृणामुपघातः पीडा वैकल्यलक्षणः प्रबन्धोच्छेदो वा प्रमापणलक्षणो वा वधो हिंसेति। कार्य्यन्तु सुखदुःखसंवेदनं तस्याऽऽयतनमधिष्ठानमाश्रयः शरीरम। कार्य्याऽऽश्रयस्य शरीरस्य स्वविषयोपलब्धेश्च कर्त्तृणामिन्द्रियाणां वधो हिंसा, न नित्यस्याऽऽत्मनः। तत्र यदुक्तं—तदभावः सात्मकप्रदाहेऽपि तन्नित्यत्वात इत्येतदयुक्तम। यस्य सत्त्वोच्छेदो हिंसा, तस्य कृतहानमकृताभ्यागमश्चेति दोषः। एतावच्चैतत स्यात। सत्त्वोच्छेदो वा हिंसा अनुच्छित्तिधर्मकस्य सत्त्वस्य कार्य्याऽऽश्रय

---

तत्रापि दूषणान्तरमाह इत्याशङ्कते।—तदभावः पातकाभावः सात्मकशरीरस्य प्रदाहेऽपि प्रसक्तः तन्नित्यत्वात तस्य आत्मनः नित्यत्वात नित्यत्वं निर्विकारत्वम् तेन जन्यधर्मानाश्रयत्वमाभमतम् इति चेत्। तन्नित्यत्वात शरीरनाशे शरीरविशिष्टाऽऽत्मनाशस्य नियतत्वात इत्यपि काश्चत। किञ्च सात्मकशरीरनाशेऽपि हन्तुः पातकाभावः स्यात तस्याऽऽत्मनो नित्यत्वेन तन्नाशकत्वाभावात् ॥ ५ ॥

परिहरति।—कार्य्याऽऽश्रयस्य चेष्टाऽऽश्रयस्य कर्त्तुः कृतिच्छेदकस्य शरीरस्यैव नाशः न त्वात्मनः इति न पातकाभावः। यद्वा—न हन्तुः पातकाभावः कार्य्याऽऽश्रयकर्त्तृवधात् शरीरस्य नाशात् ब्राह्मणत्वादेः शरीरवृत्तित्वात्तन्नाशादेव पापोत्पत्तिरिति

कर्तृवधो वा न कल्पान्तरमन्यदस्ति सत्त्वोच्छेदस्य प्रतिषेधे, तत्र किमन्यच्छक्यं यथाभूतमिति। अथवा कार्य्याऽऽश्रयकर्तृवधादिति कार्य्याऽऽश्रयो देहेन्द्रियबुद्धिसङ्घातो नित्यस्याऽऽत्मनः तत्र सुखदुःखप्रतिसंवेदनं तस्याधिष्ठानमाश्रयः तदायतनं तद्भवति न ततोऽन्यदिति स एव कर्त्ता तन्निमित्ता हि सुखदुःखसंवेदनस्य निर्वृत्तिः न तमन्तरेणेति, तस्य वध उपघातः पीडा प्रमापणं वा हिंसा, न नित्यत्वेनाऽऽत्मोच्छेदः। तत्र यदुक्तम्— तदभावः सात्मकप्रदाहेऽपि तन्नित्यत्वात् एतन्नेति ॥ ६ ॥

इतश्च देहादिव्यतिरिक्त आत्मा ।—

## सव्यदृष्टस्येतरेण प्रत्यभिज्ञानात् ॥ ७ ॥

पूर्वापरयोर्विज्ञानयोरेकविषये प्रतिसन्धिज्ञानं प्रत्यभिज्ञानं तमेवैतर्हि पश्यामि यमज्ञासिषं, स एवायमर्थ इति। सव्येन चक्षुषा दृष्टस्येतरेणापि चक्षुषा प्रत्यभिज्ञानात्, यमद्राक्षं तमेवैतर्हि पश्यामीति। इन्द्रियचैतन्ये तु नान्यदृष्टमन्यः प्रत्यभिजानातीति प्रत्यभिज्ञाऽनुपपत्तिः। अस्ति त्विदं प्रत्यभिज्ञानं तस्मादिन्द्रियव्यतिरिक्तश्चेतनः ॥ ७ ॥

भाव। वस्तुतस्तु अपूर्वशरीरावच्छिन्नप्राणसंयोगाऽऽत्मकोत्पत्तिवत् शरीरावच्छिन्नप्राणसंयोगध्वंसविशेषाऽऽत्मकं मरणमप्यात्मनः सम्भवात्। अन्यथा शरीराविनाशिनो बन्धनमुखानरोधादेर्हिंसात्वं न स्यात्। पातकानभ्युपगन्तृचार्वाकादिमते शरीरभेदसाधनन्तु वक्ष्यमाणयुक्तिभिरिति ध्येयम् ॥ ६ ॥

समाप्तं देहभेदप्रकरणम् ।

प्रसङ्गाच्चक्षुरद्वैतप्रकरणमारभते।—वामेन चक्षुषा दृष्टस्य दक्षिणेन चक्षुषा प्रत्यभिज्ञानात् स्थिरा ऽत्मा साधुरिति केषाञ्चिन्मतम् तन्निराकरणायैतदुपन्यासः ॥ ७ ॥

## नैकस्मिन्नासाऽस्थिव्यवहिते द्वित्वाभिमानात् ॥ ८ ॥

एकस्मिट चक्षु मध्ये नासाऽस्थिव्यवहितम, तस्यान्तौ गृह्यमाणौ द्वित्वाभिमान प्रयोजयत, मध्यव्यवहितस्य दीर्घ स्येव ॥ ८ ॥

## एकविनाशे द्वितीयाविनाशान्नैकत्वम् ॥ ९ ॥

एकस्मिन्नुपहते चोद्धृते वा चक्षुषि द्वितीयमवतिष्ठते चक्षु विषयग्रहणलिङ्गम। तस्मादेकस्य व्यवधानानुपपत्ति ॥ ९ ॥

## अवयवनाशेऽप्यवयव्युपलब्धेरहेतु ॥ १० ॥

एकविनाशे द्वितीयाविनाशादित्यहेतु, कस्मात्?—वृक्षस्य हि कासुचिच्छाखासु छिन्नासूपलभ्यत एव वृक्ष ॥ १० ॥

## दृष्टान्तविरोधादप्रतिषेध ॥ ११ ॥

न कारणद्रव्यस्य विभागे कार्य्यद्रव्यमवतिष्ठते नित्यत्व प्रसङ्गात। बहुष्ववयविषु यस्य कारणानि विभक्तानि तस्य विनाश। येषा कारणान्यविभक्तानि, तान्यवतिष्ठन्त। अथवा दृश्यमानार्थविरोधो दृष्टान्तविरोध मृतस्य हि शिर कपाले द्वाववटौ नासाऽस्थिव्यवहितौ चक्षुष स्थान भेदन गृह्यते न चैतदेकस्मिन्नासाऽस्थिव्यवहिते सम्भवति। अथवैकविनाशस्या

---

एतद्दूषयति।—मध्यस्थसेतुना तडागस्येव नासाऽस्थ्यव्यवहितगोलकान्तराव च्छिन्नतया द्वित्वप्रत्ययो भ्रम इत्यर्थ ॥ ८ ॥

समाधत्ते।—चक्षुरेक्य एकचक्षुर्नाशेऽन्धत्व स्यादिति भाव ॥ ९ ॥

अवैकदेशी परिहरति।—अवयवस्य शाखादे नाशेऽप्यवयविनो वृक्षस्य प्रत्यभि ज्ञानात्तावयवनाशे सर्वत्रावयविनाशनियम तथा चक्षुर्नाशेऽपि नान्धत्वमिति ॥ १० ॥

एकदेशिमतस्य पूर्वोक्ताऽऽक्षेपस्य च समाधानाय सिद्धान्तिन सूत्रम्—उक्तप्रतिषेधो न युक्त दृष्टान्तस्य विरोधादयुक्तत्वात्। न हि शाखाच्छेदे वृक्षस्तिष्ठति तथा सति वृक्षस्यानाशप्रसङ्गात अतोऽवस्थितावयवस्तत्र खण्डवृक्षो जातनैकदेशिमत युक्तम्।

नियमाद्वाविमावर्थौ तौ च पृथग्‌ावरणोपघातौ अनुमीयेते विभिन्नाविति अवपीडनाच्चैकस्य चक्षुषो रश्मिविषयसन्निकर्षस्य भेदात् दृश्यभेद इव गृह्यते तच्चैकत्वे विरुध्यते अवपीडननिवृत्तौ चाभिन्नप्रतिसन्धानमिति तस्मादेकस्य व्यवधानानुपपत्तिः ॥ ११ ॥

अनुमीयते चायं देहादिसङ्घातव्यतिरिक्तश्चेतन इति ।—

## इन्द्रियान्तरविकारात् ॥ १२ ॥

कस्यचिदम्लफलस्य गृहीततद्रससाहचर्ये रूपे गन्धे वा केनचिदिन्द्रियेण गृह्यमाणे रसनस्येन्द्रियान्तरस्य विकारः रसानुस्मृतौ रसगर्द्धिप्रवर्त्तितो दन्तोदकसंप्लवभूतो गृह्यते, तस्येन्द्रियचैतन्येऽनुपपत्तिः नान्यदृष्टमन्यः स्मरति ॥ १२ ॥

## न स्मृतेः स्मर्त्तव्यविषयत्वात् ॥ १३ ॥

स्मृतिर्नाम धर्मो निमित्तादुत्पद्यते तस्याः स्मर्त्तव्यो विषयः तत्कृत इन्द्रियान्तरविकारः, नाऽऽत्मकृत इति ॥ १३ ॥

एतेनैकनाशे द्वितीयाविनाशाद्भेदसाधनमपि प्रयुक्तम् चक्षुर्नाशेऽपि गोलकान्तरावच्छिन्नावयवस्य चक्षुषः सम्भवात्। इदञ्च लाघवाच्चक्षुरद्वैतमिति टीकास्वरससिद्धम्। परं तु — चक्षुर्द्वैतमेव सूत्रार्थं मन्यमाना व्याचक्षते सिद्धान्तिन एव —सव्यमिति। शङ्कते —नैकस्मिन्निति। समाधत्ते —एकेति। शङ्कते —अवयवेति। निराकरोति —दृष्टान्तेति। शाखानाशे वृक्षनाशाऽऽवश्यकत्वात् दृष्टान्तो न युक्तः यद्वा —दृष्टान्तस्य गोलकभेदस्य विरोधादन्यथाऽनुपपन्नत्वात् दृष्टे हि मृतस्य चक्षुरधिष्ठानगोलकद्वयं भेदेनैवोपलभ्यत इति वदन्ति ॥ ११ ॥

आत्मन इन्द्रियभेदे युक्त्यन्तरमाह।—चिरबिल्वादिद्रव्ये दृष्टे तद्रसस्मरणाद्दन्तोदकसंप्लवरूपरसनेन्द्रियविकारादिन्द्रियव्यतिरिक्त आत्मा सिध्यति ॥ १२ ॥

आक्षिपति।—स्मृतिर्हि स्मर्त्तव्यविषयिणीति नियमः तस्याश्च दर्शनादिना सामानाधिकरण्ये मानाभावात्। अस्तु वा विषयतयैव सामानाधिकरण्यमिति भावः ॥ १३ ॥

**तदात्मगुणसद्भावादप्रतिषेधः ॥ १४ ॥**

तस्या आत्मगुणत्वे सति सद्भावादप्रतिषेध आत्मनः यदि स्मृतिरात्मगुणः एवं सति स्मृतिरुपपद्यते नान्यदृष्टमन्यः स्मरतीति। इन्द्रियचैतन्ये तु नानाकर्तृकाणां विषयग्रहणानाम् अप्रतिसन्धानम् प्रतिसन्धाने वा विषयव्यवस्थाऽनुपपत्तिः। एकस्तु चेतनोऽनेकार्थदर्शी भिन्ननिमित्तः पूर्वदृष्टमर्थम् अनुस्मरतीति एकस्यानेकार्थदर्शिनो दर्शनप्रतिसन्धानात् स्मृतेरात्मगुणत्वे सति सद्भावः विपर्यये चानुपपत्तिः। स्मृत्याश्रयाः प्राणभृतां सर्वे व्यवहाराः आत्मलिङ्गम्। उदाहरणमात्रमिन्द्रियान्तरविकार इति। १४।

**अपरिसङ्ख्यानाच्च स्मृतिविषयस्य ॥ १५ ॥**

अपरिसङ्ख्याय च स्मृतिविषयमिदमुच्यते न स्मृतेः स्मर्त्तव्यविषयत्वादिति। येयं स्मृतिरगृह्यमाणेऽर्थे अज्ञासिषमहममुमर्थमिति एतस्या ज्ञातृज्ञानविशिष्टः पूर्वज्ञातोऽर्थो विषयः, नार्थमात्रम्। ज्ञातवानहममुमर्थम् असावर्थो मया ज्ञातः, अस्मिन्नर्थे मम ज्ञानमभूदिति चतुर्विधमेतद्वाक्यं स्मृतिविषयज्ञापकं समानार्थम्। सर्वत्र खलु ज्ञाता ज्ञानं ज्ञेयञ्च गृह्यते। अथ प्रत्यक्षेऽर्थे या स्मृतिः (ज) तया त्रीणि ज्ञानान्येकस्मिन्नर्थे प्रतिसन्धीयन्ते समानकर्त्तृकाणि न नानाकर्त्तृकाणि नाकर्त्तृकाणि किं तर्हि—एककर्त्तृकाणि। अद्राक्षममुमर्थं

समाधत्ते। [illegible] धर्मिग्राहकमानेन स्मृतेरात्मगुणत्वात्परिशेषादात्मगुणत्वसिद्धेः [illegible] गामीत्यनुभवात् विषयनिष्ठकार्यकारणभावे चैतस्य नानात्मत्वस्य सर्वथाऽनुपपत्तेरिति भावः ॥ १४ ॥

विषयाणां स्मृतज्ञानां स्मृतेरसर्वार्थत्वं स्यादित्याशङ्कां समाधत्ते।—अपरि

(ज) प्रत्यक्ष इति पाठः।

यमेवैतर्हि पश्यामि, अद्राक्षमिति दर्शनं, दर्शनसंवित्तिश्च न खल्वसंविदिते स्वे दर्शने स्यादेतददर्क्षमिति। ते खल्वेते द्वे ज्ञाने। यमेवैतर्हि पश्यामीति तृतीयं ज्ञानम्। एवमेकोऽर्थस्त्रिभिर्ज्ञानैर्युज्यमानो नाकर्तृको न नानाकर्तृकः किं तर्हि?—एककर्तृक इति। सोऽयं स्मार्तविषयाऽपारसङ्ख्यायमानो विद्यमान नानाऽप्रतिषिध्यते नास्त्यात्मा स्मृते स्मर्तव्यविषयत्वादिति। न चेत् स्मृतिमात्रं स्मर्तव्यमात्रविषयं वा इदं खलु ज्ञानप्रतिसन्धानवत् स्मृतिप्रतिसन्धानम् एकस्य सर्वविषयत्वात्। एकोऽयं ज्ञाता सर्वविषयः स्वानि ज्ञानानि प्रतिसन्धत्ते, अमुमर्थं ज्ञास्यामि अमुमर्थं विजानामि अमुमर्थमज्ञासिषम् अमुमर्थं जिज्ञासमानश्चिरमज्ञात्वाऽध्यवस्यत्यज्ञासिषमिति। एवं स्मृतिमपि त्रिकालविशिष्टां सुस्मूर्षाविशिष्टाञ्च प्रतिसन्धत्ते। संस्कारसन्ततिमात्रे तु सत्त्वे उत्पद्योत्पद्य संस्कारास्तिरोभवन्ति, स नास्त्य कोऽपि संस्कारः यस्त्रिकालविशिष्टं ज्ञानं स्मृतिञ्चानुभवेत् न चानुभवम् अन्तरेण ज्ञानस्य स्मृतेश्च प्रतिसन्धानमहं ममेति चोत्पद्यते देहान्तरवत्। अतोऽनुमीयते अस्त्येकः सर्वविषयः प्रतिदेहं स्वज्ञानप्रबन्धं स्मृतिप्रबन्धञ्च प्रतिसन्धत्ते इति। यस्य देहान्तरेषु वृत्तेरभावान्न प्रतिसन्धानं भवतीति ॥ १५ ॥

## नाऽऽत्मप्रतिपत्तिहेतूनां मनसि सम्भवात् ॥ १६ ॥

न देहादिसङ्घातव्यतिरिक्त आत्मा। कस्मात्?—आत्मप्रतिपत्तिहेतूनां मनसि सम्भवात्। दर्शनस्पर्शनाभ्यामेकार्थग्रहणादित्येवमादीनामात्मप्रतिपादकानां हेतूनां मनसि सम्भव

सङ्घातानात्मान्यात् तथा च लाघवादातिरिक्ताऽऽत्मसिद्धिः। इदं न सूत्रं किन्तु भाष्यमिति केचित् ॥ १५ ॥

इत्यात्म चक्षुरद्वैतप्रकरणम्।

यत मनो हि सर्वविषयमिति, तस्मान्न शरीरेन्द्रियमनोबुद्धि सङ्घातव्यतिरिक्त आत्मेति ॥ १६ ॥

**ज्ञातुर्ज्ञानसाधनोपपत्तेः संज्ञाभेदमात्रम् ॥ १७ ॥**

ज्ञातुः खलु ज्ञानसाधनान्युपपद्यन्ते चक्षुषा पश्यति घ्राणेन जिघ्रति स्पर्शनेन स्पृशति एवम्मन्तुः सर्वविषयस्य मतिसाधनम् अन्तःकरणभूतं सर्वविषयं विद्यते येनायं मन्यत इति। एवमति ज्ञातर्यात्मसंज्ञा [illegible] मनसि च मनःसंज्ञा [illegible] तदिदं संज्ञाभेदमात्रं [illegible] इति। [illegible] प्रत्याख्याने [illegible] प्रत्यक्षेण [illegible] ॥ १७ ॥

**नियमश्च निरनुमानः ॥ १८ ॥**

योऽयं नियम इष्यते रूपादिग्रहणसाधनान्यस्य सन्ति मतिसाधनं सर्वविषयं नास्तीति। अयं निरनुमानः नास्त्यनुमानमस्ति येन नियमं प्रतिपद्यामहे इति। रूपादिभ्यश्च विषयान्तरं सुखादयः तदुपलब्धौ करणान्तरसद्भावः। यथा चक्षुषा गन्धो न गृह्यत इति करणान्तरं घ्राणम् एवञ्चक्षु

नन्वस्मिन् [illegible]—[illegible] आत्मसाधक [illegible] ॥ १६ ॥

[illegible]—[illegible] मनसो [illegible] [illegible]दुपपादनाय करणान्तरमवश्य [illegible] तथा चक्षुरादिना [illegible] मन आत्माऽस्त्विति संज्ञा [illegible] किन्तु [illegible]पपादकत्वेन मनसो [illegible] आत्मनश्च प्रत्यक्षोपपादक[illegible] सत्त्वमिति भेद आवश्यक इति भाव ॥ १७ ॥

ननु रूपाद्युपलब्धिप्रत्यक्ष सकरणकमस्तु न तु सुखादिप्रत्यक्षम् एव परमाख्यन्तरस्याती

घ्राणाभ्यां रसो न गृह्यत इति करणान्तरं रसनम् एवं शेषेषु। तथा चक्षुरादिभिः सुखादयो न गृह्यन्त इति करणान्तरेण भवितव्यम्, तच्च ज्ञानायौगपद्यलिङ्गम्। यच्च सुखाद्युपलब्धौ करणं तच्च ज्ञानायौगपद्यलिङ्गम्, तस्येन्द्रियमिन्द्रियं प्रति सन्निधेरसन्निधेर्न युगपज्ज्ञानान्युत्पद्यन्ते। तत्र यदुक्तम् — आत्मप्रतिपत्तिहेतूनां मनसि सम्भवात् इति तदयुक्तम् ॥१८॥

किं पुनरयं देहादिसङ्घातादन्यो नित्य उतानित्य इति? कुतः संशयः?—उभयथा दृष्टत्वात् संशयः। विद्यमानमुभयथा भवति नित्यमनित्यञ्च। प्रतिपादिते चाऽऽत्मसद्भावे संशयानिवृत्तेरिति। आत्मसद्भावहेतुभिरेवास्य प्राग् देहभेदादवस्थानं सिद्धम्। ऊर्ध्वमपि देहभेदादवतिष्ठते। कुतः?—

**पूर्वाभ्यस्तस्मृत्यनुबन्धात् जातस्य हर्षभय-शोकसम्प्रतिपत्तेः ॥ १९ ॥**

जातः खल्वयं कुमारकोऽस्मिन् जन्मन्यगृहीतेषु हर्षभयशोकहेतुषु हर्षभयशोकान् प्रतिपद्यते लिङ्गानुमेयान्, ते च स्मृत्यनुबन्धादुत्पद्यन्ते नान्यथा, स्मृत्यनुबन्धश्च पूर्वाभ्यासमन्तरेण न भवति, पूर्वाभ्यासश्च पूर्वजन्मनि सति नान्यथा इति सिध्यत्येतत्—अवतिष्ठतेऽयमूर्ध्वं शरीरभेदादिति ॥१९॥

नित्यत्वेऽपि मनसः प्रत्यक्षं स्यादिवाऽऽह।—उक्तो नियमाविरोधो निरनुमानं निष्प्रमाणकं गौरवाद्विपरीतं च विनिगमकाभावाच्चेति भावः ॥ १८ ॥

समाप्तं मनोभेदप्रकरणम्।

एवं साधितेऽपि देहादिभिन्न आत्मनि विना तन्नित्यतां न परलोकार्थिनः प्रवृत्तिः अत आत्मनित्यताप्रतिपादनाय सूत्रम्।—जातस्य बालस्य एतज्जन्माननुभूते अपि हर्षाऽऽदिहेतुषु सत्सु हर्षाऽऽदीनां सम्प्रतिपत्तेः उत्पत्तिः तस्याः पूर्वपूर्वानुभवाधीनस्मृतिसम्बन्धादेव सम्भवात्। इत्थं चानादित्वेनास्याऽऽत्मनः पूर्वपूर्वसिद्धौ तस्यानादित्वम् अनादेश्च भावस्य न नाश इति नित्यत्वसिद्धिरिति भावः ॥ १९ ॥

पद्माऽऽदिषु प्रबोधसम्मीलनविकारवत्तद्विकारः ॥२०॥

यथा पद्माऽऽदिष्वनित्येषु प्रबोधसम्मीलनं विकारो भवति एवमानित्यस्याऽऽत्मनो हर्षभयशोकसम्प्रतिपत्तिर्विकारः स्यात्। हेत्वभावादयुक्तम्। अनेन हेतुना पद्माऽऽदिषु प्रबोधसम्मीलनविकारवदानित्यस्याऽऽत्मनो हर्षाऽऽदिसम्प्रतिपत्तिरिति। नात्रोदाहरणसाधर्म्यात् साध्यसाधनहेतुर्न वैधर्म्यादस्ति हेत्वभावात् असम्बद्धार्थकमपार्थकमुच्यत इति। दृष्टान्ताच्च हर्षाऽऽदिनिमित्तस्यानिवृत्तिः या चेयमासेवितेषु विषयेषु हर्षाऽऽदिसम्प्रतिपत्तिः स्मृत्यनुबन्धकृता प्रत्यात्मं गृह्यते सेयं पद्माऽऽदिसम्मीलनदृष्टान्तेन न निवर्त्तते यथा चेयं न निवर्त्तते तथा जातस्यापीति। क्रियाजातौ च पर्णविभागसंयोगौ प्रबोधसम्मीलने क्रियाहेतुश्चानुमेयः। एवञ्च सति किं दृष्टान्तेन प्रतिषिध्यते ॥ २० ॥

अथ निर्निमित्तः पद्माऽऽदिषु प्रबोधसम्मीलनविकार इति मतम् एवमात्मनोऽपि हर्षाऽऽदिसम्प्रतिपत्तिरिति तच्च —

नोष्णशीतवर्षाकालनिमित्तत्वात् पञ्चाऽऽत्मकविकाराणाम् ॥ २१ ॥

उष्णादिषु सत्सु भावात् असत्सु अभावात् तन्निमित्ताः पञ्चभूतानुग्रहेण निर्वृत्तानां पद्माऽऽदीनां प्रबोधसम्मीलनविकाराः, इति न निर्निमित्ताः। एवं हर्षाऽऽदयो विकारा निमित्ताद्भवितुमर्हन्ति, न निमित्तमन्तरेण, न चान्यत्

चेव प्रवृत्ते।—बालस्य हर्षाऽऽदयो मुखविकासाद्यनुमेयाः न च तस्मात्वपद्माऽऽदीनां प्रबोधादिवददृष्टविशेषाधीनक्रियावशादेव तदुपपत्तेरिति भावः ॥ २ ॥

सिद्धान्तसूत्रम्।—उक्तं न युक्तं यतः पञ्चाऽऽत्मकानां पाञ्चभौतिकानां पद्माऽऽदीनां

पूर्वाभ्यस्तस्मृत्यनुबन्धात निमित्तमस्तीति। न चोत्पत्ति निरोधकारणानुमानमात्मनो दृष्टान्तात् न हर्षाऽऽदीना निमित्तमन्तरेणात्पत्ति नाणादेर्वान्निमित्तान्तरोपादान हर्षाऽऽदीना, तस्मादयुक्तमेतत् ॥ २१ ॥

इतश्च नित्य आत्मा —

## प्रेत्याऽऽहाराभ्यासकृतात् स्तन्याभिलाषात् ॥ २२ ॥

जातमात्रस्य वत्सस्य प्रवृत्तिलिङ्ग स्तन्याभिलाषो गृह्यत स च नान्तरेणाऽऽहाराभ्यासम्। कया युक्त्या ?—दृश्यत हि शरीरिणा क्षुधापीड्यमानानामाहाराभ्यासकृतात स्मरणान् बन्धादाहाराभिलाष न च पूर्वशरीरमन्तरेणासौ जातमात्रस्योपपद्यत, तेनानुमीयते भूतपूर्वं शरीर यत्रानेनाऽऽहारोऽभ्यस्त इति। स खल्वयमात्मा पूर्वशरीरात् प्रेत्य शरीरान्तरमापन्न क्षुत्पीडित पूर्वाभ्यस्तमाहारमनुस्मरन् स्तन्यमभिलषति तस्मान्न देहभेदादात्मा भिद्यते, भवत्येवोर्द्ध्व देहभेदादिति ॥ २२ ॥

## अयसोऽयस्कान्ताभिगमनवत् तदुपसर्पणम् ॥ २३ ॥

यथा खलु अय अभ्यासमन्तरेणायस्कान्तमुपसर्पति, एवम आहाराभ्यासमन्तरेण बाल स्तन्यमभिलषति ॥ २३ ॥

ये विकारा तेषाम् उष्णकालाऽऽदिनिमित्तत्वात्। मनुष्याऽऽदीनान्तु हर्षाऽऽदिनिमित्त मुखविकासादय इति न तुल्यतेति भाव ॥ २१ ॥

आत्मनित्यत्व हेत्वन्तरमाह।—प्रेत्य मृत्वा जातमात्रस्य य स्तन्याभिलाष स तावदाहाराभ्यासजनित जन्मान्तरीणाऽऽहारेष्टसाधनताधीजन्यजीवनादृष्टाहाधित संस्काराधीनेष्टसाधनतास्मरणेन हि बाल स्तन्यपाने प्रवर्त्तत इत्यनादित्वमिति ॥ २२ ॥

शङ्कते।—यथाऽयस्कान्तसन्निहितस्यायसोऽयस्कान्ताभिमुखतया गमन तथैव बालस्यापि स्तनोपसर्पणम्, न त्विष्टसाधनताज्ञानाधीनप्रवृत्तिजन्यचेष्टयेत्यर्थ ॥ २३ ॥

किमिदमयसोऽयस्कान्ताभिसर्पणं निर्निमित्तम् ? अथ निमित्तात् ? इति । निर्निमित्तं तावत्—

**नान्यत्र प्रवृत्त्यभावात् ॥ २४ ॥**

यदि निर्निमित्तं लोष्टाऽऽदयोऽप्ययस्कान्तमुपसर्पेयुः न जातु नियमे कारणमस्तीति । अथ निमित्तात्, तत्केनोपलभ्यते ? इति । क्रियालिङ्गं क्रियाहेतुः क्रियानियमलिङ्गश्च क्रियाहेतुनियमः, तेनान्यत्र प्रवृत्त्यभावः । बालस्यापि नियतमुपसर्पणं क्रियोपलभ्यते । न च स्तन्याभिलाषलिङ्गमन्यदाहाराभ्यासकृतात् स्मरणानुबन्धात् निमित्तं दृष्टान्तेनोपपाद्यते न चासति निमित्ते कस्यचिदुत्पत्तिः न च दृष्टान्तो दृष्टमभिलाषहेतुं बाधते तस्मादयसोऽयस्कान्ताभिगमनमदृष्टान्त इति । अयसः खल्वपि नान्यत्र प्रवृत्तिर्भवति न जात्वयो लोष्टमुपसर्पति किं कृतोऽस्य नियम इति, यदि कारणनियमात् स च क्रियानियमलिङ्गः । एवं बालस्यापि नियतविषयोऽभिलाषः कारणनियमाद्भवितुमर्हति तच्च कारणमभ्यस्तस्मरणम् अन्यद्वेति दृष्टेन विशिष्यते दृष्टो हि शरीरिणामभ्यस्तस्मरणादाहाराभिलाष इति ॥ २४ ॥

इतश्च नित्य आत्मा । कस्मात् ?—

**वीतरागजन्मादर्शनात् ॥ २५ ॥**

सरागो जायत इत्यर्थादापद्यते । अयं जायमानो रागानुबद्धो जायते । रागस्य पूर्वानुभूतविषयानुचिन्तनं योनिः, पूर्वानु

---

समाधत्ते ।—स्तन्यपान एव बालः प्रवर्त्तते न त्वन्यत्रात नियमः कथं स्यात् दस्तुतस्तु अन्यत्र क्वचित् प्रवृत्त्यभावात् प्रवृत्तिश्च चेष्टाऽनुमता लिङ्गं न तु क्रिया न चम् अतो न व्यभिचार इति भावः ॥ २४ ॥

हेत्वन्तरमाह ।—वीतरागो रागशून्यस्तावन्नोत्पद्यते, अपि तु सरागः, तत्र च

...वश्च विषयाणामन्यस्मिन् जन्मनि शरीरमन्तरेण नोपपद्यते। सोऽयमात्मा पूर्वशरीरानुभूतान् विषयाननुस्मरन् तेषु तेषु रज्यते, तथा चायं द्वयोर्जन्मनोः प्रतिसन्धिः। एवं पूर्वशरीरस्य पूर्वतरेण पूर्वतरस्य पूर्वतमेनेत्यादिनाऽनादिश्चेतनस्य शरीरयोगः, अनादिश्च रागानुबन्ध, इति सिद्धं नित्यत्वमिति ॥ २५ ॥

कथं पुनर्ज्ञायते पूर्वविषयानुचिन्तनजनितो जातस्य रागो न पुनः —

**सगुणद्रव्योत्पत्तिवत् तदुत्पत्तिः ॥ २६ ॥**

यथोत्पत्तिधर्मकस्य द्रव्यस्य गुणाः कारणत उत्पद्यन्ते तथोत्पत्तिधर्मकस्याऽऽत्मनो रागः कुतश्चिदुत्पद्यते। अत्रायमुदितानुवादो निदर्शनार्थः ॥ २६ ॥

**न सङ्कल्पनिमित्तत्वाद्रागादीनाम् ॥ २७ ॥**

न खलु सगुणद्रव्योत्पत्तिवदुत्पत्तिरात्मनो रागस्य च। कस्मात्?—सङ्कल्पनिमित्तत्वाद्रागादीनाम्। अयं खलु प्राणिनां विषयानासेवमानानां सङ्कल्पजनितो रागो गृह्यते। सङ्कल्पश्च पूर्वानुभूतविषयानुचिन्तनयोनिः। तेनानुमीयते—जातस्यापि पूर्वानुभूतार्थचिन्तनकृतो राग इति। आत्मोत्पादाधिकरणात्तु रागोत्पत्तिर्भवन्ती सङ्कल्पादन्यस्मिन् रागकारणे सति वाच्या कार्यद्रव्यगुणवत्। न चाऽऽत्मोत्पादः सिद्धो नापि सङ्कल्पादन्यद्रागकारणमस्ति, तस्मादयुक्तं सगुणद्रव्योत्पत्तिवत्तदुत्पत्तिरिति।

---

जन्मान्तरीयेष्टसाधनताज्ञानाधीनस्मर[ण]। इत्युपरात पूर्व ...याभिलाष उक्त सन्मात् तु पतगाऽऽदीनां ...णादिभक्षणाभिलाषसाधारण्य रागमात्रमित्यपि ...कृतम् ॥ २५ ॥

शङ्कते।—द्रव्यस्य घटादेः यथा ...स्य रूपादिविशिष्टस्य उत्पत्ति ... घटादि स्वत एव रूपादिमान् भवति तथैवाऽऽत्माऽपि स्वत एव सरागो भवतु ... प्रयोजकत्वं त्वदीयहेतूनामिति भाव ॥ २६ ॥

समाधत्ते।—सङ्कल्पो ज्ञानम् इष्टसाधनताज्ञानम् इति यावत् तन्निमित्तका हि

रिति। अथापि मङ्कल्पादन्यद्रागकारण धर्माधर्मलक्षणमदृष्ट मुपादीयते तथाऽपि पूर्वशरीरयोगोऽप्रत्याख्येय । तत्र हि तस्य निर्वृत्ति नास्मिन जन्मनि, तन्मयत्वाद्राग इति। विषया भ्यास खल्वय भावनाहेतु तन्मयत्वमुच्यत इति। जातिविशे षाच्च रागविशेष इति। कर्म खल्विद जातिविशेषनिर्वर्त्तकम तादर्थ्यात्ताच्छब्द्य विज्ञायते, तस्मादनुपपन्न सङ्कल्पादन्य द्रागकारणमिति ॥ २७ ॥

'अनादिश्चेतनस्य शरीरयोग' इत्युक्तम्। स्वकृतकर्मनिमित्त चास्य शरीर सुखदुःखाधिष्ठानम, तत् परीक्ष्यते,—कि घ्राणादिवदेकप्रकृतिकम? उत नानाप्रकृति? इति। कुत सशय?—विप्रतिपत्ते सशय, पृथिव्यादीनि भूतानि सङ्ख्या विकल्पेन शरीरप्रकृतिरिति प्रतिजानत इति। कि तत्र तत्त्वम?—

पार्थिव गुणान्तरोपलब्धे ॥ २८ ॥

तत्र मानुष शरीर पार्थिवम्। कस्मात्?—गुणान्तरोपलब्धे। गन्धवती पृथिवी गन्धवच्छरीरम, अबादीनामगन्धवत्त्वात् तत्प्रकृत्यगन्ध स्यात्, न त्विदमबादिभिरसम्पृक्तया पृथिव्याऽऽरब्ध चेष्टेन्द्रियार्थाऽऽश्रयभावेन कल्पते इत्यत पञ्चाना भूताना सयोगे सति शरीर भवति, भूतसयोगो हि मिथ पञ्चाना न निषिद्ध इति। आप्यतैजसवायव्यानि लोकान्तरे शरीराणि, तेष्वपि भूतसयोग पुरुषार्थतन्त्र इति। स्थाल्यादिद्रव्यनिष्पत्तावपि नि सशया नाबादिसयोगमन्तरेण निष्पत्तिरिति। * पार्थिवा ऽऽप्यतैजस तद्गुणोपलब्धे। * *निश्वासोच्छासोपलब्धेश्चातुर्भौतिक

रागादय तथा चेष्टसाधनताज्ञानत्वेनेच्छात्वादिना कार्य्यकारणभावात प्रवृत्तित्वेन चेष्टात्वेन च कार्य्यकारणभावान्नाप्रयोजकत्वमिति भाव ॥ २७ ॥

समाप्तमनादिनिधनप्रकरणम्।

क्रमप्र प्ते शरीरपरीक्षणे मानुषाऽऽदिशरीरं पाञ्चभौतिकमित्यक्तं। तत्र सिद्धान्त

कम। * * गन्धक्लेदपाकव्यूहावकाशदानेभ्य पाञ्चभौतिकम।*
त इमे सन्दिग्धा हेतव इत्युपेक्षितवान सूत्रकार। कथ
सन्दिग्धा ?—सति च प्रकृतिभावे भूताना धर्मोपलब्धि असति
च सयोगाप्रतिषेधात् सन्निहितानामिति, यथा स्थाल्यामुदक
तेजोवाय्वाकाशानामिति। तदिदमनेकभूतप्रकृतिशरीरम् (भ)
अगन्धमरसमरूपमस्पर्शञ्च प्रकृत्यनुविधानात स्यात, न त्विद
मित्थम्भूत तस्मात् पार्थिव गुणान्तरोपलब्धे ॥ २८ ॥

## पार्थिवाऽऽप्यतैजस तद्गुणोपलब्धे ॥ २८ ॥ क ॥

## निश्वासोच्छ्वासोपलब्धेश्चातुर्भौतिकम् ॥ २८ ॥ ख ॥

## गन्धक्लेदपाकव्यूहावकाशदानेभ्य पाञ्चभौतिकम् ॥ २८ ॥ ग ॥

---

सूत्रम्।—मानुषाऽऽदिशरीर पार्थिव पृथिवीसमवायिकारणक गुणान्तरस्य गन्ध
नीलाऽऽदिरूपकाठिन्यादे उपलब्धिरिति ॥ २८ ॥

मतान्तराभिधानाय त्रिसूत्री।—तद्गुणाना पृथिव्यप्तेजोगुणानां गन्धस्नेहोष्ण
स्पर्शानाम् उपलब्धे। एतावता त्रिभौतिकत्वे सिद्धे निश्वासादतश्चातुर्भौतिकत्वम्।
निश्वासोच्छ्वासौ प्राणवायोर्व्यापारविशेषौ। क्लेदो जलावशेष जलविशिष्टपृथिवी वा
इत्युभयथाऽपि जलमावश्यकम्। भुक्ताशादजठरानले पाकस्य तत्र सयोगाधीनत्वात्तेज
सिद्धि। व्यूहो निश्वासादि। अवकाशदान छिद्रम्। एतानि मतानि सूत्रकृता
तुच्छत्वान्न दूषितानि। तथा हि एकस्मिन् शरीरे पृथिवीत्वादिनानाजात सङ्करा
ऽऽपत्तेरसम्भवात् न वा नानापादानकत्व विजातीयानामनारम्भकत्वात् तथात्व वा
जलाद्यारब्धस्य न पृथिवीत्वं व्यभिचारात् न वा चित्रद्रव्य गन्धवत्त्वविरोधात
गन्धादीनामानाशमनपायाच्च पार्थिवत्वमित्यक्षप्रायम् यद्वा पार्थिवत्व कथ जलाद
सम्बन्ध ? इत्याशङ्कायां जलादिनिमित्तवशाच्चैभौतिकत्वादिव्यपदेश इत्याशयेन
त्रिसूत्री ॥ २८ ॥ क ॥ ख ॥ ग ॥

इति वृत्तिसम्मतानि अधिकसूत्राणि।

(भ) भूताना परस्परोपमर्दकत्वेनेति यावत्।

**श्रुतिप्रामाण्याच्च ॥ २९ ॥** ८

सूर्य्यन्ते चक्षुर्गच्छतात” इत्यत्र मन्त्रे “पृथिवीन्ते शरीरम” इति श्रयत तदिद प्रकृतौ विकारस्य प्रलयाभिधानमिति। “सूर्य्य ते चक्षु स्मणोमि’ इत्यत्र मन्त्रान्तर पृथिवीन्ते शरीरम इति श्रूयते, सेय कारणाद्विकारस्य सृतिरभिधीयत इति। स्थाल्यादिषु च तुल्यजातीयानामेककार्य्याऽऽरम्भदर्शनात भिन्नजातीयानामेककार्य्याऽऽरम्भानुपपत्ति ॥ २९ ॥

अथेदानीमिन्द्रियाणि प्रमेयक्रमेण विचार्य्यन्ते किमाव्यक्तिकानि? आहोस्विद्भौतिकानि? इति। कुत सशय?—

**कृष्णसारे सत्युपलम्भाद्व्यतिरिच्य चोपलम्भात सशय ॥ ३० ॥**

कृष्णसार भौतिक तस्मिन्ननुपहते रूपोपलब्धि, उपहते चानुपलब्धिरिति। व्यतिरिच्य कृष्णसारमवस्थितस्य विषयस्योपालम्भ, न कृष्णसारप्राप्तस्य न चाप्राप्यकारित्वमिन्द्रि

पार्थिवत्व युक्त्यन्तरमाह।— सूर्य्यन्त चक्षु स्मणोमि इति मन्त्रान्त पृथिवी ते शरीरम् इत्याभधानात् एव प्रकृतौ विकारस्य लयाभिधाने सूर्य्यन्त चक्षुर्गच्छतात इति मन्त्रान्ते पृथिवीं ते शरीरम् इति। इमा चत् मूत्री कचन भाष्यतया वर्णयन्ति तन्न तथा सत्येकसूत्रस्य प्रकरणत्वानुपपत्ते अत एव चतुथ मतमवेत्यपरे। अन्ये सूत्रद्वयानुपपत्त्या “भाष्यत जमवायव्यानि लोकान्तरशरीराणि तष्वपि भूतसयोग पुरुषार्थतन्त्र इति भाष्य सूत्रतया वर्णयन्ति तदर्थम्—भाष्य दीनि लोकान्तरेषु वरुणलोकादिषु प्रसिद्धानि शरीराणि। जलादिरूपत्वे कथमुपभोगक्षमता? इत्यत तष्वपीति।—भूतसयोग पार्थिव्युपष्टम्भ पुरुषार्थतन्त्र उपभोगसम्पादक ॥ २९ ॥

समाप्त शरीरपरीक्षाप्रकरणम्।

अथेन्द्रिय परीक्षणीयम्। तत्र लक्षणसूत्रोक्त भौतिकत्वमिन्द्रियाणां परीक्षित प्रथमाह।—कृष्णसारे चक्षुर्गोलके सति घटाद्युपलम्भाद्गोलकस्यान्द्रियत्वमिति बौद्धा। व्यतिरिच्य विषय प्राप्य उपलम्भात् उपलम्भजननात् गोलकातिरिक्तमीत्यपरे। तत्र

याणाम, तदिदमभौतिकत्वे विभुत्वात् सम्भवति। एवमुभयधर्मोपलब्धेः संशयः ॥ ३० ॥

अभौतिकानि इत्याह। कस्मात्?—

**महदणुग्रहणात् ॥ ३१ ॥**

महदिति महत्तरं महत्तमं चोपलभ्यते यथा,—न्यग्रोधपर्वतादि। अणीयोऽणीयस्तरमणुतमञ्च गृह्यते, यथा—न्यग्रोधधानादि। तदुभयमुपलभ्यमानं चक्षुषो भौतिकत्वं बाधते भौतिकं हि यावत् तावदेव व्याप्नोति अभौतिकन्तु विभुत्वात् सर्वव्यापकमिति ॥ ३१ ॥

न महदणुग्रहणमात्रादभौतिकत्वं विभुत्वञ्चेन्द्रियाणां शक्यं प्रतिपत्तुम्। इदं खलु—

**रश्म्यर्थसन्निकर्षविशेषात् तद्ग्रहणम् ॥ ३२ ॥**

तयोर्महदण्वोर्ग्रहणं चक्षूरश्मेरर्थस्य च सन्निकर्षविशेषाद् भवति, यथा—प्रदीपरश्मेरर्थस्य चेति। रश्म्यर्थसन्निकर्षश्चाऽऽवरणलिङ्गः चाक्षुषो हि रश्मिः कुड्यादिभिरावृतमर्थं न प्रकाशयति यथा—प्रदीपरश्मिरिति ॥ ३२ ॥

---

इन्द्रियाणि गोलकातिरिक्तानि न वेति संशयः। गोलकातिरिक्तानीति नैयायिकादयः। तत्राप्यभौतिकान्याहङ्कारिकाणीति साङ्ख्याः भौतिकानीत्यपरे। ३० ॥

तत्र साङ्ख्यमतेन बौद्धमतमुपन्यस्याह।—गोलकं नाम यम् अप्राप्यकारित्वेऽपि प्रसङ्गात् इदमत्र गोलकातिरिक्तं भौतिकमिति वाच्यम् इदमप्यसङ्गतम्। चक्षुषा हि न्यूनपरिमाणा महत्परिमाणाश्च गृह्यन्ते। न च न्यूनेन महतो व्याप्तिः सम्भवति न च व्याप्यैव ग्रहणम् अतोऽभौतिकानीन्द्रियाण्याहङ्कारिकाणीति ॥ ३१ ॥

सिद्धान्तयति।—रश्मिगोलकाद्बहिर्निर्गत्य तमर्थं घटादिं यः सन्निकर्षविशेषः संयोगविशेषः तस्मात् तयोर्महदण्वोर्ग्रहणमुपपद्यते भौतिकस्यापि प्रदीपादेर्महदणुप्रकाशकत्वं दृष्टम् अभौतिकत्वे तु परपक्षाभिमतानां सर्वेषामेव ग्रहणं स्यात् ॥ ३२ ॥

आवरणानुमेयत्वे सतीदमाह,—

**तदनुपलब्धेरहेतु ॥ ३३ ॥**

रूपस्पर्शवद्धि तेज, महत्त्वादनेकद्रव्यवत्त्वाद्रूपवत्त्वाच्चोप लब्धिरिति । प्रदीपवत् प्रत्यक्षत उपलभ्येत, चक्षुषो रश्मिर्यदि स्यादिति ॥ ३३ ॥

**नानुमीयमानस्य प्रत्यक्षतोऽनुपलब्धिर-भावहेतु ॥ ३४ ॥**

सन्निकर्षप्रतिषेधार्थनाऽऽवरणेन लिङ्गेनानुमीयमानस्य रश्मेर्या प्रत्यक्षतोऽनुपलब्धि नासावभाव प्रतिपादयति, यथा—चन्द्रमस परभागस्य, पृथिव्याश्चाधोभागस्य ॥ ३४ ॥

**द्रव्यगुणधर्मभेदाच्चोपलब्धिनियम ॥ ३५ ॥**

भिन्न खल्वय द्रव्यधर्मो गुणधर्मश्च महदनेकद्रव्यवच्च विभ क्तावयवमाप्य द्रव्य प्रत्यक्षतो नोपलभ्यते स्पर्शस्तु शीतो गृह्यते, तस्य द्रव्यस्यानुबन्धात् हेमन्तशिशिरौ कल्प्येते । तथाविध मेव च तैजस द्रव्यमनुद्भूतरूप सह रूपेण नोपलभ्यते स्पर्श स्त्वस्योष्ण उपलभ्यते, तस्य द्रव्यस्यानुबन्धात ग्रीष्मवसन्तौ कल्प्येते ॥ ३५ ॥

तैजसे चक्षुष्यनुपलब्धिबाध चोद्य प्रहृते ।—रश्म्यर्थसन्निकर्षो न हि तु गोलकाति रिक्तस्य रश्मेरनुपलब्धे ॥ ३३ ॥

समाधत्ते ।—रूपोपलब्ध्या सन्निकर्षत्वादिनाऽनुमीयमानस्य चक्षुष प्रत्यक्षतोऽनुप लब्धिर्नाभावनिर्णायिकेत्यर्थ ॥ ३४ ॥

कथ तर्हि नोपलभ्य ? इत्यत आह ।—द्रव्यस्य धर्मभेदो महत्त्वादि गुणस्य धर्म श्चोद्भूतत्व तदधीनत्वात् प्रत्यक्षस्य द्रव्यमात्र उपलब्धिर्न नियम, यतोऽनुद्भूतरूप महत्त्वादिमत् तस्य प्रत्यक्ष तदभावाच्चक्षुरादेरप्रत्यक्षम् ॥ ३५ ॥

यत्र त्वेषा भवति—

**अनेकद्रव्यसमवायाद्रूपविशेषाच्च रूपोपलब्धिः ॥३६॥**

यत्र रूपञ्च द्रव्यञ्च तदाश्रयः प्रत्यक्षत उपलभ्यते रूपविशेषस्तु, यद्भावात् क्वचिद्रूपोपलब्धिः यदभावाच्च द्रव्यस्य क्वचिदनुपलब्धिः, स रूपधर्मोऽयमुद्भवसमाख्यात इति । अनुद्भूतरूपश्चायं नायनो रश्मिः, तस्मात्प्रत्यक्षतो नोपलभ्यत इति । दृष्टश्च तेजसो धर्मभेदः । उद्भूतरूपस्पर्शं प्रत्यक्षं तेजः यथा,—आदित्यरश्मयः । उद्भूतरूपमनुद्भूतस्पर्शञ्च प्रत्यक्षम् यथा—प्रदीपरश्मयः । उद्भूतस्पर्शमनुद्भूतरूपमप्रत्यक्षम् , यथा—अबादिसंयुक्तं तेजः । अनुद्भूतरूपस्पर्शोऽप्रत्यक्षः—चाक्षुषो रश्मिरिति ॥ ३६ ॥

**कर्मकारितश्चेन्द्रियाणां व्यूहः पुरुषार्थतन्त्रः ॥३७॥**

यथा चेतनस्यार्थो विषयोपलब्धिभूतः सुखदुःखोपलब्धिभूतश्च कल्प्यते तथेन्द्रियाणि व्यूढानि । विषयप्राप्त्यर्थश्च रश्मेश्चाक्षुषस्य व्यूहः, रूपस्पर्शानभिव्यक्तिश्च व्यवहारप्रक्लृप्त्यर्था, द्रव्यविशेषे च प्रतीघातादावरणोपपत्तिर्व्यवहारार्था सर्वद्रव्याणां विश्वरूपो व्यूहः इन्द्रियवत्कर्मकारितः पुरुषार्थतन्त्रः । कर्म तु धर्माधर्मभूतं चेतनस्योपभोगार्थमिति ॥ ३७ ॥

**अव्यभिचाराच्च प्रतीघातो भौतिकधर्मः ॥ ३८ ॥**

यश्चाऽऽवरणोपलम्भादिन्द्रियस्य द्रव्यविशेषे प्रतीघातः, स भौतिकधर्मो न भूतानि व्यभिचरति, नाभौतिकं प्रतिघातधर्मकं दृष्टमिति । अप्रतिघातस्तु व्यभिचारी, भौतिकाभौति

चक्षुरादावुद्भूतरूपमेव न कुत ? इत्याशङ्काया भाष्यम् ।—अदृष्टविशेषाधीनमिन्द्रियाणां व्यूहो रचनाविशेष उपभोगसाधनमिति । सूत्रमेवेदमिति कश्चित् ॥ ३७ ॥

कयो समानत्वादिति। यदपि मन्यते प्रतिघाताद्भौतिकानी-न्द्रियाणि अप्रतिघातादभौतिकानीति प्राप्तम, दृष्टश्चाप्रतिघात काचाभ्रपटलस्फटिकान्तरितोपलब्धे, तन्न युक्तम, कस्मात?—यस्माद्भौतिकमपि न प्रतिहन्यते काचाभ्रपटलस्फटिकान्तरितप्रकाशात् प्रदीपरश्मीनाम्, स्थाल्यादिषु पाचकस्य तेजसोऽप्रतिघात ॥ ३८ ॥

उपपद्यते चानुपलब्धि कारणभेदात्।—

**मध्यन्दिनोल्काप्रकाशानुपलब्धिवत्तदनुपलब्धि ॥ ३९ ॥**

यथाऽनकद्रव्येण समवायाद्रूपविशेषाच्चोपलब्धिरिति, सत्युपलब्धिकारणे मध्यन्दिनोल्काप्रकाशो नोपलभ्यत आदित्यप्रकाशेनाभिभूत, एव महदनेकद्रव्यवत्त्वाद्रूपविशेषाच्चोपलब्धिरिति। सत्युपलब्धिकारणे चाक्षुषो रश्मिर्नोपलभ्यत निमित्तान्तरत, तच्च व्याख्यातम् अनुद्भूतरूपस्पर्शद्रव्यस्य प्रत्यक्षतोऽनुपलब्धिरिति। अत्यन्तानुपलब्धिश्चाभावकारणम ॥ ३९ ॥

यो हि ब्रवीत लोष्टप्रकाशो मध्यन्दिने आदित्यप्रकाशाभिभवान्नोपलभ्यत इति, तस्यैतत् स्यात्,—

**न रात्रावप्यनुपलब्धे ॥ ४० ॥**

अप्यनुमानतोऽनुपलब्धिरिति। एवमत्यन्तानुपलब्धेर्लोष्टप्रकाशो नास्ति, न त्वेव चक्षुषो रश्मिरिति ॥ ४० ॥

---

महता रूपवताऽनुपलब्ध्या दृष्टान्तमाह।—महता रूपवतश्चोल्काप्रकाशस्य सौराऽऽलोकेनाभिभवान्मध्यन्दिनेऽनुपलब्धिवदनुद्भूतरूपवत्त्वाच्चक्षुषोऽप्यनुपलब्धि सम्भवतीति भाव ॥ ३९ ॥

नन्वेवं घटादेरपि रश्मि स्यात् सौराऽऽलोकेनाभिभवात् पुनरयह इत्यत आह।—अतोऽस्य घटादौ रश्मिरिति भ्रम ॥ ४१ ॥

उपपन्नरूपा चेयम ।—

**वाह्यप्रकाशानुग्रहाद्विषयोपलब्धेरनभिव्यक्तितोऽनुपलब्धि ॥ ४१ ॥**

वाह्येन प्रकाशेनानुगृहीत चक्षुर्विषयग्राहक तदभावेऽनुपलब्धि सति च प्रकाशानुग्रहे शीतस्पर्शोपलब्धौ च सत्या तदाश्रयस्य द्रव्यस्य चक्षुषाऽग्रहण रूपस्यानुद्भूतत्वात सेय रूपानभिव्यक्तितो रूपाऽऽश्रयस्य द्रव्यस्यानुपलब्धिर्दृष्टा, तत्र यदुक्त —"तदनुपलब्धेरहेतु" इत्येतदयुक्तम ॥ ४१ ॥

कस्मात् पुनरभिभवाऽनुपलब्धिकारण चाक्षुषस्य रश्मे नोच्यते ? इति ।—

**अभिव्यक्तौ चाभिभवात् ॥ ४२ ॥**

वाह्यप्रकाशानुग्रहनिरपेक्षतायाञ्चेति चार्थ । यद्रूपमभिव्यक्तमुद्भूत वाह्यप्रकाशानुग्रहञ्च नापेक्षते, तद्विषयोऽभिभव, विपर्य्ययेऽभिभवाभावात् अनुद्भूतरूपत्वाच्चानुपलभ्यमान वाह्यप्रकाशानुग्रहाच्चोपलभ्यमान नाभिभूयत इति । एवमुपपन्नम् अस्ति चाक्षुषो रश्मिरिति ॥ ४२ ॥

---

नन्वनुद्भूतरूपवत्त्वाच्चक्षुषोऽनुपलब्धि न त्वभिभवादित्यत्र किं विनिगमकम् ? इति तटस्थाऽऽशङ्कायामाह ।——अनभिव्यक्ततोऽनुद्भूतरूपवत्त्वात् चक्षुषोऽनुपलब्धि । कुत ?—वाह्यप्रकाशानुग्रहात् सौराऽऽलोकादिसाहित्यात् विषयोपलम्भ तस्योद्भूत रूपवत्त्वे वाह्यप्रकाशापेक्षा न स्यात् अभिभूतत्वे च तत्साहित्येनापि प्रत्यक्षजनन न स्यात अभिभूतस्य कार्य्याक्षमत्वादिति भाव ॥ ४१ ॥

ननु चक्षुषो नाभिभव किन्तु तद्रूपस्य तस्य च प्रत्यक्षजनकत्वे मानाभाव । किञ्चाभिभवात् तस्य न प्रत्यक्षम् इतरप्रत्यक्षजनने च विरोधाभाव इत्याशङ्कायामाह ।—रूपस्य अभिव्यक्तौ प्रत्यक्षे उद्भूतत्व इति यावत् उद्भूतरूपस्य प्रत्यक्षाभावे ह्यभिभवकल्पना । न त्वेवं प्रकृते सुवर्णादिवत् सर्वदाऽभिभावकद्रव्यान्तरकल्पने च गौरवमिति भाव ॥ ४२ ॥

**नक्तञ्चरनयनरश्मिदर्शनाच्च ॥ ४३ ॥**

दृश्यन्ते हि नक्तं नयनरश्मयो नक्तञ्चराणां वृषदंशप्रभृतीनां, तेन शेषस्यानुमानमिति। जातिभेदवदिन्द्रियभेद इति चेत धर्ममात्र चानुपपन्नम। आवरणस्य प्राप्तिप्रतिषेधार्थस्य दर्शनादिति ॥४३॥

इन्द्रियार्थसन्निकर्षस्य ज्ञानकारणत्वानुपपत्ति। कस्मात्?—

**अप्राप्यग्रहणं काचाभ्रपटलस्फटिकान्तरितोपलब्धे ॥ ४४ ॥**

तृणादिसर्पद्द्रव्यं काचेऽभ्रपटले वा प्रतिहतं दृष्टम अव्यवहितेन सन्निकृष्यते व्यवहन्यते वै प्राप्तिर्व्यवधानेनेति। यदि च रश्म्यर्थसन्निकर्षो ग्रहणहेतुः स्यात्, न व्यवहितस्य सन्निकर्ष इत्यग्रहणं स्यात्। अस्ति चेयं काचाभ्रपटलस्फटिकान्तरितोपलब्धिः सा ज्ञापयत्यप्राप्यकारीणि इन्द्रियाणि, अत एवाभौतिकानि, प्राप्यकारित्वं हि भौतिकधर्म इति ॥ ४४ ॥

**न कुड्यान्तरितानुपलब्धेरप्रतिषेध ॥ ४५ ॥**

अप्राप्यकारित्वे सतीन्द्रियाणां कुड्यान्तरितस्यानुपलब्धिर्न स्यात ॥ ४५ ॥

---

चक्षुषि प्रमाणान्तरमाह।—नक्तञ्चराणां वृषदंशाऽऽदीनां गोलके रश्मिदर्शनात् तद्दृष्टान्तेन परेषामपि रश्म्यनुमानमिति भाव अन्यथा तमसि तस्य प्रत्यक्षं न स्यादिति हृदयम् ॥ ४३ ॥

अप्राप्यकारित्वं चक्षुष स्यादित्याशङ्कते ॥ ४४ ॥

समाधत्त।—परे तु उक्तसूत्रस्य पूर्वपक्षपरत्वं मन्यमानस्य भाष्यकारस्यावतरणिका अप्राप्यग्रहणमिति वस्तुत सिद्धान्तसूत्रमेव। तत्प्रदीपदृष्टान्तेन काचाद्यन्तरितप्रकाशकत्वेन तैजसत्वं सिध्यतीति। नन्वप्राप्यकारित्वं किं न स्यात्? अताऽऽह कुड्यति।—उक्तस्य तैजसत्वस्य प्रतिषेधी गोलकाऽऽत्मकत्वं न सम्भवति कुड्यान्तरितस्यानुपलब्धेरित्याह ॥ ४५ ॥

प्राप्यकारित्वेऽपि तु काचाभ्रपटलस्फटिकान्तरितोप लब्धिर्न स्यात।—

**अप्रतिघातात् सन्निकर्षोपपत्तिः ॥ ४६ ॥**

न च काचोऽभ्रपटलं वा नयनरश्मिं विष्टभ्नाति सोऽप्रति हन्यमानः सन्निकृष्यत इति ॥ ४६ ॥

यश्च मन्यते न भौतिकस्याप्रतीघात इति, तन्न —

**आदित्यरश्मेः स्फटिकान्तरेऽपि दाह्येऽवि-घातात ॥ ४७ ॥**

आदित्यरश्मेरविघातात, स्फटिकान्तरितेऽप्यविघातात दाह्येऽविघातात। अविघातादिति च पदाभिसम्बन्धभेदाद्वाक्य भेद इति। यथा वाक्यञ्चार्थभेद इति। प्रतिवाक्य वाक्यार्थभेद। आदित्यरश्मिः कुम्भादिषु न प्रतिहन्यते, अविघातात कुम्भस्थ मुदकं तपति प्राप्तौ हि द्रव्यान्तरगुणस्य उष्णस्पर्शस्य ग्रहणं तेन च शीतस्पर्शाभिभव इति। स्फटिकान्तरितेऽपि प्रकाशनीये प्रदीपरश्मीनामप्रतिघात, अप्रतिघातात् प्राप्तस्य ग्रहणमिति। भर्जनकपालादिस्थञ्च द्रव्यमाग्नेयेन तेजसा दह्यते तत्राविघातात प्राप्तिः प्राप्तौ तु दाह, नाप्राप्यकारि तेज इति। अविघातादिति च केवलं पदमुपादीयते। कोऽयमविघातो नाम ? अव्यूह्यमानावयवेन व्यवधायकेन द्रव्येण सर्वतो द्रव्य स्याविष्टम्भः क्रियाहेतोरप्रतिबन्धः प्राप्तरप्रतिषेध इति। दृष्टं हि कलशनिषक्तानामपां वहिः शीतस्पर्शस्य ग्रहणम्, न च

---

ननु कुड्यान्तरित इव काचान्तरितेऽपि सन्निकर्षो न सम्भवतीति कथं प्राप्य कारित्वम् इत्याशङ्कायामाह।— काचादिना स्वच्छद्रव्यणाप्रतिघातादप्रतिबन्धात सन्निकर्ष उपपद्यत इति भाव ॥ ४६ ॥

इन्द्रियेणासान्निकृष्टस्य द्रव्यस्य सन्निकर्षोपलब्धि, दृष्टौ च प्रत्यन्द परिसर्पौ तत्र काचाभ्रपटलादिभिनयनरश्मेरप्रतिघाताद्विभ याथेन सत्र सान्निकर्षादुपपद्म ग्रहणमिति ॥ ४७ ॥

नेतरेतरधर्मप्रसङ्गात् ॥ ४८ ॥

काचाभ्रपटलादिवद्वा कुड्यादिभिरप्रतिघात, कुड्यादिवद्वा काचाभ्रपटलादिभि प्रतिघात, इति नियमे कारण वाच्यमिति ॥ ४८ ॥

आदर्शोदकयो प्रसादस्वाभाव्याद्रूपोपलब्धिवत् तदुपलब्धि ॥ ४९ ॥

आदर्शोदकयो प्रसादो रूपविशेष स्वो धर्मो नियमदर्शनात प्रसादस्य वा स्वो धर्मो रूपोपलम्भनम यथाऽऽदर्शप्रतिहतस्य परावृत्तस्य नयनरश्मे स्वेन मुखेन सन्निकर्षे सति स्वमुखोपलम्भन प्रतिबिम्बग्रहणाख्यमादर्शरूपानुग्रहात् तन्निमित्त भवति आदर्शरूपोपघात तदभावात् कुड्यादिषु च प्रतिबिम्बग्रहण न भवति एव काचाभ्रपटलादिभिरविघातश्चक्षूरश्मे कुड्यादिभिश्च प्रतिघाता द्रव्यस्वभावनियमादिति ॥४९॥

---

तत्र दृष्टान्तमाह।—दाख्य रात वस्तुमात्रोपलक्षणम् परे तु दाख्ये कपालादौ वक्र्यादेराविघातपर तदित्याहु ॥ ४७

आक्षिपति।—अप्रतिघातो न युक्त इतरस्य स्फाटकाद इतरस्य कुड्यादे यो धम प्रतिघातकत्व तत्प्रसङ्गात् स्फाटकादिकमपि कुड्यादिवत्प्रतिबन्धक भवेदित्यथ ॥ ४८ ॥

समाधत्ते।—आदर्शे उदके च प्रसादस्वाभाव्यात् स्वच्छस्वभावत्वात् मुखादिरूपोपलब्धि न तु भित्त्यादौ एव स्फटिकाद्यन्तरितस्योपलब्धि न तु कुड्याद्यन्तरितस्येति स्वाभाव्यान्न दोष । एतेन वह्न्यादेर्घटादिनाऽप्रतिघातवच्चक्षुषोऽपि प्रतिघातो न स्यादिति प्रत्युक्तम् वह्न्याद्यप्रतिबन्धेऽपि दीपाऽऽलोकादे प्रतिबन्धदर्शनादिति भाव ॥ ४९ ॥

**दृष्टानुमितानां नियोगप्रतिषेधानुपपत्तिः ॥ ५० ॥**

प्रमाणस्य तत्त्वविषयत्वात् न खलु भो ! परीक्षमाणेन दृष्टानुमिता अर्थाः शक्या नियोक्तुमेवं भवतेति नापि प्रतिषेद्धुमेवं मा भवतेति। न हीदमुपपद्यते रूपवद्गन्धोऽपि चाक्षुषो भवत्विति, गन्धवद्वा रूपमचाक्षुषं मा भूदिति। अग्निप्रतिपत्तिवद्धूमेनोदकप्रतिपत्तिरपि भवत्विति, उदकाप्रतिपत्तिवद्वा धूमेनाग्निप्रतिपत्तिरपि मा भूदिति। किं कारणम्?—यथा खल्वर्था भवन्ति य एषां स्वो भावः स्वो धर्म इति तथाभूताः प्रमाणेन प्रतिपद्यन्त इति तथाभूतविषयकं हि प्रमाणमिति। इमौ खलु नियोगप्रतिषेधौ भवताऽऽदेशितौ काचाभ्रपटलादिवद्वा कुड्याऽऽदिभिरप्रतिघातो भवतु कुड्याऽऽदिवद्वा काचाभ्रपटलादिभिरप्रतिघातो मा भूदिति। न दृष्टानुमिताः खल्विमे द्रव्यधर्माः, प्रतिघाताप्रतिघातयोरुपलब्ध्यनुपलब्धी व्यवस्थापिके, व्यवहितानुपलब्ध्याऽनुमीयते कुड्यादिभिः प्रतिघातः व्यवहितोपलब्ध्याऽनुमीयते काचाभ्रपटलादिभिरप्रतिघात इति ॥ ५० ॥

अथापि खल्वेकमिदमिन्द्रियम्? बहूनीन्द्रियाणि वा? कुतः संशयः?—

**स्थानान्यत्वे नानात्वादवयविनानास्थानत्वाच्च संशयः ॥ ५१ ॥**

बहूनि द्रव्याणि नानास्थानानि दृश्यन्ते, नानास्थानश्च

---

चक्षुषस्तादृशत्वकल्पने किं मानम्? इत्यत आह।—हि यस्मात् दृष्टानामनुमितानां वा पदार्थानां दृष्टानुमितानामिति बोध्यं तेषामेवं भवतेति नियोग एवं मा भवतेति प्रतिषेधो वा नोपपद्यते युक्त्यनुसारिणी हि कल्पनेति भावः ॥ ५ ॥

समाप्तमिन्द्रियपरीक्षाप्रकरणम्।

इन्द्रियाणामेकत्वादिकमिन्द्रियनानात्वं युज्यते इत्यपोह्यतेन्द्रियनानात्व

मनेकोऽवयवी चेति। तेनन्द्रियेषु भिन्नस्थानेषु संशय इति ॥ ५१ ॥

एकमिन्द्रियम् —

**त्वगव्यतिरेकात ॥ ५२ ॥**

त्वगेकमिन्द्रियमित्याह। कस्मात?—अव्यतिरेकात्। न त्वचा किञ्चिदिन्द्रियाधिष्ठान न प्राप्तम। न चासत्या त्वचि किञ्चिद्विषयग्रहण भवति। यथा सर्वन्द्रियस्थानानि व्याप्तानि, यस्याञ्च सत्या विषयग्रहण भवति सा त्वगकमिन्द्रियमिति॥५२॥

**नेन्द्रियान्तरार्थानुपलब्धे ॥ ५३ ॥**

स्पर्शोपलब्धिलक्षणाया सत्या त्वचि गृह्यमाणे त्वगिन्द्रियेण स्पर्श इन्द्रियान्तरार्था रूपाऽऽदयो न गृह्यन्ते अन्धादिभि न स्पर्शग्राहकादिन्द्रियान्तरमस्तीति स्पर्शवदन्धादिभिगृह्येरन रूपादय, न च गृह्यन्ते तस्मान्नैकमिन्द्रिय त्वगिति ॥ ५३ ॥

**त्वगवयवविशेषेण धूमोपलब्धिवत्तदुपलब्धि ॥५४॥**

यथा त्वचोऽवयवविशेष कश्चिच्चक्षुषि सन्निकृष्टो धूमस्पर्श गृह्णाति नान्य, एव त्वचाऽवयवविशेषो रूपादिग्राहक तेषामुपघातादन्धादिभिर्न गृह्यन्ते रूपादय इति ॥ ५४ ॥

**व्याहतत्वादहेतु ॥ ५५ ॥**

त्वगव्यतिरेकादेकमिन्द्रियमित्युक्त्वा त्वगवयवविशेषेण धूमोपलब्धिवद्रूपोपलब्धिरित्युच्यते, एवञ्च सति नानाभूतानि

---

परीक्षणीयम् तत्र संशयमाह।—स्थानान्यत्वे स्थानभेदे घटपटाऽऽदीनां नानात्वदर्श नान्नानाऽवयवस्थितस्यावयविन एकत्वदर्शनाच्च इन्द्रियाणां नानात्वमेकत्व वा इति संशय ॥ ५१ ॥

पूर्वपक्षसूत्रम्।—सर्वेष्विन्द्रियप्रदेशेष्वव्यतिरेकात् अस्त्वात्, त्वगेवैकमिन्द्रिय मस्तु ॥ ५२ ॥

विषयग्राहकाणि विषयव्यवस्थानात् तद्भावे विषयग्रहणस्य भावात तदुपघाते चाभावात, तथा च पूर्वो वाद उत्तरेण वादेन व्याहन्यत इति। सन्दिग्धश्चाव्यतिरेक। पृथिव्यादिभिरपि भूतैरिन्द्रियाधिष्ठानानि व्याप्तानि, न च तेष्वसत्सु विषयग्रहणं भवतीति। तस्मान्न त्वगन्यद्वा सर्वविषयकमेकमिन्द्रियमिति ॥ ५५ ॥

## न युगपदर्थानुपलब्धेः ॥ ५६ ॥

आत्मा मनसा सम्बध्यते, मन इन्द्रियेण, इन्द्रिय सर्वार्थसन्निकृष्टमिति, आत्मेन्द्रियमनोऽर्थसन्निकर्षेभ्यो युगपद्ग्रहणानि स्युः, न च युगपद्रूपाऽऽदयो गृह्यन्ते, तस्मान्नैकमिन्द्रिय सर्वविषयमस्तीति। असाहचर्य्याच्च विषयग्रहणाना नैकमिन्द्रिय सर्वविषयक साहचर्य्ये हि विषयग्रहणानामन्धाद्यनुपपत्तिरिति ॥ ५६ ॥

## विप्रतिषेधाच्च न त्वगेका ॥ ५७ ॥

न खलु त्वगेकमिन्द्रिय, व्याघातात्, त्वचा रूपाण्यप्राप्तानि गृह्यन्त इति। अप्राप्यकारित्वे स्पर्शाऽऽदिष्वप्येव प्रसङ्ग। स्पर्शादीनाञ्च प्राप्ताना ग्रहणाद्रूपादीनामप्राप्तानामग्रहणमिति प्राप्तम्। * प्राप्याप्राप्यकारित्वमिति चेत् आवरणानुपपत्तेर्विषयमात्रस्य ग्रहणम * अथापि मन्येत प्राप्ता स्पर्शाऽऽदयस्त्वचा गृह्यन्ते, रूपाणि त्वप्राप्तानीति। एव सति नास्त्यावरणम आवरणानुपपत्तेश्च रूपमात्रस्य ग्रहणं व्यवहितस्य चाव्यवहितस्य चेति। * दूरान्तिकानुविधानञ्च रूपोपलब्ध्यनुपलब्ध्योर्न

---

उत्तरयति।—युगपत् एकदा अर्थानां गन्धरूपाऽऽदीनाम् अनुपलब्धेन त्वगेवैकमिन्द्रियम् अन्यथा तस्य व्यापकत्वाच्चाक्षुषादिकाले घ्राणजाऽऽदिकमपि स्यादिति भाव ॥ ५६ ॥

स्यात * अप्राप्त त्वचा गृह्यते रूपमिति दूरे रूपस्याग्रहणम् सन्तिके च ग्रहणमित्येतन्न स्यादिति ॥ ५७ ॥

एकत्वप्रतिषेधाच्च नानात्वसिद्धौ स्थापनाहेतुरप्युपादीयते,—

**इन्द्रियार्थपञ्चत्वात् ॥ ५८ ॥**

अर्थ प्रयोजनम, तत् पञ्चविधमिन्द्रियाणा। स्पर्शनेनेन्द्रियेण स्पर्शग्रहणे सति न तेनैव रूप गृह्यते इति रूपग्रहण प्रयोजन चक्षुरनुमीयते। स्पर्शरूपग्रहणे च ताभ्यामेव गन्धो न गृह्यते, इति गन्धग्रहणप्रयोजन घ्राणमनुमीयत। त्रयाणा ग्रहणे न तैरेव रसो गृह्यते इति रसग्रहणप्रयोजन रसनमनुमीयते। न चतुर्णा ग्रहणे तैरेव शब्द श्रूयते, इति शब्दग्रहण प्रयोजन श्रोत्रमनुमीयते। एवमिन्द्रियप्रयोजनस्यानितरेतर साधनसाध्यत्वात् पञ्चैवेन्द्रियाणि ॥ ५८ ॥

**न तदर्थबहुत्वात् ॥ ५९ ॥**

न खल्विन्द्रियार्थपञ्चत्वात् पञ्चेन्द्रियाणीति सिध्यति। कस्मात्?—तेषामर्थाना बहुत्वात् बहव खल्विमे इन्द्रियार्था स्पर्शास्तावच्छीतोष्णानुष्णशीता इति, रूपाणि शुक्लहरिता दीनि, गन्धा इष्टानिष्टोपेक्षणीया, रसा कटुकादय, शब्दा वर्णाऽऽत्मानो ध्वनिमात्राश्च भिन्ना, तद्यस्येन्द्रियार्थपञ्चत्वात्पञ्चेन्द्रियाणि, तस्येन्द्रियार्थबहुत्वाद्बहूनीन्द्रियाणि प्रसज्यन्त इति ॥ ५९ ॥

---

इन्द्रियाणा नानात्वे कारणान्तरमाह।—इन्द्रियार्थानामिन्द्रियग्राह्याणां रूपाऽऽदीनां पञ्चत्वात् पञ्चविधत्वात् रूपाऽऽदीनां हि चक्षुराद्येकैकेन्द्रियमात्रग्राह्यत्वादेवचक्षु तत्रैकेन्द्रियपक्षे न सम्भवति गन्धाऽऽदीना रूपाद्युपलब्धिप्रसङ्गश्चेति भाव ॥५८॥

शङ्कते।—इन्द्रियार्थाना नीलपीताऽऽदीनां बहुत्वादिन्द्रियाणा बहुत्वप्रसङ्गा दिन्द्रियार्थपञ्चत्वादिन्द्रियभेदो न युक्त ॥ ५९ ॥

**गन्धत्वाद्यव्यतिरेकात् गन्धाऽऽदीनामप्रतिषेधः ॥६०॥**

गन्धत्वादिभिः स्वसामान्यैः कृतव्यवस्थानां गन्धाऽऽदीनां यानि गन्धाऽऽदिग्रहणानि, तान्यसमानसाधनसाध्यत्वाद्ग्राहकान्तराणि प्रयोजयन्ति। अर्थसमूहोऽनुमानमुक्तं, नार्थैकदेशः, अर्थैकदेशञ्चाऽऽश्रित्य विषयपञ्चत्वमात्रं भवान् प्रतिषेधति, तस्मादयुक्तोऽयं प्रतिषेध इति। कथं पुनर्गन्धत्वादिभिः स्वसामान्यैः कृतव्यवस्था गन्धादयः ? इति।—स्पर्शः खल्वयं त्रिविधः, शीत उष्णोऽनुष्णाशीतश्च स्पर्शत्वेन स्वसामान्येन सङ्गृहीतः गृह्यमाणे च शीतस्पर्शे नोष्णस्यानुष्णाशीतस्य वा ग्रहणं ग्राहकान्तरं प्रयोजयति, स्पर्शभेदानामेकसाधनसाध्यत्वात्, येनैव शीतस्पर्शो गृह्यते तेनैवेतरावपीति। एवं गन्धत्वेन गन्धानां रूपत्वेन रूपाणां रसत्वेन रसानां, शब्दत्वेन शब्दानामिति। गन्धादिग्रहणानि पुनरसमानसाधनसाध्यत्वात् ग्राहकान्तराणां प्रयोजकानि, तस्मादुपपन्नमिन्द्रियार्थपञ्चत्वात् पञ्चेन्द्रियाणीति ॥ ६० ॥

यदि सामान्यं सङ्ग्राहकं, प्राप्तमिन्द्रियाणाम्—

**विषयत्वाव्यतिरेकादेकत्वम् ॥ ६१ ॥**

विषयत्वेन हि सामान्येन गन्धादयः सङ्गृहीता इति ॥ ६१ ॥

समाधत्ते।—न प्रतिषेधो न गन्धाऽऽदीनां सौरभाऽऽदीनां गन्धत्वाद्यव्यतिरेकात् गन्धत्वाऽऽदिमत्त्वात्　तथा च गुणविभाजकगन्धत्वावच्छिन्नग्राहकत्वमभिप्रेतं न त्ववान्तरधर्मावच्छिन्नग्राहकत्वमिति भावः ॥ ६ ॥

यदि गन्धत्वाऽऽदिना सुरभ्यादीनामैक्यं तदा विषयत्वेन गन्धरसाऽऽदीनामप्यैक्यादिन्द्रियैक्यं स्यादिति शङ्कते।—विषयत्वाव्यतिरेकात् विषयत्वेनैक्यात् ॥ ६१ ॥

## न बुद्धिलक्षणाधिष्ठान-गत्याकृति-जातिपञ्चत्वेभ्य ॥ ६२ ॥

न खलु विषयत्वेन सामान्येन कृतव्यवस्था विषया ग्राहकान्तरनिरपेक्षा एकसाधनग्राह्या अनुमीयन्त अनुमीयन्ते च पञ्च गन्धाऽऽदयो गन्धत्वादिभि स्वसामान्यै कृत व्यवस्था इन्द्रियान्तरग्राह्या तस्मादसम्बद्धमेतत। अयमेव चार्थोऽनूद्यते बुद्धिलक्षणपञ्चत्वादिति।—बुद्धय एव लक्षणानि विषयग्रहणलिङ्गत्वादिन्द्रियाणाम तदेतदिन्द्रियार्थपञ्चत्वादित्येतस्मिन सूत्रे कृतभाष्यमिति। तस्माद्बुद्धिलक्षणपञ्चत्वात पञ्चेन्द्रियाणि। अधिष्ठानान्यपि खलु पञ्च इन्द्रियाणाम, सर्वशरीराधिष्ठान स्पर्शन स्पर्शग्रहणलिङ्गम, कृष्णसाराधिष्ठान चक्षुर्बहिर्नि सृत रूपग्रहणलिङ्गम, नासाऽधिष्ठानं घ्राणम, जिह्वाऽधिष्ठान रसनम कर्णच्छिद्राधिष्ठान श्रोत्रम, गन्धरसरूपस्पर्शशब्दग्रहणलिङ्गत्वादिति। गतिभेदादपीन्द्रियभेद, कृष्णसारोपनिबद्ध चक्षुर्बहिर्नि सृत्य रूपाधिकरणानि द्रव्याणि प्राप्नोति। स्पर्शनादीनि त्विन्द्रियाणि विषया एवाश्रयोपसर्पणात् प्रत्यासीदन्ति। सन्तानवृत्त्या शब्दस्य श्रोत्रप्रत्यासत्तिरिति। आकृति खलु परिमाणमियत्ता सा पञ्चधा,—स्वस्थानमात्राणि घ्राणरसनस्पर्शनानि विषयग्रहणेनानुमेयानि। चक्षु कृष्णसाराऽऽश्रय बहिर्नि सृत विषयव्यापि। श्रोत्र नान्यदाकाशात् तच्च विभु शब्दमात्रानुभवानुमेय पुरुषसंस्कारोपग्रहाच्चाधिष्ठाननियमेन

उत्तरयति।—इन्द्रियाणामैक्य न। हेतुमाह बुद्धीत्यादि।—बुद्धेश्चाक्षुषादि, श्रावण चाक्षुषत्वादि तत्पञ्चत्वेन तदवच्छिन्नकरणानां पञ्चत्वम् एवमधिष्ठान रूपादि विषय तत्पञ्चत्वात गति दूरादौ गमनम् इद चक्षुरधिकृत्य यथा—गत प्रकार तथा च प्रकाराणां पञ्चत्वात् चक्षुर्हि गत्वा गृह्णाति, त्वग्देशावच्छेदेन, श्रोत्रं

शब्दस्य व्यञ्जकमिति। जातिरिति योनिं प्रचक्षते, पञ्च खाल्वन्द्रिययोनय पृथिव्यादीनि भूतानि तस्मात् प्रकृति पञ्चत्वादपि पञ्चेन्द्रियाणीति सिद्धम ॥ ६२ ॥

कथ पुनर्ज्ञायते भूतप्रकृतीनीन्द्रियाणि, नाव्यक्तप्रकृतीनि ? इति।—

## भूतगुणविशेषोपलब्धेस्तादात्म्यम् ॥ ६३ ॥

दृष्टो हि वाय्वादीना भूताना गुणविशेषाभिव्यक्तिनियम वायु स्पर्शव्यञ्जक आपो रसव्यञ्जिका तेजो रूपव्यञ्जक पार्थिव किञ्चिद्द्रव्य कस्यचिद्द्रव्यस्य गन्धव्यञ्जकम। अस्ति चायमिन्द्रियाणा भूतगुणविशेषोपलब्धिनियम, तेन भूतगुण विशेषोपलब्धेर्मन्यामहे भूतप्रकृतीनीन्द्रियाणि नाव्यक्तप्रकृतीनीति ॥ ६३ ॥

गन्धादय पृथिव्यादिगुणा इत्युपदिष्टम उद्देशश्च पृथिव्यादीनामेकगुणत्व समान, इत्यत आह —

## गन्धरसरूपस्पर्शशब्दाना स्पर्शपर्यन्ता पृथिव्या अप्तेजोवायूना पूर्व पूर्वमपोह्याऽऽकाशस्योत्तर ॥ ६४ ॥

स्पर्शपर्यन्तानामिति विभक्तिविपरिणाम आकाशस्योत्तर शब्द स्पर्शपर्यन्तेभ्य इति। कथ तरप्निर्देश ?—स्वतन्त्रविनि

कर्णावच्छिन्नेन्धात्प्रकारभेदात आकृति गोलकाऽऽदीना सस्थानविशेष जाति पार्थिवत्वादि वहुता जाति धर्म तेन प्राप्तत्वसङ्ग ॥ ६२ ॥

घ्राणादि पार्थिवत्वान्सत्त्व मानमाह।—भूताना पृथिव्यादीना ये गुणविशेषा गन्धाऽऽदय तदुपलब्धकत्वा कुङ्कुमगन्धाभिव्यञ्जकघृत दिदृष्टान्तेन पार्थिवत्वादिसाधन मिति भाव ॥ ६३ ॥

समाप्तमिन्द्रियनानात्वप्रकरणम्।

क्रमप्राप्तार्थपरीक्षणाय सिद्धान्तसूत्रम्।—स्पर्शपर्यन्तेषु मध्ये पूर्व पूर्व त्यक्त्वा

योगसामर्थ्यात्, तेनोत्तरशब्दस्य परार्थाभिधानं विज्ञायते । उद्देशसूत्रे हि स्पर्शपर्य्यन्तेभ्यः परः शब्द इति । तन्त्रं वा स्पर्शस्य विवक्षितत्वात् स्पर्शपर्य्यन्तेषु नियुक्तेषु योऽन्यस्तदुत्तरः शब्द इति ॥ ६४ ॥

**न सर्वगुणानुपलब्धेः ॥ ६५ ॥**

नायं गुणानियोगः साधुः । कस्मात्?—यस्य भूतस्य ये गुणाः, न ते तदात्मकेनेन्द्रियेण सर्वे उपलभ्यन्ते पार्थिवेन हि घ्राणेन स्पर्शपर्य्यन्ता न गृह्यन्ते, गन्ध एवैको गृह्यते, एवं शेषेष्वपीति ॥ ६५ ॥

कथं तर्हीमे गुणा विनियोक्तव्या इति?—

**एकैकश्येनोत्तरोत्तरगुणसद्भावादुत्तरोत्तराणां तदनुपलब्धिः ॥ ६६ ॥**

गन्धाऽऽदीनामेकैको यथाक्रमं पृथिव्यादीनामेकैकस्य गुणः, अतस्तदनुपलब्धिः तेषां तयोस्तस्य चानुपलब्धिः घ्राणेन रसरूपस्पर्शानां, रसनेन रूपस्पर्शयोः, चक्षुषा स्पर्शस्येति ॥ ६६ ॥

अतश्चोत्तरोत्तरेषु गुणा ज्ञातव्याः उत्तरः शब्दः आकाशस्य गुणः तथा च स्पर्शान्ताः पृथिव्याः रसरूपस्पर्शाः जलस्य रूपस्पर्शौ तेजसः स्पर्शो वायोः शब्द आकाशस्य ॥६४॥

वाचस्पतिः ।—उक्तो गुणनियमो न युक्तः पृथिव्यादिगुणानामभिमतानां स्वं स्वं प्राणाऽऽदिग्राह्यत्वाभावात् पार्थिवत्वादिकम् घ्राणेन पृथिव्या रसादि-ग्रहणात् बहिरिन्द्रियाणां स्वप्रकृतिगतात्मयोग्यावच्छिन्नविशेषगुणग्राहकत्वनियमो भज्यतेति भावः ॥ ६५ ॥

इत्थं च पृथिव्यादावुपलभ्यमानानां रसाऽऽदीनां का गतिः? इत्यत्र स्वमतमाह ।—उत्तरोत्तराणाम् जलादीनाम्, एकैकश्येन एकैकक्रमेण तदुत्तरोत्तरगुणसद्भावात् रसाऽऽदिगुणसद्भावात्, तदनुपलब्धिस्तेषां रसाऽऽदीनां घ्राणादिनाऽनुपलब्धिरित्यर्थः ॥ ६६ ॥

कथ तर्ह्यनेकगुणानि भूतानि गृह्यन्त इति ?—

**संसर्गाच्चानेकगुणग्रहणम् ॥ ६७ ॥**

अबादिसंसर्गाच्च पृथिव्या रसाऽऽदयो गृह्यन्ते, एवं शेषेष्वपीति ॥ ६७ ॥

नियमस्तर्हि न प्राप्नोति, संसर्गस्यानियमात, चतुर्गुणा पृथिवी, त्रिगुणा आप, द्विगुण तेज, एकगुणो वायुरिति नियमश्चोपपद्यते कथम ?—

**विष्टं ह्यपरम्परेण ॥ ६८ ॥**

पृथिव्यादीना पूर्वं पूर्वमुत्तरेणोत्तरेण विष्टम अत संसर्ग नियम इति । तच्चैतद्भूतसृष्टौ वेदितव्य, नैतर्हीति ॥ ६८ ॥

**न पार्थिवाऽऽप्ययो प्रत्यक्षत्वात् ॥ ६९ ॥**

नेति त्रिसूत्री प्रत्याचष्टे । कस्मात्—पार्थिवस्य द्रव्यस्याऽऽप्यस्य च प्रत्यक्षत्वात् । महत्त्वादनेकद्रव्यवत्त्वाद्रूपाच्चोपलब्धिरिति तैजसमेव द्रव्य प्रत्यक्ष स्यात्, न पार्थिवमाप्य वा, रूपाभावात्, तैजसवत्तु पार्थिवाऽऽप्ययो प्रत्यक्षत्वात न संसर्गादनेकगुणग्रहण भूतानामिति । भूतान्तररूपकृतञ्च पार्थिवाऽऽप्ययो प्रत्यक्षत्व ब्रुवत प्रत्यक्षो वायु प्रसज्यते । नियमे वा कारणमुच्यताम् इति । रसयोर्वा पार्थिवाऽऽप्ययो प्रत्यक्षत्वात् पार्थिवो रस षड्विध आप्यो मधुर एव न चैतत् संसर्गाद्भवितुमर्हति । रूपयोर्वा पार्थिवाऽऽप्ययो प्रत्यक्षत्वात तैजसरूपानुगृहीतयो संसर्गे हि व्यञ्जकमेव

तर्हि कथ पृथिव्यादौ रसादिग्रहणम् ? तत्रा ऽऽह ।—अपर पृथिव्यादि परेण जलाऽऽदिना हि यस्मात् विष्ट सम्बद्धम् तथा च पृथिव्याद्यवच्छिन्नजलाऽऽदिना रसनासंयोगाद्रसाऽऽदिग्रह इति भाव ॥ ६८ ॥

सिद्धान्तसूत्रम् ।—उक्तौ गुणनियमौ न युक्त कुत ?—पार्थिवस्याऽऽप्यस्य च

रूप न व्यङ्ग्यमस्तीति। एकानेकविधत्वे च पार्थिवाऽऽप्ययो
प्रत्यक्षत्वात रूपयो पार्थिव हरितलोहितपीताद्यनेकविध
रूपम आप्यन्तु शुक्लमप्रकाशकम , न चैतदेकगुणाना समर्गे
सत्युपलभ्यत इति। उदाहरणमात्रञ्चैतत। अत पर
प्रपञ्च। स्पर्शयोर्वा पार्थिवतैजसयो प्रत्यक्षत्वात पार्थिवो
ऽनुष्णाशीत स्पर्श, उष्णस्तैजस प्रत्यक्ष , न चैतदेकगुणाना-
मनुष्णाशीतस्पर्शेन वायुना समर्गेणोपपद्यत इति। अथवा
पार्थिवाऽऽप्ययाद्रव्ययोर्व्यवस्थितगुणयो प्रत्यक्षत्वात चतुर्गुण
पार्थिव द्रव्य त्रिगुणमाप्य प्रत्यक्षम तन तत्कारणमनुमीयते
तथाभूतमिति। तस्य कार्य्यं लिङ्गम, कारणभावाद्धि काय्यभाव
इति। एव तैजसवायव्ययोर्द्रव्ययो प्रत्यक्षत्वाद गुणव्यवस्थाया
तत्कारणे द्रव्ये व्यवस्थाऽनुमानमिति। दृष्टश्च विवेक पार्थि
वाऽऽप्ययो प्रत्यक्षत्वात पार्थिव द्रव्यमबादिभिर्वियुक्त प्रत्यक्षतो
गृह्यते आप्यञ्च पराभ्या, तैजसञ्च वायुना, न चैकैकगुण
गृह्यत इति। निरनुमानन्तु विष्ट ह्यपर परेणेत्येतदिति,
नात्र लिङ्गमनुमापक गृह्यत इति येनैतदेव प्रतिपद्येमहि।
यच्चोक्त,—"विष्ट ह्यपर परेण" इति भूतसृष्टौ वेदितव्य न
साम्प्रतमिति नियमकारणाभावादयुक्तम् , दृष्टञ्च साम्प्रतम
परम्परेण विष्टमिति, वायुना च विष्ट तेज इति। विष्टत्व
सयोग, स च द्वयो समान, वायुना च विष्टत्वात स्पर्शवत्तेज
न तु तेजसा विष्टत्वाद्रूपवान वायु इति नियमे कारण
नास्तीति। दृष्टञ्च तैजसेन स्पर्शेन वायव्यस्पर्शस्याभिभवाद
ग्रहणमिति, न च तेनैव तस्याभिभव इति ॥ ६८ ॥

---

द्रव्यस्य प्रत्यक्षत्वाद्रूपस्पर्शसिद्धे तस्य रूपस्पर्शगुणत्वे चक्षुषा त्वचा च ग्रहण न स्यात् रूपादेव कस्मिंश्चादात्म्येन कस्मिंश्च परम्परया हेतुत्वे गौरवमिति भाव ॥ ६८ ॥

तदेव न्यायविरुद्धं प्रवादं प्रतिषिध्य "न सर्वगुणानुपलब्धेः" इति चोदितं समाधीयते ।—

**पूर्वं पूर्वं गुणोत्कर्षात्तत्तत्प्रधानम् ॥ ७० ॥**

तस्मान्न सर्वगुणोपलब्धिः घ्राणाऽऽदीनाम्। पूर्वं पूर्वं गन्धादेर्गुणस्योत्कर्षात् तत्तत्प्रधानम्। का प्रधानता ?—विषयग्राहकत्वम्, को गुणोत्कर्षः ?—अभिव्यक्तौ समर्थत्वम्। यथा बाह्यानां पार्थिवाऽऽप्यतैजसानां द्रव्याणां चतुर्गुणत्रिगुणद्विगुणानां न सर्वगुणव्यञ्जकत्वं गन्धरसरूपोत्कर्षात्तु यथाक्रमं गन्धरसरूपव्यञ्जकत्वम्, एवं घ्राणरसनचक्षुषां चतुर्गुणत्रिगुणद्विगुणानां न सर्वगुणग्राहकत्वं गन्धरसरूपोत्कर्षात्तु यथाक्रमं गन्धरसरूपग्राहकत्वम्, तस्मात् घ्राणाऽऽदिभिर्न सर्वेषां गुणानामुपलब्धिरिति। यस्तु प्रतिजानीते गन्धगुणत्वाद्घ्राणं गन्धग्राहकम् एवं रसनादिष्वपीति, तस्य यथागुणयोगं घ्राणाऽऽदिभिर्गुणग्रहणं प्रसज्यत इति ॥ ७० ॥

किं कृतं पुनर्व्यवस्थानम् ?—किञ्चित् पार्थिवमिन्द्रियं, न सर्वाणि, कानिचिदाप्यतैजसवायव्यानीन्द्रियाणि, न सर्वाणीति ।—

**तद्व्यवस्थानन्तु भूयस्त्वात् ॥ ७१ ॥**

अर्थनिर्वृत्तिसमर्थस्य प्रविभक्तस्य द्रव्यस्य संसर्गः पुरुषसंस्कारकारितं भूयस्त्वम्, दृष्टो हि प्रकर्षे भूयस्त्वशब्दः प्रकृष्टो

---

एवमाऽऽदेः पृथिव्यादिगुणत्वे घ्राणादिनाऽपि तद्ग्रहणप्रसङ्ग इत्यतो नियामकमाह ।—पूर्वं पूर्वं घ्राणादि तत्तत्प्रधानं गन्धाऽऽदिप्रधानम्। प्राधान्ये बीजमाह ।—गुणोत्कर्षात् गुणस्य गन्धाऽऽदेरुत्कर्षात् तद्व्यवस्थापकत्वात् तथा च गन्धाऽऽदिषु मध्ये स्वव्यवस्थापकगुणस्यैव ग्राहकत्वं घ्राणाऽऽदीनामिति ॥ ७० ॥

ननु पृथिव्यन्तरस्यापि गन्धप्राधान्यात् किमिन्द्रियं किं नेन्द्रियम् ? इत्यत आह ।—

यथा—विषयो भूतानित्यच्यते। यथा पृथगर्थक्रियासमर्थानि पुरुषसंस्कारवशादिषौषधिमाणप्रभृतीनि द्रव्याणि निर्वर्त्त्यन्ते न सर्वं सर्वार्थम, एवं पृथगविषयग्रहणसमर्थानि घ्राणाऽऽदीनि निर्वर्त्त्यन्ते न सर्वविषयग्रहणसमर्थानीति ॥ ७१ ॥

स्वगुणान्नोपलभन्ते इन्द्रियाणि कस्मात्? इति चेत—

**सगुणानामिन्द्रियभावात् ॥ ७२ ॥**

स्वान गन्धादीन्नोपलभन्ते घ्राणाऽऽदीनि। केन कारणेन? इति चेत स्वगुणैः सह घ्राणाऽऽदीनामिन्द्रियभावात घ्राणं स्वेन गन्धेन समानार्थकारिणा सह वाह्यं गन्धं गृह्णाति तस्य स्वगन्धग्रहणं सहकारिवैकल्यात् न भवति एवं शेषाणामपि ॥ ७२ ॥

यदि पुनर्गन्धः सहकारी च स्यात घ्राणस्य ग्राह्यश्चेत्यत आह—

**तेनैव तस्याग्रहणाच्च ॥ ७३ ॥**

न गुणोपलब्धिरिन्द्रियाणाम। यो ब्रूते यथा वाह्यद्रव्यं चक्षुषा गृह्यते तथा तेनैव चक्षुषा तदेव चक्षुर्गृह्यतामिति तादृगिदम, तुल्यो ह्युभयत्र प्रतिपत्तिहेत्वभाव इति ॥ ७३ ॥

भूयस्त्वात मत्वाऽऽयविशिष्टपाकव्याधारत्वात तदयवस्थान घ्राणादीन्द्रियत्वव्यवस्थिति ॥ ७१ ॥

घ्राणाऽऽदीनां गन्धाऽऽदिगुणवत्त्वे मानमाह।—सगुणानां गन्धाऽऽदिविशिष्टानां घ्राणाऽऽदीनाम् इन्द्रियभावात् गन्धाऽऽदिसाक्षात्कारकरणत्वात् कुङ्कुमगन्धाभिव्यञ्जकघृताऽऽदौ तथैव दर्शनात् ॥ ७२ ॥

इत्यञ्च गन्धाऽऽदिसिद्धावप्रत्यक्षत्वादनुद्भूतत्वकल्पनमित्याशयेनाऽऽह।—तेन इन्द्रियेण तस्य सगुणस्येन्द्रियस्य अग्रहणादनुद्भूतत्वकल्पनमिति ॥ ७३ ॥

न शब्दगुणोपलब्धे ॥ ७४ ॥

स्वगुणान्नोपलभन्ते इन्द्रियाणीत्येतत न भवति, उपलभ्यते हि स्वगुण शब्द श्रोत्रेणेति ॥ ७४ ॥

तदुपलब्धिरितरेतरद्रव्यगुणवैधर्म्यात ॥ ७५ ॥

न शब्देन गुणेन सगुणमाकाशमिन्द्रिय भवति न शब्द शब्दस्य व्यञ्जक न च घ्राणादीना स्वगुणग्रहण प्रत्यक्ष नाप्यनुमीयते अनुमीयते तु श्रोत्रेणाऽऽकाशेन शब्दस्य ग्रहण शब्दगुणत्वञ्चाऽऽकाशस्येति परिशेषश्चानुमान वेदितव्यम आत्मा तावत् श्रोता, न करणम्, मनस श्रोत्रत्वे बधिरत्वाभाव पृथिव्यादीना घ्राणाऽऽदिभावे सामर्थ्य श्रोत्रभावे चासामर्थ्यम। अस्ति चेद श्रोत्रम आकाशञ्च शिष्यते, परिशेषादाकाश श्रोत्रमिति ॥ ७५ ॥

इति वात्स्यायनीये न्यायभाष्ये तृतीयाध्यायस्याद्यमाह्निकम।

---

नन्विन्द्रियगुणानामप्रत्यक्षत्वान्नियमो नेत्याशङ्कते।—उक्तनियमो न युक्त शब्दस्य श्रोत्रगुणस्य उपलब्धे ॥ ७४ ॥

समाधत्ते —द्रव्यगुणाना रूपशब्दाऽऽदीना परस्पर वैधर्म्याच्छब्दस्योपलम्भ न चक्षुरूपाऽऽदीना शब्दाऽऽश्रयस्य लाघवेनैक्यासिद्धेरिति भाव ॥ ७५ ॥

समाप्तमर्थपरीक्षाप्रकरणम्।

इति तृतीयाध्यायस्याद्यमाह्निकम् आत्मादिप्रमेयचतुष्कपरीक्षकं नाम।

## तृतीयाध्यायस्य द्वितीयाह्निकम् ।

परीक्षितानीन्द्रियाण्यर्थाश्च । बुद्धेरिदानी परीक्षाक्रम । सा किमनित्या ? नित्या वा ? इति । कुत संशय ?—

**कर्माऽऽकाशसाधर्म्यात् संशय ॥ १ ॥**

अस्पर्शवत्त्वं ताभ्यां समानो धर्म उपलभ्यते बुद्धौ, विशेषश्चोपजनापायधर्मवत्त्वं विपर्ययश्च यथास्वमनित्यनित्ययोस्तस्यां बुद्धौ नोपलभ्यते तेन संशय इति ॥ १ ॥

अनुपपन्नरूप खल्वयं संशय । सर्वशरीरिणां हि प्रत्यात्मवेदनीयाऽनित्या बुद्धि सुखादिवत् भवति च संवित्तिर्ज्ञास्यामि जानामि अज्ञासिषमिति, न चोपजनापायावन्तरेण त्रैकाल्यव्यक्ति ततश्च त्रैकाल्यव्यक्तेरनित्या बुद्धिरित्येतत् सिद्धम् । प्रमाणसिद्धञ्चेदम् । शास्त्रेऽप्युक्तम्,— इन्द्रियार्थसन्निकर्षोत्पन्न युगपज्ज्ञानानुत्पत्तिर्मनसो लिङ्गम् इत्येवमादि । तस्मात् संशयप्रक्रियाऽनुपपत्तिरिति । दृष्टिप्रवादोपालम्भार्थन्तु प्रकरणम् । एवं हि पश्यन्त प्रवदन्ति साङ्ख्या पुरुषस्यान्तःकरणभूता नित्या बुद्धिरिति साधनञ्च प्रचक्षते ।—

**विषयप्रत्यभिज्ञानात् ॥ २ ॥**

किं पुनरिद प्रत्यभिज्ञानम् ?—य पूर्वमज्ञासिषमर्थं, तमिमं

---

अथ क्रमप्राप्ततया बुद्धिमनसोश्च परीक्षा सप्तभि प्रकरणै तदर्थञ्चेदं चाऽऽह्निकार्थ , परे तु शरीरावच्छेदव्याप्यभागानुकूलसम्बन्धवत्परीक्षा शरीरान्तर्वर्त्तिप्रमेयपरीक्षणाऽऽह्निकार्थ इति । तन्मते इन्द्रियपरीक्षायामात्माश्रि तत्र च बुद्धिपरीक्षा पञ्चभि प्रकरणै तत्राऽऽदौ बुद्ध्यनित्यताप्रकरणम् तत्र संशयदर्शनाय सूत्रम् ।—कर्मण आकाशस्य च साधर्म्यान्निःस्पर्शत्वात् बुद्धिपदार्थे नित्यत्वसंशय बुद्धिपदं नित्यं न वा ? इति संशय पर्यवसन्न ॥ १ ॥

तत्र बुद्धेर्नित्यत्व साङ्ख्या साधयन्ति ।—बुद्धिर्नित्येति शेष, योऽहं घटमद्राक्षं, सोऽहं

ज्ञानामीति ज्ञानयो समानेऽर्थे प्रतिसन्धिज्ञान प्रत्यभिज्ञानम। एतच्चावस्थिताया बुद्धेरुपपन्नम। नानात्वे तु बुद्धिभेदेषूत्पन्नाप वर्गिषु प्रत्यभिज्ञानानुपपत्ति नान्यज्ञातमन्य प्रत्यभिजानातीति॥ २॥

## साध्यसमत्वादहेतु ॥ ३॥

यथा खलु नित्यत्व बुद्धे साध्यम एव प्रत्यभिज्ञानमपीति। कि कारणम?—चेतनधमस्य करणाऽनुपपत्ति पुरुषधर्म खल्वय ज्ञान दर्शनमुपलब्धिर्बोध प्रत्ययोऽध्यवसाय इति, चेतनो हि पूर्वज्ञातमर्थं प्रत्यभिजानातीति तस्यैतस्माद्धेतोर्नित्यत्व युक्तमिति। * करणचैतन्याभ्युपगमे तु चेतनस्वरूप वचनीयम, * नानिर्दिष्ट स्वरूपमात्माऽन्तर शक्यमस्तीति प्रतिपत्तुम ज्ञानञ्चेत बुद्धेरन्त करणस्याभ्युपगम्यते चेतनस्येदानी कि स्वरूपम? को धर्म? कि तत्त्वम? ज्ञानेन च बुद्धौ वर्त्तमानेनाय चेतन कि करोति? इति। * चेतयत इति चेत न ज्ञानादर्थान्तरवचनम। * पुरुषश्चेतयते बुद्धिर्जानातीति नद ज्ञानादर्थान्तरमुच्यते, चेतयते जानीते बुध्यते पश्यत्युपलभ्यत इत्येकोऽयमर्थ इति। बुद्धिर्ज्ञापयतीति चेत अद्धा जानीते पुरुष बुद्धिर्ज्ञापयतीति। सत्यमेतत् एवञ्चाभ्युपगम ज्ञान पुरुषस्येति सिद्ध भवति, न बुद्धेरन्त करणस्य इति। * प्रतिपुरुषञ्च शब्दान्तरव्यवस्था प्रतिज्ञाने प्रतिषेधहेतुवचनम। * यश्च प्रतिजानीते, कश्चित् पुरुषश्चेतयते कश्चिद्बुध्यते, कश्चिदुपलभते, कश्चित पश्यतीति पुरुषान्तराणि खल्विमानि, चेतनो बोद्धोपलब्धा द्रष्टेति नैकस्यैते

घट स्मरामीति प्रत्यभिज्ञानमेक वृत्तिमन्त विषयीकरोति न चाऽऽत्मा तथा तस्य जन्य धर्मानधिकरणस्य कूटस्थत्वात् तस्मात् वृत्तिमती बुद्धिरेव। वृत्तिस्तु तस्या परिणाम बुद्धेरप्याविर्भावतिरोभावाव न तूत्पत्तिविनाशाविति ॥ २॥

परिहरति।—साध्यसमत्वात् असिद्धत्वात्, प्रतिसन्धातृत्व न हेतु, अह जानामी

धर्मा इति। अत्र को प्रतिषेधहेतु ? इति। * अर्थस्याभेद इति चेत समानम अभिन्नार्था एते शब्दा इति। तत्र व्यवस्थाऽनुपपत्तिरित्येव त्वं मन्यसे, समान भवति , पुरुषश्चेतयते बुद्धिं जानीत इत्यत्राप्यर्थो न भिद्यते, तत्रोभयोश्चेतनत्वादन्यतरलोप इति। यदि पुनर्बुध्यतेऽनयेति बोधन बुद्धिमन एवोच्यते तच्च नित्यम। अस्त्वेतदेव न तु मनसो विषयप्रत्यभिज्ञाना न्नित्यत्वम। दृष्ट हि करणभेदे ज्ञातुरेकत्वात प्रत्यभिज्ञानम , सव्यदृष्टस्येतरेण प्रत्यभिज्ञानात इति चक्षुर्वत। प्रदीपवच्च प्रदीपान्तरदृष्टस्य प्रदीपान्तरेण प्रत्यभिज्ञानमिति। तस्माज्ज्ञातुरय नित्यत्वे हेतुरिति ॥ ३ ॥

यच्च मन्यते बुद्धेरवस्थिताया यथाविषय वृत्तयो ज्ञानानि निश्चरन्ति वृत्तिश्च वृत्तिमतो नान्येति।—

## न युगपदग्रहणात् ॥ ४ ॥

वृत्तिवृत्तिमतोरनन्यत्वे वृत्तिमतोऽवस्थानाद् वृत्तीनामवस्थानमिति , यानीमानि विषयग्रहणानि, तान्यवतिष्ठन्त इति युगपद्विषयाणा ग्रहण प्रसज्यत इति ॥ ४ ॥

## अप्रत्यभिज्ञाने च विनाशप्रसङ्ग ॥ ५ ॥

अतीते च प्रत्यभिज्ञाने वृत्तिमानप्यतीत इत्यन्त करणस्य विनाश प्रसज्यते विपर्य्यये च नानात्वमिति ॥ ५ ॥

---

त्वादना आत्मन एव प्रतिसन्धातृ त्वयात्। अनादिनिधनत्वमेव तस्य कौटस्थ्यम् अन्यादृश त्वसिद्धमिति भाव ॥ ३ ॥

बुद्धेरेव स्थायिन्या यथाविषय ज्ञानाऽऽत्मका वृत्तयो वृत्तिमदभिन्ना वह्नेरिव स्फुलिङ्गा वि सरन्तीति साङ्ख्यमत निरस्यति।—वृत्तिवृत्तिमतोरभेदे वृत्तिमदवस्थित्या वृत्तयोऽप्यव स्थितर्वाच्या तथा च सर्वपदार्थग्रहण युगपत् स्यात् न चैव तस्मान्नाभेद इति ॥ ४ ॥

अथ वृत्तीनामनवस्थायित्वमुच्यते तदाऽऽह।—अप्रत्यभिज्ञाने प्रत्यभिज्ञानस्य अभावे विनाशे वृत्तिमतोऽपि विनाश स्यात अतो न द्वयोरैक्यम् ॥ ५ ॥

अविभु चैकं मनः पर्य्यायेणेन्द्रियैः संयुज्यत इति ।—

**क्रमवृत्तित्वादयुगपद्ग्रहणम् ॥ ६ ॥**

इन्द्रियार्थानां वृत्तिवृत्तिमतोर्नानात्वमिति, एकत्वे च प्रादुर्भावतिरोभावयोरभाव इति ॥ ६ ॥

**अप्रत्यभिज्ञानञ्च विषयान्तरव्यासङ्गात् ॥ ७ ॥**

अप्रत्यभिज्ञानमनुपलब्धिः, अनुपलब्धिश्च कस्यचिदर्थस्य विषयान्तरव्यासक्ते मनस्युपपद्यते, वृत्तिवृत्तिमतोर्नानात्वात् । एकत्वे ह्यनर्थको व्यासङ्ग इति ॥ ७ ॥

विभुत्वे चान्तःकरणस्य पर्य्यायेणेन्द्रियैः संयोगः,—

**न गत्यभावात् ॥ ८ ॥**

प्राप्तानीन्द्रियाण्यन्तःकरणेनेति प्राप्त्यर्थस्य गमनस्याभावः, तत्र क्रमवृत्तित्वाभावादयुगपद्ग्रहणानुपपत्तिरिति । गत्यभावाच्च प्रतिषिद्धं विभुनोऽन्तःकरणस्यायुगपद्ग्रहणं न लिङ्गान्तरेणानुमीयते । यथा चक्षुषो गतिः प्रतिषिद्धा सन्निकृष्टविप्रकृष्टयोस्तुल्यकालग्रहणात् पाणिचन्द्रमसोर्व्यवधानप्रतीघातेनानुमीयत इति । सोऽयं नान्तःकरणे विवादो न तस्य नित्यत्वे, सिद्धं हि मनोऽन्तःकरणं नित्यञ्चेति । क्व तर्हि विवादः ? तस्य विभुत्वे तच्च प्रमाणतोऽनुपलब्धेः प्रतिषिद्धं

अयुगपद्ग्रहणं क्रमते व्युत्पादयति मनस इत्यादि ।—मनसोऽणुत्वादिन्द्रियैः सह क्रमेण सम्बन्धात् ज्ञानानां क्रमिकत्वम् तथा च —"अविभु चैकं मनः पर्य्यायेण सर्वैरिन्द्रियैः सम्बध्यते" इत्यवतारभाष्यम् तत्तदिन्द्रियमनःसंयोगं विना ज्ञानमनुपपद्यते ॥ ६ ॥

न प्रतिरेके ज्ञानाभावमुपपादयति ।—अप्रत्यभिज्ञानं तत्तदिन्द्रियजन्यज्ञानाभावः, विषयान्तरेण इन्द्रियान्तरेण मनसः सम्बन्धादित्यर्थः ॥ ७ ॥

लभ्यते चेद नोपपद्यत इत्याह ।—लभ्यते मनसः क्रमेणेन्द्रियसम्बन्धं न, मनसः,

मिति। एकस्मान्त करण नाना चैता ज्ञानाऽऽत्मिका वृत्तय, चक्षुर्विज्ञान, घ्राणविज्ञान रूपविज्ञान गन्धविज्ञानम, एतच्च वृत्तिवृत्तिमतारकत्वऽनुपपन्नमिति। एतेन विषयान्तरव्यासङ्ग प्रत्युक्त। विषयान्तरग्रहणलक्षणा विषयान्तरव्यासङ्ग पुरुषस्य, नान्त करणस्येति। केनचिदिन्द्रियेण सान्निधि कनचिदसन्निधि रिति, अयन्तु व्यासङ्गोऽनुज्ञायते मनस इति॥ ८॥

एकमन्त करण नाना वृत्तय (ञ) इति सत्यभेद वृत्तेरिद मुच्यत।—

## स्फटिकान्यत्वाभिमानवत्तदन्यत्वाभिमान ॥ ९॥

तस्या वृत्तौ नानात्वाभिमान यथा—द्रव्यान्तरोपहिते स्फटिके अन्यत्वाभिमानो नीला लोहित इति। एव विषया न्तरोपधानादिति॥ ९॥

## न हेत्वभावात्॥ १०॥

स्फटिकान्यत्वाभिमानवदय ज्ञानेषु नानात्वाभिमानो गौण न पुनर्गन्धाद्यन्यत्वा अमानवदिति हेतुनास्ति हेत्वभावादनुप पन्न इति। समाना हेत्वभाव इति चेत न ज्ञानाना क्रमणोप जननापायदर्शनात क्रमण हीन्द्रियार्थेषु ज्ञानान्यपजायन्ते

विभुत्वन गत्यभावात पर तु नकारो न सूत्राङ्गत किन्तु विभुत्व चान्त करणस्य मध्याजणान्द्र सयोगा नेति भाष्यानन्तराणकाजाम इत्याह॥ ८॥

वृत्तिवृत्तिमतोवस्तुतोऽभदेऽपि भेदप्रत्ययप्रतिपादनाय प्रवृत्त।—यथा जवा कुसुमाऽऽदिसान्नधानादकस्यापि स्फटिकस्य तत्तद्रूपाभिमान तथा वृत्तिमदभिन्नाऽपि वृत्तस्तत्तद्विषयसन्निकर्षवशान्नानेव प्रतिभासत इति॥ ९॥

दूषयति।—अमत्वे साधकाभावान्नोक्त युक्तमित्यथ केचित्तु न हेत्वभावादिति

(ञ) "चौथभाष्यमेतत् इति तात्पर्यटीका।

आपयन्ति चेति दृश्यते, तस्माद्गन्धाद्यन्यत्वाभिमानवदयं ज्ञानेषु नानात्वाभिमान इति ॥ १० ॥

स्फटिकान्यत्वाभिमानवदित्येतदमृष्यमाणः क्षणिकवाद्याह —

**स्फटिकेऽप्यपरापरोत्पत्तेः क्षणिकत्वाद्व्यक्तीनामहेतुः ॥ ११ ॥**

स्फटिकस्याभेदेनावस्थितस्योपधानभेदान्नानात्वाभिमान इत्ययमविद्यमानहेतुकः पक्षः । कस्मात्?—स्फटिकेऽप्यपरापरोत्पत्तेः, स्फटिकेऽप्यन्या व्यक्तय उत्पद्यन्ते अन्या निरुध्यन्त इति । कथम्?—क्षणिकत्वाद्व्यक्तीनाम्, क्षणश्चाल्पीयान् कालः, क्षणस्थितिकाः क्षणिकाः । कथं पुनर्गम्यते क्षणिका व्यक्तयः? इति ।—उपचयापचयप्रबन्धदर्शनाच्छरीरादिषु, पक्तिनिर्वृत्तस्याऽऽहाररसस्य शरीरे रुधिराऽऽदिभावेनोपचयोऽपचयश्च प्रबन्धेन प्रवर्त्तते, उपचयाद्व्यक्तीनामुत्पादः अपचयाद्व्यक्तिनिरोधः । एवञ्च सत्यवयवपरिणामभेदेन वृद्धिः शरीरस्य कालान्तरे गृह्यते इति, सोऽयं व्यक्तिमात्रे वेदितव्य इति ॥ ११ ॥

भाष्यमिति टीकाऽदर्शनादत्र सूत्र किन्तु तुच्छतया सूत्रकृताऽदूषणादज्ञानतापरिहाराय भाष्यकृता तदुक्तमिति मन्यन्ते ॥ १ ॥

समाप्तं बुद्ध्यनित्यताप्रकरणम् ।

स्फटिक इव क्षणिकत्वभ्रम इत्यसहमानः सौगतः शङ्कते ।— स्फटिकान्यत्वाभिमानवदित्यहेतुः । कुतः?—स्फटिकेऽप्यपरापरोत्पत्तेः । विलक्षणविलक्षणस्फटिकोत्पत्तेः । तत्र मानमाह व्यक्तीनां भावानां क्षणिकत्वात् । तत्साधनाय भाष्यम् — "उपचयापचयप्रबन्धदर्शनाच्छरीराऽऽदिषु" प्रतिक्षणं शरीरेषूपचयापचयदर्शनान्नानात्वम्, न ह्येकस्मिन्नवयविनि परिमाणद्वयसमावेश इति भावः । इदं सूत्रमेवेति केचित् ॥ ११ ॥

**नियमहेत्वभावाद्यथादर्शनमभ्यनुज्ञा ॥ १२ ॥**

पदार्थानां सर्वासु व्यक्तिषूपचयापचयप्रबन्धः शरीरवदिति नायं नियमः। कस्मात्?—हेत्वभावात्। नात्र प्रत्यक्षमनुमानं वा प्रतिपादकमस्तीति। तस्माद्यथादर्शनमभ्यनुज्ञा। यत्र यत्रोपचयापचयप्रबन्धो दृश्यते, तत्र तत्र व्यक्तीनामपरापरोत्पत्तिरुपचयापचयप्रबन्धदर्शनेनाभ्यनुज्ञायते, यथा शरीराऽऽदिषु। यत्र यत्र न दृश्यते तत्र तत्र प्रत्याख्यायते यथा ग्रावप्रभृतिषु। स्फटिकेऽप्युपचयापचयप्रबन्धो न दृश्यते, तस्मादयुक्तं स्फटिकेऽप्यपरापरोत्पत्तिरिति। यथा चार्कस्य कटुकिम्ना सर्वद्रव्याणां कटुकिमानमापादयेत तादृगेतदिति ॥ १२ ॥

यश्चाशेषनिरोधेनापूर्वोत्पादं निरन्वयं द्रव्यसन्ताने क्षणिकानां मन्यते तस्यैतत्—

**न, उत्पत्तिविनाशकारणोपलब्धेः ॥ १३ ॥**

उत्पत्तिकारणं तावदुपलभ्यते अवयवोपचयो वल्मीकादीनाम्। विनाशकारणञ्चोपलभ्यते घटादीनामवयवविभागः। यस्य त्वनपचितावयवं निरुध्यते, अनुपचितावयवञ्चोत्पद्यते, तस्याशेषनिरोधे निरन्वये वाऽपूर्वोत्पादे न कारणमुभयत्राप्युपलभ्यत इति ॥ १३ ॥

सिद्धान्तसूत्रम्।—पदार्थानां विनाशसामग्रीविशेष्यानयमे मानाभावात् अभ्युपेत्य ऽऽदर्शनमिति।—यदि कस्यचिद्विनाशसामग्रीविशेष्ये मानं स्यात् तदा च क्षणिकत्वं तस्याभ्यनुज्ञायत एव यथाऽन्त्यशब्द इति ॥ १२ ॥

पूर्वपक्षान्तरमाह।—न स्फटिकादेः क्षणिकत्वम् यत उत्पत्तिविनाशकारणानुपलब्धेः। विशीर्णतान्ववयवोपचयापचयादीनि न च स्फटिके विनाशकारणमुपलभ्यते, येन पूर्वविनाशोऽपरोत्पत्तिश्च स्यादिति भावः ॥ १३ ॥

**चीरविनाशे कारणानुपलब्धिवद्दध्युत्पत्तिवच्च तदुपपत्ति ॥ १४ ॥**

यथाऽनुपलभ्यमान चीरविनाशकारण दध्युत्पत्तिकारणञ्चा भ्यनुज्ञायते तथा स्फटिकेऽपरापरासु व्यक्तिषु विनाशकारण मुत्पत्तिकारणञ्चाभ्यनुज्ञेयमिति ॥ १४ ॥

**लिङ्गतो ग्रहणान्नानुपलब्धि ॥ १५ ॥**

चीरविनाशलिङ्ग चीरविनाशकारणम। दध्युत्पत्तिलिङ्ग दध्युत्पत्तिकारणञ्च गृह्यते अतो नानुपलब्धि। विपर्य्ययस्तु स्फटिकाऽऽदिष द्रव्येषु, अपरापरोत्पत्तौ व्यक्तीना न लिङ्गमस्तो त्यनुवृत्तिरेवेति ॥ १५ ॥

अत्र कश्चित् परिहारमाह।—

**न पयस परिणामो गुणान्तरप्रादुर्भावात् ॥ १६ ॥**

पयस परिणामो न विनाश इत्यक आह। परिणाम श्चावस्थितस्य द्रव्यस्य पूवधर्मनिवृत्तौ धमान्तरोत्पत्तिरिति। गुणान्तरप्रादुर्भाव इत्यपर आह। गुणान्तरप्रादुभावश्च सतो द्रव्यस्य पूर्वगुणनिवृत्तौ गुणान्तरमुत्पद्यत इति, स खल्वेकपत्तौ भाव इव ॥ १६ ॥

---

चाक्षिपति।—दध्युत्पत्तिवद्दध्युत्पत्तिकारणानुपलब्धिवत् तदुपपत्ति। पूव स्फटिकविनाशकारणानुपलब्धेरुत्तरस्फटिकोत्पत्तिकारणानुपलब्धेश्चोपपत्ति स्यादित भाव ॥ १४ ॥

।सद्धान्तसूत्रम्।- दध्न चीरविनाशस्य च प्रत्यक्षसिद्धत्वात्तत्कारण कल्प्यते न त्वव स्फटिकविनाशोत्पादावुपलभ्येते येन तत्कारणकल्पनम् ॥ १५ ॥

सौगतमते साङ्ख्यदूषणमुपन्यस्यति।— न चीरस्य नाशो दध्नश्चोत्पत्ति किन्तु चीरस्य परिणाम परिणामशब्दार्थो गुणान्तरप्रादुर्भाव विद्यमानस्य चीरस्य पूव रसतिरोभावोऽम्लरसाऽऽत्मकगुणान्तरस्याऽऽविर्भावादित्यर्थ ॥ १६ ॥

अत्र तु प्रतिषेध।—

व्यूहान्तराद्द्रव्यान्तरोत्पत्तिदर्शनं पूर्वद्रव्यनिवृत्तेरनुमानम् ॥ १७ ॥

सम्मूर्च्छनलक्षणादवयवव्यूहात द्रव्यान्तरे दध्युत्पन्ने गृह्य माणे पूर्व पयोद्रव्यमवयवविभागेभ्यो निवृत्तमित्यनुमीयते यथा मृदवयवानां व्यूहान्तराद्द्रव्यान्तरे स्थाल्यामुत्पन्नायां पूर्व मृत्पिण्डद्रव्य मृदवयवविभागेभ्यो निवर्तत इति। * मृद्वच्चाऽवयवान्वय ।* पयोदध्नार्नाशेषनिरोधे निरन्वयो द्रव्यान्तरोत्पादो घटत इति अभ्यनुज्ञाय च निष्कारण क्षीरविनाश दध्युत्पादश्च प्रतिषेध उच्यते इति ॥ १७ ॥

क्वचिद्विनाशकारणानुपलब्धे क्वचिच्चोपलब्धेरनैकान्त ॥ १८ ॥

क्षीरदधिवन्निष्कारणौ विनाशोत्पादौ स्फटिकादिव्यक्तीनामिति नायमेकान्त इति। कस्मात?—हेत्वभावात। नात्र हेतुरस्ति अकारणौ विनाशोत्पादौ स्फटिकादिव्यक्तीना क्षीर दधिवत, न पुनर्यथा विनाशकारणभावात् कुम्भस्य विनाश उत्पत्तिकारणभावाच्चोत्पत्ति, एव स्फटिकाऽऽदिव्यक्तीना विनाशोत्पत्तिकारणभावाद्विनाशोत्पत्तिभाव इति। * निरधिष्ठानञ्च दृष्टान्तवचनम गृह्यमाणयोर्विनाशोत्पादयो स्फटिकाऽऽदिषु स्यादयमाश्रयवान दृष्टान्त क्षीरविनाशकारणानुपलब्धिवद्दध्युत्प

---

एतन्निराकरोति सूत्रकार।—व्यूहान्तरात रचनाऽन्तरात् पूर्वावयवसंयोगनाशो द्रव्यान्तरोत्पादश्चाऽऽनुभविक इति भाव ॥ १७ ॥

दोषान्तराभिधानाय सिद्धान्तिना सूत्रम्।—क्षीरदधिदृष्टान्तेन विनाशोत्पादा वकारणकाववति न युक्तम् —घटाऽऽदौ सकारणकत्वोपलब्धेर्व्यभिचारात्। वस्तुत

न्तिवर्त्तति, तौ तु न गृह्येते, तस्मान्निरधिष्ठानोऽयं दृष्टान्त इति। अभ्यनुज्ञाय च स्फटिकस्योत्पादविनाशौ योऽत्र साधकस्तस्याभ्यनुज्ञानादप्रतिषेधः। कुम्भवन्न निष्कारणौ विनाशोत्पादौ स्फटिकादीनामित्यभ्यनुज्ञेयोऽयं दृष्टान्तः प्रतिषेद्धुमशक्यत्वात्। क्षीरदधिवत्तु निष्कारणौ विनाशोत्पादाविति शक्योऽयं प्रतिषेद्धुं कारणतो विनाशोत्पत्तिदर्शनात्। क्षीरदध्नोर्विनाशोत्पत्ती पश्यता तत्कारणमनुमेयम् कार्य्यलिङ्गं हि कारणमित्युपपन्नमनित्या बुद्धिरिति ॥ १८ ॥

इदन्तु चिन्त्यते कस्येयं बुद्धिः आत्मेन्द्रियमनोऽर्थानां गुण इति ?—प्रसिद्धोऽपि च खल्वयमर्थः परीक्षाशेषं प्रवर्त्तयामीति प्रक्रियते सोऽयं बुद्धौ सन्निकर्षोत्पत्तेः संशयः विशेषस्याग्रहणादिति। तत्रायं विशेषः —

## नेन्द्रियार्थयोस्तद्विनाशेऽपि ज्ञानावस्थानात् ॥१९॥

नेन्द्रियाणामर्थानां वा गुणो ज्ञानम् तेषां विनाशे ज्ञानस्य भावात्। भवति खल्विदमिन्द्रियेऽर्थे च विनष्टे ज्ञानमद्राक्षमिति, न च ज्ञातरि विनष्टे ज्ञानं भवितुमर्हति। अन्यत् खलु चेतदिन्द्रियार्थसन्निकर्षजं ज्ञानं, यदिन्द्रियार्थविनाशे न भवति इदमन्यदात्ममनःसन्निकर्षजं, तस्य युक्तो भाव इति। स्मृतिः खल्वियमद्राक्षमिति पूर्वदृष्टविषया न च विज्ञातरि नष्टे

---

क्षीरविनाशेऽस्तद्रव्यसंयोगस्य हेतुत्वादस्तरसवत्परमाणुभिश्च दध्न आरम्भान्नाकारणकौ क्षीरविनाशदध्युत्पादाविति ॥ १८ ॥

समाप्तं क्षणभङ्गप्रकरणम्।

बुद्धेरात्मगुणत्वं यद्यप्यात्मपरीक्षात एव सिद्धप्रायं तथाऽपि विशिष्य व्युत्पादनाय बुद्ध्यात्मगुणत्वप्रकरणम्। तत्र चेन्द्रियार्थसन्निकर्षाधीनत्वादिन्द्रियादिनिष्ठत्वमेवास्तु भेर्य्याकाशसंयोगाधीनशब्दस्याऽऽकाशनिष्ठत्ववदिति पूर्वपक्षे सिद्धान्तसूत्रम्।—बुद्धि

पूर्वोपलब्धे स्मरण युक्तम , न चान्यदृष्टमन्य स्मरति न च मनसि ज्ञातर्यभ्युपगम्यमाने शक्यमिन्द्रियार्थयोर्ज्ञातृत्व प्रतिपादयितुम ॥ १९ ॥

अस्तु तर्हि मनोगुणो ज्ञानम ?—

## युगपज्ज्ञेयानुपलब्धेश्च न मनस ॥ २० ॥

युगपज्ज्ञेयानुपलब्धिरन्त करणस्य लिङ्गम , तत्र युगपज्ज्ञेयानुपलब्ध्याऽनुमीयते अन्त करणम , न तस्य गुणो ज्ञानम , कस्य तर्हि ?—ज्ञस्य वशित्वात । वशी ज्ञाता वश्य करणम , ज्ञानगुणत्वे च करणभावनिवृत्ति । घ्राणाऽऽदिसाधनस्य च ज्ञातुर्गन्धाऽऽदिज्ञानभावादनुमीयते अन्त करणसाधनस्य सुखाऽऽदिज्ञान स्मृतिश्चेति । तत्र यज्ज्ञानगुण स आत्मा , यत्तु सुखाद्युपलब्धिसाधनमन्त करण मनस्तत् इति सञ्ज्ञाभेदमात्र, नार्थभेद इति । युगपज्ज्ञेयानुपलब्धेश्चायोगिन इति चार्थ । योगी खलु ऋद्धौ प्रादुर्भूतायां विकरणधर्मा निर्माय सेन्द्रियाणि शरीरान्तराणि तेषु तेषु युगपज्ज्ञेयानुपलभते तच्चैतद्विभौ ज्ञातर्युपपद्यते नाणौ मनसीति । विभुत्वे वा मनसो ज्ञानस्य नाऽऽत्मगुणत्वप्रतिषेध । विभु मन , तदन्त करणभूतमिति तस्य सर्वेन्द्रियैर्युगपत संयोगाद्युगपज्ज्ञानान्युत्पद्येरन्निति ॥ २० ॥

नेन्द्रियस्य न वाऽर्थस्य गुण तन्नाशेऽपि ज्ञानस्य स्मरणस्य चावस्थानात उत्पत्तेः न अनुभवितुरभावे स्मरणमुपपद्यतेऽतिप्रसङ्गादिन्यात भाव ॥ १९ ॥

मनोगुणत्वं निरस्यति ।—युगपदि त्यानुपलब्धेर्हेतोः सिद्धस्य मनसो न कर्तृत्वम् —धर्मग्राहकमानेन करणत्वेनैव सिद्धे । वस्तुतो युगपज्ज्ञेयानुपलब्धिरित्यनेन मनसोऽणुत्व सूचितम् तथा च तद्गतसुखाद्यप्रत्यक्षता स्यात्, एव कायव्यूहे तत्तद्देहावच्छेदेन ज्ञानाऽऽदिकं न स्यादिति ॥ २ ॥

**तदात्मगुणत्वेऽपि तुल्यम् ॥ २१ ॥**

विभुरात्मा सर्वेन्द्रियै संयुक्त, इति युगपज्ज्ञानोत्पत्ति प्रसङ्ग इति ॥ २१ ॥

**इन्द्रियैर्मनस सन्निकर्षाभावात तदनुत्पत्ति ॥२२॥**

गन्धाद्युपलब्धेरिन्द्रियार्थसन्निकर्षवदिन्द्रियमन सन्निकर्षोऽपि कारण तस्य चायौगपद्यमणुत्वात मनस अयौगपद्यादनुत्पत्तिर्युगपज्ज्ञानानामात्मगुणत्वेऽपीति ॥ २२ ॥

यदि,पुनरात्मेन्द्रियार्थसन्निकर्षमात्राद्गन्धादिज्ञानमुत्पद्यते —

**नोत्पत्तिकारणानपदेशात ॥ २३ ॥**

आत्मेन्द्रियसन्निकर्षमात्राद्गन्धाऽऽदिज्ञानमुत्पद्यते, इति नात्रोत्पत्तिकारणमपदिश्यते, येनैतत प्रतिपद्येमहीति ॥ २३ ॥

**विनाशकारणानुपलब्धेश्चावस्थाने तन्नित्यत्व-प्रसङ्ग ॥ २४ ॥**

तदात्मगुणत्वेऽपि तुल्यमित्येतदनेन समुच्चीयते। द्विविधो हि गुणनाशहेतु,—गुणानामाश्रयाभाव विरोधी च गुण, अभावो नित्यत्वादात्मनोऽनुपपन्न, विरोधी च बुद्धेर्गुणो न गृह्यते, तस्मादात्मगुणत्वे सति बुद्धेर्नित्यत्वप्रसङ्ग ॥ २४ ॥

---

प्रकृते।—तस्या बुद्धरात्मगुणत्वेऽपि ज्ञानयौगपद्य तुल्यम् आत्मन सर्वेन्द्रिय संयोगात् तथा च स ंघत्तदवस्थ एवेति कथ तया युक्त्या मन सिद्धिरिति भाव ॥२१॥

उत्तरयति।—युगपज्ज्ञानेन्द्रिय सह मनस सन्निकर्षाभावान्न युगपज्ज्ञानाविषयोपलब्धिरिति भाव ॥ २२ ॥

आचपति।—बुद्ध्युत्पत्तौ कारणस्यानपदेशात् अकथनात् नाऽऽत्मगुणो बुद्धि आत्ममन संयोगस्य कारणत्वे ज्ञानस्य सावादक्रमप्रसङ्ग इति भाव ॥ २३ ॥

बुद्धेरात्मगुणत्वे दोषमप्याह।—बुद्धेरात्मन्यवस्थाने विनाशकारणस्याऽऽश्रयनाशादेरनुपलब्धस्तस्या बुद्धिनित्यता प्रसङ्ग ॥ २४ ॥

**अनित्यत्वग्रहाद्बुद्धेर्बुद्ध्यन्तराद्विनाशः शब्दवत् ।२५॥**

अनित्या बुद्धिरिति सर्वशरीरिणां प्रत्यात्मवेदनीयमेतत् गृह्यते च बुद्धिसन्तानः, तत्र बुद्धेर्बुद्ध्यन्तरं विरोधी गुण इत्यनुमीयते यथा शब्दसन्ताने शब्दः शब्दान्तरविरोधीति। असङ्ख्येयेषु ज्ञानकारितेषु संस्कारेषु स्मृतिहेतुष्वात्ममनसोश्च सन्निकर्षे समाने स्मृतिहेतौ सति न कारणस्यायौगपद्यमस्तीति युगपत् स्मृतयः प्रादुर्भवेयुः, यदि बुद्धिरात्मगुणः स्यादिति ॥ २५ ॥

तत्र कश्चित् सन्निकर्षस्यायौगपद्यमुपपादयिष्यन्नाह —

**ज्ञानसमवेताऽऽत्मप्रदेशसन्निकर्षान्मनसः स्मृत्युत्पत्तेर्न युगपदुत्पत्तिः ॥ २६ ॥**

ज्ञानसाधनः संस्कारो ज्ञानमित्युच्यते ज्ञानसंस्कृतैरात्मप्रदेशैः पर्यायेण मनः सन्निकृष्यते, आत्ममनःसन्निकर्षात् स्मृतयोऽपि पर्यायेण भवन्तीति ॥ २६ ॥

**नान्तःशरीरवृत्तित्वान्मनसः ॥ २७ ॥**

सदेहस्याऽऽत्मनो मनसा संयोगो विपच्यमानकर्माऽऽशयसहितो जीवनमिष्यते। तत्रास्य प्राक् प्रायणादन्तःशरीरे

उत्तरयति।—बुद्धेरनित्यत्वस्य ग्रहणात् उत्पादनाशयोरनुभावकत्वात् तत्कारणे कल्पनीये आत्ममनोयोगादेरुत्पादकत्वमनन्यलभ्यं बुद्धेः संस्कारादेर्वा नाशकत्वं कल्प्यते चरमबुद्धेस्तु अदृष्टनाशात् कालाद्वा नाशः। बुद्धेर्बुद्ध्यन्तरनाश्यत्वेऽनुरूपं दृष्टान्तमाह शब्दवदिति।—शब्दस्य यथा शब्दान्तरनाश्यत्वं चरमशब्दस्य निमित्तनाशनाश्यत्वं तथा प्रकृतेऽपीति भावः ॥ २५ ॥

ननु बुद्धेरात्मगुणत्वे संस्काराऽऽत्ममनोयोगयोः सत्त्वात् स्मृतीनां यौगपद्यं स्यात् अतः कश्चिन् परिहारमाशङ्कते।—ज्ञानं संस्कारकारणं समवेतं यदवच्छेदेन तदवच्छेदेन मनःसन्निकर्षस्य स्मृत्युत्पादकत्वात् तस्य च क्रमिकत्वान्न स्मृतियौगपद्यमित्यर्थः। ज्ञायतेऽनेनेति व्युत्पत्त्या ज्ञानपदं संस्कारपरमित्यन्ये ॥ २६ ॥

तमिमं दूषयति।—उक्तं न युक्तम्, —मनसः अन्तःशरीरवृत्तित्वात् अन्तःशरीरे

वर्त्तमानस्य मनम शरीराद्वहिर्ज्ञानसस्कृतैरात्मप्रदेशै सयोगो नोपपद्यत इति ॥ २७ ॥

**साध्यत्वादहेतु ॥ २८ ॥**

विपच्यमानकर्माऽऽशयमात्र जीवनम, एवञ्च सति साध्यमन्त शरीरवृत्तित्व मनम इति ॥ २८ ॥

**स्मरत शरीरधारणोपपत्तेरप्रतिषेध ॥ २९ ॥**

सुस्मूर्षया खल्वय मन प्रणिदधान चिरादपि कञ्चिदर्थ स्मरति, स्मरतश्च शरीरधारण दृश्यते आत्ममन सान्निकर्षजश्च प्रयत्नो द्विविध —धारक, प्रेरकश्च, नि सृते च शरीराद्वाह्य मनसि धारकस्य प्रयत्नस्याभावात् गुरुत्वात्पतन स्यात् शरीरस्य स्मरत इति ॥ २९ ॥

**न तदाशुगतित्वान्मनस ॥ ३० ॥**

आशुगति मन तस्य वहि शरीरादात्मप्रदेशेन ज्ञानसस्कृतेन सन्निकर्ष, प्रत्यागतस्य च प्रयत्नोत्पादनम उभय युज्यत इति। उत्पाद्य वा धारक प्रयत्न शरीरान्निसरण मनस, अतस्तत्रोपपन्न धारणमिति ॥ ३० ॥

---

वृत्तिर्ज्ञानजनकीभूतो व्यापारो यस्य तत्त्वात शरीरातिरिक्तावच्छेदनाऽऽत्ममनायोगस्य ज्ञानाहेतुत्वाच्छरीरावाच्छन्नस्य हेतुत्व तद्वाधतादवस्थ्यमिति भाव ॥ २७ ॥

एकदेशी शङ्कते।—शरीरावच्छिन्नाऽऽत्ममनोयोगो न हेतु साध्यत्वात प्रामङ्गत्वात् मानाभावादिति भाव ॥ २८ ॥

सिद्धान्तमूत्र।—उक्तप्रतिषेधो न युक्त स्मरत शरीरधारणरूपाया उपपत्ते यत्नो अन्यथा मनसो वाह्यभाव शरीरावाच्छन्नाऽऽत्ममनोयोगाभावेन प्रयत्नाभाव शरीरधारण न स्यादिति भाव ॥ २९ ॥

पुन शङ्कते।—शरीराधारण न मनस आशुगतित्वाच्छीघ्रमेव शरीरपरावृत्ते ॥ ३ ॥

**न स्मरणकालानियमात् ॥ ३१ ॥**

किञ्चित् क्षिप्रं स्मर्य्यते, किञ्चिच्चिरेण, यदा चिरेण तदा सुस्मूर्षया मनसि धार्य्यमाणे चिन्ताप्रबन्धे सति कस्यचिदर्थस्य लिङ्गभूतस्य चिन्तनमाराधितं स्मृतिहेतुर्भवति तच्चैतच्चिरनिश्चरिते मनसि नोपपद्यते इति। शरीरसंयोगानपेक्षश्चाऽऽत्मनःसंयोगो न स्मृतिहेतुः शरीरस्य भोगाऽऽयतनत्वात् उपभोगाऽऽयतनं पुरुषस्य ज्ञातुः शरीरम्, न ततो निश्चरितस्य मनसः आत्मसंयोगमात्रं ज्ञानसुखाऽऽदीनामुत्पत्तौ कल्पते, क्लृप्तौ वा शरीरवैयर्थ्यमिति ॥ ३१ ॥

**आत्मप्रेरणयदृच्छा-ज्ञताभिश्च न संयोग-विशेषः ॥ ३२ ॥**

आत्मप्रेरणेन वा मनसो वहिः शरीरात् संयोगविशेषः स्यात् यदृच्छया वाऽऽकस्मिकतया ज्ञतया वा मनसः सर्वथा चानुपपत्तिः। कथम्?—* स्मर्त्तव्यत्वादिच्छातः स्मरणज्ञानासम्भवाच्च * यदि तावदात्मा "अमुष्यार्थस्य स्मृतिहेतुः संस्कारः अमुष्मिन्नात्मप्रदेशे समवेतः, तेन मनः संयुज्यताम्" इति मनः प्रेरयति, तदा स्मृत एवासावर्थो भवति न स्मर्त्तव्यः। न

---

दूषयति।—मनसः शीघ्रमागमनं न युक्तम्—स्मरणे कालनियमाभावात् कदाचिच्छीघ्रं स्मर्य्यते कदाचित् प्रणिधानात् विलम्बेनापीति। न च प्रणिधानं शरीरान्तःस्थितमनस एव वहिर्निःसरणाव्यवहितपूर्वमेवेति वाच्यम् वहिर्निर्गमनान्तःप्रवेशानुकूलक्रियाविभागाऽऽदिकालकलापं यावच्छरीरधारणं न स्यादिति भावः ॥ ३१ ॥

एकदेशिमतमन्य एकदेशी दूषयति।—वहिः प्रदेशविशेषे मनःसंयोगविशेषो न सम्भवति स हि न स्यात्मात्मप्रेरणेन तस्य स्मरणीयज्ञानपूर्वकतया प्रागेव स्मृत्यापत्तेः। नापि यदृच्छया अकस्मात् आकस्मिकत्वस्य निषेधात्। नापि मनसो

चाऽऽत्मप्रत्यक्ष आत्मप्रदेश संस्कारो वा, तत्रानुपपन्नाऽऽत्म प्रत्यक्षेण संवित्तिरिति। सुस्मूर्षया चायं मन प्रणिदधानश्चिरा दपि कञ्चिदर्थं स्मरति नाकस्मात्। ज्ञत्वञ्च मनसो नास्ति, ज्ञानप्रतिषेधादिति ॥ ३२ ॥

एतञ्च—

## व्यासक्तमनस पादव्यथनेन संयोगविशेषेण समानम् ॥ ३३ ॥

यदा खल्वयं व्यासक्तमना क्वचिद्देशे शर्करया कण्टकेन वा पादव्यथनमाप्नोति तदाऽऽत्ममन संयोगविशेष एषितव्य, दृष्ट हि दुःख दुःखवेदनञ्चेति। तत्रायं समान प्रतिषेध। यदृच्छया तु विशेष, नाऽऽकस्मिकी क्रिया, नाऽऽकस्मिक संयोग इति। * कर्मादृष्टमुपभोगार्थं क्रियाहेतुरिति चेत् समानम, * कर्मा दृष्ट पुरुषस्थ पुरुषोपभोगार्थं मनसि क्रियाहेतु। एवं दुःख दुःखसंवेदनञ्च सिध्यतीत्येवञ्चेन्मन्यसे समानम्, स्मृति हेतावपि संयोगविशेषो भवितुमर्हति। तत्र यदुक्तम्,— "आत्मप्रेरणयदृच्छा ज्ञताभिश्च न संयोगविशेष" इत्ययम प्रतिषेध इति, पूर्वस्तु प्रतिषेध,—"नान्त शरीरवृत्तित्वान्मनस" इति ॥ ३३ ॥

अवश्या मावृततया मनसो ज्ञातृत्वानभ्युपगमात। प्रेरणयदृच्छा ज्ञताभि प्रयत्नेच्छा ज्ञानैरित्यर्थ इति कश्चित तन्न प्रयत्नेनैव चरितार्थत्वाऽऽपत्त ॥ ३२ ॥

एतन्निराकरोति।—वृक्ष्यादिकं प्रसृत कण्टकाऽऽदिना पादव्यथनेन तदवच्छेदेन मन संयोगो यथा जायते तथैतदपीति भाव इतरथा तत्र मन संयोगे ऽप्युक्तदोषा स्यु। अदृष्टविशेषाधीनकर्मवशादयाविति चेत्, तुल्य प्रकृतेऽपीति भाव ॥ ३३ ॥

क्व खल्विदानीं कारणयौगपद्यसद्भावे युगपदस्मरणस्य हेतुरिति?—

**प्रणिधानलिङ्गाऽऽदिज्ञानानामयुगपद्भावात् युगपदस्मरणम् ॥ ३४ ॥**

यथा खल्वात्ममनसोः सन्निकर्षः संस्कारश्च स्मृतिहेतुः एवं प्रणिधानलिङ्गाऽऽदिज्ञानानि तानि च न युगपद्भवन्ति, तत्कृता स्मृतीनां युगपदनुत्पत्तिरिति ॥ ३४ ॥

**प्रातिभवत्तु प्रणिधानाद्यनपेक्षे स्मार्त्ते यौगपद्यप्रसङ्गः ॥ ३५ ॥**

यत् खल्विदं प्रातिभमिव ज्ञानं प्रणिधानाद्यनपेक्षं स्मार्त्तमुत्पद्यते, कदाचित् तस्य युगपदुत्पत्तिप्रसङ्गो हेत्वभावात्। * सतः स्मृतिहेतोरसंवेदनात् प्रातिभेन समानाभिमानः * बह्वर्थविषये वै चिन्ताप्रबन्धे कश्चिदेवार्थः कस्यचित् स्मृतिहेतुः तस्यानुचिन्तनात् तस्य स्मृतिर्भवति न चायं स्मर्त्ता सर्वं स्मृतिहेतुं संवेदयते एवं मे स्मृतिरुत्पन्नेत्यसंवेदनात् प्रातिभमिव ज्ञानमिदं स्मार्त्तमिति। * प्रातिभे कथमिति चेत् पुरुषकर्मविशेषादुपभोगवन्नियमः। * प्रातिभमिदानीं ज्ञानं युगपत् कस्मात् नोत्पद्यते?—यथोपभोगार्थं कर्म युगपदुपभोगं न करोति एवं पुरुषकर्मविशेषः प्रतिभाहेतुर्न युगपदनेकं प्रातिभं ज्ञानमुत्पादयति। * हेत्वभावादयुक्तमिति चेन्न,

स्मरणायौगपद्यं स्वयमुपपादयति।—प्रणिधानं चित्तैकाग्र्यं सुस्मूर्षेति यावत् लिङ्गज्ञानम् उद्बोधकम् उद्बोधकानामानन्त्यादादिपदं ज्ञानान्तरपरतो योजनीयम् तस्य क्रमात् स्मरणक्रमः। यदि च युगपदुद्बोधकानि, तदा तावदयथक्रमस्मरणमिष्यत एव, यथा पदज्ञानादाविति मन्तव्यम् ॥ ३४ ॥

करणस्य प्रत्ययपर्य्याये सामर्थ्यात * उपभोगवन्नियम इत्यस्ति दृष्टान्त। इतुनास्तीति चेन्मन्यसे न करणस्य प्रत्ययपर्य्याये सामर्थ्यात नैकस्मिन ज्ञेये युगपदनेक ज्ञानमुत्पद्यत न चानेकस्मिन, तदिद दृष्टेन प्रत्ययपर्य्यायेणानुमेय करणसामर्थ्य मित्थम्भतमिति। न ज्ञातु विकरणधर्मणो दहनान्तत्वे प्रत्यययौगपद्यादिति, अयञ्च द्वितीय प्रतिषेध। अवास्थत-शरीरस्य चानेकज्ञानसमवायादकप्रदेशे युगपदनेकार्थस्मरण स्यात् * क्वचिदवास्थितशरीरस्य ज्ञातुरिन्द्रियार्थप्रबन्धेन ज्ञानमनकमेकस्मिन्नात्मप्रदेशे समवैति तन यदा मन सयुज्यते, तदा ज्ञातपूर्वस्यानेकस्य युगपत स्मरण प्रसज्यते, प्रदेशस्य सयोगपर्य्यायाभावादिति। * आत्मप्रदेशानामद्रव्या न्तरत्वादेकार्थसमवायस्याविशेषे स्मृतियौगपद्यप्रतिषेधानुप-पत्ति * शब्दसन्ताने तु श्रोत्राधिष्ठानप्रत्यासत्त्या शब्द श्रवणवत सस्कारप्रत्यासत्त्या मनस स्मृत्युत्पत्तेर्न युगपदुत्पत्ति प्रसङ्ग। पूर्व एव तु प्रतिषेध, नानेकज्ञानसमवायादेकप्रदेशे युगपत् स्मृतिप्रसङ्ग इति ॥ ३५ ॥

यत् पुरुषधर्मो ज्ञानम् अन्त करणस्येच्छाद्वेषप्रयत्नसुख दु खानि धर्मा इति कस्यचिद्दर्शन, तत् प्रतिषिध्यते —

**ज्ञस्येच्छाद्वेषनिमित्तत्वादारम्भनिवृत्त्यो ॥ ३६ ॥**

अय खलु जानीते तावत्—इद मे सुखसाधनम्, इद मे दु खसाधनमिति, ज्ञात सुखसाधनमाप्तुमिच्छति दु खसाधन हातुमिच्छति, प्राप्तुम इच्छाप्रयुक्तस्यास्य सुखसाधनावाप्तये समीहाविशेष आरम्भ, जिहासाप्रयुक्तस्य दु खसाधनपरिवर्जन

---

नन्विच्छाऽऽदीनां मनोधर्मत्वाच्चेषा ज्ञानजन्यत्वात् सामानाधिकरण्येन च तत्र कार्य्यकारणभावात् कथ ज्ञानस्याऽऽत्मगुणत्वम्? इत्याशङ्कया सिद्धान्तसूत्रम्।—प्रश्न

निवृत्ति, एवं ज्ञानेच्छाप्रयत्नसुखदुःखानामेकेनाभिसम्बन्धः, एककर्त्तृकत्वं ज्ञानेच्छाप्रवृत्तीनां समानाऽऽश्रयत्वञ्च। तस्माज्ज्ञस्येच्छाद्वेषप्रयत्नसुखदुःखानि धर्मा, नाचेतनस्येति आरम्भनिवृत्त्योश्च प्रत्यगात्मनि दृष्टत्वात् परत्रानुमानं वेदितव्यमिति॥३६॥

अत्र भूतचैतनिक आह,—

**तल्लिङ्गत्वादिच्छाद्वेषयोः पार्थिवाद्येष्वप्रतिषेधः॥३७॥**

आरम्भनिवृत्तिलिङ्गाविच्छाद्वेषाविति यस्याऽऽरम्भनिवृत्ती, तस्येच्छाद्वेषौ, तस्य ज्ञानमिति प्राप्तं पार्थिवाऽऽप्यतैजसवायवीयानां शरीराणामारम्भनिवृत्तिदर्शनादिच्छाद्वेषज्ञानैर्योग इति चैतन्यम्॥३७॥

**परश्वादिष्वारम्भनिवृत्तिदर्शनात्॥३८॥**

शरीरे चैतन्यनिवृत्ति। आरम्भनिवृत्तिदर्शनादिच्छाद्वेषज्ञानैर्योग इति प्राप्तं परश्वादेः करणस्याऽऽरम्भनिवृत्तिदर्शनाच्चैतन्यमिति। अथ शरीरस्येच्छाऽऽदिभिर्योगः, परश्वादेस्तु करणस्याऽऽरम्भनिवृत्ती व्यभिचरतः न तर्ह्ययं हेतुः पार्थिवाऽऽप्यतैजसवायवीयानां शरीराणामारम्भनिवृत्तिदर्शनादिच्छाद्वेषज्ञानैर्योग इति। अयं तर्ह्यन्योऽर्थः "तल्लिङ्गत्वादिच्छाद्वेषयोः पार्थिवा

ज्ञानवत आत्मन इच्छाऽऽदयः। हेतुमाह—आरम्भनिवृत्त्योरिच्छाद्वेषनिमित्तत्वादिति प्रवृत्तिनिवृत्त्योरिच्छाद्वेषजन्यत्वात् तत्र सामानाधिकरण्येन ज्ञानस्य हेतुत्वमिति भावः। यद्वा—अस्य ज्ञानवतः यांविच्छाद्वेषौ तन्निमित्तत्वादित्यर्थः तथा च ज्ञानेच्छाप्रयत्नानां सामानाधिकरण्यं नासिद्धम्॥३६॥

नन्वस्तु तथा सामानाधिकरण्यं परन्तु तेषामधिकरणं कायाकारपार्थिवादिपरमाणुपुञ्ज एवेति चार्वाकः शङ्कते।—पार्थिवाद्येषु देहेषु ज्ञानादेर्न प्रतिषेधः। कुतः—इच्छाद्वेषयोस्तल्लिङ्गत्वादारम्भनिवृत्तिलिङ्गकत्वात् तयोः चेष्टाविशेषलिङ्गकत्वाच्चेष्टाश्रयः शरीरं प्रत्यक्षसिद्धत्वादिति भावः॥३७॥

समाधत्ते प्रतिबन्धमाह।—आरम्भनिवृत्त्यनुमापकक्रियाविशेषदर्शनात् परश्वा

द्येष्वप्रतिषेध'। पृथिव्यादीना भूतानामारम्भस्तावत् त्रस (ट) स्थावरशरीरेष, तदवयवव्यूहलिङ्ग प्रवृत्तिविशेष लोष्टाऽऽदिषु च लिङ्गाभावात् प्रवृत्तिविशेषाभावो निवृत्ति, आरम्भनिवृत्ति लिङ्गाविच्छाद्वेषावित पार्थिवाऽऽप्येष्वणुषु तद्दर्शनादिच्छा द्वेषयोस्तद्योगाज्ज्ञानयोग इति सिद्ध भूतचैतन्यमिति ॥ ३८ ॥

## कुम्भाऽऽदिष्वनुपलब्धेरहेतु ॥ ३९ ॥

कुम्भाऽऽदिमृदवयवाना व्यूहलिङ्ग प्रवृत्तिविशेष आरम्भ सिकताऽऽदिषु प्रवृत्तिविशेषाभावो निवृत्ति न च मृत्सिकताना मारम्भनिवृत्तिदर्शनादिच्छाद्वेषप्रयत्नज्ञानैर्योग, तस्मात् तल्लिङ्ग त्वादिच्छाद्वेषयोरित्यहेतुरिति ॥ ३९ ॥

## नियमानियमौ तु तद्विशेषकौ ॥ ४० ॥

तयोरिच्छाद्वेषयोर्नियमानियमौ विशेषकौ भेदकौ, ज्ञस्येच्छा द्वेषनिमित्त प्रवृत्तिनिवृत्ती न स्वाऽऽश्रये, किं तर्हि?— प्रयोज्याऽऽश्रये। तत्र प्रयुज्यमानेष भूतेषु प्रवृत्तिनिवृत्ती स्त, न सर्वेषु इत्यनियमोपपत्ति। यस्य तु ज्ञानाद्भूतानामिच्छाद्वेष निमित्त आरम्भनिवृत्ती स्वाऽऽश्रये, तस्य नियम स्यात्, यथा भूताना गुणान्तरनिमित्ता प्रवृत्तिर्गुणप्रतिबन्धाच्च निवृत्ति र्भूतमात्रे भवति नियमेन एव भूतमात्रे ज्ञानेच्छाद्वेषनिमित्ते प्रवृत्तिनिवृत्ती स्वाऽऽश्रये स्याताम्। तस्मात् प्रयोजकाऽऽश्रिता ज्ञानेच्छाद्वेषप्रयत्ना, प्रयोज्याऽऽश्रये तु प्रवृत्तिनिवृत्ती इति सिद्धम्। ✓ एकशरीरे तु ज्ञातृबहुत्व निरनुमानम्। * भूतचैत-

दिष ज्ञानाऽऽदावाद्वप्रसङ्ग। तस्मात् क्रियाविशेषाणा प्रयत्नादजन्यत्व सम्बन्धान्तरेण न तु समवायेन व्यभिचारादिति भाव ॥ ३८ ॥

✓ समते व्युत्पादयति।—तद्विशेषकौ तयोश्चेतनाचेतनयो विशेषकौ इतरव्यावर्त्तकौ नियमानियमौ समवायेन जन्यतानियमतदभावौ समवायेन ज्ञानेच्छाऽऽदीना चेतन

(ट) त्रसशब्दस्य जङ्गम इत्यर्थ जङ्गमस्थावरशरीरेष्वित्यर्थ।

निकायपदार्थस्यैकशरीरे बहूनि भूतानि ज्ञानेच्छाद्वेषप्रयत्नगुणा- नीति ज्ञातृबहुत्वं प्राप्तम्, ओमिति ब्रुवतः प्रमाणं नास्ति यथा नाना शरीरेषु नाना ज्ञातारो बुद्ध्यादिगुणव्यवस्थानात् एव मेकशरीरेऽपि बुद्ध्यादिव्यवस्थाऽनुमानं स्यात् ज्ञातृबहुत्वस्येति। *दृष्टश्चान्यगुणनिमित्तः प्रवृत्तिविशेषो भूतानाम् सोऽनुमान मन्यत्रापि दृष्टः करणलक्षणेषु भूतेषु परश्वादिषूपादान- लक्षणेषु च मृत्प्रभृतिष्वन्यगुणनिमित्तः प्रवृत्तिविशेषः, सोऽनु मानम् अन्यत्रापि च त्रसस्थावरशरीरेषु तदवयवव्यूहलिङ्गः प्रवृत्तिविशेषो भूतानामन्यगुणनिमित्त इति, स च गुणः प्रयत्न समानाऽऽश्रयः संस्कारो धर्माधर्मसमाख्यातः सर्वार्थं पुरुषार्था- ऽऽराधनाय प्रयोजको भूतानां प्रयत्नवदिति। आत्मास्तित्व हेतुभिरात्मनित्यत्वहेतुभिश्च भूतचैतन्यप्रतिषेधः कृतो वेदितव्यः, नेन्द्रियार्थयोः तद्विनाशेऽपि ज्ञानावस्थानादिति च समानः प्रतिषेध इति। क्रियामात्रं क्रियोपरममात्रञ्च प्रवृत्तिनिवृत्ती इत्यभिप्रेत्योक्तं —"तल्लिङ्गत्वादिच्छाद्वेषयोः पार्थिवाद्येष्वप्रति षेधः" अन्यथा त्विमे आरम्भनिवृत्ती आख्यातः, न च तथाविधे पृथिव्यादिषु दृश्येते तस्मादयुक्तं तल्लिङ्गत्वादिच्छाद्वेषयोः पार्थिवाद्येष्वप्रतिषेधः' इति॥ ४०॥

भूतेन्द्रियमनसां समानः प्रतिषेधः, मनस्तूदाहरणमात्रम्,—

**यथोक्तहेतुत्वात् पारतन्त्र्यादकृताभ्यागमाच्च न मनसः॥ ४१॥**

इच्छाद्वेषप्रयत्नसुखदुःखज्ञानान्यात्मनो लिङ्गमित्यतः प्रभृति

धर्मत्वात् अवच्छेदकतया च शरीरे तेषां अन्यजनकभावः। परश्वादौ यद्यपि यत्र तत्रा क्रिया वस्तुतस्तु चेष्टैव परश्वादौ क्रियाजनिका यदादिस्तद्धेतुत्वमानाभावः॥४०॥

इच्छाऽऽदीनां मनोगुणत्वाभावे युक्त्यन्तरमाह।—इच्छादय इति शेषः यथोक्त-

यथोक्तं सङ्ख्याते तेन भूतेन्द्रियमनसाञ्चैतन्यप्रतिषेधः । पार-
तन्त्र्यात्—परतन्त्राणि भूतेन्द्रियमनांसि धारणप्रेरणव्यूहन-
क्रियासु प्रयत्नवशात् प्रवर्त्तन्ते चैतन्ये पुनः स्वतन्त्राणि
स्युरिति । अकृताभ्यागमाच्च प्रवृत्तिर्वाग्बुद्धिशरीरारम्भ इति
चैतन्ये भूतेन्द्रियमनसां परकृतं कर्म पुरुषेण भुज्यत इति स्यात्
अचैतन्ये तु तत्साधनस्य स्वकृतकर्मफलोपभोगः पुरुषस्योपप-
द्यत इति ॥ ४१ ॥

अथायं सिद्धोपसङ्ग्रहः,—

**परिशेषाद्यथोक्तहेतूपपत्तेश्च ॥ ४२ ॥**

आत्मगुणो ज्ञानमिति प्रकृतम् । परिशेषो नाम प्रसक्तप्रति-
षेधेऽन्यत्राप्रसङ्गाच्छिष्यमाणे सम्प्रत्ययः भूतेन्द्रियमनसां प्रतिषेधे
द्रव्यान्तरं न प्रसज्यते शिष्यते चाऽऽत्मा, तस्य गुणो ज्ञानमिति
ज्ञायते । यथोक्तहेतूपपत्तेश्चेति ।—दर्शनस्पर्शनाभ्यामेकार्थ-

हेतुत्वात् ज्ञानेच्छाऽऽदीनां सामानाधिकरण्येन कार्यकारणभावात् पारतन्त्र्यात्
मनसश्चानसहकारित्वात् इच्छाऽऽदयो न तद्गुणाः वस्तुतस्तु इच्छाऽऽदीनां पारतन्त्र्यात्
पराधीनविषयताशालित्वात् इच्छाऽऽदीनां हि समानाधिकरणस्वजनकज्ञानविषय एव
विषयता ज्ञानस्यैवाधिकरणे च तन्न स्यादिति भावः । स्वकृतात् स्वयंकृतात् कर्मणः
अभ्यागमो भोगः स मनसो यत्नाऽऽदिसत्त्वे न स्यात् न ह्यन्यकृतात्कर्मणो भोगः न
वा भोगोऽपि मनसः भोक्तृत्वस्यात्माऽऽदिभागिन एवाऽऽत्मत्वात् तद्भिन्ने आत्मनि
मानाभावात् आत्मनः सुखाऽऽदिसाक्षात्कारानुरोधान्महत्त्वम् मनसश्च ध्यानग्राहक-
मानादणुत्वम् अतोऽपि नैक्यम् । न च मनसः परमाणुत्वाल्लाघवाच्च नित्यत्वं तन्मतम्
तथा चाऽऽत्ममनसोर्नित्यत्वात् सदा ज्ञानाऽऽदिप्रसङ्गादनिर्मोक्षः स्यात् अतोऽस्य वरम्
अनित्यत्वं तन्नाशश्च मोक्ष इति वाच्यम् अदृष्टाभावेन नित्ययोरपि वन्ध्ययोरिव
फलाजनकत्वात् । न च ज्ञानाऽऽदिकं प्रकृत्य इत्येतत्सर्वं मन एवेति श्रुतेर्मनस एव
ज्ञानादिकम् अभेदसूचनेनोपादानोपादेयभावकथनादिति वाच्यम् अन्नं वै प्राण
इत्यादौ निमित्तेऽपि अभेदोल्लेखदर्शनात् कारणत्वमात्रे तात्पर्य्यादिति तत्त्वम् ॥ ४१ ॥

आत्मगुणत्वमुपसंहरति ।—इच्छाऽऽदिकमात्मगुण इत्यादि । हेतुमाह — परि-

ग्रहणादित्येवमादीनामात्मप्रतिपत्तिहेतूनामप्रतिषेधादिति, परिशेषज्ञापनार्थं प्रकृतस्थापनाऽऽदिज्ञानार्थञ्च यथोक्तहेतूपपत्ति वचनमिति। अथवोपपत्तेश्चेति हेत्वन्तरमेवेदम्,—नित्यः खल्वयमात्मा यस्मादेकस्मिन् शरीरे धर्मं चरित्वा कायभेदात् स्वर्गे देवेषूपपद्यते अधर्मं चरित्वा देहभेदान्नरकेषूपपद्यत इति उपपत्तिः शरीरान्तरप्राप्तिलक्षणा, सा सति सत्त्वे नित्ये चाऽऽश्रयवती बुद्धिप्रबन्धमात्रे तु निरात्मके निराश्रया नोपपद्यत इति। एकसत्त्वाधिष्ठानश्चानेकशरीरयोगः संसार उपपद्यते, शरीरप्रबन्धोच्छेदश्चापवर्गो मुक्तिरित्युपपद्यते बुद्धिसन्ततिमात्रे त्वेकसत्त्वानुपपत्तेर्न कश्चिद्दीर्घमध्वानं सन्धावति न कश्चिच्छरीरप्रबन्धाद्विमुच्यत इति संसारापवर्गानुपपत्तिरिति। बुद्धिसन्ततिमात्रे च सत्त्वभेदात् सर्वमिदं प्राणिव्यवहारजातमप्रतिसंहितमव्यावृत्तमपरिनिष्ठञ्च (ठ) स्यात् ततः स्मरणाभावान्नान्यदृष्टमन्यः स्मरतीति, स्मरणञ्च खलु पूर्वज्ञातस्य समानेन ज्ञात्रा ग्रहणम् अज्ञासिषममुमर्थं ज्ञेयमिति, सोऽयमेको ज्ञाता पूर्वज्ञातमर्थं गृह्णाति, तच्चास्य ग्रहणं स्मरणमिति, तद् बुद्धिप्रबन्धमात्रे निरात्मके नोपपद्यते ॥ ४२ ॥

## स्मरणन्त्वात्मनो ज्ञस्वाभाव्यात् ॥ ४३ ॥

उपपद्यत इति। आत्मन एव स्मरणं, न बुद्धिसन्ततिमात्रस्येति। तुशब्दोऽवधारणे। कथम्?—ज्ञस्वभावत्वात्, ज्ञ इत्यस्य स्वभावः स्वो धर्मः अयं खलु ज्ञास्यति जानाति अज्ञासीत्

शेषात् शरीराऽऽद्यन्यहेतुनिरासात् यथोक्तहेतूनां दर्शनस्पर्शनाभ्यामेकार्थग्रहणादित्यादीनाम् उपपत्तेः उपपन्नत्वात् ॥ ४२ ॥

स्मृतेरात्मगुणत्वमर्थसिद्धमपि विप्रतिपत्तिनिरासाय पृथगुत्पादयति।—तुरर्थे। ज्ञस्वाभाव्यात् ज्ञानवत्स्वाभाव्यात् ज्ञानत्वावच्छिन्नवत्त्वं ह्यात्मनः स्वभावः अतश्च

(ठ) अपरिनिष्ठानञ्च इत्यपि पाठः।

दिति त्रिकालविषयेणानेकेन ज्ञानेन सम्बध्यते, तच्चास्य त्रिकालविषयं ज्ञानं प्रत्यात्मवेदनीयं ज्ञास्यामि जानामि अज्ञासिषमिति वर्त्तते तत यस्यायं स्वो धर्मः तस्य स्मरणं न बुद्धिप्रबन्धमात्रस्य निरात्मकस्येति ॥ ४३ ॥

स्मृतिहेतूनामयौगपद्यात् युगपदस्मरणमित्युक्तम्। अथ केभ्यः स्मृतिरुत्पद्यते इति?—स्मृतिः खलु—

**प्रणिधाननिबन्धाभ्यासलिङ्गलक्षणसादृश्य-परिग्रहाऽऽश्रयाऽऽश्रितसम्बन्धाऽऽनन्तर्यवियोगैक-कार्यविरोधातिशयप्राप्तिव्यवधानसुखदुःखेच्छाद्वेष-भयार्थित्वक्रियारागधर्माधर्मनिमित्तेभ्यः ॥ ४४ ॥**

सुस्मूर्षया मनसो धारणं—प्रणिधानं, सुस्मूर्षितलिङ्गचिन्तनञ्चार्थस्मृतिकारणम्। निबन्धः खलु—एकग्रन्थोपयमोऽर्थानाम्

---

ज्ञानत्वाच्च क्षणत्वात् तद्धर्मत्वमथात सिद्धम् यद्वा —स्वलाभाव्यात् स्मृतिहेतुज्ञानस्याऽऽत्महात्त्वे सिद्ध स्मृतेरात्मवृत्तित्वमपि सिद्धम् परं तु — ज्ञानस्याऽऽशुविनाशित्वात्कथं स्मृतिहेतुत्वमत्राऽऽह स्मरणमत्यादि।—ज्ञानवत स्वभाव संस्कार तस्मादित्यथ” इत्याह ॥ ४३ ॥

स्मृतेर्यौगपद्यसमाधानाय प्रणिधानाऽऽदीनामुद्बोधकाना क्रमो हेतुरुक्त तत्र प्रणिधानाऽऽदीनि दर्शयति।—स्मरणमित्यनुवर्त्तते। निमित्तशब्दस्य द्वन्द्वात्परं श्रुतस्य प्रत्येकमभिसम्बन्धः। प्रणिधानं मनसो विषयान्तरसञ्चारवारणम् निबन्ध एकग्रन्थोपनिबन्धनम् यथा प्रमाणेन प्रमेयाऽऽदिस्मरणम्। अभ्यास संस्कारबाहुल्यम् एतस्य यद्यपि नोद्बोधकत्वं तथाऽपि सादृश्य शीघ्रमुद्बोधकसमवधान स्यादित्याशयेन तदुपन्यास। अभ्यासो दृढतरसंस्कार उद्बोधकत्वेनोक्त इति केचित्। लिङ्ग व्याप्यम् व्यापकस्य स्मारकम् लक्षण यथा कपिध्वजाऽऽदि अर्जुनादे। सादृश्य देहादे। परिग्रह स्वीकार तस्य स्वस्वामिभावोऽथ तदेकतरेणान्यतरस्मरणम्। आश्रयाऽऽश्रितौ राजाऽऽदितत्परिजनौ परस्परस्मारकौ। सम्बन्धो गुरुशिष्यभावादिः शौवन्यायात् पृथगुक्त। आनन्तर्य्य शौचाचमनादे। वियोगो यथा दारादे। एककार्य्या

एकग्रन्थोपगता खल्वर्था अन्योऽन्यस्मारकत्वेन आनुपूर्व्येणान्यथा वा भवन्तीति। धारणाशास्त्रकृतो वा प्रज्ञातेषु वस्तुषु स्मर्त्तव्यानामुपनिक्षेपो निबन्ध इति। अभ्यासस्तु—समाने विषये ज्ञानानामभ्यावृत्तिरभ्यासजनितः संस्कार आत्मगुणोऽभ्यास शब्देनोच्यते, स च स्मृतिहेतुः समान इति। लिङ्गं पुनः—संयोगि समवाय्येकार्थसमवायि (ङ) विरोधि चेति। संयोगी यथा—धमोऽग्ने गौर्विषाणं, पाणिः पादस्य रूपं स्पर्शस्य, अभूतं भूतस्येति। लक्षणं—पशववयवस्थं गोत्रस्य स्मृतिहेतुः विदानामिदं गर्गाणामर्मिति। सादृश्यं—चित्रगतं प्रतिरूपकम्, देवदत्तस्येत्येवमादि। परिग्रहात्—स्वेन वा स्वामी स्वामिना वा स्वं स्मर्य्यते। आश्रयात्—ग्रामण्या तदधीनं स्मरति। आश्रितात्—तदधीनेन ग्रामण्यमिति। सम्बन्धात्—अन्तेवासिना गुरुं स्मरति ऋत्विजा याज्यमिति। आनन्तर्य्यात् इति—करणीयेष्वर्थेषु। वियोगात्—येन विप्रयुज्यते तद्वियोगप्रतिसंवेदी भृशं स्मरति। एककार्य्यात्—कर्त्रन्तरदर्शनात् कर्त्रन्तरे स्मृतिः। विरोधात्—विजिगीषमाणयोरन्यतरदर्शनादन्यतरः स्मर्य्यते। अतिशयात्—येनातिशय उत्पादितः। प्राप्तेः,—यतो येन किञ्चित्

---

अन्तेवासिप्रभृतयः परस्परस्मारकाः। विरोधादाहिनकुलादेरन्यतरेणापरस्मरणम्। अतिशयः संस्कारः उपनयनाऽऽदरेणाचार्याऽऽदिस्मारकः। प्राप्तिधनाऽऽदेर्दातारं स्मारयति। व्यवधानमावरणम् यथा खड्गाऽऽदः कोषाऽऽदि। सुखदुःखयोरन्यतरेणापरस्य तयोर्वा तत्प्रयोजकस्य वा स्मरणम्। इच्छाद्वेषौ यद्विषयकतया गृहीतौ तस्य स्मारकौ। भयं मरणादेस्तद्धेतोर्वा स्मारकम्। याचना दातुः। क्रिया शाखादेर्वाय्वादेः। रागात् प्रीतं पुत्रादे स्मरणम्। धर्माधर्माभ्यां जन्मान्तरानुभूतसुखदुःखसाधनयो

(ङ) अत्र षष्ठीतत्पुरुषसप्तमीतत्पुरुषसमासौ बोध्यौ यद्वा—षष्ठीतत्पुरुष बहुव्रीहिसमासौ।

आसमासन्न वा भवति तमभीक्ष्णं स्मरति। व्यवधानात्—कोशाऽऽदिभिरसिप्रभृतीनि स्मर्य्यन्ते। सुखदुःखाभ्या—तद्धेतु स्मर्य्यते। इच्छाद्वेषाभ्या—यमिच्छति यञ्च द्वेष्टि, त स्मरति। भयात्— यतो बिभेति। अर्थित्वात्—येनार्थी भोजनेनाऽऽच्छादनेन वा। क्रियाया —रथेन रथकार स्मरति। रागात—यस्या स्त्रिया रक्तो भवति, तामभीक्ष्णं स्मरति। धर्मात्—जात्यन्तरस्मरणम इह चाधीतश्रुतावधारणमिति। अधर्मात—प्रागनुभूतदुःखसाधन स्मरति। न चैतेषु निमित्तेषु युगपत्संवेदनानि भवन्तीति युगपदस्मरणमिति। निदर्शनञ्चेद स्मृतिहेतूना न परिसङ्ख्यानमिति ॥ ४४ ॥

अनित्यायाञ्च बुद्धावुत्पन्नाऽपवर्गित्वात् कालान्तरावस्थानाच्चानित्याना संशय,—किमुत्पन्नाऽपवर्गिणी बुद्धि शब्दवत ?—आहोस्वित कालान्तरावस्थायिनी कुम्भवदिति ? उत्पन्नाऽपवर्गिणीति पक्ष परिगृह्यते। कस्मात ?—

## (ढ) कर्मानवस्थायित्वग्रहणात ॥ ४५ ॥

कर्मणोऽनवस्थायिनो ग्रहणादिति। क्षिप्तस्येषोरापतनात् क्रियासन्तानो गृह्यते, प्रत्यर्थनियमाच्च बुद्धीना क्रियासन्तानवत् बुद्धिसन्तानोपपत्तिरिति। * अवस्थितग्रहणे च व्यवधीयमानस्य प्रत्यक्षनिवृत्ते। * अवस्थिते च कुम्भे गृह्यमाणेन

---

प्रागनुभूतसुखादेश्च स्मरणमिति। उक्तेषु च किञ्चित्स्वरूप सत्किञ्चिच्च ज्ञातमुद्बोधकमित्यव्युत्पादनाय चाय प्रपञ्च ॥ ४४ ॥

समाप्त बुद्ध्यात्मगुणत्वप्रकरणम्।

बुद्धेर्यद्यन्तराविनाश उक्त स च तृतीयक्षणवृत्तिध्वसप्रतियोगित्वसिद्धौ स्यात्, अतो बुद्धेरुत्पन्नापवर्गित्व व्युत्पादनीयम् तत्र सिद्धान्तसूत्रम्।—शरीराऽऽद्यकम

---

(ढ) स्थिरगोचरा बुद्धय क्षणिका, बुद्धित्वात् कर्माऽऽदिबुद्धिवत् इति तात्पर्यटीका।

सन्तानेनैव बुद्धिर्वर्त्तते प्राग्व्यवधानात् तेन व्यवहिते प्रत्यक्षज्ञान निवर्त्तते। कालान्तरावस्थाने तु बुद्धेर्दृश्यव्यवधानेऽपि प्रत्यक्षमवतिष्ठेतेति। स्मृतिश्चानिङ्ग बुद्ध्यवस्थाने संस्कारस्य बुद्धिजन्यस्य स्मृतिहेतुत्वात्। यश्च मन्येतावतिष्ठते बुद्धि दृष्टा हि बुद्धिविषये स्मृति सा च बुद्धावनित्यायां कारणाभावान्न स्यादिति तदिदमलिङ्गम्। कस्मात्?—बुद्धिजो हि संस्कारो गुणान्तरं स्मृतिहेतु न बुद्धिरिति ॥ ४५ ॥

हेत्वभावादयुक्तमिति चेत—

बुद्ध्यवस्थानात् प्रत्यक्षत्वे स्मृत्यभाव ॥ ४६ ॥

यावदवतिष्ठते बुद्धि तावदसौ बोद्धव्योऽर्थ प्रत्यक्ष प्रत्यक्षे च स्मृतिरनुपपन्नेति ॥ ४६ ॥

अव्यक्तग्रहणमनवस्थायित्वात् विद्युत्सम्पाते रूपाव्यक्तग्रहणवत् ॥ ४७ ॥

यद्युत्पन्नाऽपवर्गिणी बुद्धि प्राप्तमव्यक्त बोद्धव्यस्य ग्रहणम् यथा विद्युत्सम्पाते वैद्युतस्य प्रकाशस्यानवस्थानादव्यक्त रूपग्रहणमिति। व्यक्त तु द्रव्याणां ग्रहण तस्मादयुक्तमेतदिति ॥४७॥

हेतूपादानात् प्रतिषेद्धव्याभ्यनुज्ञा ॥ ४८ ॥

उत्पन्नाऽपवर्गिणी बुद्धिरिति प्रतिषेद्धव्य तदेवाभ्यनुज्ञायते विद्युत्सम्पाते रूपाव्यक्तग्रहणवदिति। * यत्राव्यक्त ग्रहण,

धारायां मनवस्थायां प्रत्यक्षधाराऽपि बाध्या न चान्यद्बुद्धेरुत्तरोत्तरग्राहकत्व विरस्य व्यापाराभावात् पूर्वपूर्वस्य च परपरेऽननुभवादिनाशसिद्धावाश्रयनाशादेरभावाद्विरोधिगुणस्यैव नाशकत्वमिति कथमवस्थायित्वग्रहणादात वाऽर्थ ॥४५॥

ग्रहते।—बुद्धिरप्याशुविनाशिनी स्यात योग्याशुविशेषगुणत्वादृष्टधर्मिग्राहिणी न स्यात् विद्युत्सम्पातकालीनवस्तुग्रहणवत् न चैव तस्मान्न तथेत्यर्थ ॥ ४७ ॥

उत्तरयति।—प्रतिषेद्धव्यस्य बुद्धेराशुविनाशित्वस्याभ्यनुज्ञा त्वया कृता

नीत्पन्नाऽपवर्गिणो बुद्धिरिति ग्रहणहेतुविकल्पाद्ग्रहणविकल्प, न बुद्धिविकल्पात्, * यदिद क्वाचदव्यक्त ग्रहणम अय विकल्पो ग्रहणहेतुविकल्पात् , यत्रानवस्थितो ग्रहणहेतु तत्राव्यक्त ग्रहण यत्रावस्थित, तत्र व्यक्त न तु बुद्धेरवस्थानानवस्था नाभ्यामिति। कस्मात ? —अर्थग्रहण हि बुद्धि यत्तदर्थग्रहण मव्यक्त व्यक्त वा, बुद्धि सेति। विशेषाग्रहणे च सामान्यग्रहण मात्रमव्यक्तग्रहणम् , तत्र विषयान्तरे बुद्ध्यन्तरानुत्पत्तिनिमित्ता भावात्। यत्र समानधमयुक्तस्य धर्मी गृह्यते विशषधर्मयुक्तश्च, तद्व्यक्त ग्रहणम् , यत्र तु विशेषऽगृह्यमाणे सामान्यग्रहणमात्र तदव्यक्त ग्रहणम। समानधर्मयोगाच्च विशिष्टधर्मयोगो विषया न्तर तत्र यत् ग्रहणं न भवति तत् ग्रहणनिमित्ताभावात् न बद्धरनवस्थानादिति। यथाविषयञ्च ग्रहण व्यक्तमेव प्रत्यर्थं नियतत्वाच्च बुद्धीनाम सामान्यविषयञ्च ग्रहण स्वविषयं प्रति व्यक्त विशेषविषयञ्च प्रत्यव्यक्तम , विशेषविषयञ्च ग्रहण स्वविषय प्रति व्यक्तम् प्रत्यर्थनियता हि बुद्धय , तदिदमव्यक्त-ग्रहण देशित क्व विषये बुद्ध्यनवस्थानकारित स्यादिति। धर्मिणस्तु धर्मभेद बुद्धिनानात्वस्य भावाभावाभ्या तदुपपत्ति धर्मिण खल्वर्थस्य समानाश्च धर्माविशिष्टाश्च तेष प्रत्यर्थनियता नानाबुद्धय , ता उभय्यो यदा धर्मिणि वर्त्तन्ते, तदा व्यक्त ग्रहणं धर्मिणमभिप्रेत्य, यदा तु सामान्यग्रहणमात्र तदाऽव्यक्त ग्रहण मिति। एव धर्मिणमभिप्रेत्य व्यक्ताव्यक्तयोर्ग्रहणयोरुपपत्ति रिति , न चेदमव्यक्त ग्रहण बुद्धेर्नोद्भव्यस्य वाऽनवस्थायित्वादुप पद्यत इति ॥ ४८ ॥

विरतृत्पत्तादृष्टानदपस हेतो साधकस्य उपादानात्, तथा चांशतो वाध इति भाव ॥ ४८ ॥

इद हि न,—

**प्रदीपार्चिःसन्तत्यभिव्यक्तग्रहणवत्तद्ग्रहणम् ॥४९॥**

अनवस्थायित्वेऽपि बुद्धेस्तेषा द्रव्याणा ग्रहण व्यक्त प्रतिपत्तव्यम, कथम ?—प्रदीपार्चिःसन्तत्यभिव्यक्तग्रहणवत्। प्रदीपार्चिषा सन्तत्या वर्त्तमानाना ग्रहणानवस्थान ग्राह्यानवस्थानञ्च प्रत्यर्थनियतत्वात् बुद्धीना यावन्ति प्रदीपार्चींषि तावत्यो बुद्धय इति दृश्यते चात्र व्यक्त प्रदीपार्चिषा ग्रहणमिति ॥४९॥

चेतना शरीरगुण, सति शरीरे भावादसति चाभावादिति —

**द्रव्ये स्वगुणपरगुणोपलब्धे संशय ॥ ५० ॥**

सांशयिक इति भाव । स्वगुणोऽप्सु द्रवत्वमुपलभ्यते, परगुणश्चोष्णता तेनाय संशय, कि शरीरगुणश्चेतना शरीरे गृह्यते, अथ द्रव्यान्तरगुण ? इति ॥ ५० ॥

**यावच्छरीरभावित्वाद्रूपाऽऽदीनाम् ॥ ५१ ॥**

न शरीरगुणश्चेतना, कस्मात ?—न रूपाऽऽदिहीन शरीर गृह्यते चेतनाहीनन्तु गृह्यते यथोष्णताहीना आप, तस्मान्न

अस्तु तर्हि सदृष्टान्तनान्यासां बुद्धीनामनवस्थायित्वमित्याह।—यथा प्रदीपार्चिषां सन्तन्यमानानामनवस्थायित्वेऽप्यभिव्यक्तग्रहणं तथाऽन्यत्रापि स्यात् विद्युत्सम्पात स्थले या बुद्धिरव्यक्ता सा स्वविषये व्यक्तैवेति भाव ॥ ४९ ॥

समाप्तं बुद्ध्युत्पन्नाऽपवर्गित्वप्रकरणम् ।

अथ बुद्धेः शरीरगुणत्वाभावप्रकरणम्। न च प्रागेव तत्सिद्धेरनारम्भणीयमेतत्, शरीरेऽहं जानामीत्याद्यनुभवेन तत्साधकानामाभासीकरणात् अतो विशिष्य तद्दूषणाय संशयबीजमाह।—द्रव्ये चन्दनाऽऽदौ स्वगुणस्य रूपाऽऽदेः परगुणस्य शैत्यादेश्च ग्रहात् एवं शरीरे रूपाऽऽदेरौष्ण्यस्य च ग्रहात् बुद्ध्यादिः शरीरगुणो न वेति संशय ॥ ५० ॥

तत्र सिद्धान्तसूत्रम्।—"न शरीरगुणश्चेतना" इति पादो भाष्यस्थ पूरणं, न

१

शरीरगुणश्चेतनेति । संस्कारवदिति चेत न कारणानुच्छेदात । यथाविध द्रव्ये संस्कार तथाविधे एवापरम, न तत्र कारणोच्छेदात अत्यन्त संस्कारानुपपत्तिर्भवति, यथाविधे शरीरे चेतना गृह्यते तथाविध एवात्यन्तोपरमश्चेतनाया गृह्यते तस्मात संस्कारवदित्यसम समाधि । अथापि शरीरस्थ चेतनोत्पत्तिकारण स्यात द्रव्यान्तरस्थ वोभयस्थ वा तत्र, नियमहेत्वभावात । शरीरस्थेन कदाचिच्चेतनोत्पद्यते कदाचिन्न इति नियमहेतुर्नास्तीति, द्रव्यान्तरस्थेन शरीर एव चेतनोत्पद्यते न लोष्टाऽऽदिषु इत्यत्र न नियमहेतुरस्तीति । उभयस्थ निमित्तत्व शरीरसमानजातीये द्रव्ये चेतना नोत्पद्यत शरीर एव चोत्पद्यत इति नियमहेतुर्नास्तीति ॥ ५१ ॥

यश्च मन्येत सति श्यामादिगुणे द्रव्ये श्यामाद्युपरमो दृष्ट, एव चेतनोपरम स्यादिति —

## न पाकजगुणान्तरोत्पत्ते ॥ ५२ ॥

नात्यन्त रूपोपरम द्रव्यस्य श्यामे रूपे निवृत्ते पाकज गुणान्तर रक्त रूपमुत्पद्यते, शरीरे तु चेतनामात्रोपरमो ऽत्यन्तमिति ॥ ५२ ॥

शरीराविशेषगुण इत्यर्थ । अय तर्काऽऽकार बुद्ध्यादिक शरीराविशेषगुण स्यात् यावच्छरीरभावि स्यात रूपाऽऽदिवत् तत्पारम्पर्य्य चानुमानम् बुद्ध्यादिक न शरीर विशेषगुण अयावद्द्रव्यभावित्वात शब्दवत् व्यतिरेक रूपवद्वा । अयावद्द्रव्यभावित्वञ्च चाश्रयत्वाभिमतकालाननाश्रयप्रतियोगित्वम् ॥ ५१ ॥

पिठरपाकमत व्यभिचारमाशङ्कते ।—शरीरे पाकाधीनरूपाऽऽदेर्ना व्यभिचारा शङ्का साधने युक्तमित्यर्थ । परं तु सिद्धान्तसूत्रमवदत् । तथा हि पाकजरूपे न व्यभिचार शङ्कनीय पाकजगुणान्तरस्य रूपान्तरस्योत्पत्त । तथा च स्वसमानाधि करणस्वसमानजातीय समानकालीनत्व पूर्वोक्तहेतौ नाशप्रतियोगित्वे विशेषणीय मित्यर्थ इत्याह ॥ ५२ ॥

## प्रतिद्वन्द्विसिद्धे पाकजानामप्रतिषेधः ॥५३॥

अथापि यावत्सु द्रव्येषु पूर्वगुणप्रतिद्वन्द्विसिद्धि, तावत्सु पाकजोत्पत्तिर्दृश्यते, पूर्वगुणैः सह पाकजानामवस्थानस्याग्रहणात, न च शरीरे चेतनाप्रतिद्वन्द्विसिद्धौ सहानवस्थायि गुणान्तरं गृह्यते, येनानुमीयेत, तेन चेतनाया विरोध तस्मादप्रतिषिद्धा चेतना यावच्छरीरं वर्त्तेत, न तु वर्त्तते, तस्मान्न शरीरगुणश्चेतना इति ॥ ५३ ॥

इतश्च न शरीरगुणश्चेतना —

## शरीरव्यापित्वात् ॥ ५४ ॥

शरीरं शरीरावयवाश्च सर्वे चेतनोत्पत्त्या व्याप्ता इति न क्वचिदनुत्पत्तिश्चेतनायाः, शरीरवच्छरीरावयवाश्चेतना इति प्राप्तं चेतनबहुत्वम्, तत्र यथा प्रतिशरीरं चेतनबहुत्वे सुख दुःखज्ञानानां व्यवस्थालिङ्गम् एवमेकशरीरेऽपि स्यात् न तु भवति, तस्मान्न शरीरगुणश्चेतनेति ॥ ५४ ॥

सिद्धान्तसूत्रम् ।—पाकजानां प्रतिद्वन्द्विनि पूर्वशरीरप्रतिरूपके शरीरान्तरं सिद्धं घटाऽऽदौ पाकजरूपसम्भवेऽपि शरीरे न तत्सम्भवः शरीरावयवानां चर्माऽऽदीनामग्नि संयोगविशेषेण नाशाऽऽवश्यकत्वात् । परे तु पाकजानां प्रतिद्वन्द्विनोऽग्निसंयोगात् सिद्धे तथा च तादृशाग्निसंयोगासमानाधिकरणत्वमर्थः तेनाग्निसंयोगनाश्येऽग्निसंयोगजन्ये च न व्यभिचार इत्याहुः । अन्ये तु शरीरगुणत्वाभावे हेत्वन्तरमाह प्रतिद्वन्द्वीति ।—पाकजानां पूर्वरूपाऽऽदिकं प्रतिद्वन्द्वि विरोधि एकस्मिन् रूपे विद्यमाने रूपान्तरा भावात् प्रकृते त्वेकस्मिन् ज्ञाने सत्यपि द्वितीयक्षणे ज्ञानान्तरोत्पत्तेर्ज्ञानादिकं न शरीरविशेषगुणः इत्यर्थ इत्याहुः ॥ ५३ ॥

हेत्वन्तरमाह ।—शरीरविशेषगुणानामिति शेषः ज्ञानसुखाऽऽदिकन्तु न शरीर व्यापकम् हृदयाद्यवच्छेदेन तदानुभविकत्वादिति भावः ॥ ५४ ॥

यदुक्तं न क्वचिच्छरीरावयवे चेतनाया अनुत्पत्तिरिति, सा,—

**न केशनखाऽऽदिष्वनुपलब्धे ॥ ५५ ॥**

केशेषु नखाऽऽदिषु चानुत्पत्तिश्चेतनाया इति अनुपपन्नं शरीरव्यापित्वमिति ॥ ५५ ॥

**त्वक्पर्य्यन्तत्वाच्छरीरस्य केशनखाऽऽदिष्वप्रसङ्गः ॥५६॥**

इन्द्रियाऽऽश्रयत्वं शरीरलक्षणं त्वक्पर्य्यन्तं जीवमनःसुखदुःखसंवित्त्यायतनभूतं शरीरम्, तस्मान्न केशाऽऽदिषु चेतनोत्पद्यते। अर्थकारितस्तु शरीरोपनिबन्धः केशाऽऽदीनामिति ॥ ५६॥

इतश्च न शरीरगुणश्चेतना —

**शरीरगुणवैधर्म्यात् ॥ ५७ ॥**

द्विविधश्च शरीरगुणः, अप्रत्यक्षश्च गुरुत्वम् इन्द्रियग्राह्यश्च रूपाऽऽदिः विधाऽन्तरन्तु चेतना प्रत्यक्षा संवद्यत्वात्, नेन्द्रियग्राह्या मनोविषयत्वात, तस्मात् द्रव्यान्तरगुण इति ॥ ५७ ॥

**न रूपाऽऽदीनामितरेतरवैधर्म्यात ॥ ५८ ॥**

यथेतरेतरविधर्माणो रूपाऽऽदयो न शरीरगुणत्वं जहति एवं रूपाऽऽदिवैधर्म्याच्चेतना शरीरगुणत्वं न हास्यतीति ॥ ५८ ॥

देशयति।—शरीररूपाऽऽदेराश्रयव्यापकत्वं न शारीरस्य गौररूपस्यशाऽऽदः केशनखादावनुपलब्धिरित्यर्थः ॥ ५५ ॥

दूषयति।—स्पष्टम्। अन्ये तु—चेतना न शरीरगुणः शरीरव्यापित्वात् शरीरतदवयवेषु सर्वथैकेन सम्बन्धेन सत्त्वात् शरीरगुणस्तु न स्वावयववृत्ति शङ्कते न केशेति।—एतन्यस्यानुपलब्धे। समाधत्ते त्वगितीत्याह ॥ ५६ ॥

हेत्वन्तरमाह।—बुद्धिः न शरीरगुणः शरीरगुणवैधर्म्यात् बहिरिन्द्रियाऽऽवेद्यत्वे सति मनसा वेद्यत्वात् ॥ ५७ ॥

आक्षिपति।—नोक्तं युक्तं रूपाऽऽदीनां परस्परवैधर्म्यात् तथा च तद्रीत्या स्पर्शाऽऽदीनां शरीरगुणत्वं न स्यात्, अचाक्षुषत्वात् तथा चोक्तमप्रयोजकमिति भावः ॥५८॥

ऐन्द्रियकत्वाद्रूपाऽऽदीनामप्रतिषेध ॥ ५९ ॥

अप्रत्यक्षत्वाच्चेति । यथेतरेतरविधर्माणो रूपाऽऽदयो न द्वैविध्यमतिवर्त्तन्ते, तथा चेतनाऽपि नातिवर्त्तेत यदि शरीरगुण स्यादिति । अतिवर्त्तते तु, तस्मान्न शरीरगुण इति ॥ ५९ ॥

भूतेन्द्रियमनसां ज्ञानप्रतिषेधात् सिद्धे सत्याऽऽरम्भो विशेष ज्ञापनार्थ बहुधा परीक्ष्यमाण तत्त्व सुनिश्चिततरं भवतीति परीक्षिता बुद्धि । मनस इदानीं परीक्षाक्रम । तत् किं प्रतिशरीरमेकमनेकम ? इति विचार —

ज्ञानायौगपद्यादेक मन ॥ ६० ॥

अस्ति खलु वै ज्ञानायौगपद्यमेकैकस्येन्द्रियस्य यथाविषय करणस्यैकप्रत्ययानवृत्तौ सामर्थ्यान्न तदेकत्वे मनसो लिङ्गम्, यत्तु खल्विदमिन्द्रियान्तराणां विषयान्तरेषु ज्ञानायौगपद्य मिति तल्लिङ्गम्, कस्मात ?—सम्भवति खलु वै बहुषु मनस्सु इन्द्रियमन सयोगयौगपद्यमिति ज्ञानयौगपद्य स्यात न तु भवति, तस्माद्विषये प्रत्ययपर्य्यायादेक मन ॥ ६० ॥

---

समाधत्ते ।—रूपाऽऽदीना न शरीरगुणत्वप्रतिषेध । कुत ?—ऐन्द्रियकत्वात् । तत्तदिन्द्रियग्राह्यत्वलक्षणतत्तद्गुणवधर्म्येऽपि शरीरगुणत्वावच्छिन्नधर्मस्य बाह्येन्द्रियग्राह्यत्वे सति ग्राह्यत्वस्याभावात् बुद्धौ च तत्सत्त्वादिति भाव ॥ ५९ ॥

समाप्त चेद शरीरगुणभेदप्रकरणम् ।

अथ क्रमप्राप्ता मन परीक्षा तत्र प्रतिशरीरमेकं मनश्चक्षुरादिसहकारितया मन पञ्चक वीत सर्वार्थ मन पञ्चकसर्वोचितम् तेन च प्रत्येक सकलमन सम्बन्धासम्बन्धाभ्यां व्यासङ्गयौगपद्ये उपपद्यते इति पूर्वपक्षे सिद्धान्तसूत्रम् ।— प्रतिशरीरं मनोनानात्वे व्यासङ्गस्थलेऽपि यौगपद्य स्यात् अतो न मनोनानात्वमिति भाव ॥ ६ ॥

न युगपदनेकक्रियोपलब्धेः ॥ ६१ ॥

अयं खल्वध्यापकोऽधीते व्रजति कमण्डलुं धारयति पन्थानं पश्यति शृणोत्यरण्यजान् शब्दान् बिभ्यत् व्याललिङ्गानि बुभुत्सते स्मरति च गन्तव्यं स्थानीयमिति क्रमस्याग्रहणात् युगपदेताः क्रिया, इति प्राप्तं मनसां बहुत्वमिति॥६१॥

अलातचक्रदर्शनवत्तदुपलब्धिराशुसञ्चारात् ॥६२॥

आशुसञ्चारादलातस्य भ्रमतो विद्यमानः क्रमो न गृह्यते क्रमस्याग्रहणादविच्छेदबुद्ध्या चक्रवद्बुद्धिर्भवतीति, तथा बुद्धीनां क्रियाणाञ्चाऽऽशुवृत्तित्वाद्विद्यमानः क्रमो न गृह्यते, क्रमस्याग्रहणात् युगपत् क्रिया भवन्तीत्यभिमानो भवति। किं पुनः क्रमस्याग्रहणात् युगपत् क्रियाऽभिमानः ?—अथ युगपद्भावादेव युगपदनेकक्रियोपलब्धिरिति ? नात्र विशेषप्रतिपत्तेः कारणमुच्यत इति। उक्तमिन्द्रियान्तराणां विषयान्तरेषु पर्यायेण बुद्धयो भवन्तीति, तच्चाप्रत्याख्येयमात्मप्रत्यक्षत्वात्। अथापि दृष्टश्रुतानर्थाश्चिन्तयतः क्रमेण बुद्धयो वर्त्तन्ते, न युगपत् अनेनानुमातव्यमिति। वर्णपदवाक्यबुद्धीनां तदर्थबुद्धीनाञ्चाऽऽशुवृत्तित्वात् क्रमस्याग्रहणम्, कथम् ?—वाक्यस्थेषु खलु वर्णेषूच्चरत्सु प्रतिवर्णं तावत् श्रवणं भवति, श्रुतं वर्णमेकमनेकं वा पदभावेन स प्रतिसन्धत्ते प्रतिसन्धाय पदं व्यवस्यति, पदव्यवसायेन स्मृत्या पदार्थं प्रतिपद्यते, पदसमूहप्रतिसन्धानाच्च वाक्यं व्यवस्यति, सम्बद्धांश्च पदार्थान् गृहीत्वा वाक्यार्थं प्रतिपद्यते न चाऽसौ क्रमेण वर्त्तमानानां बुद्धीनामाशुवृत्तित्वात्

---

दीर्घशष्कुलीभक्षणाऽऽदौ ज्ञानयौगपद्यज्ञानात् स्यादित्याशङ्कते।—न एकं मनः अनेकक्रियाणाम् अनेकज्ञानानाम्, उपलब्धिरित्यर्थः ॥ ६१ ॥

समाधत्ते।—क्रमिकेऽपि तज्ज्ञाने यौगपद्योपलब्धिः, आशुसञ्चारात् शीघ्रसञ्चा

क्रमो गृह्यते, तदेतदनुमानमतश्च बुद्धिक्रियायौगपद्याभि मानस्येति, न चास्ति मुक्तसंशया युगपदुत्पत्तिर्बुद्धीनां, यया मनसां बहुत्वमेकशरीरेऽनुमीयत इति ॥ ६२ ॥

## यथोक्तहेतुत्वाच्चाणु ॥ ६३ ॥

अणु मन एकञ्चेति धर्मसमुच्चयो ज्ञानायौगपद्यात्, महत्त्वे मनसः सर्वेन्द्रियसंयोगात् युगपद्विषयग्रहणं स्यादिति ॥ ६३ ॥

मनसः खलु भो ! सेन्द्रियस्य शरीरे वृत्तिलाभो नान्यत्र शरीरात्, ज्ञातुश्च पुरुषस्य शरीराऽऽयतना बुद्ध्यादयो, विषयोपभोगो जिहासितहानमीप्सितावाप्तिश्च सर्वे च शरीराऽऽश्रया व्यवहाराः । तत्र खलु विप्रतिपत्तेः संशयः —किमयं पुरुषकर्म निमित्तः शरीरसर्गः ?—आहोस्वित् भूतमात्रादकर्मानिमित्तः ? इति । श्रूयते खल्वत्र विप्रतिपत्तिरिति । तत्रेदं तत्त्वम्,—

## पूर्वकृतफलानुबन्धात्तदुत्पत्तिः ॥ ६४ ॥

पूर्वशरीरे या प्रवृत्तिर्वाग्बुद्धिशरीराऽऽरम्भलक्षणा, तत् पूर्वकृतं कर्मोक्तं तस्य फलं तज्जनितौ धर्माधर्मौ, तत्फलस्यानुबन्धः आत्मसमवेतस्यावस्थानं, तेन प्रयुक्तेभ्यो भूतेभ्यस्तस्योत्पत्तिः शरीरस्य, न स्वतन्त्रेभ्य इति । यदधिष्ठानोऽयमात्माऽयमहमिति मन्यमानो यत्राभियुक्तो यत्रोपभोगतृष्णया विषयानुपलभमानो धर्माधर्मौ संस्करोति, तदस्य

राऽऽत्मकदोषात् यथा अलातचक्रे वेगातिशयेन भ्राम्यमाणे क्रियासन्तानस्य भेदनानुपलब्धिरिति ॥ ६२ ॥

ननु यौगपद्योपपादकतया मनसो विभुत्व स्यादत आह।—मन इति शेषः यथोक्तस्य ज्ञानायौगपद्यस्य हेतुत्वान्मनोऽणुत्वसाधकत्वादित्यर्थः ॥ ६३ ॥

समाप्तं मनःपरीक्षाप्रकरणम् ।

अथ प्रसङ्गाच्छरीरस्य तत्पुरुषादृष्टनिष्पाद्यताप्रकरणम्, अथवा एकत्रैव शरीरे मनसः सर्वैरात्मभिः सह संयोगात् सर्वत्रैव मनसा ज्ञानं जन्यताम्, अतस्तददृष्टजन्यता

शरीर, तेन संस्कारेण धर्माधर्मलक्षणेन भूतसहितेन पतितेऽस्मिन् शरीरे उत्तरं निष्पाद्यते निष्पन्नस्य चास्य पूर्वशरीरवत् पुरुषार्थं क्रिया पुरुषस्य च पूर्वशरीरवत् प्रवृत्तिरिति कर्मापेक्षेभ्यो भूतेभ्य शरीरसर्गे सत्येतदुपपद्यत इति। दृष्टा च पुरुषगुणेन प्रयत्नेन प्रयुक्तेभ्यो भूतेभ्य पुरुषार्थक्रियासमर्थाना द्रव्याणा रथप्रभृतीना मुत्पत्ति, तथाऽनुमातव्य—शरीरमपि पुरुषार्थक्रियासमर्थमुत्पद्यमान पुरुषस्य गुणान्तरापेक्षेभ्यो भूतेभ्य उत्पद्यत इति ॥ ६४ ॥

अत्र नास्तिक आह —

**भूतेभ्यो मूर्त्त्युपादानवत् तदुपादानम् ॥ ६५ ॥**

यथा कर्मनिरपेक्षेभ्यो भूतेभ्यो निर्वृत्ता मूर्त्तय सिकता शर्करापाषाणगैरिकाञ्जनप्रभृतय पुरुषार्थकारित्वादुपादीयन्ते, तथा कर्मनिरपेक्षेभ्यो भूतेभ्य शरीरमुत्पन्न पुरुषार्थकारित्वा दुपादीयत इति ॥ ६५ ॥

**न साध्यसमत्वात् ॥ ६६ ॥**

यथा शरीरोत्पत्तिरकर्मनिमित्ता साध्या तथा सिकता शर्करापाषाणगैरिकाञ्जनप्रभृतीनामप्यकर्मनिमित्त सर्ग साध्य, साध्यसमत्वादसाधनमिति। भूतेभ्यो मूर्त्त्युपादानवत् तदिति चानेन साध्यम् ॥ ६६ ॥

---

प्रतिपादनप्रकरणम्। तत्र शरीरं तत्तत्पुरुषसमवेतादृष्टनिमित्तकं न वा? इति विप्रतिपत्तौ निषेधकोटिस्तथा —अदृष्टाभावात् तस्य शरीरहेतुत्वाभावात् अदृष्टस्य आत्मसमवायाभावाद्वा। तत्राऽऽद्य पक्ष निरस्यति।—पूर्वकृतस्य यागदानहिंसाऽऽदे फलस्य धर्माधर्मरूपस्य अनुबन्धात् सहकारिभावात्, तस्य शरीरस्य उत्पत्ति ॥ ६४ ॥

आक्षिपति —भूतेभ्य इति सावधारणम् तथा चादृष्टनिरपेक्षेभ्यो भूतेभ्य परमाणुभ्य मूर्त्तेर्मृदादे उपादानमारम्भो यथा तथैव तस्य शरीरस्य उपादानमारम्भ परमाणुभ्योऽदृष्टनिरपेक्षेभ्य इत्यर्थ ॥ ६५ ॥

समाधत्ते।—नोक्तं युक्तं दृष्टान्तस्य साध्यसमत्वात् पक्षसमत्वात्, घटादेरप्यदृष्टसापेक्षपरमाणुभ्य एवोत्पत्तेरुपगमात्तदजन्यत्वस्य तत्रासिद्धेरिति भाव ॥ ६६ ॥

नोत्पत्तिनिमित्तत्वान्मातापित्रोः ॥ ६७ ॥

विषमश्चायमुपन्यासः । कस्मात्?—निर्बीजा इमा मूर्त्तय उत्पद्यन्ते, बीजपूर्विका तु शरीरोत्पत्तिः । मातापितृशब्देन लोहितरेतसी बीजभूते गृह्येते तत्र सत्त्वस्य गर्भवासानुभवनीयं कर्म पित्रोश्च पुत्रफलानुभवनीये कर्मणी मातुर्गर्भाऽऽशये शरीरोत्पत्तिं भूतेभ्यः प्रयोजयन्तीत्युपपन्नं बीजानुविधानमिति ॥ ६७ ॥

तथाऽऽहारस्य ॥ ६८ ॥

उत्पत्तिनिमित्तत्वादिति प्रकृतम् । भुक्तं पीतमाहारः, तस्य पक्तिनिर्वृत्तो रसद्रव्यं मातृशरीरे चोपचीयते बीजं गर्भाऽऽशयस्थं बीजसमानपाकं मात्रया चोपचयो बीजे यावद्व्यूहसमर्थः सञ्चय इति । सञ्चितं चार्बुदमांसपेशीकललकण्डराशिरःपाणिपादादिना च व्यूहेनेन्द्रियाधिष्ठानभेदेन व्यूह्यते व्यूहे च गर्भनाड्याऽवतारितं रसद्रव्यमुपचीयते यावत्प्रसवसमर्थमिति, न चायमन्नपानस्य स्थाल्यादिगतस्य कल्प्यत इति, एतस्मात् कारणात् कर्मनिमित्तत्वं शरीरस्य विज्ञायत इति ॥ ६८ ॥

प्राप्तौ चानियमात् ॥ ६९ ॥

न सर्वो दम्पत्योः संयोगो गर्भाऽऽधानहेतुर्दृश्यते, तत्रासति कर्मणि न भवति, सति च भवतीत्यनुपपन्नो नियमाभाव इति ।

न मृदादिसाम्यमित्याह सूत्राभ्याम् ।—शरीरे न मृदादिसाम्यं मातापित्रोः कर्मणः शरीरोत्पत्तिनिमित्तत्वात् पुत्रदर्शनाऽऽदिजन्यसुखानुभावकादृष्टस्य देवाऽऽराधनाऽऽदिजन्यस्य पुत्राऽऽदिनिमित्तत्वात् । एवं मातापित्रोराहारस्य शरीरोत्पत्तिनिमित्तत्वाददृष्टसहकारिणाऽऽहारस्य शुक्रशोणितादिद्वारा कललादिजनकत्वात् । आहारस्य पितामहपितृभोजनादेरदृष्टद्वारा पुत्रजनकत्वादित्यर्थ इत्यन्ये ॥ ६७ ॥ ६८ ॥

आहारस्यादृष्टसहकारित्वे विपक्षे बाधकमाह ।—प्राप्तौ दम्पत्योः सम्भोगे

कर्मनिरपेक्षेषु भूतेषु शरीरोत्पत्तिहेतुषु अनियम स्यात न ह्यत्र कारणाभाव इति ॥ ६८ ॥

अथापि —

**शरीरोत्पत्तिनिमित्तवत संयोगोत्पत्तिनिमित्त कर्म ॥ ७० ॥**

यथा खल्विद शरीर धातुप्राणसवाहिनीना नाडीना शुक्रान्ताना धातूनाञ्च स्नायुस्थिशिरापेशीकललकण्डराणाञ्च शिरोबाहूदराणा सक्थाञ्च कोष्ठगाना वातपित्तकफानाञ्च मुख कण्ठहृदयाऽऽमाऽऽशयपक्वाऽऽशयाध स्रोतसाञ्च परमदु खसम्पादनीयेन सन्निवेशेन व्यूहनमशक्य पृथिव्यादिभि कर्मनिरपेक्षै रुत्पादयितुमिति कर्मनिमित्ता शरीरोत्पत्तिरिति विज्ञायते, एवञ्च प्रत्यात्मनियतस्य निमित्तस्याभावान्निरतिशयै आत्मभि सम्बन्धात सर्वाऽऽत्मनाञ्च समानै पृथिव्यादिभिरुत्पादित शरीर पृथिव्यादिगतस्य च नियमहेतोरभावात सर्वाऽऽत्मना सुखदु ख सवित्त्यायतन समान प्राप्तम्, यत्तु प्रत्यात्म व्यवतिष्ठते तत्र शरीरोत्पत्तिनिमित्त कर्म व्यवस्थाहेतुरिति विज्ञायत। परिपच्यमानो हि प्रत्यात्मनियत कर्माऽऽशयो यस्मिन्नात्मनि वर्त्तत, तस्यैवोपभोगाऽऽयतन शरीरमुत्पाद्य व्यवस्थापयति। तदेव शरीरोत्पत्तिनिमित्तवत् संयोगनिमित्त कर्मेति विज्ञायते।

---

तु गर्भधारणस्य यतो न नियम ततोऽदृष्टस्य सहकारित्वमावश्यकमभाव ॥ ६९ ॥

नन्वदृष्टनिरपेक्षैरेव भूतै कैश्चित् स्वभावविशेषाच्छरीर जन्यता स्वभावानभ्युपगमे च शरीरस्य सर्वाऽऽत्मसयुक्तत्वात् साधारण्याऽऽपत्ति अत आह।—अथमथ — शरीरस्य सर्वाऽऽत्मसयुक्तत्वेऽपि सयोगविशेषोऽवच्छेदकतालक्षणो येनाऽऽत्मना सह तदीयं तच्छरीर सयोगविशेष एव कुत ?—इत्यत आह सयोगेति।—सयोगविशेषोत्पत्तौ कर्म अदृष्टविशेष, निमित्तम् यथा शरीरोत्पत्तावदृष्टविशेषो निमित्तमिति। सयोग

प्रत्यात्मव्यवस्थानन्तु शरीरस्याऽऽत्मना संयोग प्रचक्ष्महे, इति ॥ ७० ॥

## एतेनानियम प्रत्युक्त ॥ ७१ ॥

योऽयमकर्मनिमित्ते शरीरसर्गे सत्यनियम इत्युच्यते, अयं शरीरोत्पत्तिनिमित्तवत् संयोगोत्पत्तिनिमित्त कर्मेत्यनेन प्रत्युक्त। कस्तावदयं नियम?—यथैकस्याऽऽत्मन शरीर, तथा सर्वेषामिति नियम, अन्यस्यान्यथेत्यनियमो भेदो व्यावृत्तिर्विशेष इति। दृष्टा च जन्मव्यावृत्ति उच्चाभिजनो निकृष्टाभिजन इति, प्रशस्त निन्दितमिति व्याधिबहुलमरोगमिति समग्र विकलमिति पीडाबहुल सुखबहुलमिति, पुरुषातिशयलक्षणोपपन्न विपरीतमिति, प्रशस्तलक्षण निन्दितलक्षणमिति, पट्विन्द्रिय मृद्विन्द्रियमिति। सूक्ष्मश्च भेदोऽपरिमेय। सोऽयं जन्मभेद प्रत्यात्मनियतात् कर्मभेदादुपपद्यते, असति कर्मभेदे प्रत्यात्मनियते निरतिशयित्वादात्मना समानत्वाच्च पृथिव्यादीना पृथिव्यादिगतस्य नियमहेतोरभावात् सर्वं सर्वाऽऽत्मना प्रसज्यत न त्विदमित्थम्भूत जन्म तस्मात् कर्मनिमित्ता शरीरोत्पत्तिरिति ॥ ७१ ॥

विशेषस्तदात्मज्ञानजननियामको जातिविशेष एव। संयोग शरीरावयवसंस्थानविशेष इति कश्चित ॥ ७ ॥

अथ शरीर मादृष्टजन्य प्रकृतेरारम्भस्वभावत्वादेव तदुपपत्ते प्रतिबन्धकपूर्वशरीरापगमस्त्वदृष्टाधीन जलस्य निम्नानुसरणस्वभावस्येव बन्धापगमाधीनत्वम् इति द्वितीयपक्ष साङ्ख्यसम्मत निरस्यति।—एतेन अदृष्टहेतुकत्वव्यवस्थापनेन अनियमस्तु आत्मन कदाचिन्मानुषशरीरसम्बन्ध कदाचिदन्यादृश किञ्चिच्च शरीर सकलावयव किञ्चिच्च विकलावयवमित्यादि। अदृष्टहेतुत्वानभ्युपगमे त्वयमानियम न त्वभ्युपगते किन्त्वदृष्टनिरपेक्षप्रकृतिमात्राऽऽरब्धत्वे सर्वाऽऽत्मसाधारण्य शरीरस्य स्यात् इति भाव। अन्ये तु अदृष्टमप्यनियत स्यादित्यताऽऽह एतेनेति।—तत्राप्यदृष्टान्तरमित्यनादित्वमेवेति भाव इत्याहु ॥ ७१ ॥

## उपपन्नश्च तद्वियोग कर्मक्षयोपपत्ते ॥ ७२ ॥

कर्मनिमित्ते शरीरसर्गे तेन शरीरेणाऽऽत्मनो वियोग उपपन्न । कस्मात्?—कर्मक्षयोपपत्त , उपपद्यते खलु कर्मक्षय, सम्यगदर्शनात्, प्रक्षीणे मोहे वीतराग पुनर्भवहेतुकर्म्म कायवाङ्मनोभिर्न करोति, इत्युत्तरस्यानुपचय, पूर्वोपचितस्य विपाकप्रतिसंवेदनात् प्रक्षय । एव प्रसवहेतोरभावात पतितेऽस्मिन शरीरे पुन शरीरान्तरानुपपत्तेरप्रतिसन्धि । अकर्मनिमित्ते तु शरीरसर्गे भूतक्षयानुपपत्तस्तद्वियोगानुपपत्तिरिति ॥ ७२ ॥

## तददृष्टकारितमिति चेत् पुनस्तत्प्रसङ्गोऽपवर्गे॥७३॥

अदर्शन खलु अदृष्टमित्युच्यते, अदृष्टकारिता भूतेभ्य शरीरोत्पत्ति न जात्वनुत्पन्ने शरीरे द्रष्टा निरायतनो दृश्य पश्यति, तच्चास्य दृश्य द्विविध —विषयश्च नानात्वञ्च , अव्यक्ताऽऽत्मनोस्तदर्थ शरीरसर्ग तस्मिन्नवसिते चरितार्थानि भूतानि न शरीरमुत्पादयन्तीत्युपपन्न शरीरवियोग इति , एव चेन्मन्यसे, पुनस्तत्प्रसङ्गोऽपवर्गे, पुन शरीरोत्पत्ति प्रसज्यत इति । या चानुत्पन्ने शरीरे दर्शनानुत्पत्तिरदर्शनाभिमता, या चापवर्गे शरीरनिवृत्तौ दर्शनानुत्पत्तिरदर्शनभूता, नैतयोरदर्शनयो कश्चिद्विशेष इत्यदर्शनस्यानिवृत्तेरपवर्गे पुन शरीरोत्पत्तिप्रसङ्ग इति ॥ ७३ ॥

---

आर्हतास्तु मन परमाणुगुणमदृष्ट मन्यन्ते तथा हि पार्थिवा परमाणव सहिता स्वादृष्टवशाच्छरीरमारभन्ते मनश्च स्वादृष्टप्रयुक्त शरीरमाविशति तस्मादृष्टस्वभावादेव पुरुषस्य सुखदुःख साधयतीति तत्रोत्तरमाह ।—तत्तदात्माऽदृष्टापगमे विना तत्तदात्मोपभोगाय परमाणवश्चेच्छरीरमारभन्ते मुक्तेऽपि तदात्मनि तस्यामाव शरीरमारभेरन् । अपवर्ग इत्युपलक्षणम् संसारिणामपि नर वा रि तुरगाऽऽदिशरीरोत्पत्तौ विनिगमकं न स्यादिति भाव ॥ ७३ ॥

चरितार्थाविशेष इति चेत्,—

**न करणाकरणयोरारम्भदर्शनात् ॥ ७४ ॥**

चरितार्थानि भूतानि दर्शनावसानान्न शरीरान्तरमारभन्त इत्यय विशेष, एव चेदुच्यते करणाकरणयोरारम्भदर्शनात् चरितार्थाना भूताना विषयोपलब्धिकरणात् पुन पुन शरीराऽऽरम्भो दृश्यते, प्रकृतिपुरुषयोर्नानात्वदर्शनस्याकरणा न्निरर्थक शरीराऽऽरम्भ पुन पुनर्दृश्यत, तस्मादकर्मनिमित्ताया भूतसृष्टे न दर्शनार्था शरीरोत्पत्तिर्युक्ता, युक्ता तु कर्मनिमित्त सर्ग दर्शनार्था शरीरोत्पत्ति। कर्मविपाकसवेदन दर्शनमिति तददृष्टकारितमिति चेत् कस्यचिद्दर्शनम — अदृष्ट नाम परमाणूना गुणविशेष क्रियाहेतु तेन प्रेरिता परमाणव सम्मूर्च्छिता शरीरमुत्पादयन्तीति, तन्मन समाविशति, स्वगु णेनादृष्टेन प्रेरिते समनस्के शरीरे द्रष्टुरुपलब्धिर्भवतीति" एतस्मिन वै दर्शने गुणानुच्छेदात् पुनस्तत्प्रसङ्गोऽपवर्गे, अपवर्ग शरीरोत्पत्ति परमाणुगुणस्यादृष्टस्यानुच्छेद्यत्वा दिति ॥ ७४ ॥

**मन कर्मनिमित्तत्वाच्च सयोगानुच्छेद ॥ ७५ ॥**

मनोगुणेनादृष्टेन समावेशिते मनसि सयोगव्युच्छेदो न स्यात् तत्र किंकृत शरीरादपसर्पण मनस इति?—कर्माऽऽशय क्षये तु कर्माऽऽशयान्तराद्विपच्यमानादपसर्पणोपपत्तिरिति। अदृष्टादेवापसर्पणमिति चेत्—योऽदृष्ट शरीरोपसर्पणहेतु, स एवापसर्पणहेतुरपीति न, एकस्य जीवनप्रायणहेतुत्वानुपपत्ते,

अदृष्टस्य मनोगुणत्वमपि दूषयति।—सयोगस्य शरीराऽऽरम्भकस्य ज्ञानाऽऽदि जनकस्य च, उच्छेदो न स्यात्। कुत?—मनसो यत् कर्म्म अदृष्ट, तन्निमित्तत्वात्,

एवञ्च सति एकमदृष्टं जीवनप्रायणयोर्हेतुरिति प्राप्तम्, नैतदुपपद्यते ॥ ७५ ॥

**नित्यत्वप्रसङ्गश्च प्रायणानुपपत्तेः ॥ ७६ ॥**

विपाकसंवेदनात् कर्माऽऽशयक्षये शरीरपातः प्रायणम्, कर्माऽऽशयान्तराच्च पुनर्जन्म। भूतमात्रात्तु कर्मनिरपेक्षात् शरीरोत्पत्तौ कस्य क्षयात् शरीरपातः प्रायणम्? इति प्रायणानुपपत्तेः खलु वै नित्यत्वप्रसङ्गं विद्मः, यादृच्छिके तु प्रायणे प्रायणभेदानुपपत्तिरिति ॥ ७६ ॥

पुनस्तत्प्रसङ्गोऽपवर्ग इत्येतत् समाधित्सुराह —

**अणुश्यामतानित्यत्ववदेतत् स्यात् ॥ ७७ ॥**

यथाऽणोः श्यामता नित्या अग्निसंयोगेन प्रतिबद्धा न पुनरुत्पद्यते, एवमदृष्टकारितं शरीरमपवर्गे पुनर्नोत्पद्यत इति ॥ ७७ ॥

**नाकृताभ्यागमप्रसङ्गात् ॥ ७८ ॥**

नायमस्ति दृष्टान्तः। कस्मात्?—अकृताभ्यागमप्रसङ्गात्। अकृतं प्रमाणतोऽनुपपन्नं तस्याभ्यागमोऽभ्युपपत्तिर्व्यवसायः, एतच्छ्रद्दधानेन प्रमाणतोऽनुपपन्नं मन्तव्यम्, तस्मान्नायं दृष्टान्तः,

---

तस्य नित्यत्वात् तादृशसंयोगधारा नोच्छिद्यते तस्यानित्यत्वेऽपि व्यधिकरणभोगस्य तन्नाशकत्वेऽतिप्रसङ्ग इति भावः ॥ ७५ ॥

संयोगानुच्छेदे का क्षतिः? अत आह।—तथा सति प्रायणस्य मरणस्य अनुपपत्तेः शरीराऽऽदानत्वस्याविनाशित्वस्य च प्रसङ्गः ॥ ७६ ॥

आक्षिपति।—यथा परमाणोः श्यामता नित्याऽपि निवर्त्तते तथा शरीराऽऽदिकमपि निवर्त्तते तथैव परमाणुनिष्ठं नित्यमप्यदृष्टं निवर्त्तते तदभावाच्च नापवर्गे शरीराभावः ॥ ७७ ॥

सिद्धान्तसूत्रम्।—अकृतस्य प्रमाणाविषयस्य, अभ्यागमः स्वीकारः, तत्प्रसङ्गात्

न प्रत्यक्ष, न चानुमान किञ्चिदुच्यत इति। तदिद दृष्टान्तस्य साध्यसमत्वमभिधीयत इति। अथवा नाकृताभ्यागमप्रसङ्गात् अणुश्यामतादृष्टान्तेनाकर्मनिमित्ता शरीरोत्पत्ति समादधान स्याकृताभ्यागमप्रसङ्ग अकृत सुखदु खहेतौ कर्मणि पुरुषस्य सुख द खमभ्यागच्छतीति प्रसज्येत ओमिति ब्रुवत प्रत्यक्षानुमानाऽऽगमविरोध। प्रत्यक्षविरोधस्तावत —भिन्नमिद सुख द ख प्रत्यात्मवेदनीयत्वात प्रत्यक्ष सर्वशरीरिणाम। को भेद ?—तीव्र मन्दश्चिरमाशु नानाप्रकारमकप्रकारमिति एवमादि विशेष , न चास्ति प्रत्यात्मनियत सुखद खहेतुविशेष न चासति हतुविशेषे फलविशेषो दृश्यत कर्मनिमित्ते तु सुखदु ख याग कमणा तीव्रमन्दतोपपत्त कर्मसञ्चयानाञ्चोत्कर्षापकर्ष भ।वान्नानाविधैकविधभावाच्च कम्मणा सुखदु खभेदोपपत्ति। साऽय हतुभदाभावात दृष्ट सुखद खभेदो न स्यादिति प्रत्यक्ष विरोध। तथाऽनुमानविरोध,—दृष्ट हि पुरुषगुणव्यवस्थानात् सुखदु खव्यवस्थानम य खलु चेतनावान साधननिर्वर्त्तनीय सुख बुद्धा तदीप्सन तदाप्तिसाधनावाप्तये प्रयतत स सुखेन युज्यते न विपरीत , यश्च साधननिवर्त्तनीय दु ख बुद्धा तज्जिहासु साधनपरिवर्जनाय यतत, स दु खन परित्यज्यत न विपरीत , अस्ति चेद यत्नमन्तरेण चेतनाना सुखदु ख व्यवस्थान, तेनापि चेतनगुणान्तरव्यवस्थानकृतेन भवितव्य मित्यनुमानम। तदेतदकर्मनिमित्ते सुखदु खयोगे विरुध्यत इति, तच्च गुणान्तरमसवेद्यत्वाददृष्ट विपाककालानियमाच्चा

इत्यथ स ाह परमाणुनिष्ठादृष्टस्य कारणस्य सत्त्वे शरीरोच्छेद स्यात् एवमणुश्यामतानित्यत्वस्यापि प्रमाणागोचरस्य स्वीकार स्यात् तथा च दृष्टान्तासिद्ध न वाऽनादि भावस्य नाश सम्भवति, अन्यभावत्वम तद्धेतुत्वात् , यद्वा,—नित्यादृष्टाच्छरीरसम्बन्धो

ऽत्रस्थितम बुद्ध्यादयस्तु मवेद्यास्यापवर्गिणश्चेति। अथाऽऽगम विरोध —बहु खल्विदमार्षमृषीणामुपदेशजातमनुष्ठानपरिवर्जनाऽऽश्रयमुपदेशफलञ्च शरीरिणां वर्णाऽऽश्रमविभागेनानुष्ठानलक्षणा प्रवृत्तिः परिवर्जनलक्षणा निवृत्तिः तच्चोभयमेतस्यां दृष्टौ नास्ति कर्म सुचरितं दुश्चरितं वा कर्मनिमित्तं पुरुषाणां सुखदुःखयोग इति विरुध्यते सेयं पापिष्ठानां मिथ्यादृष्टिरकर्मनिमित्ता शरीरसृष्टिः अकर्मनिमित्तं सुखदुःखयोग इति ॥ ७८ ॥

इति वात्स्यायनीये न्यायभाष्ये तृतीयाध्यायस्य द्वितीयमाह्निकम।

समाप्तश्चाय तृतीयोऽध्याय ॥ ३ ॥

---

ऽगमे ऽकृतात स्वयमजानतात कर्मण अभ्यागम फलसम्बन्ध स्यात् तथा च स्वाकृतत्वाविशेषात कि शरीरं कस्य भविष्यतीत्यत्र नियामकाभाव इति भाव ॥ ७८ ॥

समाप्तं शरीरस्यादृष्टनिष्पाद्यताप्रकरणम्।

समाप्तञ्च तृतीयाध्यायस्य द्वितीयमाह्निकम् ॥ २ ॥

इति श्रीविश्वनाथभट्टाचार्यकृतायां न्यायसूत्रवृत्तौ तृतीयाध्यायवृत्तिः ।

---

# चतुर्थाध्यायस्य प्रथमाह्निकम् ।

---

मनसोऽनन्तरं प्रवृत्तिः परीक्षितव्या तत्र खलु यावद्धर्माधर्माऽऽश्रयशरीराऽऽदि परीक्षितं, सर्वा सा प्रवृत्तेः परीक्षा इत्याह,—

**प्रवृत्तिर्यथोक्ता ॥ १ ॥**

**तथा परीक्षितेति ॥ १ ॥**

सुरकोटिविजयिप्रभाभरं योगिमानसचरं परं महः ।
श्यामलं किमपि धाम कामदं कामकोटिकमनीयमाश्रये ॥

तृतीये तावदात्माऽऽदिप्रमेयषट्कं कारणरूपं परीक्षितम् अथ कार्यरूपं प्रवृत्त्यादिप्रमेयषट्कमवसरतो हेतुहेतुमद्भावेन च परीक्षणीयम् यद्यपि प्रथमाह्निके षट्कं परीक्षणीयं द्वितीयाऽऽह्निके तु तत्त्वज्ञानं तथाऽपि तस्यापवर्गहेतुत्वादुपोद्घातेन च परीक्षणीयत्वादपवर्गपरीक्षाऽन्तःपातितया षट्कपरीक्षणाध्यायार्थः तत्र चोद्दिष्टक्रमवत्तया षट्कपरीक्षा प्रथमाऽऽह्निकार्थः । तत्र प्रथमाऽऽह्निके चतुर्दश प्रकरणानि । तत्र यथोक्तरूपयोः प्रवृत्तिदोषयोः परीक्षा प्रथमप्रकरणार्थः । न चार्थभेदात् प्रकरणभेदः । यथा तथेति परस्परसाकाङ्क्षाभ्यामवयवाभ्यामुक्तरूपवत्त्वलक्षणकार्थवत्त्वकथनात् प्रवृत्तिपरीक्षायामाकाङ्क्षितायां सूत्रम् ।—अत्र तथेति शेषं पूरयन्ति तदयुक्तम् तथा सत्येव यथाशब्दस्याऽऽकाङ्क्षाशान्तावग्रिमसूत्रस्य तथाशब्दोऽपि यथाशब्दान्तरस्य पूरणीयतया प्रकरणभेदाऽऽपत्तेः तस्मादग्रिमसूत्रस्थतथाशब्देनान्वयो युक्तः प्रवृत्तिर्यथा उक्तलक्षणवती तथा दोषा अप्युक्तलक्षणवन्त इत्यग्रिमसूत्रसवलितोऽर्थः । "प्रवृत्तिर्वाग्बुद्धिशरीराऽऽरम्भः" इत्युक्तलक्षणसत्त्वात् सिद्धं लक्षणमिति भावः । प्रवृत्तिस्तु द्वयी—कारणरूपा कार्यरूपा च द्वे अप्यात्मसमवेते तत्राऽऽद्या—यत्नत्वेनाविशिष्टा विशिष्टा च यत्नत्वजातिमती मानसप्रत्यक्षसिद्धा द्वितीया तु—धर्माधर्मरूपा यागादेरगम्यागमनादेश्च चिरध्वस्तस्य व्यापारतया कर्मनाशाजलस्पर्शाऽऽदेः प्रायश्चित्तादेश्च नाश्यतया सिध्यतीति ॥ १ ॥

प्रवृत्त्यनन्तरास्तर्हि दोषाः परीक्ष्यन्तामित्यत आह,—

**तथा दोषाः ॥ २ ॥**

परीक्षिता इति। बुद्धिसमानाऽऽश्रयत्वादात्मगुणाः प्रवृत्तिहेतुत्वात् पुनर्भवप्रतिसन्धानसामर्थ्याच्च संसारहेतवः संसारस्यानादित्वादनादिना प्रबन्धेन प्रवर्त्तन्ते मिथ्याज्ञाननिवृत्तिस्तत्त्वज्ञानात् तन्निवृत्तौ रागद्वेषप्रबन्धोच्छेदेऽपवर्ग” इति प्रादुर्भावनिरोधधर्मका इत्येवमाद्युक्तं दोषाणामिति ॥ २ ॥

प्रवर्त्तनालक्षणा दोषा इत्युक्तम्, तथा चेमे मानेर्ष्याऽसूयाविचिकित्सामत्सरादयः ते कस्मान्नोपसङ्ख्यायन्ते?—इत्यत आह —

**तत्त्रैराश्यं रागद्वेषमोहार्थान्तरभावात् ॥ ३ ॥**

तेषां दोषाणां त्रयो राशयस्त्रयः पक्षाः। रागपक्षः—कामो मत्सरः स्पृहा तृष्णा लोभ इति। द्वेषपक्षः—क्रोध ईर्ष्याऽसूया

दोषपरीक्षायां प्रमाणमाह।—तथा दोषा अपि प्रवर्त्तनालक्षणा इत्युक्तलक्षणवन्त एवेति नासिद्धिरिति भावः ॥ २ ॥

समाप्तं प्रवृत्तिदोषसामान्यपरीक्षाप्रकरणम् ।

अथ त्रैराश्येन विशेषेण दोषपरीक्षणाय तत् त्रैराश्यप्रकरणम् तत्र सिद्धान्तसूत्रम्।—तेषां दोषाणां त्रयो राशयः त्रयः पक्षाः न तु रागद्वेषमोहानामेकत्वं तेषामर्थान्तरभावात् अवान्तरभेदवत्त्वात् तथा च भयशोकमानाऽऽदीनामन्तर्भावान्न विभागन्यूनत्वम् इच्छात्वद्वेषत्वमिथ्याज्ञानत्वरूपविरुद्धधर्मवत्त्वान्न विभागाऽऽधिक्यम् इच्छात्वाऽऽदिकन्तु रागादावनुभवसिद्धम्। तत्र रागपक्षः—कामो मत्सरः स्पृहा तृष्णा लोभो माया दम्भ इति। कामः—रिरंसा रतिश्च विजातीयसंयोग नारीगताभिलाष इति तु न युक्तं स्त्रिया कामेऽव्याप्तेः। मत्सरः—स्वप्रयोजनप्रतिसन्धानं विना पराभिमतनिवारणेच्छा यथा राजकीयादुदपानान्नोदकं पेयम् इत्यादि एवं परगुणनिवारणेच्छाऽपि। स्पृहा—धर्माविरोधेन प्राप्तीच्छा। तृष्णा—इदं मे न क्षीयतामितीच्छा उचितव्ययाकरणेनापि धनरक्षणेच्छारूपं कार्पण्यमपि तृष्णाभेद एव। धर्मविरोधेन परद्रव्येच्छा लोभः। परवञ्चनेच्छा माया। कपटेन धार्मिकत्वादिना

द्रोहोऽमर्ष इति। मोहपक्षः—मिथ्याज्ञानं विचिकित्सा मानः प्रमाद इति त्रैराश्यान्नोपसङ्ख्यायन्त इति। लक्षणस्य तर्ह्यभेदात् त्रित्वमनुपपन्नम्। नानुपपन्नं रागद्वेषमोहार्थान्तरभावात्। आसक्तिलक्षणो रागः अमर्षलक्षणो द्वेषः मिथ्याप्रतिपत्तिलक्षणो मोह इति। एतत् प्रत्यात्मवेदनीयं सर्वशरीरिणाम्, विजानात्ययं शरीरी रागमुत्पन्नम्, अस्ति मेऽध्यात्मं रागधर्म इति, विरागश्च विजानाति नास्ति मेऽध्यात्मं रागधर्म इति। एवमितरयोरपीति। मानेर्ष्याऽसूयाप्रभृतयस्तु त्रैराश्यमनुपतिता इति नोपसङ्ख्यायन्ते ॥ ३ ॥

नैकप्रत्यनीकभावात् ॥ ४ ॥

नार्थान्तरं रागादयः। कस्मात्?—एकप्रत्यनीकभावात्। तत्त्वज्ञानं सम्यङ्मतिरार्यप्रज्ञा सम्बोध इत्येकमिदं प्रत्यनीकं त्रयाणामिति ॥ ४ ॥

---

स्वोत्कर्षख्यापनेच्छा दम्भः। द्वेषपक्षः—क्रोध ईर्ष्याऽसूया द्रोहोऽमर्षोऽभिमान इति। क्रोधः—नेत्रलौहित्याऽऽदिहेतुर्द्वेषविशेषः। ईर्ष्या—साधारणे वस्तुनि परस्वत्वानद्रुद्धौ तरि द्वेषः यथा दायादादीनाम्। असूया—परगुणाऽऽदौ द्वेषः। द्रोहः—नाशाय द्वेषः। हिंसा तु द्रोहजन्या परं तु न द्रोहं मन्यन्ते। अमर्षः—कृतापराधे असमर्थस्य द्वेषः। अभिमानः—अपकारिण्यकिञ्चित्करस्याऽऽत्मनि द्वेषः। मोहपक्षः—विपर्ययः संशयस्तर्को मानः प्रमादो भयशोकौ। विपर्ययः—मिथ्याज्ञानापरपर्यायोऽयथार्थनिश्चयः। एकधर्मिकविरुद्धभावाभावज्ञानं संशयः स एव विचिकित्सेत्युच्यते। व्याप्याऽऽरोपाद्व्यापकप्रसञ्जनं तर्कः। आत्मन्यविद्यमानगुणाऽऽरोपेणोत्कर्षधीर्मानः गुणवति निर्गुणत्वधीरूपस्मयोऽपि मानेऽन्तर्भवति। प्रमादः—पूर्वकर्त्तव्यतया निश्चितेऽप्यकर्त्तव्यताधीः एवं वैपरीत्येऽपि। भयम्—अनिष्टहेतूपनिपाते तत्परित्यागानर्हताज्ञानम्। शोकः—इष्टवियोगे तल्लाभानर्हताज्ञानम् ॥ ३ ॥

अनूद्यते।—रागाऽऽदीनां भेदो न एकप्रत्यनीकभावात् एकस्मिन् प्रत्यनीकभावो विरोधित्वं यस्य तत् तथा तेनैकनाश्यत्वादित्यर्थः एकं हि तत्त्वज्ञानमेषां विरोधि ॥४॥

**व्यभिचारादहेतु ॥ ५ ॥**

एकप्रत्यनीका पृथिव्या श्यामाऽऽदयोऽग्निसयोगेनैकेन एकयोनयश्च पाकजा इति ॥ ५ ॥

सति चार्थान्तरभावे —

**तेषा मोह पापीयान्नामूढस्येतरोत्पत्ते ॥ ६ ॥**

मोह पाप पापतरो वा द्वावभिप्रेत्योक्तम , कस्मात ?— नामूढस्येतरोत्पत्ते । अमूढस्य रागद्वेषौ नोत्पद्येते, मूढस्य तु यथासङ्कल्पमुत्पत्ति विषयेषु रञ्जनीया सङ्कल्पा रागहेतव, कोपनीया सङ्कल्पा द्वेषहेतव• उभये च सङ्कल्पा न मिथ्याप्रतिपत्तिलक्षणत्वान्मोहादन्ये , ताविमौ मोहयोनी रागद्वेषाविति । तत्त्वज्ञानाच्च मोहनिवृत्तौ रागद्वेषानुत्पत्तिरित्येकप्रत्यनीकभावोपपत्ति । एवञ्च कृत्वा तत्त्वज्ञानात् दु खजन्मप्रवृत्तिदोषमिथ्याज्ञानानामुत्तरोत्तरापाय तदनन्तराभावादपवर्ग इति व्याख्यातमिति ॥ ६ ॥

समाधत्ते ।—एकविरोधित्वं भेदनिषेधे न हेतु व्यभिचारात् एकाग्निसयोगनाश्यत्वेऽपि रूपाऽऽदीना भेदात ॥ ५ ॥

किञ्च नतेषामेकानवच्छत्व तत्त्वज्ञानस्य मोहनिवर्तकत्वात् तन्निवृत्त्या रागाऽऽदिनिवृत्तेरित्याशयेनाऽऽह ।—यद्यपि बहूना निर्द्धारणे इष्ठन् तमपीविधानात् पापिष्ठ पापतम इति वा युक्त तथाऽपि द्वौ द्वावाधकृत्य निद्धारण द्वयोनिर्द्धारणे ईयसुनो विधानात् तेन रागमोहयोर्द्वेषमोहयोर्वा मोह पापीयाननर्थमूल बलवत्त्व इति यावत् । हेतुमाह नामूढस्यात ।—मोहशून्यस्य रागद्वेषयोरभावादित्यथ । न च तत्त्वज्ञानिनोऽपि हिताहितगोचरप्रवृत्तिनिवृत्तौ रागद्वेषाधीने इति तत्र व्यभिचार इति वाच्य धर्माधर्मप्रयोजकरागद्वेषयोर्दोषत्वेन विवक्षितत्वात् । एतदभिप्रायकमेवा सक्ताऽऽइत्यश्च मुक्त इत्यादिकमपीति भाव ॥ ६ ॥

**प्राप्तस्तर्हि निमित्तनैमित्तिकभावादर्थान्तरभावो दोषेभ्यः ॥ ७ ॥**

अन्यद्धि निमित्तम् अन्यच्च नैमित्तिकमिति दोषनिमित्तत्वान्न दोषो मोह इति ॥ ७ ॥

**न दोषलक्षणावरोधात् (सत्त्वात्) मोहस्य ॥ ८ ॥**

'प्रवर्त्तनालक्षणा दोषाः' इत्यनेन दोषलक्षणेनावरुध्यते दोषेषु मोह इति ॥ ८ ॥

**निमित्तनैमित्तिकोपपत्तेश्च तुल्यजातीयानामप्रतिषेधः ॥ ९ ॥**

द्रव्याणां गुणानां वाऽनेकविधविकल्पो निमित्तनैमित्तिकभावे तुल्यजातीयानां दृष्ट इति ॥ ९ ॥

शङ्कते।—दोषनिमित्तत्वान्मोहस्य दोषाभिन्नत्वं स्यात् अभेदेन कार्य्यकारणभावाभावात्। दोषेभ्य इत्यान्तर्गणिकभेदाभिप्रायवचनम्। प्राप्तस्तर्हीत्यंशस्तु न सूत्रं किन्तु भाष्यकृत पूरणमित्यपि वदन्ति ॥ ७ ॥

निराकरोति।—मोहस्य दोषलक्षणसत्त्वाद्दोषत्वम् व्यक्तिभेदाच्च हेतुहेतुमद्भावो न विरुध्यत इति भावः ॥ ८ ॥

अप्रयोजकत्वमुक्त्वाऽनैकान्तिकत्वमप्याह।—एकजातीययोरपि द्रव्ययोर्गुणयोश्च निमित्तनैमित्तिकोपपत्तेः हेतुहेतुमद्भावस्वीकारात् तुल्यजातीयत्वप्रतिषेधो न युक्त इति ॥ ९ ॥

समाप्तं दोषपरीक्षाप्रकरणम्।

दोषानन्तर प्रेत्यभाव, तस्यासिद्धि, आत्मनो नित्यत्वात, न खलु नित्य किञ्चिज्जायते, म्रियते वा, इति जन्ममरणयो र्नित्यत्वादात्मनोऽनुपपत्ति, उभयञ्च प्रेत्यभाव इति। तत्राय सिद्धानुवाद —

**आत्मनित्यत्वे प्रेत्यभावसिद्धि ॥ १० ॥**

नित्योऽयमात्मा प्रैति पूर्वशरीर जहाति म्रियते इति, प्रेत्य च पूर्वशरीर हित्वा भवति जायते, शरीरान्तरमुपादत्त इति तच्चैतदुभयं 'पुनरुत्पत्ति प्रेत्यभाव' इत्यत्रोक्तम, पूर्वशरीर हित्वा शरीरान्तरोपादान प्रेत्यभाव इति, तच्चैतन्नित्यत्वे सम्भवतीति। यस्य तु सत्त्वोत्पाद सत्त्वनिरोध प्रेत्यभाव तस्य कृतहानमकृताभ्यागमश्च दोष, उच्छेदहेतुवाद ऋष्युपदेशा श्चानर्थका इति ॥ १० ॥

कथमुत्पत्तिरिति चेत —

**व्यक्ताद्व्यक्ताना प्रत्यक्षप्रामाण्यात् ॥ ११ ॥**

केन प्रकारेण किंधर्मकात कारणाद्व्यक्त शरीराद्युत्पद्यते ? इति। व्यक्तात् भूतसमाख्यातात पृथिव्यादित परमसूक्ष्मान्नि

---

क्रमप्राप्ततया प्रत्यभावे परीक्षणीये प्रत्यभाव शरीरस्य बुद्धरात्मनो वा ? इति संशय पुनरुत्पत्ति प्रेत्यभाव इति लक्षणसूत्राद्विनष्टस्योत्पाद प्रतीयते न चासौ नित्यस्या ऽऽत्मन सम्भवतीति शरीरादे स्यात्। न च मृतस्य शरीरादुत्पत्तिविरोधान्नेद युक्तमिति वाच्यम् प्रेत्यभाव इत्यस्य मुख व्यादाय स्वपिति इतिवत् व्यत्ययेन भूत्वा प्रायण मित्यर्थादिव सिद्धान्तसूत्रम्।—आत्मन पूर्वोक्तयुक्त्या नित्यत्वे प्रेत्यभावस्तस्य सिध्यति एकजातीयशरीराऽऽद्यसम्बन्ध चरमसम्बन्धनाशयोरुत्पादप्रायणयोरात्मन सम्भवात्। सम्बन्धस्त्ववच्छेद्यावच्छेदकभावलक्षण स च स्वरूपसम्बन्धविशेषोऽतिरिक्तो वेत्यन्यदेतत्। लक्षणसूत्रे पुनरुत्पत्ति इत्यत्र पुन पदञ्च प्रत्यभावप्रवाहस्यानादित्वज्ञापनाय तज्ज्ञानञ्च वैराग्य उपयुज्यत इति ॥ १ ॥

ननु प्रेत्यभाव उत्पत्तिमद्द्रव्य सा च न सजातीयाद्विजातीयाद्वा सम्भवात

स्थाद्व्यक्तं शरीरेन्द्रियविषयोपकरणाऽऽधारं प्रज्ञातं द्रव्यमुत्पद्यते। व्यक्तञ्च खल्विन्द्रियग्राह्यं, तत्सामान्यात् कारणमपि व्यक्तम्। किं सामान्यम्?—रूपाऽऽदिगुणयोगः। रूपाऽऽदिगुणयुक्तेभ्यः पृथिव्यादिभ्यो नित्येभ्यो रूपाऽऽदिगुणयुक्तं शरीराद्युत्पद्यते प्रत्यक्षप्रामाण्यात्, दृष्टो हि रूपाऽऽदिगुणयुक्तेभ्यो मृत्प्रभृतिभ्यस्तथाभूतस्य द्रव्यस्योत्पादः, तेन चादृष्टस्यानुमानमिति रूपाऽऽदीनामन्वयदर्शनात् प्रकृतिविकारयोः पृथिव्यादीनामतीन्द्रियाणां कारणभावोऽनुमीयते इति ॥ ११ ॥

न घटाद्घटानिष्पत्तेः ॥ १२ ॥

इदमपि प्रत्यक्षम्—न खलु व्यक्ताद्घटाद्व्यक्तो घट उत्पद्यमानो दृश्यत इति व्यक्ताद्व्यक्तस्यानुत्पत्तिदर्शनान्न व्यक्तं कारणमिति ॥ १२ ॥

व्यक्ताद्घटनिष्पत्तेरप्रतिषेधः ॥ १३ ॥

न ब्रूमः सर्वं सर्वस्य कारणमिति किन्तु यदुत्पद्यते व्यक्तं द्रव्यं, तत् तथाभूतादेवोत्पद्यत इति। व्यक्तञ्च तन्मृद्द्रव्यं

ऽऽणुपृथिव्यादौ व्यभिचारात् तत्रत्यमानाभावात् अत प्रत्यक्षाभावाऽऽसङ्ग इत्यपो हाताति प्रसङ्ग इत्यासप्रकारं दर्शयति।—व्यक्तानाम् उत्पत्तिरिति शेषः। व्यक्ताद्व्यक्तजातीयात् पृथिव्यादेः व्यक्तानां व्यक्तजातीयानां कार्यपृथिव्यादीनाम् उत्पत्तेः। इत्थञ्च पृथिव्यादेः पृथिव्यादितो रूपवदादितश्च रूपवदादीनामुत्पत्तेः प्रत्यक्षसिद्धत्वात्परमाणुरपि कल्प्यते तस्यैवापकृष्टमहत्त्वेन सावयवावयवत्वसिद्धेः (घ) तदवयवावयवस्य त्र्यणुकस्यानन्त्यत्वमिति भावः ॥ ११ ॥

अनुमां ग्रहते।—विपक्षकार्यकारणभावाभावे सामान्यतोऽपि न तथेति भावः ॥ १२ ॥

विपक्षतो व्यभिचारो न विरोधी सामान्यतस्तु साध्यवत्त्वाश्रयत्वात् समाधत्ते।—

(घ) अत्र बहवोऽह।

कपालसञ्चक यतो घट उत्पद्यत, न चैतन्निष्कवान क्वचि दभ्यनुज्ञा लब्धुमर्हतीति तदेतत तत्त्वम ॥ १३ ॥

अत पर प्रावादुकाना दृष्टय प्रदर्श्यन्त —

**अभावाद्भावोत्पत्तिर्नानुपमृद्य प्रादुर्भावात् ॥ १४ ॥**

असत सदुत्पद्यत इत्यय पक्ष । कस्मात् ?—उपमृद्य बीजमङ्कुर उत्पद्यते नानुपमृद्य, न चेद्बीजापमद, अङ्कुरोत्पत्तिर्न स्यादिति ॥ १४ ॥

अत्राभिधीयत —

**व्याघाताद्प्रयोग ॥ १५ ॥**

उपमृद्य प्रादुर्भावादित्ययुक्त प्रयोग व्याघातात यदुप मृद्नाति न तदुपमृद्य प्रादुर्भवितुमर्हति विद्यमानत्वात, यच्च प्राक्भव त न तनाप्रादुर्भूतनाविद्यमाननापमद इति ॥ १५ ॥

**नातीतानागतयो कारकशब्दप्रयोगात ॥ १६ ॥**

अतीते चानागते चाविद्यमान कारकशब्दा प्रयुज्यन्ते, पुत्रो जनिष्यते जनिष्यमाण पुत्रमभिनन्दति पुत्रस्य जनिष्य माणस्य नाम करोति अभूत कुम्भ भिन्न कुम्भमनुशोचति,

सजातीयात् सजातीयोत्पत्तिन प्रतिषेध पृथिवीजातीयात् कपालादितो घटाऽऽदि निष्पत्त उक्ताऽऽपादन चाप्रयोजकत्वात भाव ॥ १३ ॥

समाप्त प्रत्यभावपरीक्षाप्रकरणम् ।

अथावाश्चा प्रकरणानि प्रसङ्गाद्वादिनामभ्युपगतान्युपोद्घाताय तत्राऽऽदौ शून्यतापादानप्रकरणम् तत्र पूर्वपक्षसूत्रम्।—अभावादुपादानात कार्याणा भावाना सत्वात यतोऽङ्कुरादयो बीजाऽऽदिकमनुपमृद्य न प्रादुर्भावाभाव तथा च बीजाऽऽदि विनाशा ङ्कुराद्युपादानमिति ॥ १४ ॥

अत्रोत्तरम्।—उपमृद्य प्रादुर्भवतीति न युक्त प्रयोग व्याघातात् उपमर्दकस्य भूतमसत्त्व उपमर्दकत्वायोगात् पूर्वं सत्त्वे च पुनत प्रादुर्भावायोगात ॥ १५ ॥

पूर्वपक्षी दूषयति।—नायुक्त प्रयोग, अतीतऽनागत च कारकशब्दप्रयोगात्

भिन्नस्य कुम्भस्य कपालानि अजाता पुत्रा पितरं तापयन्तीति बहुलं भाक्ता प्रयोगा दृश्यन्ते। का पुनरियं भक्ति ?—आनन्तर्य्यं भक्ति। आनन्तर्य्यसामर्थ्यादुपमृद्य प्रादुर्भावार्थं प्रादुर्भविष्यन्नङ्कुर उपमृद्नातीति भाक्तं कर्त्तृत्वमिति ॥ १६ ॥

**न विनष्टेभ्योऽनिष्पत्ते ॥ १७ ॥**

न विनष्टाद्बीजादङ्कुर उत्पद्यत इति, तस्मान्नाभावाद्भावोत्पत्तिरिति ॥ १७ ॥

**क्रमनिर्द्देशादप्रतिषेध ॥ १८ ॥**

उपमर्दप्रादुर्भावयो पौर्वापर्य्यनियम क्रम स खल्वभावाद्भावोत्पत्तेर्हेतुर्निर्दिश्यते स च न प्रतिषिध्यत इति। व्याहत व्यूहानामवयवाना पूर्वव्यूहनिवृत्तौ व्यूहान्तराद्द्रव्यनिष्पत्तिर्नाभावात्। बीजावयवा कुतश्चिन्निमित्तात् प्रादुर्भूतक्रिया पूर्वव्यूहं जहति व्यूहान्तरञ्चाऽऽपद्यन्ते व्यूहान्तरादङ्कुर उत्पद्यते। दृश्यन्ते खल्ववयवास्तत्संयोगाश्चाङ्कुरोत्पत्तिहेतव। न चानिवृत्ते पूर्वव्यूहे बीजावयवाना शक्यं व्यूहान्तरेण भवितुम् इत्युपमर्द

कुत्र कमाऽऽदबोधकशब्दप्रयोगात यथा जनिष्यते पुत्र जनिष्यमाणं पुत्रमभिनन्दति अभूत कुम्भ भिन्नं कुम्भमनुशोचति ॥ १६ ॥

नन्वास्तामौपचारिक प्रयोग तथाऽपि किं बीजाऽऽदेर्विनष्टस्योपादानत्वं मन्यसे, बीजाऽऽदिविनाशस्य वा ? अन्ये पि तस्योपादानत्वं निमित्तत्वं वा ? तत्राऽऽद्यौ त्तरम्।—विनष्टानां बीजाऽऽदीनामुपादानत्वायोगात् अत एव न द्वितीय तत्र विनष्ट विनाश., यतो नोभयत्र द्रव्यत्वस्य भावकार्य्यसमवायिकारणताऽवच्छेदकत्वात् ॥ १७ ॥

तृतीये त्वाह।—अभावस्य कारणत्वं प्रतिषिध्यते प्रतिबन्धकाभावस्य हेतुत्वापगमात्, इत्याह क्रमेति।—बीजे विनष्टेऽङ्कुरो जायत इति प्रत्ययात् बीजस्य प्रतिबन्धकस्याभाव कारणम् बीजे विनष्टे हि तदवयवसम्बन्धाभिषिक्तभूम्यवयवसहितैरङ्कुर

प्रादुर्भावयो पौर्वापर्य्यनियम क्रम , तस्मान्नाभावाद्भावोत्पत्ति रिति। न चान्यद्बीजावयवेभ्योऽङ्कुरोत्पत्तिकारणम, इत्युपपद्यते बीजोपादाननियम इति ॥ १८ ॥

अथापर आह —

## ईश्वर कारण पुरुषकर्माफल्यदर्शनात् ॥ १९ ॥

पुरुषोऽय समीहमानो नावश्य समीहाफलमाप्नोति, तनानुमायते पराधीन पुरुषकर्मफलाऽऽराधनमिति। यदधीन स ईश्वर , तस्मादीश्वर कारणमिति ॥ १९ ॥

## न पुरुषकर्माभावे फलानिष्पत्ते ॥ २० ॥

ईश्वराधीना चेत् फलनिष्पत्ति स्यात अपि तर्हि पुरुषस्य समीहामन्तरेण फल निष्पद्येतेति ॥ २० ॥

अारभ्यत अभावमात्रस्य कारणत्व चूर्णीकृतादपि बीजादङ्कुरोत्पत्ति स्यात् अभावस्य ानविशेषत्वादिति भाव ॥ १८ ॥

समाप्त शून्यतोपादाननिराकरणप्रकरणम् ।

मतान्तरमाह।—अनेन ब्रह्मपरिणामवादी ब्रह्मविवर्त्तवादी वा दर्शित इति वदन्ति तथा हि ब्रह्मैव नामरूपप्रपञ्चभेदेन विपरिणमते मृत्तिकेवोदञ्चनाऽऽदिभावेन अत एव प्राक्तनरूपस्य सत्त्वस्यापरित्याग प्रपञ्चेषु उदञ्चनादाविव मृत्तिकात्वस्येति परिणामवाद । ब्रह्मैव चानाद्यनिर्वचनीयाविद्यावशान्नानारूपेण विवर्त्तते मुखमिव तत्तज्जलाद्यालम्बनभेदादिति विवर्त्तवाद । ननु पुरुषकर्मैव कारणमस्तु किमीश्वरस्य कारणत्वेन ? इत्यत आह पुरुषेति।—पुरुषकर्मणो हि वैफल्यमपि दृश्यते सहकार्य्यन्तरमवश्य वाच्यम् तथा च ईश्वर एव यथा यथेच्छति तथा जगद्विपरिवर्त्तत इत्येवास्तु किं पुरुषकर्मणा ? इति भाव । वस्तुतस्तु केवलेश्वरकारणतापर प्रकरण तदुपादानतापर ये तु न किमपि मानमाकलयाम इति ॥ १९ ॥

समाधत्त।—केवल न ब्रह्मण परन्तु ईश्वरस्यैव हेतुत्वे तदिच्छाया अव्यतिरिक्ताया अविषयतायाश्चानभ्युपगमात अभ्युपगमे द्वैताऽऽपत्ति अत सर्व सर्वदा स्यात न स्याद्वा क्वाप्यवाच्यमिति पुरुषकर्मणोऽपि सहकारिताऽऽवश्यकी ब्रह्मण उपादानत्वन्तु न सम्भवात, असमवायिकारणासम्भवात् तस्य कारणतामात्र त्विष्यत एवेति भाव ॥२०॥

## तत्कारितत्वादहेतुः ॥ २१ ॥

पुरुषकारमीश्वरोऽनुगृह्णाति फलाय, पुरुषस्य यतमानस्येश्वरः फलं सम्पादयतीति। यदा न सम्पादयति तदा पुरुषकर्माफलं भवतीति, तस्मादीश्वरकारितत्वादहेतुः पुरुषकर्माभावे फलानिष्पत्तेरिति। * गुणविशिष्टमात्मान्तरमीश्वरः तस्याऽऽत्मकल्पात् कल्पान्तरानुपपत्तिः *। अधर्ममिथ्याज्ञानप्रमादहान्या धर्मज्ञानसमाधिसम्पदा च विशिष्टमात्मान्तरमीश्वरः तस्य च धर्मसमाधिफलमणिमाद्यष्टविधमैश्वर्यम्, सङ्कल्पानुविधायी चास्य धर्मः प्रत्यात्मवृत्तीन् धर्माधर्मसञ्चयान् पृथिव्यादीनि च भूतानि प्रवर्त्तयति, एवञ्च स्वकृताभ्यागमस्यालोपेन निर्माणप्राकाम्यमीश्वरस्य स्वकृतकर्मफलं वेदितव्यम् आप्तकल्पश्चायं यथा पितापत्यानां, तथा पितृभूत ईश्वरो भूतानाम्, न चाऽऽत्मकल्पादन्यः कल्पः सम्भवति न तावदस्य बुद्धिं विना कश्चिद्धर्मो लिङ्गभूतः शक्य उपपादयितुम् आगमाच्च, द्रष्टा बोद्धा सर्वज्ञातेश्वर इति बुद्ध्यादिभिश्चाऽऽत्मलिङ्गैः (त)

* नन्वेवं पुरुषव्यापारस्य फले व्यभिचारी न स्यादित्यत आह।—फलाभावस्य पुरुषकर्माभावकारितत्वात् पुरुषस्य कर्म अदृष्टं तदभावाधीनत्वात् पुरुषकारः अहेतुः फलानुत्पादकः। नन्वीश्वर एव कः? इत्यत्र भाष्यं—गुणविशिष्टमात्मान्तरमीश्वरः गुणा नित्यज्ञानेच्छाप्रयत्नाः सामान्यगुणाश्च संयोगाऽऽदिभावाः विशिष्टमात्मान्तरं जीवेभ्यो भिन्न आत्मा जगदाराध्यः सृष्ट्यादिकर्त्ता वेदकर्त्ता हिताहितोपदेशको जगत्पिता। परे तु—प्रमाणान्तरैरीश्वरप्रतिपत्त्यभावेऽपि विभूती तथा हि ईश्वरः कारकम् सर्वोपनिषत्सु अनुमानन्तु क्षित्यादिकं सकर्त्तृकं कार्य्यत्वाद्घटवदित्यूह्यम्। ननु जीवानामेव कर्त्तृत्वं स्यादत आह पुरुषेति।—पुरुषकर्मणां वैफल्यं दृश्यते तथा च विफले कर्मणि प्रवर्त्तमानत्वादज्ञत्वं जीवानां यत उपादानगोचरापरोक्षज्ञानादिमतो हि कर्त्तृत्वं न च क्षित्याद्युपादानगोचरज्ञानं जीवानामिति

(त) विवेचि बोध्यम् तृतीया विभागेति।

निःस्वरूपाऽऽप्त्यमीश्वरं प्रत्यक्षानुमानाऽऽगमविषयातीतं कः शक्त उपपादयितुम्? स्वकृताभ्यागमलोपेन च प्रवर्त्तमानस्यास्य यदुक्तं प्रतिषेधजातम् अकर्मनिमित्ते शरीरसर्गे तत् सर्वं प्रसज्यत इति ॥ २१ ॥

अपर इदानीमाह —

**अनिमित्ततो भावोत्पत्तिः कण्टकतैक्ष्ण्या-ऽऽदिदर्शनात् ॥ २२ ॥**

अनिमित्ता शरीराद्युत्पत्तिः, कस्मात्?—कण्टकतैक्ष्ण्याऽऽदिदर्शनात् कण्टकस्य तैक्ष्ण्यं पर्वतधातूनां चित्रता ग्राव्णां श्लक्ष्णता निर्निमित्तञ्चोपादानं दृष्टं, तथा शरीरसर्गोऽपीति ॥२२॥

**अनिमित्तनिमित्तत्वान्नानिमित्ततः ॥ २३ ॥**

अनिमित्ततो भावोत्पत्तिरित्युच्यते, यतश्चोत्पद्यते तन्निमित्तम् अनिमित्तस्य निमित्तत्वान्नानिमित्ता भावोत्पत्तिरिति ॥२३॥

भाव । ननु ईश्वरो जीवानां कर्मत्वमास्थायाऽऽशङ्कते न पुरुषेति ।—फलस्य कार्यस्य कर्माभावेऽनिष्पत्तेः तत्तत्पुरुषोपभोगसाधनत्वात् तत्कर्मजन्यत्वमिति शरीराय पुरुषात् । समाधत्ते तदिति ।—कर्मणोऽपि तत्कारितत्वादीश्वरकारित्वात् अचेतनस्य चेतनाऽधिष्ठितस्यैव जनकत्वादिति भाव ॥ २१ ॥

समाप्तमीश्वरोपादानताप्रकरणम् ।

यदि च कार्याणामाकस्मिकत्वं तदा न परमाण्वादीनामुपादानत्वं न वेश्वरस्य निमित्तत्वम् अत आकस्मिकत्वनिराकरणप्रकरणमारभते तत्र पूर्वपक्षसूत्रम् ।—अनिमित्तत इति प्रथमाऽन्तात् तसिल् अनिमित्ता भावोत्पत्तिरित्यर्थः भावेति स्पष्टार्थम् शरीराद्युत्पत्तिर्न कारणनियम्या उत्पत्तिमत्त्वात् कण्टकतैक्ष्ण्याद्युत्पत्तिवत् यद्वा — घटाऽऽदिकं न सकारणकं भावत्वात् कण्टकतैक्ष्ण्यादिवत् । तैक्ष्ण्यं संस्थानविशेषः । आदिपदान्मयूरचित्रताऽऽदिपरिग्रहः तदकारणकमेवेत्याशयः ॥ २२ ॥

एकदेशी भाष्यं दूषयति ।—अनिमित्तत इति हेतुपञ्चमीनिर्देशादनिमित्तस्यैव निमित्तत्वात् कथमनिमित्तत इति ॥ २३ ॥

निमित्तानिमित्तयोरर्थान्तरभावादप्रतिषेधः ॥२४॥

अन्यद्धि निमित्तम् अन्यश्च निमित्तप्रत्याख्यानम् न च प्रत्याख्येयमेव प्रत्याख्येयम् यथाऽनुदकः कमण्डलुरिति नोदकप्रतिषेध उदकं भवतीति स खल्वयं वादोऽकर्मनिमित्तः शरीरादिसर्ग इत्येतस्मान्न भिद्यते, अभेदात् तत्प्रतिषेधेनैव प्रतिषिद्धो वेदितव्य इति ॥ २४ ॥

अन्योऽनुमन्यते —

सर्वमनित्यमुत्पत्तिविनाशधर्मकत्वात ॥ २५ ॥

किमनित्यं नाम ?—यस्य कदाचिद्भावस्तदनित्यम् उत्पत्तिधर्मकमनुत्पन्नं नास्ति विनाशधर्मकमाविनष्टं नास्ति। किं पुनः सर्वम् ? —भौतिकञ्च शरीरादि अभौतिकञ्च बुद्ध्यादि तदुभयं

दूषयति।—अनिमित्तस्य निमित्तस्य च अर्थान्तरभावात भेदात उक्त प्रतिषेधो न युक्त अनिमित्तस्य निमित्तत्वाभावात शरीरस्याकर्मनिमित्तत्वदूषणेनैव च तन्निमित्ततापि दूषितेति। तस्मात् सूत्रद्वयमेव व्याचष्टे — समाधत्ते अनिमित्तेति —अनिमित्तस्य अनिमित्तत्वसाधकस्य निमित्तत्वान्निमित्त त्वानुमति जनकत्वात अनिमित्तत इति व्याहतम् अनिमित्तत्वानुमति जनका नभ्युपगमेऽनिमित्तत्व न सिध्यतीति कण्टकतैक्ष्ण्यादिकमपि नानिमित्तकम् अन्ष्ट विशेषमहत्त्वे तस्याभावस्तद्भावा नादिति हृदयम। दोषान्तरमाह निमित्तेति।—इदमेव निमित्तमिदमनिमित्तमिति प्रतीत्या तयोर्भेदसिद्धेर्निमित्तप्रतिषेधो न युक्त इतरथा च सार्वलौकिकी प्रतीतिर्नोपपद्यतेति भाव ॥ २४ ॥

समाप्तमाकस्मिकत्वप्रकरणम्।

सर्वस्यानित्यत्वे नाऽऽत्मादेरपि नित्यत्व स्यात् अत सर्वानित्यत्वनिराकरण प्रकरणम् तत्र प्रमेयत्वम् अनित्यत्वव्याप्य न वा ? इति संशये पूर्वपक्षसूत्रम्।— अनित्यं विनाशि उत्पत्तिमती विनाशधर्मकत्वात् उत्पत्तिमत्त्वञ्चाऽऽकाशादेरपि मेयत्वात सिद्धमिति भाव तेन परमते तव नासिद्धि यथा,—उत्पत्तिविनाशधर्मकत्वात्

मुत्पत्तिविनाशधर्मकं विज्ञायते तस्मात् तत्सर्वम अनित्य मिति ॥ २५ ॥

**नानित्यतानित्यत्वात् ॥ २६ ॥**

यदि तावत सर्वस्यानित्यता नित्या तन्नित्यत्वान्न सर्व-मनित्यम, अथानित्या तस्यामविद्यमानायां सर्वं नित्य मिति ॥ २६ ॥

**तदनित्यत्वमग्नेर्दाह्य विनाश्यानुविनाशवत॥२७॥**

तस्या अनित्यताया अप्यनित्यत्वम, कथम ?—यथाऽग्निर्दाह्य विनाश्यानुविनश्यति एव सर्वस्यानित्यता सर्व विनाश्यानु विनश्यतीति ॥ २७ ॥

**नित्यस्याप्रत्याख्यान यथोपलब्धिव्यवस्थानात ॥२८॥**

अय खलु वादी नित्य प्रत्याचष्टे नित्यस्य च प्रत्याख्यान मनुपपन्नम कस्मात ?—यथोपलब्धिव्यवस्थानात। यस्योत्पत्ति विनाशधर्मकत्वमुपलभ्यते प्रमाणत, तदनित्यम, यस्य नोप लभ्यते, तद्विपरीतम्। न च परमसूक्ष्माणा भूतानामाकाश कालदिगात्ममनसा तद्गुणानाञ्च केषाञ्चित् सामान्यविशेषसम

---

उत्पत्तिविनाशधर्मकाणा मानसिद्धत्वात् तद्भिन्नमप्रमाणकमिति हृदयम् परं तु अनित्यत्व कादाचित्कत्वम् उत्पत्तिधर्मकत्वाद्विनाशधर्मकत्वादिति हेतुद्वये तात्पर्य्य मित्याहु ॥ २५ ॥

दूषयति।—उत्पत्तिमत्त्व न विनाशित्वसाधकम् अनित्यताया ध्वंसस्य नित्य त्वादविनाशित्वात् तत्र व्यभिचारात ॥ २६ ॥

आक्षिपति।—तस्या अनित्यताया अप्यनित्यत्वम् यथाऽग्निर्दाह्यस्येन्धनाद विनाशानन्तर स्वयमपि नश्यति न तु दाह्योत्पन्नं तथा घटादेरपि नाशो नश्यति न घटाद्युन्मज्जन ध्वंसध्वंसस्यापि प्रतियोगिध्वंसत्वात् ध्वंसप्रागभावानाधारकालस्य प्रतियोग्यधिकरणत्वमिति व्याप्तेरप्रयोजकत्वाद्गोन्मज्जनमित्यन्ये ॥ २७ ॥

समाधत्ते।—नित्यस्य नित्यत्वविशिष्टस्य नित्यत्वस्य, न प्रत्याख्यानमिति फलितम्

वायोनाश्चोत्पत्तिविनाशधर्मकत्वं प्रमाणत उपलभ्यते, तस्मान्न नित्यान्येतानीति ॥ २८ ॥

अयमन्य एकान्तः —

**सर्वं नित्यं पञ्चभूतनित्यत्वात् ॥ २९ ॥**

भूतमात्रमिदं सर्वं तानि च नित्यानि, भूतोच्छेदानुपपत्तेरिति ॥ २९ ॥

**नोत्पत्तिविनाशकारणोपलब्धेः ॥ ३० ॥**

उत्पत्तिकारणञ्चोपलभ्यते विनाशकारणञ्च तत सर्वनित्यत्वं व्याहन्यत इति ॥ ३ ॥

**तल्लक्षणावरोधादप्रतिषेधः ॥ ३१ ॥**

यस्योत्पत्तिविनाशकारणमुपलभ्यत इति मन्यसे न तद्भूतलक्षणहीनमर्थान्तरं गृह्यते, भूतलक्षणावरोधाद्भूतमात्रमिदमित्ययुक्तोऽयं प्रतिषेध इति ॥ ३१ ॥

**नोत्पत्तितत्कारणोपलब्धेः ॥ ३२ ॥**

कारणसमानगुणस्योत्पत्तिः कारणञ्चोपलभ्यते न चैतदुभय

मयोपलाभ्य उपलभ्यमानतक्रमेण तथा च धामग्राहकमानेन लाघवसहकृतेनाऽऽकाशादानित्यत्वव्यवस्थापनादिति ॥ २८ ॥

समाप्तं सर्वानित्यत्वनिराकरणप्रकरणम् ।

सर्वनित्यत्वं न प्रत्यभावाऽऽदिसिद्धिः अतस्तन्निराकरणप्रकरणम् तत्राऽऽक्षेप सूत्रम् ।—सर्वं नित्यं भूतत्वान्मयत्वाद्वा न दृष्टान्तप्रदर्शनाय पञ्चभूतनित्यत्वादित्युक्तम् तेन परमाण्वाकाशदृष्टान्तता लभ्यते ॥ २९ ॥

समाधत्ते ।—सर्वानित्यत्वं न युक्तं घटाऽऽदीनाम् उत्पत्तिविनाशकारणानां कपालसंयोगमुद्गरपाताऽऽदीनाम् उपलब्धेः तथा चोत्पत्तिविनाशावश्यकाविति ॥ ३ ॥

पुनः शङ्कामाह ।—उक्तप्रतिषेधो न नित्यस्य परमाण्वादेर्लक्षणं भूतत्वाऽऽदि घटाऽऽदौ तदवरोधात् तत्सत्त्वात् तथा चोत्पादादिप्रत्यया भ्रान्ता इति भावः ॥ ३१ ॥

दूषयति —भानित्यत्वनिषेधो न युक्तः उत्पत्तेस्तत्कारणात् तत्समापकात उपलब्ध

नित्यविषय, न चोत्पत्तितत्कारणोपलब्धि शक्या प्रत्याख्यातं न चाविषया काचिदुपलब्धिरिति उपलब्धिसामर्थ्यात कारणेन समानगुणं कार्य्यमुत्पद्यत इत्यनुमीयते सा खलूपलब्धे र्विषय इति। एवञ्च तल्लक्षणावरोधोपपत्तिरिति उत्पत्तिविनाश कारणप्रयुक्तस्य ज्ञातु प्रयत्नो दृष्ट इति। प्रसिद्धश्चावयवी तद्धर्मो ऽत्पत्तिविनाशधर्मा चावयवो सिद्ध इति। * शब्दकर्मबुद्ध्यादीनां चाव्याप्ति * "पञ्चभूतनित्यत्वात्" "तल्लक्षणावरोधात" चेत्यनेन शब्दकर्मबुद्धिसुखदुःखेच्छाद्वेषप्रयत्नाश्च न व्याप्ता तस्मादनेकान्त * स्वप्नविषयाभिमानवन्मिथ्योपलब्धिरिति एत भूतोपलब्धौ तुल्यम। * यथा स्वप्ने विषयाभिमान एवमुत्पत्ति विनाशकारणाभिमान इति एवञ्चैतद्भूतोपलब्धौ तुल्यम द्युपृथिव्याद्युपलब्धिरपि स्वप्नविषयाभिमानवत प्रसज्यते * पृथिव्याद्यभावे सवव्यवहारविलोप इति चेत् तदितरत्र समानम उत्पत्तिविनाशकारणोपलब्धिविषयस्याप्यभावे सव व्यवहारविलोप इति सोऽयं नित्यानामतीन्द्रियत्वादविषयत्वा च्चोत्पत्तिविनाशयो स्वप्नविषयाभिमानवदनित्यहेतुरिति ॥३२॥

अवस्थितस्योपादानस्य धर्ममात्रं निवर्त्तते, धर्ममात्रमुपजायते, स खलूत्पत्तिविनाशयोर्विषय, यच्चोपजायते तत प्रागप्युपजननादस्ति, यच्च निवर्त्तते, तन्निवृत्तमप्यस्तीति, एवञ्च सर्वस्य नित्यत्वमिति,—

## न व्यवस्थाऽनुपपत्ते ॥ ३३ ॥

अयमुपन्न इयं निवृत्तिरिति व्यवस्था नोपपद्यते, उप

यथा चोत्पादविनाशप्रतीत प्रामाणिकत्वात् न तन्निर्ण्य इतरथा कादाचित्कत्वप्रतीत्यनुपपत्ते न चाऽऽविर्भावात् तदुपपत्ति तस्यवानित्यत्व सर्वनित्यत्वव्याघातात्। विवेचयिष्यते चैद स्पष्टतरमुपरिष्टात् ॥ ३२ ॥

उत्पादविनाशप्रत्ययस्य भ्रान्तत्व स्वादित्याशङ्क्याऽऽह।—वार्त्तिक

जातनिवृत्तयोर्विद्यमानत्वात् । अयं धर्म उपजातः, अयं निवृत्त इति सद्भावाविशेषादव्यवस्था, इदानीमुपजननिवृत्ती नानागतातीतकालव्यवस्था नोपपद्यते सर्वदा विद्यमानत्वात् अस्य धर्मस्योपजननिवृत्ती नास्तीति व्यवस्थाऽनुपपत्तिः उभयोरविशेषात् । अनागतोऽतीत इति कालव्यवस्थाऽनुपपत्तिः वर्त्तमानस्य सद्भावलक्षणत्वात्, अविद्यमानस्याऽऽत्मलाभ उपजनः विद्यमानस्याऽऽत्महानं निवृत्तिः इत्येतस्मिन् सति नैते दोषाः तस्मात् यदुक्तं —प्रागप्युपजननादस्ति निवृत्तश्चास्ति तदयुक्तमिति ॥ ३३ ॥

अयमन्य एकान्तः —

## सर्वं पृथक् भावलक्षणपृथक्त्वात् ॥ ३४ ॥

सर्वं नाना न कश्चिदेको भावो विद्यते कस्मात्?—भावलक्षणपृथक्त्वात् भावस्य लक्षणमभिधानं येन लक्ष्यते भावः, स समाख्याशब्दः, तस्य पृथग्विषयकत्वात् सर्वो भावः समाख्याशब्दः समूहवाची, कुम्भ इति सञ्ज्ञाशब्दो गन्धरसरूपस्पर्शसमूहे बुध्नपार्श्वग्रीवाऽऽदिसमूहे च वर्त्तते । निदर्शनमात्रञ्चेदमिति ॥ ३४ ॥

प्रमाणत्वेन सिद्धस्यापि अप्रमाणत्वशङ्कायां प्रमाप्रमव्यवहारविलोपः स्यादिति भावः ॥ ३३ ॥

समाप्तं सर्वनित्यत्वनिराकरणप्रकरणम् ।

अथ प्रसङ्गात् सर्वपृथक्त्वप्रकरणम् तत्र पूर्वपक्षसूत्रम् ।—सर्वं वस्तु पृथक् नाना लक्ष्यतेऽनेनेति लक्षणं समाख्या तस्याः पृथक्त्वं पृथगर्थकत्वम् तथा च प्रयोगः घटाऽऽदि समूहरूपं वाच्यत्वात् सेनावनाऽऽदिवत् अतीन्द्रिये गगनाऽऽदौ मानाभावात् आत्मनः शरीरातिरिक्तत्वात् गुणकर्मणोराश्रयाभेदात् विशेषसमवाययोर्मानाभावात् अभावस्य तुच्छत्वान्न व्यभिचारः यद्वा —घटाऽऽदिकं स्वस्मादपि पृथक् भावलक्षणानां गन्धरसाऽऽदीनां तत्तदवयवादीनाञ्च पृथक्त्वात् घटाऽऽदेश्च तदभेदादिति भावः ॥ ३४ ॥

नानेकलक्षणैरेकभावनिष्पत्तेः ॥ ३५ ॥

अनेकविधलक्षणैरिति मध्यमपदलोपी समासः। गन्धा ऽऽदिभिश्च गुणैर्बुध्नाऽऽदिभिश्चावयवैः सम्बद्ध एको भावो निष्पद्यते, गुणव्यतिरिक्तञ्च द्रव्यम्, अवयवातिरिक्तश्चावयवीति विभक्तन्याय श्चैतदुभयमिति ॥ ३५ ॥

अथापि —

लक्षणव्यवस्थानादेवाप्रतिषेधः ॥ ३६ ॥

न कश्चिदेको भाव इत्ययुक्तः प्रतिषेधः। कस्मात्?—लक्षण व्यवस्थानादेव, यदिदं लक्षणं भावस्य सञ्ज्ञाशब्दभूतं तदेक स्मिन् व्यवस्थितम्, यं कुम्भमद्राक्षं तं स्पृशामि यमेवास्प्राक्षं तं पश्यामीति नाणुसमूहो गृह्यते इति। * अणुसमूहे चागृह्य माणे यद्गृह्यते तदेकमेवेति। अथाप्येतदनुक्तं नास्त्येको भावः यस्मात् समुदायः एकानुपपत्तेर्नास्त्येव समूहः * नास्त्येको भावः यस्मात् समूहे भावशब्दप्रयोगः एकस्य चानुप पत्तेः समूहो नोपपद्यते, एकसमुच्चयो हि समूह इति व्याहत त्वादनुपपन्नम्, नास्त्येको भाव इति यस्य प्रतिषेधः प्रतिज्ञायते समूहे भावशब्दप्रयोगादिति हेतुं ब्रुवता स एवाभ्यनुज्ञायते,

समाधत्ते।—अनेकलक्षणैरनेकस्वरूपैः रूपरसाऽऽदिभिस्तत्तदवयवैश्च विशिष्टस्यैक स्यैव भावस्य निष्पत्तेरुत्पत्तेरित्यर्थः तथा चैकस्य धामण प्रत्यक्षाऽऽदिप्रमाणसिद्धत्वात् तस्य च भावत्वराशिमत्वादविरुद्धधर्माध्यासरूपरसाद्यात्मकत्वाभावादवयवानाञ्च कारणत्वात् कार्यकारणयोरभेदासम्भवाच्च न तत्तदात्मकत्वं घटाऽऽदेः सम्भवतीति भावः ॥ ३५ ॥

हेतुमाह।—लक्षणस्य यथाज्ञानानां घटपटाऽऽदीनां व्यवस्थानाद्व्यवस्थितत्वादेव अप्रतिषेधः पृथक्त्वव्यवस्थापनं नेत्यर्थः कपालसमवेतद्रव्यत्वाऽऽदिकं हि घटाऽऽदे र्लक्षणं कपाले घट इत्यादिप्रतीतिसिद्धम् न चैतत् समूहाऽऽत्मकत्वे सम्भवति। एव

एकमसमूहयो हि समूह इति। समूहे भावशब्दप्रयोगादिति चेत् समूहमाश्रित्य प्रत्येकं समूहिप्रतिषेधो नास्त्येको भाव इति, सोऽयमुभयतो व्याघातात् यत्किञ्चनवाद इति ॥ ३८ ॥

अयमपर एकान्त,—

**सर्वमभावो भावेष्वितरेतराभावसिद्धेः ॥ ३७ ॥**

यावद्भावजातं तत्सर्वमभावः कस्मात्?—भावेष्वितरेतराभावसिद्धेः। असन् गौरश्वात्मनाऽनश्वो गौः असन्नश्वो गवात्मनाऽगौरश्व इति। * असत्प्रत्ययस्य प्रतिषेधस्य च भावशब्देन सामानाधिकरण्यात् सर्वमभाव इति प्रतिज्ञावाक्ये पदयोः प्रतिज्ञाहेत्वोश्च व्याघातादयुक्तम्। अनेकस्याशेषता सर्वशब्दस्यार्थः भावप्रतिषेधश्चाभावशब्दस्यार्थः पूर्वं सोपाख्यमुत्तरं निरुपाख्यम् तत्र समुपाख्यायमानं कथं निरुपाख्यमभावः स्यादिति? न जात्वभावो निरुपाख्योऽनेकतयाऽशेषतया शक्यः प्रतिज्ञातुमिति। सर्वमेतदभाव इति चेत् यदिदं सर्वमिति मन्यसे, तदभाव इति एवं चेत् अनिवृत्तो व्याघातः अनेकमशेषञ्चेति नाभावप्रत्ययेन शक्यं भवितुम् अस्ति चायं प्रत्ययः सर्वमिति तस्मान्नाभाव इति। प्रतिज्ञाहेत्वोश्च व्याघातः सर्वमभाव इति, भावप्रतिषेधः प्रतिज्ञा भावेष्वितरेतराभावसिद्धेरिति हेतुः, भावेष्वितरेतराभावमनुज्ञायाऽऽश्रित्य चेतरेतराभावसिद्ध्या सर्वमभाव इत्युच्यते, यदि सर्वमभावो भावेष्वित

---

स्वरूपस्य घटादिरूपस्य यमहमद्राक्षं तं स्पृशामीति प्रत्यभिज्ञया व्यवस्थितत्वात्। परमाणोरप्रत्यक्षत्वाच्च तदसम्भवः किञ्च समूहलक्षणव्यवस्थितत्वमेव नोक्तं युक्तम् समूहो हि नानाव्यक्तिसमुदायः स च नैकव्यक्तेरनभ्युपगमे सिध्यतीति भावः ॥ ३६ ॥

समाप्तं सर्वपृथक्त्वनिराकरणप्रकरणम्।

सर्वशून्यत्वेन कार्यकारणभावासम्भव इति तन्निराकरणप्रकरणमारभते तत्र ज्ञानावस्थत्वमभावत्वव्याप्यं न वा? इति संशये पूर्वपक्षसूत्रम्।—सर्व इत्यादिपदम्,

रेतराभावसिद्धेरिति नोपपद्यते, अथ भावेष्वितरेतराभावसिद्धिः, सर्वमभाव इति नोपपद्यते, सूत्रेण चाभिसम्बन्धः ॥ ३७ ॥

## न स्वभावसिद्धेर्भावानाम ॥ ३८ ॥

न सर्वमभावः कस्मात्?—स्वेन भावेन सद्भावात् भावानाम्, स्वेन धर्मेण भावा भवन्तीति प्रतिज्ञायते कश्च स्वो धर्मो भावानाम?—द्रव्यगुणकर्मणां सदादिसामान्यं द्रव्याणां क्रियावत्त्वमादिविशेषः स्पर्शपर्यन्ताः पृथिव्या इति च प्रत्येकञ्चानन्तो भेदः सामान्यविशेषसमवायानाञ्च विशिष्टा धर्मा गृह्यन्ते सोऽयमभावस्य निरुपाख्यत्वात् सम्प्रत्यायकोऽर्थभेदो न स्यात् अस्ति त्वयं, तस्मान्न सर्वमभाव इति। अथवा न स्वभावसिद्धेर्भावानामिति स्वरूपसिद्धेरिति गौरिति प्रयुज्यमाने शब्दे जातिविशिष्टं द्रव्यं गृह्यते नाभावमात्रम् यदि च सर्वमभावः, गौरित्यभावः प्रतीयेत गोशब्देन चाभाव उच्येत यस्मात्तु गोशब्दप्रयोगे द्रव्यविशेषः प्रतीयते, नाभावः, तस्मादयुक्तमिति। अथवा न स्वभावसिद्धेरिति—असन् गौरश्वात्मनेति गवात्मना कस्मान्नोच्यते?—अवचनात् गवात्मना गौरस्तीति स्वभावसिद्धिः, अनश्वोऽश्व इति वा अगौर्गौरिति वा कस्मान्नोच्यते?—अवचनात् स्वेन रूपेण विद्यमानता द्रव्यस्येति विज्ञायते, अव्यतिरेकप्रतिषेधे च भावानामसंयोगाऽऽदिसम्बन्धो व्यतिरेकः अत्राव्यतिरेकोऽभेदाऽऽख्यसम्बन्धः, तत्प्रतिषेधे सदा असत्प्रत्ययसामानाधिकरण्यम्, यथा न सन्ति कुण्डे बदराणीति, असन् गौरश्वाऽऽत्मना अनश्वे गौरिति च गवाश्वयोरव्यतिरेकः प्रतिषिध्यते गवाश्वयोरेकत्वं नास्तीति,

अभावस्तुच्छम् तत्र प्रत्यक्ष मानमाह भावे ख्यात।—भावत्वाभिमतेषु घटाऽऽदिषु अभावत्वसिद्धे घट पटो नेत्यादिप्रतीत्या सर्वेषामभावत्वसिद्ध ॥ ३७ ॥

सिद्धान्तसूत्रम्।- भावानां पृथिव्यादीनां, स्वभावस्य धर्मादेः प्रत्या:

तस्मिन् प्रतिषिध्यमाने भावेन गवा सामानाधिकरण्य-मसत्प्रत्ययस्यासन् गौरश्वाऽऽत्मनेति यथा न सन्ति कुण्डे वदराणीति कुण्डे वदरसंयोगे प्रतिषिध्यमाने सद्भिरस-त्प्रत्ययस्य सामानाधिकरण्यमिति ॥ ३८ ॥

## न स्वभावसिद्धिरापेक्षिकत्वात् ॥ ३९ ॥

अपेक्षाकृतमापेक्षिकम, ह्रस्वापेक्षाकृत दीर्घ दीर्घापेक्षा कृत ह्रस्वम न स्वेनाऽऽत्मनावस्थित किञ्चित् कस्मात ?— अपेक्षासामर्थ्यात तस्मान्न स्वभावसिद्धिभावानामिति ॥ ३९ ॥

## व्याहतत्वादयुक्तम् ॥ ४० ॥

यदि ह्रस्वापेक्षाकृत दीर्घं किमिदानीमपेक्ष्य ह्रस्वमिति गृह्यते ?—अथ दीर्घापेक्षाकृत ह्रस्व, दीर्घमनापेक्षिकम एवमितरेतराऽऽश्रययोरेकस्याभावेऽन्यतराभावादुभयाभाव इति अपेक्षाव्यवस्थाऽनुपपन्ना। स्वभावसिद्धावसत्या समया परि-मण्डलयोर्वा द्रव्ययोरापेक्षिक दीर्घत्वह्रस्वत्वे कस्मान्न भवत ?— अपेक्षायामनपेक्षायाञ्च द्रव्ययोरभेद । यावती द्रव्ये अपेक्ष्यमाणे, तावती एवानपेक्ष्यमाणे, नान्यतरत्र भेद , आपेक्षिकत्वे तु सत्यन्यतरत्र विशेषोपजन स्यादिति। किमपेक्षासामर्थ्यमिति चेत् ?—द्वयोर्ग्रहणेऽतिशयग्रहणोपपत्ति , द्वे द्रव्ये पश्यन्नेकत्र

ऽऽदेश सिद्धे न हि तुच्छस्य नम्बरूपाऽऽदिक सत्त्वेन प्रतीतिर्वा सम्भ वति ॥ ३८ ॥

पुन शङ्कते।—न हि सर्वेषां भावानामेक स्वभाव सम्भवति आपेक्षिकत्वात् भिन्नत्वात्, भिन्नस्य एकस्वभावत्वे स्वस्मादपि भेदाऽऽपत्ते यथा —इतरसापेक्षत्वात् एतदपेक्षयाऽयं गोवतर, एतदपेक्षया ह्रस्व इति प्रतीते यत्र सापेक्ष तदवस्तु यथा नवासापेक्ष स्फाटकाऽऽरण्यम् ॥ ३९ ॥

समाधत्ते।—सापेक्षत्वस्य तुच्छत्वसाधनेऽव्याहतत्वादसिद्धत्वात् न वा घटाऽऽदे,

विद्यमानमतिशयं गृह्णाति, तद्दीर्घमिति व्यवस्यति, यच्च हीनं गृह्णाति, तद्ध्रस्वमिति व्यवस्यतीति, एतच्चापेक्षासामर्थ्य मिति ॥ ४० ॥

अथेमे सङ्ख्यैकान्तवादाः । सर्वमेकं,—सदविशेषात्, सर्वं द्वेधा —नित्यानित्यभेदात्, सर्वं त्रेधा,—ज्ञाता ज्ञानं ज्ञेय मिति सर्वं चतुर्द्धा —प्रमाता प्रमाणं प्रमेयं प्रमितिरिति एवं यथासम्भवमन्येऽपीति । तत्र परीक्षा —

**सङ्ख्यैकान्तासिद्धि कारणानुपपत्त्युपपत्तिभ्याम्॥४१॥**

यदि साध्यसाधनयोर्नानात्वम्, एकान्तो न सिध्यति, व्यतिरेकात् अथ साध्यसाधनयोरभेद एवमप्येकान्तो न सिध्यति साधनाभावात्, न हि तमन्तरेण कस्यचित् सिद्धि रिति ॥ ४१ ॥

साधकत्वं सम्भवति किञ्च साधकत्वं स्वापक्षं न वा आद्ये तस्य तुच्छत्वान्न साधकत्वम् अन्त्ये तस्यैव सत्यत्वात् कुतः सर्वशून्यत्वमिति भावः ॥ ४ ॥

समाप्तं सर्वशून्यतानिराकरणप्रकरणम् ।

अथ सङ्ख्यैकान्तवादनिराकरणप्रकरणम् । तत्र भाष्यम् —अथेमे सङ्ख्यैकान्तवादाः सर्वमेकं —सदविशेषात् सर्वं द्वेधा —नित्यानित्यभेदात् सर्वं त्रेधा —ज्ञाता ज्ञेयं ज्ञानमिति सर्वं चतुर्द्धा —प्रमाता प्रमाणं प्रमेयं प्रमितिरिति एवं यथासम्भव मन्येऽपि । तत्र यथा नित्यत्वानित्यत्वलक्षणधर्माभ्यां द्वैधं तथा सत्त्वेनैकमिति स्पष्टोऽर्थः । परं त्वेवं व्याचक्षते —एकमित्यद्वैतवादः तथा च ब्रह्मैवैकानावशेषं सत्यं सर्वमन्यन्मिथ्या यथा —सर्वं प्रपञ्चजातम् एकं द्वैतशून्यं सदविशेषात् घटः सन् पटः सन्निति प्रतीतौ घटाभिन्नसदभिन्नपटस्य घटाभेदसिद्धेः । श्रुतिरपि — एकमेवाद्वयं ब्रह्म । "नेह नानाऽस्ति किञ्चन" ( बृह उप ४ अध्या ४ ब्राह्म १९ मन्त्र ) इत्यादि । अन्येऽपीत्यनेन रूपसंज्ञासंस्कारवेदनाऽनुभवाः पञ्च स्कन्धा इति सौत्रान्तिका इत्यादि समुच्चयः एतन्मतापेक्षं सिद्धान्तसूत्रम् ।—सङ्ख्यैकान्ता न सिध्यन्ति कारणस्य प्रमाणस्य अनुपपत्तौ उपपत्तौ वा न सङ्ख्यैकान्तः, साधनस्य साध्यातिरिक्तस्यापरिहार्यत्वात् ॥४१॥

## न कारणावयवभावात् ॥ ४२ ॥

न सङ्ख्यैकान्तानामसिद्धिः, कस्मात्?—कारणस्यावयव भावात्। अवयवः कश्चित् साधनभूत इत्यव्यतिरेकः, एवं द्वैता ऽऽदीनामपीति ॥ ४२ ॥

## निरवयवत्वादहेतुः ॥ ४३ ॥

कारणस्यावयवभावादित्यहेतुः, कस्मात्?—सर्वमेक मित्यनपवर्गेण प्रतिज्ञाय कस्यचिदेकत्वमुच्यते, तत्र व्यपावृत्तो ऽवयवः साधनभूतो नोपपद्यते, एवं द्वैताऽऽदिष्वपीति। ते खल्विमे सङ्ख्यैकान्ता विशेषकारितस्यार्थविस्तारस्य प्रत्याख्याने न वर्त्तन्ते, प्रत्यक्षानुमानाऽऽगमविरोधान्मिथ्यावादा भवन्ति। अथाभ्यनुज्ञानेन वर्त्तन्ते, समानधर्मकारितोऽर्थसङ्ग्रहो विशेष कारितश्चार्थभेद इति एवमेकान्तत्वं जहतीति। ते खल्वेते तत्त्वज्ञानप्रविवेकार्थमेकान्ताः परीक्षिता इति ॥ ४३ ॥

प्रेत्यभावानन्तरं फलम्, तस्मिन् —

## सद्यः कालान्तरे च फलनिष्पत्तेः संशयः ॥ ४४ ॥

पचति दोग्धीति सद्यः फलमोदनपयसी, कर्षति वपतीति कालान्तरे फलं शस्याधिगम इति। अस्ति चेयं क्रिया

भाष्यपाठ।—न सङ्ख्यैकान्तस्यासिद्धिः कारणस्य प्रमाणस्य अवयवभावात् उक्तस्यैकदेशत्वात्तद्व्यवस्थापनाय भेदाभाव ॥ ४२ ॥

दूषयति।—उक्तो हेतुर्न युक्तः सर्वस्यैव पक्षत्वेनावशिष्टस्याभावात् पक्षैकदेशस्य हेतुत्वासम्भवादिति भावः स्यातन्तु सङ्क्षेपरेति। एतच्च नास्माकं रोचते सत्त्वेन नित्यस्य नित्यानित्यभेदात् द्वाभ्यां द्वाभ्युपगतत्वात् अनित्यस्याप्यनुमानस्य नित्यानित्यसाधकत्वे विरोधाभावात् कथमन्यथा षटपदार्थी सप्तपदार्थी च सिध्येत? तस्मादेतत् वादिनिराकरणपरत्वेन प्रकरणं सङ्घटितम् इति सङ्क्षेपः ॥ ४३ ॥

समाप्तं सङ्ख्यैकान्तवादनिराकरणप्रकरणम्।

क्रमावसरतः फलं परीक्षणीयं संशयमाह।—पाकाऽऽदिक्रियायाः सद्यः फलञ्च

"अग्निहोत्र जुहुयात् स्वर्गकाम" (मैत्री० उप० ६।३६) इति। एतस्या फले सशय ॥ ४४ ॥

**न सद्य, फल कालान्तरोपभोग्यत्वात् ॥ ४५ ॥**

स्वर्ग फल श्रूयते, तच्च भिन्नेऽस्मिन देहभेदादुत्पद्यत इति, न सद्यो ग्रामाऽऽदिकामानामारम्भफलमिति ॥ ४५ ॥

**कालान्तरेणानिष्पत्तिर्हेतुविनाशात ॥ ४६ ॥**

ध्वस्तायां प्रवृत्तौ प्रवृत्ते फल न कारणमन्तरेणोत्पत्तुमर्हति, न खलु वै विनष्टात् कारणात् किञ्चिदुत्पद्यत इति ॥ ४६ ॥

**प्राङ्निष्पत्तेर्वृक्षफलवत् तत्स्यात् ॥ ४७ ॥**

यथा फलार्थिना वृक्षमूले सेकाऽऽदिपरिकर्म क्रियत तस्मिश्च प्रध्वस्ते पृथिवीधातुरब्धातुना सङ्गृहीत आन्तरेण तेजसा पच्यमानो रसद्रव्य निर्वर्त्तयति, स द्रव्यभूतो रसो वृक्षानुगत पाकविशिष्टो व्यूहविशेषेण सन्निविशमान पर्णाऽऽदि फल निर्वर्त्तयति, एव परिषेकाऽऽदिकर्म चार्थवत् न च विनष्टात् फलनिष्पत्ति, तथा प्रवृत्त्या सस्कारो धमाधर्मलक्षणो जन्यते, स जातो निमित्तान्तरानुगृहीत कालान्तरे फल

त्वस्य कृष्याद कालान्तरफलकत्वस्य दर्शनादग्निहोत्रहवनाऽऽदार्हैसाऽऽदेर्वा फल सा ऽस्क कालान्तरेण वेति सशय ॥ ४४ ॥

तत्रहिककौत्थकौर्य्यादीनामेव फलत्वसम्भवे नादृष्टादिकल्पनमिति पूवपक्षे सिद्धान्तसूत्रम्।—कालान्त ।पभोग्यत्वेन प्रतिपादनादित्यथ स्वर्गो हि फल श्रूयत स च दुखासाम्भन्नसुख न चहिक सुख तथा एव हिसाऽऽन्तनरकापभोग फल श्रूयते न चेह तत्सम्भव इति भाव ॥ ४५ ॥

शङ्कते।—कालान्तरेण तत्तत्कम्मण फल न सम्भवात हेतोस्तत्कमण विना शात ॥ ४६ ॥

समाधत्त।—खयाऽऽदिनिष्पत्ते प्राक तद्दार स्यात्। दृष्टान्तमाह,—वृक्षफलवत्,

निष्पादयतीति। उक्तञ्चैतत —"पूर्वकृतफलानुबन्धात् तदुत्पत्ति" इति ॥ ४७ ॥

तदिदं प्राङ्निष्पत्तेर्निष्पद्यमानम्,—

**नासन्न सन्न सदसत्सदसतोर्वैधर्म्यात् ॥ ४८ ॥**

प्राङ्निष्पत्तेर्निष्पत्तिधर्मकं नासत्, उपादाननियमात कस्यचिदुत्पत्तये किञ्चिदुपादेयं न सर्वं सर्वस्येत्यसद्भावे नियमो नोपपद्यत इति। न सत प्रागुत्पत्तेर्विद्यमानस्योत्पत्तिरनुपपन्नेति न सदसत सदसतोर्वैधर्म्यात सदित्यर्थाभ्यनुज्ञा असदित्यर्थप्रतिषेध एतयोर्व्याघातो वैधर्म्यम, व्याघाताद व्यतिरेकानुपपत्तिरिति ॥ ४८ ॥

कस्मात ?—

**प्रागुत्पत्तेरुत्पत्तिधर्मकमसदित्यद्धा उत्पादव्ययदर्शनात ॥ ४९ ॥**

यथा मूलसेकाऽऽदिनाशेऽपि तदधीनावयवोपचयाऽऽदिद्वारकेण फलोत्पत्ति तथा प्रकृतेऽपि यागाऽऽदिनाशेऽपि तज्जन्यादृष्टरूपद्वारसत्त्वान्न स्वर्गाद्युत्पत्तिविरोध ॥ ४७ ॥

ननु कार्य्यकारणभाव एव न विचारसह इत्याशङ्कते।—प्राङ्निष्पत्तेरित्यनुवर्तते फलमित्यध्याहर्त्तव्यम् तथा चोत्पत्तेः प्राक फलं नासत् असत उत्पत्तौ शशशृङ्गादेरप्युत्पत्ति स्यात् स्याच्च सिकताभ्योऽपि तैलम् न वा सत् सत उत्पत्ति विरोधात अत एव न सदसत सदसतोः सत्त्वासत्त्वलक्षणवैधर्म्यात ॥ ४८ ॥

समाधत्ते।—उत्पत्तिधर्मकम् उत्पत्तिधर्मकत्वेनोपलभ्यमानं पटाऽऽदिकम् उत्पत्तेः प्रागसदिति अद्धा तत्त्वम् उत्पादनाशयोः प्रमितत्त्वात् इदानीं घट उत्पन्न इदानीं घटो विनष्ट इति प्रत्ययात् सतस्तु नोत्पत्तिसम्भव उत्पन्नपुनरुत्पादप्रसङ्गात यद्यपि नाशस्य न तत्र हेतुत्वं तथाऽप्यनुत्पन्नभावस्य नाशायोगादुत्पादसाधकत्वेन नाश उक्त ॥ ४९ ॥

यत्पुनरुक्तं—प्रागुत्पत्तेः कार्यं नासदुपादाननियमादिति,—

**बुद्धिसिद्धन्तु तदसत् ॥ ५० ॥**

इदमस्योत्पत्तये समर्थं, न सर्वमिति प्रागुत्पत्तेर्नियतकारणं कार्यं बुद्ध्या सिद्धमुत्पत्तिनियमदर्शनात्, तस्मादुपादाननियमस्योपपत्ति, सति तु कार्ये प्रागुत्पत्तेरुत्पत्तिरेव नास्तीति ॥ ५० ॥

**आश्रयव्यतिरेकाद्वृक्षफलोत्पत्तिवदित्यहेतु ॥ ५१ ॥**

मूलसेकाऽऽदिपरिकर्म फलञ्चोभयं वृक्षाऽऽश्रयं कर्म चेह शरीरे फलञ्चामुत्रेत्याश्रयव्यतिरेकादहेतुरिति ॥ ५१ ॥

**प्रीतेरात्माऽऽश्रयत्वादप्रतिषेध ॥ ५२ ॥**

प्रीतिरात्मप्रत्यक्षत्वादात्माऽऽश्रया तदाश्रयमेव कर्म धर्मसञ्ज्ञितं, धर्मस्याऽऽत्मगुणत्वात्। तस्मादाश्रयव्यतिरेकानुपपत्तिरिति ॥ ५२ ॥

असदुत्पत्तौ नियमो न स्यादित्यत आह।—तत्कार्यम् असत प्रागभावप्रतियोगि बुद्धिसिद्धं बुद्ध्या विषयीकृतम्, तथा इह इह तन्तुषु पटो भविष्यतीति ज्ञात्वा कुविन्दः प्रवर्त्तते न तु पटोऽस्तीति ज्ञात्वा, तथा सति सिद्धत्वेन ज्ञाते इच्छाऽभावात् प्रवृत्त्यनुपपत्तेः सिकताऽऽदौ पटो भविष्यतीति न ज्ञायते किन्तु न भविष्यतीति ज्ञायत एव कुत इति चेत् ?—अनुभव पृच्छ। किञ्च त्वन्मतेऽपि कुतो न ज्ञायते तत्र पटाभावादिति चेत्, कथमिदं निरणायि पटात् पूर्वं तन्तुसिकतयोस्तुल्यत्वात्, तन्तुत्वेनाऽऽश्रयतेति चेत्, तन्तुत्वेन कारणतयैव स्यात् प्रवृत्त्यनुरोधात् ॥ ५० ॥

नन्वस्तु हेतुफलभावः तथाऽपि वृक्षफलवदिति दृष्टान्तवैषम्यान्नादृष्टसिद्धिरित्याशयेन शङ्कते।—प्राक्निष्पत्तेर्वृक्षफलवदित्यहेतुः कुतः ?—आश्रयव्यतिरेकात्, यत कायेन कर्म कृतं तस्य नाशात्, वृक्षस्थले तु तस्य वृक्षस्य सत्त्वात् सलिलसेकाऽऽदिकं परिकर्मोपयुज्यत इत्यभिमानः ॥ ५१ ॥

समाधत्ते।—आश्रयव्यतिरेकादिति हेतुर्न युक्तः प्रीतेः सुखस्य स्वाश्रयशरीरावच्छेदेन जायमानस्य आत्मवृत्तित्वात्, यागाऽऽदिसामानाधिकरण्यादित्यर्थः ॥ ५२ ॥

**न पुत्रपशुस्त्रीपरिच्छदहिरण्यान्नाऽऽदिफल-निर्देशात् ॥ ५३ ॥**

पुत्राऽऽदि फलं निर्दिश्यते, न प्रीति "ग्रामकामो यजेत, पुत्रकामो यजेत" इति, तत्र यदुक्तं,—प्रीति फलमित्येतदयुक्तमिति ॥५३॥

**तत्सम्बन्धात् फलनिष्पत्तेस्तेषु फलवदुपचार ॥५४॥**

पुत्राऽऽदिसम्बन्धात फल प्रीतिलक्षणमुत्पद्यत इति पुत्राऽऽदिषु फलवदुपचार, यथाऽन्ने प्राणशब्द "अन्न वै प्राणा" इति ॥५४॥

फलानन्तर दुःखमुद्दिष्टम उक्तञ्च,— बाधनालक्षण दुःखम इति तत किमिद प्रत्यात्मवेदनीयस्य सर्वजन्तुप्रत्यक्षस्य सुखस्य प्रत्याख्यानम ?—आहोस्विदन्य कल्प इति ? अन्य इत्याह कथम ?—न वै सर्वलोकसाक्षिक सुख शक्य प्रत्याख्यातुम अयन्तु जन्ममरणप्रबन्धानुभवनिमित्ताद् दुःखान्निर्विण्णस्य दुःखञ्जिहासतो दुःखसंज्ञाभावनोपदेशो दुःखहानार्थ इति। कया युक्त्या ?—सर्वे खलु सत्त्वनिकाया सर्वाण्युत्पत्तिस्थानानि सर्व पुनर्भवो बाधनाऽनुषक्त, दुःखसाहचर्यात्, 'बाधनालक्षण दुःखम' इत्युक्तम ऋषिभिर्दुःखसंज्ञाभावनमुपदिश्यते, अत्र च हेतुरुपादीयते —

**विविधबाधनायोगाद्दुःखमेव जन्मोत्पत्ति ॥५५॥**

जन्म जायत इति शरीरेन्द्रियबुद्धय शरीराऽऽदीनाञ्च

---

क्वाचित्कामानाधिकरण्यसम्भवेऽपि सर्वत्र न तथात इत्यत।—पुत्राऽऽदीना फलनिर्देशात् सामानाधिकरण्य न सम्भवतीति भाव ॥ ५३ ॥

यद्यपि पुत्राऽऽदीनामहिकफलत्वात् तत्राऽऽश्रयव्यतिरेकाभावात् मद्देव न तथाऽपि यत्र जन्मान्तरीयधनाऽऽदिकमपि फल स्यात् तत्रापि नानुपपत्ति रत्याशङ्के नाऽऽह।—तत्सम्बन्धात् पुत्राऽऽदिसम्बन्धात फलनिष्पत्ते प्रीत्युत्पत्त तेषु पुत्राऽऽदिषु फलवदुपचार फलत्वेन व्यपदेश यथा — "अन्नं वै प्राणिना प्राणा" इति ॥ ५४ ॥

समाप्त फलपरीक्षाप्रकरणम् ।

अथ क्रमप्राप्त दुःख परीक्षणीयम्, तत्र च "बाधनालक्षणं दुःखम्" इत्युक्त,

संस्थानविशिष्टानां प्रादुर्भाव उत्पत्तिः, विविधा च बाधना— हीना मध्यमोत्कृष्टा चेति। उत्कृष्टा नारकिणां, तिरश्चान्तु मध्यमा, मनुष्याणान्तु हीना देवानां हीनतरा वीतरागाणाञ्च, एवं सर्वमुत्पत्तिस्थानं विविधबाधनाऽनुषक्तं पश्यतः सुखे तत्साधनेषु च शरीरेन्द्रियबुद्धिषु दुःखसंज्ञा व्यवतिष्ठते, दुःखसंज्ञाव्यवस्थानात् सर्वलोकेष्वनभिरतिसंज्ञा भवति अनभिरतिसंज्ञामुपासीनस्य सर्वलोकविषया तृष्णा विच्छिद्यते तृष्णाप्रहाणात् सर्वदुःखाद्विमुच्यत इति। यथा विषयोगात् पयो विषमिति बुध्यमानो नोपादत्ते, अनुपाददानो मरणदुःखं नाप्नोति ॥ ५५ ॥

दुःखोद्देशस्तु न सुखस्य प्रत्याख्यानम्। कस्मात्?—

## न सुखस्यान्तरालनिष्पत्तेः ॥ ५६ ॥

न खल्वयं दुःखोद्देशः सुखस्य प्रत्याख्यानम्। कस्मात्?— सुखस्यान्तरालनिष्पत्तेः, निष्पद्यते खलु बाधनाऽन्तरालेषु सुखं प्रत्यात्मवेदनीयं शरीरिणां, तदशक्यं प्रत्याख्यातुमिति ॥ ५६ ॥

अथापि,—

## बाधनाऽनिवृत्तेर्वेदयतः पर्य्येषणदोषादप्रतिषेधः ॥ ५७ ॥

सुखस्य दुःखोद्देशेनेति प्रकरणात्, पर्य्येषणं प्रार्थना विषयार्जनतृष्णा, पर्य्येषणस्य दोषः—यदयं वेदयमानः

---

तदर्थन्तु दुःखजन्मत्वम् इत्युक्तं तच्च शरीरादौ दुःखेऽव्याप्तमत्याशङ्क्याऽऽह।— जननयोगाज्जन्म शरीरादिकं तदुत्पत्तिसम्बन्धं विविधबाधनायोगात् दुःखमिति व्यपदिश्यते न तु वास्तवमेव तत् दुःखम्। तथा च, विविधदुःखानुषक्ततया हेयत्वाय दुःखमिति भावनीयमुपदिश्यते ॥ ५५ ॥

ननु दुःखभावनेन किं सुखं प्रत्याख्यायते? न चेदनुचितम्, अत आह।—दुःखानां मध्ये सुखस्याप्युत्पत्तावप्रत्याख्यानस्याशक्यत्वात् ॥ ५६ ॥

ननु सुखदुःखसम्बन्धाविशेषात् सुखभावनमेव किं नेष्यते? इत्यत आह।—दुःख

प्रार्थयते, तस्य प्रार्थितं न सम्पद्यते, सम्पद्य वा विपद्यते, न्यूनं वा सम्पद्यते बहु प्रत्यनीकं वा सम्पद्यते इत्येतस्मात् पर्य्येषण-दोषान्नानाविधो मानसः सन्तापो भवति, एवं वेदयतः पर्य्येषणदोषाद्बाधनाया अनिवृत्तिः बाधनाऽनिवृत्तेर्दुःखसंज्ञा भावनमुद्दिश्यते, अनेन कारणेन दुःखजन्म, न तु सुखस्याभावादिति। अथाप्येतदनूक्तम्,—" कामं कामयमानस्य यदा कामः समृध्यति। अथैनमपरः कामः क्षिप्रमेव प्रबाधते॥' " अपि चेदुदनेमिं समन्ताद्भूमिमिमां लभते सगवाश्वां, न स तेन धनेन धनैषी तृप्यति किन्तु सुखं धनकाम इति॥ ५७॥

## दुःखविकल्पे सुखाभिमानाच्च॥ ५८॥

दुःखसंज्ञाभावनोपदेशः क्रियते। अयं खलु सुखसंवेदने व्यवस्थितः सुखं परमपुरुषार्थं मन्यते न सुखादन्यन्निःश्रेयसमस्ति, सुखे प्राप्ते चरितार्थः कृतकरणीयो भवति मिथ्यासङ्कल्पात् सुखे तत्साधनेषु च विषयेषु संरज्यते संरक्तः सुखाय घटते घटमानस्यास्य जन्मजराव्याधिप्रायणानिष्टसंयोगेष्ट-वियोगप्रार्थितानुपपत्तिनिमित्तमनेकविधं यावद्दुःखमुत्पद्यते तं दुःखविकल्पं सुखमित्यभिमन्यते। सुखाङ्गभूतं दुःखं, न दुःखमनापाद्य शक्यं सुखमवाप्तुम्, तादर्थ्यात् सुखमवेदमिति सुखसंज्ञोपहतप्रज्ञो जायस्व म्रियस्वेति सन्धावतीति संसारं नातिवर्त्तते, तदस्याः सुखसंज्ञायाः प्रतिपक्षो दुःखसंज्ञाभावन-मुपदिश्यते। दुःखानुषङ्गात् दुःखं जन्मेति, न सुखस्याभावात्,

---

भावनस्य न प्रतिषेधः वन्यते सुखसाधनत्वं जानतः पर्य्येषणदोषात पर्य्येषणे सुखार्थप्रवर्त्तने दोषात् सुखार्थं प्रवर्त्तमानो हि अर्जनपालनाऽऽदौ विविधाभिर्बाधनाभिरुपतप्यते अतो दुःखभावनं वैराग्यहेतुतयोपदिश्यते॥ ५७॥

ननु दुःखमनुभवतः स्वत एव सिद्धात्तत्सम्भवात् दुःखभावनोपदेशो व्यर्थ, इत्यत

यद्येव कस्मात दु ख जन्मेति नोच्यत ? साऽयमेव वाच्ये यदेवमाह,- द खमेव जन्मति, तेन सुखाभाव ज्ञापयतोति। जन्मनिग्रहार्थीयो (थ) वै खल्वयमेवशब्द , कथम ?—न दु ख जन्म स्वरूपत किन्तु दु खापचारात्, एव सुखमपोत, एतदनेनैव निवर्त्त्यते न तु दु खमेव जन्मेति ॥ ५८ ॥

दु खोद्देशानन्तरमपवर्ग स प्रत्याख्यायते—

ऋणक्लेशप्रवृत्त्यनुबन्धादपवर्गाभाव ॥ ५९ ॥

ऋणानुबन्धान्नास्त्यपवर्ग । जायमानो ह वै ब्राह्मणस्त्रिभि ऋणैऋणवान जायते ब्रह्मचर्य्येण ऋषिभ्य, यज्ञेन देवेभ्य प्रजया पितृभ्य" ( तैत्ति० स० ६।३।१०।५ ) इति ऋणानि तेषामनुबन्ध स्वकर्मभि सम्बन्ध, कमसम्बन्धवचनात्— जरामय्य वा एतत् सत्र यदग्निहोत्र दशपूर्णमासौ च' इति, 'जरया ह वा एष तस्मात सत्राद्विमुच्यते मृत्युना ह च' इति, ऋणानुबन्धादपवर्गानुष्ठानकाला नास्तोत्यपवगाभाव । क्लेशानुबन्धान्नास्त्यपवर्ग क्लेशानुबद्ध जायते, नास्य क्लेशानुबन्ध

ध्याह।—द खस्य विविध कल्पो यव तादृश प्रातषिद्धहिसाभाननमधुनाऽऽ नै प्रवृत्तिमा भूदित्यय मुपदेश इति भाव ॥ ५८ ॥

समाप्त द खपरीक्षाप्रकरणम्।

अथ क्रमप्राप्ततयाऽपवर्ग परीक्षणीय । तत्र च तदथकप्रवृत्तिकालाभावात तदभाव इति पूर्वपक्षयति।—ऋणाद्यनुबन्धादपवर्गानुष्ठानकालाभावादपवर्गाभाव स्यात तथा च श्रयते — जायमाना ह वै ब्राह्मणस्त्रिभि ऋण ऋणवान जायते ब्रह्मचर्य्येण ऋषिभ्य यज्ञेन देवभ्य प्रजया पितृभ्य ( तत्ति स ६।३।१ ।५ ) इति ऋषिभ्य ऋणेभ्यो ब्रह्मचर्य्येण मुच्यत देवभ्य देवर्णेभ्य यज्ञेन मुच्यत प्रजया अपत्येन पि णेभ्या मुच्यते ऋणापाकरणेनव च जीवनापगम तथा च श्रयत —"जरामर्य्यं

(थ) जन्मनिग्रहार्थीय इत्यस्य प्रयोगस्य मत्वर्थीयप्रयोगवत् साधुत्वम् जन्म निग्रह एव अथ प्रवत्तते इत्यथ ।

विच्छेदो गृह्यते। प्रवृत्त्यनुबन्धाभावस्यपवर्ग, जन्मप्रभृत्यय यावत् प्रायण वाग्बुद्धिशरीराऽऽरम्भेणाविमुक्तो गृह्यते, तत्र यदुक्त — "दुःखजन्मप्रवृत्तिदोषमिथ्याज्ञानानामुत्तरोत्तरापाये तदनन्तरा भावादपवर्ग इति, तदनुपपन्नमिति ॥ ५९ ॥

अत्राभिधीयते, यत्तावदृणानुबन्धादिति ऋणैरिव ऋणैरिति —

प्रधानशब्दानुपपत्तेर्गुणशब्देनानुवादो निन्दा-प्रशंसोपपत्ते ॥ ६० ॥

ऋणैरिति नाय प्रधानशब्द, यत्र खल्वेक प्रत्यादेय ददाति, द्वितीयश्च प्रतिदेय गृह्णाति तत्रास्य दृष्टत्वात् प्रधान ऋणशब्द, न चैतदिहोपपद्यते, प्रधानशब्दानुपपत्तेर्गुणशब्दे-

वा एतत्सत्र यदग्निहोत्रं दर्शपूर्णमासौ च" "जरया ह वा एष तस्मात् सत्राद्विमुच्यते मृत्युना ह च" इति ऋणापाकरणमन्तरेण च न तत्र प्रवृत्ति तथा च स्मर्यते — "ऋणानि त्रीण्यपाकृत्य मनो मोक्षे निवेशयेत्। अनपाकृत्य मोक्षन्तु सेवमानो पतत्यध ॥" एवं क्लेशानुबन्धादपि पुरुषो हि रागाऽऽदिभिस्तत्कर्माण्यारभमाण क्लेशानुविद्ध एव दृश्यते तत् कथमपवर्ग ? एव प्रवृत्त्यनुबन्धादपि पुरुषो ऽह वाग्बुद्धिशरीरैस्तत्कर्माण्यारभमाणो धर्माधर्मौ यावज्जीवमुपार्जयन् कथमपवृज्यताम् ? इति ॥ ५९ ॥

समाधत्त।—जायमान इत्याद्यनुवादो हि प्रधानशब्द न हि जायमान कमप्यधिक्रियते तथा च भाष्यम —यदा तु मातृतो जायते कुमार न तदा कर्माभराधिक्रियते अर्थिन शक्तस्य चाधिकारादिति। जायमान इत्यनेन को वा व्यावर्त्तनीय ?—न ह्यजातस्य प्रवृत्तिरस्ति यैनासौ व्यावर्त्तनीय तत्र भाष्यम् — जायमान इति गुणशब्द विपर्ययेऽनधिकारादिति। तथा च जायमान इत्यनेनोपनीत उच्यते तस्य ब्रह्मचर्याऽऽऽवधिकारात् आग्नेयोवाऽऽ गृहस्थस्याधिकार, "यौमे वत्सानो वाऽधीयताम् इति श्रुते एवमृणशब्दोऽपि न मुख्य। न ह्यत्र प्रत्यादेय कश्चन ददाति परन्तु ऋणापाकरणवदावश्यकत्वख्यापनाय तथोक्तम्। आर्थिक शब्दप्रयोगे बीजमाह।—निन्दाप्रशंसोपपत्त ऋणानपाकरणतदपाकरणाभ्यामिवापि

नायमनुवाद ऋणैरिव ऋणैरिति, प्रयुक्तोपमश्चैतत् अग्निर्माणवक इति, अन्यत्र दृष्टश्चायमृणशब्द इह प्रयुज्यते, यथाऽग्निशब्दो माणवके। * कथं गुणशब्देनानुवाद ?—निन्दाप्रशंसोपपत्तेः। * कर्मलोपे ऋणीव ऋणादानान्निन्द्यते, कर्मानुष्ठाने च ऋणीव ऋणदानात् प्रशस्यते। * जायमान इति गुणशब्दः विपर्ययेऽनधिकारात्। * 'जायमानो ह वै ब्राह्मण" (तैत्ति० सं० ६।३।१०।५) इति च शब्दो गृहस्थः सम्पद्यमानो जायमान इति, यदाऽयं गृहस्थो जायते तदा कर्मभिरधिक्रियते, मातृतो जायमानस्यानधिकारात्, यदा तु मातृतो जायते कुमारः न तदा कर्मभिरधिक्रियते, * अर्थिनः शक्तस्य चाधिकारात् * अर्थिनः कर्मभिरधिकारः, कर्मविधौ कामसंयोगस्मृतेः, "अग्निहोत्रं जुहुयात् स्वर्गकामः" (मैत्री० उप० ६।३६) इत्येवमादि। * शक्तस्य च प्रवृत्तिसम्भवात् * शक्तस्य कर्मभिरधिकारः, प्रवृत्तिसम्भवात्, शक्तः खलु विहिते कर्मणि प्रवर्त्तते, नेतर इति। *उभयाभावस्तु प्रधानशब्दार्थे * मातृतो जायमाने कुमारे उभयमर्थिता शक्तिश्च न भवतीति। न भिद्यते च लौकिकाद्वाक्याद्वैदिकं वाक्यं प्रेक्षापूर्वकारिपुरुषप्रणीतत्वेन, तत्र लौकिकस्तावदपरीक्षकोऽपि न जातमात्रं कुमारकमेवं ब्रूयात्—अधीष्व यजस्व ब्रह्मचर्यं चरेति, कुत एवम् ऋषिरुपपन्नानवद्यवादी उपदेशार्थेन प्रयुक्त उपदिशति ? न खलु वै नर्त्तकोऽन्धेषु प्रवर्त्तते, न गायको बधिरेष्विति। *उपदिष्टार्थविज्ञानञ्चोपदेशविषयः * यश्चोपदिष्टमर्थं विजानाति, तं प्रत्युपदेशः क्रियते, न चैतदस्ति जायमानकुमारक इति।

गौणवाचकस्यमत्वकरणाभ्यां निन्दाप्रशंसे उपपद्येते न चानुष्ठानकालाभाव जरया विमुच्यत इत्युक्ते, न च जरयाऽशक्तिरुपपद्यते, "भस्मवाधो वा जुहुयात्

गार्हस्थ्यलिङ्गस्य मन्त्रब्राह्मणं कर्माभिवदति यच्च मन्त्रब्राह्मणं कर्माभिवदति तत् पत्नीसम्बन्धिना गार्हस्थ्यलिङ्गेनोपपन्नम्, तस्माद्गृहस्थोऽयं जायमानोऽभिधीयत इति। * अर्थित्वस्य चाविपरिणामे जरामर्य्यवादोपपत्तेः * यावच्चास्य फलेनार्थित्वं न विपरिणमते न निवर्त्तते तावदनेन कर्मानुष्ठेयम् इत्युपपद्यते जरामर्य्यवादस्तं प्रतीति, जरया ह वेत्यायुषस्तुरीयस्य चतुर्थस्य प्रव्रज्यायुक्तस्य वचनम्, जरया ह वैष एतस्माद्विमुच्यत इति, आयुषस्तुरीयं चतुर्थं प्रव्रज्यायुक्तं जरेत्युच्यते तत्र हि प्रव्रज्या विधीयते, अत्यन्तजरासंयोगे जरया ह वेत्यनर्थकम्, अशक्तो विमुच्यत इत्येतदपि नोपपद्यते स्वयमशक्तस्य वाह्यां शक्तिमाह—"अन्तेवासी वा जुहुयाद्ब्रह्मणा स परिक्रीतः", "क्षीरहोता वा जुहुयाद्धनेन स परिक्रीत" इति। * अथापि विहितं वाऽनूद्येत, कामाद्वाऽर्थं परिकल्प्येत, विहितानुवचनं न्याय्यमिति * ऋणवानिवास्वतन्त्रो गृहस्थः कर्मसु प्रवर्त्तते इत्युपपन्नं वाक्यस्य सामर्थ्यम्, फलस्य हि साधनानि प्रयत्नविषयो न फलम्, तानि सम्पन्नानि फलाय कल्पन्ते विहितञ्च जायमानं, विधीयते च जायमानं तेन यः सम्बध्यते, सोऽयं जायमान इति। * प्रत्यक्षविधानाभावादिति चेत् न, प्रतिषेधस्यापि प्रत्यक्षविधानाभावादिति। * प्रत्यक्षतो विधीयते गार्हस्थ्यं ब्राह्मणेन यदि चाऽऽश्रमान्तरमभविष्यत् तदपि व्यधास्यत प्रत्यक्षतः, प्रत्यक्षविधानाभावान्नास्त्याश्रमान्तरमिति न प्रतिषेधस्य प्रत्यक्षविधानाभावात् न प्रतिषेधोऽपि वै ब्राह्मणेन प्रत्यक्षतो विधीयते, न सन्त्याश्रमान्तराणि एक एव

ब्रह्मणा स परिक्रीत" इत्यादिनाऽशक्तस्यापि विधानात् तस्मादायुषश्चतुर्थभागो जरेत्युच्यते। किञ्च जरामर्य्यवादः कामनाऽभिप्रायेण तथा च भाष्यम्—अर्थित्वस्य

गृहस्थाऽऽश्रम इति प्रतिषेधस्य प्रत्यक्षतोऽश्रवणादयुक्तमेतदिति ॥ ६० ॥

## अधिकाराच्च विधानं विद्याऽन्तरवत् ॥ ६१ ॥

यथा शास्त्रान्तराणि स्वे स्वेऽधिकारे प्रत्यक्षतो विधायकानि, नार्थान्तराभावात् एवमिदं ब्राह्मणं गृहस्थशास्त्रं स्वेऽधिकारे प्रत्यक्षतो विधायकं नाऽऽश्रमान्तराणामभावादिति। * ऋग्ब्राह्मणञ्चापवर्गाभिधाय्यभिधीयते। * ऋचश्च ब्राह्मणानि चापवर्गाभिवादीनि भवन्ति। ऋचश्च तावत्,—"कर्मभिर्मृत्युमृषयो निषेदुः प्रजावन्तो द्रविणमिच्छमानाः। अथापरे ऋषयो मनीषिणः परं कर्मभ्योऽमृतत्वमानशुः॥"। "न कर्मणा न प्रजया धनेन त्यागेनैके अमृतत्वमानशुः" ( कैव० उप० २ श्लोक )। "परेण नाकं निहितं गुहायां विभ्राजते यद्यतयो विशन्ति" ( कैव० उप० ३ श्लोक )। 'वेदाहमेतं पुरुषं महान्तमादित्यवर्णं तमसः परस्तात्। तमेव विदित्वा अतिमृत्युमेति नान्यः पन्था विद्यतेऽयनाय॥ ( श्वेता० उप० ३ अध्या० ८ मन्त्र )। अथ ब्राह्मणानि—"त्रयो धर्मस्कन्धाः,—यज्ञोऽध्ययनं दानमिति, प्रथमस्तप एव, द्वितीयो ब्रह्मचार्य्याचार्य्यकुलवासी, तृतीयोऽत्यन्तमात्मानमाचार्य्यकुलेऽवसादयन्, सर्व एवैते पुण्यलोका भवन्ति, ब्रह्मसंस्थोऽमृतत्वमेति" ( छान्दो० उप० २ अध्या० २३ खण्ड० २ मन्त्र )। "एतमेव प्रव्राजिनो लोकमिच्छन्तः प्रव्रजन्तीति" ( वृह० उप० ४ अध्या० ४ ब्राह्म० २२ मन्त्र )। "अथो खल्वाहुः, काममय एवायं पुरुष इति, स यथाकामो भवति, तत्क्रतुर्भवति, यत्क्रतु

---

आपरिणामे जरामय्यवादोपपत्तेरिति। अथिल कामना तदपरिणामी तदनाशे, कर्मकरणाभिप्रायेण जरामर्य्यवाद उपपद्यते ॥ ६० ॥

भवति, तत्कर्म कुरुते यत्कर्म कुरुते, तदभिसम्पद्यते,' ( बृह० उप० ४ अध्या० ४ ब्राह्म० ५ मन्त्र ) इति कर्मभि ससरणमुक्त्वा प्रकृतमन्यदुपदिशन्ति, "—इति नु कामयमानोऽथाकामयमानो योऽकामो निष्काम आप्तकाम आत्मकाम न तस्य प्राणा उत्क्रामन्ति, अत्रैव समवनीयन्ते, (८) ब्रह्मैव सन ब्रह्माप्येति" इति ( बृह० उप० ४ अध्या० ४ ब्राह्म० ६ मन्त्र )। तत्र यदुक्तम —ऋणानुबन्धादपवर्गाभाव इत्येतदयुक्तमिति। ये 'चत्वार पथयो देवयाना इति च चातुराश्रम्यश्रुतेरेका-ऽऽश्रम्यानुपपत्ति, फलार्थिनश्चेद ब्राह्मण,— जरामर्य्यं वा एतत् सत्र यदग्निहोत्र दर्शपूर्णमासौ च' इति ॥ ६१ ॥

कथम ?—

## समारोपणादात्मन्यप्रतिषेध ॥ ६२ ॥

"प्राजापत्यामिष्टि निरूप्य तस्या सार्ववेदस हुत्वा आत्मन्यग्नीन समारोप्य ब्राह्मण प्रव्रजेत' इति श्रूयते, तेन विजानीम प्रजावित्तलोकैषणाभ्या व्युत्थितस्य निवृत्त फलार्थित्वे समारोपण विधीयत इति। एवञ्च ब्राह्मणानि "—अथ ह याज्ञवल्क्यो-ऽन्यद्वृत्तमुपाकरिष्यन। मैत्रेयीति होवाच याज्ञवल्क्य, प्रव्रजिष्यन वा अरे अहमस्मात्स्थानादस्मि हन्त तेऽनया कात्यायन्याऽन्त करवाणि' ( बृह० उप० ४ अध्या० ५ ब्राह्म०

ननु काम्याना कामनाविरहेण त्यागसम्भवेऽपि नित्याना कथ त्याग —श्रूयते ह — यावज्जीवमग्निहोत्र जुहुयात् इति। तत्राऽऽह —अपवर्गप्रतिषेधो न युक्त अग्नीनाम आत्मनि समारोपविधानात। श्रुतिः— प्राजापत्यामिष्टि निरूप्य तस्या

(८) समवनीयन्त—एकीभावेन समवसृज्यन्त प्रलीयन्त इत्यथ " इति भाष्यम्। "अत्रैव समवनीयन्ते" इत्यशस्तु नृसिंहोत्तरतापन्या प्रथमोपनिषदि ५म खण्डान्ते दृश्यते।

१२ मन्त्रौ )। "इत्युक्तानुशासनाऽसि मैत्रेयि एतावदरे खल्वमृतत्वम् इति होक्त्वा याज्ञवल्क्यः विजहार" ( बृह० उप० ४ अध्या० ५ ब्राह्म० १५ मन्त्र )॥ ६२॥

## पात्रचयान्तानुपपत्तेश्च फलाभावः ॥ ६२ ॥ क ॥

जरामर्य्ये च कर्मण्यविशेषेण कल्प्यमाने सर्वस्य पात्रचयान्तानि कर्माणि इति प्रसज्यते, तत्र एषणा व्युत्थानं न श्रूयते,—"एतद्ध स्म वै तत्पूर्वे विद्वांसः प्रजां न कामयन्ते, किं प्रजया करिष्यामः। येषां नोऽयमात्माऽयं लोक इति ते ह स्म पुत्रैषणायाश्च वित्तैषणायाश्च लोकैषणायाश्च व्युत्थायाथ भिक्षा-

चर्यं चरन्ति" ( बृह० उप० ... ) ... इत्युक्तम् ... ॥ ६२ ॥

चर्य्य चरन्ति" (बृह० उप० ४ अध्या० ४ ब्राह्म० २२ मन्त्र) इति एषणाभ्यस्य व्युत्थितस्य पात्रचयान्तानि कर्माणि नोपपद्यन्त इति, नाविशेषेण कर्त्तु प्रयोजकफलं भवतीति। चातुराश्रम्य विधानाच्चेतिहास पुराण धर्मशास्त्रेष्वैकाऽऽश्रम्यानुपपत्ति। तद प्रमाणमिति चेत न, प्रमाणेन प्रामाण्याभ्यनुज्ञानात्, प्रमाणेन खलु ब्राह्मणेनेतिहासपुराणस्य प्रामाण्यमभ्यनुज्ञायते त वा खल्वेत अथर्वाऽऽङ्गिरस एतदितिहासपुराणमभ्यवदन, इतिहास पुराण पञ्चम वेदाना वेद इति तस्मादयुक्तमेतदप्रामाण्यमिति। अप्रामाण्ये च धर्मशास्त्रस्य प्राणभृता व्यवहारलोपाल्लोकोच्छेद प्रसङ्ग। * द्रष्टृप्रवक्तृसामान्याच्चाप्रामाण्यानुपपत्ति। य एव मन्त्रब्राह्मणस्य द्रष्टार प्रवक्तारश्च, ते खल्वितिहास पुराणस्य धर्मशास्त्रस्य चेति। * विषयव्यवस्थानाच्च यथाविषय प्रामाण्यम* अन्यो मन्त्रब्राह्मणस्य विषय, अन्यश्चेतिहासपुराणधर्मशास्त्राणा मिति, यज्ञो मन्त्रब्राह्मणस्य, लोकवृत्तमितिहासपुराणस्य, लोकव्यवहारव्यवस्थान धर्मशास्त्रस्य विषय, तत्रैकेन सर्वं व्यवस्थाप्यत इति, यथाविषयमेतानि प्रमाणानीन्द्रियादिवदिति। यत् पुनरेतत् क्लेशानुबन्धस्याविच्छेदादिति,—

## सुषुप्तस्य स्वप्नादर्शने क्लेशाभावादपवर्ग ॥ ६३ ॥

यथा सुषुप्तस्य खलु स्वप्नादर्शने रागानुबन्ध सुखदु खानु बन्धश्च विच्छिद्यते, तथाऽपवर्गेऽपीति। एतच्च ब्रह्मविदा मुक्त स्याऽऽत्मनो रूपमुदाहरन्तीति ॥ ६३ ॥

क्लेशानुबन्ध दूषयति।—स्वप्नादर्शनकाले सुषुप्तस्य यथा क्लेशाभावेन दु खाभाव, तथाऽपवर्गेऽपि रागाद्यभावेन दु खाभाव स्यात् ॥ ६३ ॥

यदपि प्रवृत्त्यनुबन्धादिति —

**न प्रवृत्तिः प्रतिसन्धानाय हीनक्लेशस्य ॥ ६४ ॥**

प्रक्षीणेषु रागद्वेषमोहेषु प्रवृत्तिर्न प्रतिसन्धानाय पूर्वसन्धिस्तु पूर्वजन्मनिवृत्तौ पुनर्जन्म, तच्चादृष्टकारितं तस्याः प्रहीणायां पूर्वजन्माभावे जन्मान्तराभावोऽप्रतिसन्धानमपवर्गः। * कर्मवैकल्यप्रसङ्ग इति चेत् न कर्मविपाकप्रतिसंवेदनस्याप्रत्याख्यानात् * पूर्वजन्मनिवृत्तौ पुनर्जन्म न भवतीत्युच्यते न तु कर्मविपाकप्रतिसंवेदनं प्रत्याख्यायते, सर्वाणि पूर्वकर्माणि ह्यन्ते जन्मनि विपच्यन्त इति ॥ ६४ ॥

**न क्लेशसन्ततेः स्वाभाविकत्वात् ॥ ६५ ॥**

नोपपद्यते क्लेशानुबन्धविच्छेदः, कस्मात्?—क्लेशसन्ततेः स्वाभाविकत्वात् अनादिरियं क्लेशसन्ततिः, न चानादिः शक्य उच्छेत्तुमिति ॥ ६५ ॥

अत्र कश्चित् परिहारमाह —

**प्रागुत्पत्तेरभावानित्यत्ववत् स्वाभाविकेऽप्यनित्यत्वम् ॥ ६६ ॥**

यथाऽनादिः प्रागुत्पत्तेरभाव उत्पन्नेन भावेन निवर्त्यते, एवं स्वाभाविकी क्लेशसन्ततिरनित्येति ॥ ६६ ॥

प्रवृत्त्यनुबन्धादपवर्गाभावं दूषयति।—क्लिश्यन्तेऽनेनेति क्लेशो रागादिः तद्रहितस्य या प्रवृत्तिः सा प्रतिसन्धानाय प्रतिबन्धाय * भवति धर्माधर्मौ न जनयतीत्यर्थः ॥ ६४ ॥

क्लेशाभावमसहमानः शङ्कते।—क्लेशसन्ततेरुच्छेदो न युक्तः, स्वाभाविकत्वात् ॥ ६५ ॥

अपर आह —

**अणुश्यामताऽनित्यत्ववद्वा ॥ ६७ ॥**

यथाऽनादिरणुश्यामता अथ चाऽग्निसंयोगादनित्या तथा क्लेशसन्ततिरपीति ॥ ६७ ॥

सत खलु धर्मो नित्यत्वमनित्यत्वञ्च तत्त्वभावे ( तत्त्वअभावे ) भाक्तमिति अनादिरणुश्यामतेति हेत्वभावादयुक्तम अनुत्पत्तिधर्मकमनित्यमिति नात्र हेतुरस्तीति। अय तु समाधि —

**न सङ्कल्पनिमित्तत्वाच्च रागादीनाम् ॥ ६८ ॥**

कर्मनिमित्तत्वादितरेतरनिमित्तत्वाच्चेति समुच्चय मिथ्यासङ्कल्पेभ्यो रञ्जनीय कोपनीय मोहनीयेभ्य रागद्वेषमोहा उत्पद्यन्ते कर्म च सत्त्वनिकायनिर्वर्त्तकं नैयमिकान् रागद्वेषमोहान् निर्वर्त्तयति नियमदर्शनात् दृश्यते हि कश्चित्सत्त्वनिकायो रागबहुल कश्चिद्द्वेषबहुल कश्चिन्मोहबहुल इति। इतरेतरनिमित्ता च रागादीनामुत्पत्ति मूढो रज्यति, मूढ कुप्यति, रक्तो मुह्यति कुपितो मुह्यति। सर्वमिथ्यासङ्कल्पानां तत्त्वज्ञानादनुत्पत्ति कारणानुत्पत्तौ च कार्य्यानुत्पत्तेरिति रागाऽऽदीनामत्यन्तमनुत्पत्तिरिति। अनादिश्च क्लेशसन्ततिरित्ययुक्तम, सर्व इमे खल्वाध्यात्मिका भावा अनादिना प्रबन्धेन प्रवर्त्तन्ते शरीराऽऽदय न जात्वत्र कश्चिदनुत्पन्नपूर्व प्रथमत

एकदेशी समाधत्त।—प्रागुत्पत्तरभावानित्यत्ववत् प्रागभावानित्यत्ववत् अनादपरमाणुश्यामताया विनाशवद्वा विनाश ॥ ६६ ॥ ६७ ॥

आनित्यत्वं विनाशिभावत्वं न च तत प्रागभावे न वाऽणुश्यामताऽऽग्निरमादि तथा च भाष्यम् —अनादिरणुश्यामतेति हेत्वभावादयुक्तम्। इत्यतो मतद्वयमुपेक्ष्य स्वसिद्धान्तमाह।—नोक्तं युक्तम् कुत ?—रागाऽऽदीनां सङ्कल्पनिमित्तत्वात् सङ्कल्पो

उत्पद्यते अन्यत्र तत्त्वज्ञानात। न चैव सत्यनुत्पत्तिधर्मक किञ्चिदुदयधर्मक प्रतिज्ञायत इति, कर्म च सत्त्वनिकाय निवर्त्तक तत्त्वज्ञानकृतात मिथ्यासङ्कल्पविघातान्न रागाद्युत्पत्ति निमित्त भवति, सुखदु खसवित्तिफलन्तु भवतीति ॥ ६८ ॥

इति वात्स्यायनीये न्यायभाष्ये चतुर्थाध्यायस्याऽऽद्यमाह्निकम।

---

## चतुर्थाध्यायस्य द्वितीयमाह्निकम्।

---

किन्नु खलु भो यावन्तो विषया, तावत्सु प्रत्येक ज्ञान मुत्पद्यत ? अथ क्वचिदुत्पद्यत ? इति। कस्मात विशेष ?—न तावदेकैकत्र यावद्विषयमुत्पद्यत ज्ञेयानामानन्त्यात नापि क्वचिदुत्पद्यते, यत्र नोत्पद्यते तत्रानिवृत्तो मोह इति मोहशेषप्रसङ्ग न चान्यविषयेण तत्त्वज्ञानेनान्यविषयो मोह शक्य प्रतिषेद्धुमिति। (ध) मिथ्याज्ञान वै खलु मोह, न तत्त्वज्ञानस्यानुत्पत्तिमात्रम तच्च मिथ्याज्ञान यत्र विषये प्रवर्त्तमान ससारबीज भवति, स विषयस्तत्त्वतो ज्ञेय इति। कि पुनस्तन्मिथ्याज्ञानम् ? –अनात्मन्यात्मग्रह, अहमस्मीति

मिथ्याज्ञान निमित्त येषाम् तथा च तत्त्वज्ञानेन मिथ्याज्ञानानवृत्तौ रागाऽऽदिनिवृत्ति यज्यत एवति भाव ॥ ६८ ॥

समाप्तमपवर्गपरीक्षाप्रकरणम्।

समाप्त चतुर्थाध्यायस्य प्रथममाह्निकम् ॥ १ ॥

(ध) सिद्धान्ती वदति।

मोहोऽहङ्कार इति अनात्मान खल्वहमस्मीति पश्यता दृष्टिरहङ्कार इति। किं पुनस्तदर्थजात यद्विषयोऽहङ्कार ?—शरीरेन्द्रियमनोवेदनाबुद्धय अर्थजातम्। कथ तद्विषयोऽहङ्कार ससारबीज भवति ?—अय खलु शरीराद्यर्थजातमहमस्मीति व्यवसित तदुच्छेदेनाऽऽत्मोच्छेद मन्यमानोऽनुच्छेदतृष्णापरिप्लुत पुन पुनस्तदुपादत्ते तदुपाददानो जन्ममरणाय यतते ततो वियोगान्नात्यन्त दु खाद्विमुच्यत इति। यस्तु दु ख दु खाऽऽयतन दु खानुषक्त सुखञ्च सर्वमिद दु खमिति पश्यति स दु ख परिजानाति परिज्ञातञ्च दु ख प्रहीण भवत्यनुपादानात स विषान्नवत एव दोषान कर्म च दु खहेतुरिति पश्यति, न चाप्रहीणेषु दोषेषु दु खप्रबन्धोच्छेदेन शक्य भवितुमिति दोषान जह्यात, प्रहीणेषु च दोषेषु न प्रवृत्ति प्रतिसन्धानायेत्युक्तम्, प्रेत्यभाव फलदु खानि च ज्ञेयानि व्यवस्थापयति कर्म च दोषांश्च प्रहेयान, अपवर्गोऽधिगन्तव्य तस्याधिगमोपायस्तत्त्वज्ञानम् एव चतसृभिर्विधाभि प्रमेय विभक्तमासेवमानस्याभ्यस्यतो भावयत सम्यग्दर्शन यथाभूतावबोधस्तत्त्वज्ञानमुत्पद्यते, एवञ्च—

**दोषनिमित्ताना तत्त्वज्ञानादहङ्कारनिवृत्ति ॥१॥**

शरीरादि दु खान्त प्रमेय दोषनिमित्त, तद्विषयत्वान्मिथ्याज्ञानस्य, तदिद तत्त्वज्ञान तद्विषयमुत्पन्नमहङ्कार निवर्तयति,

---

अथ शास्त्रस्य परम प्रयोजनमपवर्ग स चाहृष्टो लाघवत परीक्षितोऽप्य किञ्चित्कर कारणानुरूपणात् तन्वाभिहितमेव दु खाऽऽदसूत्रे—कारणनाशकमेण दु खाभावोऽपवर्ग इति इति चरमस्य मिथ्याज्ञानापगमहेतुनाभिहित तत्त्वज्ञान तत्र हेतुरिति चेत् ?—कस्य तत्त्व ज्ञातव्यमत्यभिधानीयमित्याशयेन तत्त्वज्ञानपरीक्षा सैव चाऽऽशङ्काया। तत्र च षट प्रकरणानि—आदौ तत्त्वज्ञानोत्पत्तिप्रकरणम्, अन्यानि च यथायथं वक्ष्यन्ते तत्र सिद्धान्तसूत्रम्।—अहङ्कारोऽहमित्यभिमान स च शरीराऽऽदिविषयको मिथ्याज्ञानमुच्यते, तत्र दोषनिमित्ताना शरीराऽऽदीनां, तत्त्वज्ञा

समानविषये तयोर्विरोधात्, एव तत्त्वज्ञानाद् दुःखजन्मप्रवृत्तिदोषमिथ्याज्ञानानामुत्तरोत्तरापाये तदनन्तराभावादपवर्ग इति, स चाय शास्त्रार्थसङ्ग्रहोऽनूद्यते नापूर्वो विधीयत इति ॥ १ ॥

प्रसङ्ख्यानाऽऽनुपूर्व्यां तु खलु—

**दोषनिमित्त रूपादयो विषया सङ्कल्पकृता ॥२॥**

कामविषया इन्द्रियार्था इति रूपादय उच्यन्ते ते मिथ्या सङ्कल्प्यमाना रागद्वेषमोहान प्रवर्त्तयन्ति, तान पूर्व प्रसञ्चक्षीत ताश्च प्रसञ्चक्षाणस्य रूपाऽऽदिविषयो मिथ्यासङ्कल्पो निवर्त्तते तन्निवृत्तावध्यात्म शरीराऽऽदि प्रसञ्चक्षीत तत्प्रसङ्ख्यानादध्यात्म विषयाऽहङ्कारो निवर्त्तते सोऽयमध्यात्म बहिश्च विविक्तचित्तो विहरन मुक्त इत्युच्यते ॥ २ ॥

अत पर काचित सज्ञा हेया, काचिद्भावयितव्येत्युपदिश्यते, नार्थनिराकरणमर्थोपादान वा, कथमिति ?—

**तन्निमित्तन्त्ववयव्यभिमान ॥ ३ ॥**

तेषा दोषाणा निमित्तन्त्ववयव्यभिमान, सा च खलु स्त्रीसज्ञा सपरिष्कारा पुरुषस्य, पुरुषसज्ञा च स्त्रिया, परिष्कारश्च निमित्तसज्ञा अनुव्यञ्जनसज्ञा च। निमित्तसज्ञा—

अनात्मवस्य ज्ञानान्निवर्त्तते आत्मत्वेन हि शरीराऽऽदौ मुह्यन् रञ्जनीयत्वात् रज्यति कोपनीयेषु कुप्यति। केचित्त— दोषनिमित्तानां रागाऽऽदीनां तत्त्वज्ञानादुत्खातमिथ्यानुबन्धत्वज्ञानात् अहङ्कारस्याभिलाषस्य निवृत्तिरित्यर्थ इत्याहु ॥ १ ॥

ननु के तावदनुरञ्जनीया विषया येषु रज्यन् ससरति ? इत्यतो विवेकाय तानुपदिशति।—सङ्कल्प ध्यनीयीनत्वेन भावन तद्विषयीकृता रूपाऽऽदय दोषस्य रागाऽऽदे निमित्तम् सुन्दरीयमिति जानन् रज्यति असुन्दरमिति द्वेष्टि ते रूपाऽऽदय हेयत्वेन भावनीया प्रथम तत शरीराऽऽत्मविवेक ॥ २ ॥

ननु सौन्दर्य्याऽऽदिक पश्यतो रागाऽऽदिप्रसङ्गोऽपि दुष्परिहर तदुक्तं —"चञ्चलं हि मन कृष्ण प्रमाथि बलवद्दृढम्" इत्यतो रागाऽऽदिनिवृत्त्युपायं दर्शयन्नाह।—

रसनाश्रोत्रं दन्तोष्ठं चक्षुर्नासिकम्। अनुव्यञ्जनसंज्ञा—इत्थं दन्ता इत्थमोष्ठाविति। सेयं संज्ञा कामं वर्धयति तदनुषक्तांश्च दोषान् विवर्जनीयान्, वर्जनं त्वस्याः, भेदेनावयवसंज्ञा, केशलोममांसशोणितास्थिस्नायुशिराकफपित्तोच्चारादिसंज्ञा, तामशुभसंज्ञेत्याचक्षते तामस्य भावयतः कामरागः प्रहीयते सत्ये च द्विविधे विषये काचित् संज्ञा भावनीया काचित् परिवर्जनीयेत्युपदिश्यते यथा विषसम्पृक्तेऽन्नेऽन्नसंज्ञोपादानाय विषसंज्ञा प्रहाणायेति ॥ ३ ॥

अथेदानीमर्थं निराकरिष्यताऽवयव्युपपाद्यते,—

## विद्याऽविद्याद्वैविध्यात् संशयः ॥ ४ ॥

सदसतोरुपलम्भाद्विद्या द्विविधा, सदसतोरनुपलम्भादविद्याऽपि द्विविधा उपलभ्यमानेऽवयविनि विद्याद्वैविध्यात्

---

अवद्यावान् तृष्णया शरीरे अभिमानं परिष्कारबुद्धिं ...रागाऽऽदिनिमित्तम् तथा च सा बुद्धिर्हेया। अत एव भाष्याऽऽदौ परिष्कारबुद्धिरनुरञ्जनसंज्ञा सा हेया। दोषज्ञानमशुभसंज्ञा सा भावनीयेति। अनुरञ्जनसंज्ञा यथा — खञ्जनत् खञ्जननयना परिणतबिम्बाधरा पृथुश्रोणी। कमलमुकुलस्तनीयं पूर्णेन्दुमुखी सुखाय मे भविता॥ इति। अशुभसंज्ञा यथा — चर्मानामतपाबोयं मांसास्रकपूयपूरिता। अस्यां रज्यति यो मूढः पिशाचः कस्ततोऽधिकः?॥ स्वशरीराऽऽदौ अप्यशुभसंज्ञैव भावनीया एवं कापनीयाऽपि शुभसंज्ञा। मां दृष्ट्वाऽसौ दुराचार दुष्टो निष्ठुरचेष्टित। कण्ठपीठं कुठारेण छित्वाऽस्य स्यां सुखी कदा?॥ अशुभसंज्ञा तु — मांसास्थिकीकसमयो देहः किं मेऽपराध्यति। एतस्मादपरः कर्त्ता कर्त्तनीयः कथं मया॥ इति॥ ३॥

समाप्तं तत्त्वज्ञानोत्पत्तिप्रकरणम्।

अथ प्रसङ्गादवयविप्रकरणम् वस्तुतस्तु शरीरे धर्मद्वयस्य सम्बन्धेऽपि एकं ध्येयमपरं हेयमिति निर्युक्तिकम् अतोऽवयवी नास्ति किन्तु परमाणुपुञ्ज इति तच्च तदेव तन्मुमुक्षुभिर्भावनीयम् परमाणुपुञ्ज इत्यप्यापातत परमाणूनामप्ये निराकारत्वमाणत्वादिति सौगतसिद्धान्तमपाकर्त्तुमयमारम्भः। यद्यपि द्वितीयाध्याये

संशय , अनुपलभ्यमाने चाविद्यादेविध्यात् संशय , सोऽयम वयवी यद्युपलभ्यते, अथापि नोपलभ्यते, न कथञ्चन संशयात् मुच्यत इति ॥ ४ ॥

## तदसंशय पूर्वहेतुप्रसिद्धत्वात् ॥ ५ ॥

तस्मिन्ननुपपन्न संशय कस्मात् ?—पूर्वोक्तहेतूनाम प्रतिषेधात अस्ति द्रव्यान्तराऽऽरम्भ इति ॥ ५ ॥

## वृत्त्यनुपपत्तेरपि तर्हि संशयानुपपत्ति ॥६॥

वृत्त्यनुपपत्तेरपि तर्हि संशयानुपपत्तिनास्ति अवयवीति ॥६॥

तद्विभजते —

## कृत्स्नैकदेशावृत्तित्वादवयवानामवयव्यभाव ॥७॥

एकैकोऽवयवो न तावत् कृत्स्नेऽवयविनि वर्त्तते, तयो परिमाणभेदादवयवान्तरसम्बन्धाभावप्रसङ्गाच्च । नाप्यवयव्येक देशेन न ह्यस्यान्येऽवयवा एकदेशभूता सन्तीति ॥ ७ ॥

व्यवस्थापित एवावयवो तथाऽपि अयुक्तदाख्न सोवाान्तकस्य वभाषिकस्य चाव प्रत्यवस्थानमिति तव संशयप्रश्नशनाय सूत्रम् ।—संशय इत्यस्य अवयविनीत्यादि अवयावन प्रत्यचासद्धत्वात तत्पलापो दु शक्य इत्यत उक्त विद्यति ।— प्रमाभमभदन ज्ञानद्वाविध्यात् ज्ञानत्वलक्षणसाधारणधर्मदर्शनात् ज्ञाने प्रामाण्यसंशयादवयविनि संशय इत्यथ ॥ ४ ॥

समाधत्त ।—तत्रावयविनि न संशय पूवहतुप्रसिद्धत्वात द्वितीयाध्यायाक्त युक्तिभिरवयावन प्रकर्षेण सिद्धत्वात् ॥ ५ ॥

अवयविान बाधक प्रकृत ।—आपदवधारणे तर्हि संशयानुपपत्तिवृत्त्यनुप पत्तितोऽवयव्यभावादव स्यादत्यथ । वृत्त्यनुपपत्ति विवृणोति भाष्यकार —कृत्स्नैक देशावृत्तित्वादवयवानामवयव्यभाव । अवयवी हि एककावयव का र्त्स्न्येन एकदेशेन वा ?—ना ऽद्य विषमपारमाणत्वात् अन्त्ये पि तदवयवत्वेन वा ?—नाऽऽद्य स्वस्मिन् वृत्तिविरोधात् नान्त्य अवयवावयवान्तरावृत्तत्त । तथाऽपि कथमवयव्य भाव इत्यत्र भाष्यम् —तषु चावृत्तेरवयव्यभाव तेषु अवयवेषु पूर्वोक्तयुक्त्या अभावाद वयवी नास्ति, न ह्यवृत्तिवृत्तिस्त्व ऽभ्युपगत इति भाव । एवमेवैतन्निराकरोति ॥६॥

अथावयवेष्वेवावयवी वर्त्तते —

**तेषु चावृत्तेरवयव्यभाव ॥ ८ ॥**

न तावत् प्रत्यवयवं वर्त्तते, तयो परिमाणभेदात् द्रव्यस्य चैकद्रव्यत्वप्रसङ्गात्। नाप्येकदेशेन सर्वेषु अन्यावयवाभावात् तदेव युक्तं सशयो नास्त्यवयवीति ॥ ८ ॥

**पृथक् चावयवेभ्योऽवृत्ते ॥ ९ ॥**

पृथक् चावयवेभ्य, धर्मिभ्यो धर्मस्याग्रहणादिति समानम् ॥ ९ ॥

**न चावयव्यवयवा ॥ १० ॥**

॥ १० ॥

**एकस्मिन् भेदाभावाद्भेदशब्दप्रयोगानुपपत्तेरप्रश्न ॥ ११ ॥**

किं प्रत्यवयवं कृत्स्नोऽवयवी वर्त्तते ?—अथैकदेशेन ? इति नोपपद्यते प्रश्न, कस्मात् ?—एकस्मिन् भेदाभावाद्भेदशब्द

---

नन्वास्तामवृत्तिरेवावयवी इति शङ्काया पूर्वपक्षिसूत्रम्।—अवयवेभ्य पृथक् अवयवी नास्तीति शेष। तेषु चावृत्तेरित्यस्य सूत्रत्वे अवयव्यभाव इत्यनुवर्त्तते; कुत ?—अवृत्ते वृत्त्यभावेऽवयविनो नित्यत्वप्रसङ्ग न च नित्योऽवयव्युपलभ्यते ततो नास्त्येवावयवीति भाव यद्वा कृत्स्नैकदेशाभ्यामवयवी न वर्त्तते किन्तु स्वरूपेणवर्त्तते इति शङ्काया पूर्वपक्षिण सूत्रं पृथगिति।—अवयवेभ्य पृथगवयवी नास्ति कुत ?—अवृत्ते अवृत्तित्वप्रसङ्गात् तथा सति नित्य स्यादिति भाव। कश्चित्तु —"अवयवातिरिक्तोऽवयवी वर्त्ततामित्यत्र पूर्वपक्षिण सूत्रं पृथगिति।—पूर्वोक्तयुक्त्याऽवयवेभ्य पृथगप्यवृत्ते ॥९॥

नन्ववयवावयविनोस्तादात्म्यमेव सम्बन्ध स्यादित्याह।—न हि तन्तु पट सन्तो रवस्मिति कश्चित्प्रत्येति न चाऽभेदेनाऽऽधाराऽऽधेयभाव उपपद्यते ॥ १ ॥

सिद्धान्तसूत्रम्।—अवयवी कार्त्स्न्येन एकदेशेन वा वर्त्तत इति प्रश्नो न युक्त, एकस्मिन्नवयविनि, भेदाभावाद्भेदनियतशब्दप्रयोगस्यायुक्तत्वात् अनेकस्मा

प्रयोगानुपपत्तेः । कृत्स्नमित्यनेकस्याशेषाभिधानम्, एकदेश इति नानात्वे कस्यचिदभिधानम् ताविमौ कृत्स्नैकदेशशब्दौ भेदविषयौ नैकस्मिन्नवयविन्युपपद्येते भेदाभावादिति ॥ ११ ॥

अन्यावयवाभावान्नैकदेशेन वर्त्तत इत्यहेतुः —

अवयवान्तरभावेऽप्यवृत्तेरहेतुः ॥ १२ ॥

अवयवान्तराभावादिति । यद्यप्येकदेशोऽवयवान्तरभूत स्यात् तथाऽप्यवयवेऽवयवान्तर वर्त्तत नावयवीति, अन्यावयवभावेऽप्यवृत्तेरवयविनो नैकदेशेन वृत्तिरन्यावयवाभावादित्यहेतुः । वृत्तिः कथमिति चेत् ?—एकस्यानेकत्राऽऽश्रयाऽऽश्रितसम्बन्धलक्षणा प्राप्तिः । आश्रयाऽऽश्रितभाव कथमिति चेत् ?—यस्य यतोऽन्यत्राऽऽत्मलाभानुपपत्तिः स आश्रयः, न कारणद्रव्येभ्योऽन्यत्र कार्य्यद्रव्यमात्मानं लभते विपर्य्ययस्तु कारणद्रव्येष्विति । नित्येषु कथमिति चेत् ?—अनित्येषु दर्शनात् सिद्धम् । नित्येषु द्रव्येषु कथमाश्रयाऽऽश्रयभाव इतीति चेत् ?—अनित्येषु द्रव्यगुणेषु दर्शनादाश्रयाऽऽश्रितभावस्य नित्येषु सिद्धिरिति । तस्मादवयव्यभिमानः प्रतिषिध्यते निःश्रेयसकामस्य, नावयवो, यथा रूपाऽऽदिषु मिथ्यासङ्कल्पो न रूपाऽऽदय इति ॥ १२ ॥

शेषता हि कात्स्न्यं समुदायिना किञ्चित्त्वमेकदेशत्वं न चैकस्य तत्सम्भव इति भावः ॥ ११ ॥

इदञ्च वृत्तिविकल्पो न युक्त इत्याह ।—अवयवी स्वावयवेषु नैकदेशेन वर्त्तते अवयवान्तराभावादिति यः परेषां हेतुः स न युक्तः कुतः ?—अवयवान्तरभावेऽप्यवृत्तेः अवयवान्तरसत्त्वेऽपि तस्यैव पर वृत्तिरायाति न त्ववयविनोऽपीति यथा —अवृत्तवसनाभावस्य कृत्स्नैकदेशविकल्पो न इष्टः कुतः ?—अवयवान्तरस्य अवयविभिन्नस्य अवयवस्य भावेऽपि सत्त्वेऽपि सम्भवात् घटत्वाऽऽदिवत् स्वरूपेणावयविनो वृत्ते सम्भवात वृत्ते कृत्स्नैकदेशान्यतरात्मना घटत्वाऽऽदौ व्यभिचारादप्रयोजकत्वादिति भावः ॥ १२ ॥

सर्वाग्रहणमवयव्यसिद्धेरिति प्रत्यवस्थितोऽप्येतदाह,—

**केशसमूहे तैमिरिकोपलब्धिवत् तदुपलब्धिः ॥१३॥**

यथैकैकः केशस्तैमिरिकेण नोपलभ्यते केशसमूहस्तूपलभ्यते तथैकैकोऽणुर्नोपलभ्यते अणुसमूहस्तूपलभ्यते, तदिदमणुसमूहविषयं ग्रहणमिति ॥ १३ ॥

**स्वविषयानतिक्रमेणेन्द्रियस्य पटुमन्दभावाद्विषयग्रहणस्य तथाभावो नाविषये प्रवृत्तिः ॥१४॥**

यथाविषयमिन्द्रियाणां पटुमन्दभावाद्विषयग्रहणानां पटुमन्दभावो भवति चक्षुः खलु प्रकृष्यमाणं नाविषयं गन्धं गृह्णाति निकृष्यमाणञ्च स्वविषयात् प्रच्यवते सोऽयं तैमिरिकः कश्चिच्चक्षुर्विषयं केशं न गृह्णाति, कश्चित् गृह्णाति केशसमूहम् उभयं ह्यतैमिरिकेण चक्षुषा गृह्यते परमाणवस्त्वतीन्द्रिया इन्द्रियाविषयभूता न केनचिदिन्द्रियेण गृह्यन्ते समुदितास्तु गृह्यन्त इत्यविषये प्रवृत्तिरिन्द्रियस्य प्रसज्येत न जात्वर्थान्तरमणुभ्यो गृह्यत इति, त इमे खल्विमे परमाणवः संहिता (न)* गृह्यमाणा अतीन्द्रियत्वं जहति वियुक्ताश्चा-गृह्यमाणा न अतीन्द्रियत्वं जहतीति सोऽयं द्रव्यान्तरानुत्पत्तावतिमहान् व्याघात इत्युपपद्यते द्रव्यान्तरं, यत् ग्रहणस्य

तदसमर्थं पूर्वहेतुप्रसिद्धत्वात्" इत्यनेन सर्वाग्रहणमवयव्यसिद्धेः इति पूर्वोक्तिं युक्तिमाश्रित्य पूर्वपक्षी तां दूषयितुमुपक्रमते ।—यथा तैमिरिकस्य तिमिरयुक्तचक्षुषो नैकं केशं प्रत्यक्षं किन्तु तत्समूहः, एवमेकः परमाणुरप्रत्यक्षः तत्समूहरूपा घटादिः प्रत्यक्षः स्यात् ॥ १३ ॥

उत्तरयति ।—इन्द्रियाणां पाटवे विषयग्रहणस्य पाटवं प्रकर्षः इन्द्रियाणां मान्द्ये तद्ग्रहणस्य मान्द्यमपकर्षः न तु पटुतरं चक्षुः गन्धं गृह्णाति तदिदमुक्तम् —

*) अत्र "संहिता" इत्यपि पाठः ।

विषय इति। सञ्चयमात्रं विषय इति चेत् न, सञ्चयस्य संयोगभावात्, तस्य चातीन्द्रियस्याग्रहणादयुक्तम्, सञ्चयः खल्वनेकस्य संयोगः, स च गृह्यमाणाऽऽश्रयो गृह्यते, नातीन्द्रियाऽऽश्रयः, भवति हीदमनेन संयुक्तमिति तस्मादयुक्तमेतदिति। गृह्यमाणस्य चेन्द्रियेण विषयस्याऽऽवरणाद्यनुपलब्धिकारणमुपलभ्यते तस्मान्नेन्द्रियदौर्बल्यादनुपलब्धिरणूनाम्, यथा — नेन्द्रियदौर्बल्याच्चक्षुषाऽनुपलब्धिर्गन्धाऽऽदीनामिति ॥ १४ ॥

**अवयवावयविप्रसङ्गश्चैवमाप्रलयात् ॥ १५ ॥**

य खल्ववयविनोऽवयवेषु वृत्तिप्रतिषेधादभावः सोऽयमवयवस्यावयवेषु प्रसज्यमानः सर्वप्रलयाय वा कल्पेत? निरवयवाद्वा परमाणुतो निवर्त्तेत? उभयथा चोपलब्धिविषयस्याभावः तदभावादुपलब्ध्यभावः उपलब्ध्याश्रयश्चायं वृत्तिप्रतिषेधः स आश्रयं व्याघ्नन्नाऽऽत्मघाताय कल्पत इति ॥ १५ ॥

अथापि —

**न प्रलयोऽणुसद्भावात् ॥ १६ ॥**

अवयवविभागमाश्रित्य वृत्तिप्रतिषेधादभावः प्रसज्यमानो निरवयवात् परमाणोर्निवर्त्तते, न सर्वप्रलयाय कल्पते, निरवयवत्वन्तु खलु परमाणोर्विभागैरल्पतरप्रसङ्गस्य, यतो नाल्पीय

स्वविषयानतिक्रमेण इति। फलितार्थमाह नावयवी प्रसक्ति इति।—तथा च स्वविषयं परमाणुं समूहत्वाऽऽपन्नमपि कथं चक्षुर्गृह्णीयात्? इति भावः ॥ १४ ॥

दोषान्तराभिधानाय सूत्रम्।—एवमुक्तप्रकारेण वृत्तिविकल्पदोषोऽवयवावयविन एवं च प्रसक्त आ प्रलयात् प्रलयोऽभावः तथा च सर्वाभाव एव स्यात् न कस्यापि ग्रहणमिति भावः —"सर्वाग्रहणमवयव्यसिद्धेः" इति ॥ १५ ॥

अस्तु सर्वाभाव इत्यत आह।—आश्रयनाशाद्यभावेन परमाणोर्नाशाभावेन सत्त्वसम्भवात्, यद्वा,—तन्त्वाद्यवयवविभागादल्पतरा प्रलयपर्यन्तं ध्रौव्यात्, प्रलये च

स्तत्रावस्थानात् लोष्टस्य खलु प्रविभज्यमानावयवस्याल्पतरमल्पतममुत्तरमुत्तरं भवति, स चायमल्पतरप्रसङ्गः यस्मान्नाल्पतरमस्ति, यः परमोऽल्पस्तत्र निवर्त्तते यतश्च नाल्पीयोऽस्ति, तं परमाणुं प्रचक्ष्महे इति ॥ १६ ॥

परं वा त्रुटेः ॥ १७ ॥

अवयवविभागस्यानवस्थानाद्द्रव्याणामसङ्ख्येयत्वात् त्रुटिनिवृत्तिरिति ॥ १७ ॥

अथेदानीमानुपलम्भिकः सर्वं नास्तीति मन्यमान आह —

आकाशव्यतिभेदात् तदनुपपत्तिः ॥ १८ ॥

तस्याणोर्निरवयवस्यानुपपत्तिः, कस्मात्?—आकाशव्यतिभेदात्। अन्तर्बहिश्चाणुराकाशेन समाविष्टो व्यतिभिन्नः, व्यतिभेदात् सावयवः, सावयवत्वादनित्य इति ॥ १८ ॥

आकाशासर्वगतत्वं वा ॥ १९ ॥

अथैतन्नेष्यते, परमाणोरन्तर्नास्त्याकाशमित्यसर्वगतत्वं प्रसज्यत इति ॥ १९ ॥

निखिलपृथिव्यादिनाशात् पुनः सर्गो न स्यादित्याशङ्क्य शङ्कते —अवयवात्। समाधत्ते नेति।—न सकलपृथिव्यादिनाशः परमाणूनामनाशादित्यर्थः ॥ १६ ॥

परमाणुरेव कः? इत्यत आह।—त्रुटेः परं यदतिसूक्ष्मं तत्परमाणुः। वाशब्दोऽवधारणे अथवा — त्रुटेरवयवस्त्र्यणुको वा परमाणुरिति विकल्पार्थो वाशब्दः यद्वा — त्रुटेः परं सूक्ष्मं परमाणुः त्रुटिरेव वा विश्राम इति विकल्पोऽभिमतः ॥ १७ ॥

समाप्तमवयवावयविप्रकरणम् ।

अथ विश्वस्य शून्यत्वात् क्व परमाणुसम्भावना? इति मतनिराकरणाय निरवयवप्रकरणम् तत्र पूर्वपक्षसूत्रम्।—तस्य निरवयवस्याणोः अनुपपत्तिः कुतः?—आकाशव्यतिभेदात् अन्तर्बहिश्चाऽऽकाशसमावेशात् तथा च सावयवः ततश्चानित्य इति ॥१८॥

अथ नाऽऽकाशव्यतिभेदः, तर्हि आकाशमसर्वगतं स्यादित्याह।—स्यादिति शेषः ॥ १९ ॥

**अन्तर्बहिश्च कार्य्यद्रव्यस्य कारणान्तरवचनाद-कार्य्ये तदभाव ॥ २० ॥**

अन्तरिति पिहितं कारणान्तरैः कारणमुच्यते, बहिरिति च व्यवधायकमव्यवहितं कारणमेवोच्यते, तदेतत्कार्य्यद्रव्यस्य सम्भवति नाणोः अकार्य्यत्वात् अकार्य्ये हि परमाणावन्तर्बहिरित्यस्याभावः । यत्र चास्य भावः,—अणुकार्य्यं तत् न परमाणुः यतो हि नाल्पतरमस्ति स परमाणुरिति ॥ २० ॥

**शब्दसंयोगविभवाच्च सर्वगतम् ॥ २१ ॥**

यत्र क्वचिदुत्पन्नाः शब्दा विभवन्त्याकाशे, तदाश्रया भवन्ति मनोभिः परमाणुभिस्तत्कार्य्यैश्च संयोगा विभवन्त्याकाशे नासंयुक्तमाकाशेन किञ्चिन्मूर्त्तद्रव्यमुपलभ्यते तस्मान्नासर्व-गतमिति ॥ २१ ॥

**अव्यूहाविष्टम्भविभुत्वानि चाऽऽकाशधर्म्मा ॥ २२ ॥**

संसर्पता प्रतिघातिना द्रव्येण न व्यूह्यते, यथा काष्ठेनोदकम् कस्मात् ?—निरवयवत्वात् । सर्पच्च प्रतिघाति द्रव्यं न विष्टभ्नाति, नास्य क्रियाहेतुं गुणं प्रतिबध्नाति, कस्मात् ?—अस्पर्श-त्वात्, विपर्य्यये हि विष्टम्भो दृष्ट इति, स भवान् स्पर्शवति

समाधत्ते ।—अन्तःशब्दो बहिःशब्दश्च कार्य्यद्रव्यस्यावयवावयववाची न चाकार्य्यस्यावयवसम्भव इत्यर्थः । बहिरिति दृष्टान्तार्थम् ॥ २० ॥

आकाशस्यासर्वगतत्वं स्यादित्यत्राऽऽह ।—शब्दस्य संयोगस्य च यो विभवः अथवा — शब्दजनकाभिघातसंयोगस्य यो विभवः सार्वत्रिकत्वं तस्मात् पुनः सर्वगतम् आकाशमिति शेषः सर्वदेशे शब्दोत्पत्त्या तज्जनकसंयोगानुमानात् सर्वमूर्त्तसंयोगित्व-रूपसर्वगतत्वं तस्य सिद्धम् ॥ २१ ॥

आकाशस्य सर्वसंयोगित्वे व्यूहनविष्टम्भौ स्याताम् अत आह ।—व्यूहः प्रतिहतस्य [illegible], विष्टम्भः उत्तरदेशगतिप्रतिबन्धः, आकाशे तयोरभावः निरवयवत्वात् विभुत्वं

द्रव्ये दृष्टं धर्मं विपरीतं नाऽऽशङ्कितुमर्हति, अणुवयवस्याणुतरत्वप्रसङ्गादणुकार्य्यप्रतिषेधः, सावयवत्वे चाणोरणुवयवा ऽणुतर इति प्रसज्यते, कस्मात्?—कार्य्यकारणद्रव्ययोः परिमाणभेददर्शनात, तस्मादणुवयवस्याणुतरत्वम्। यस्तु सावयव अणुकार्य्यं तदिति तस्मादणुकार्य्यमिदं प्रतिषिध्यत इति। कारणविभागाच्च कार्य्यस्यानित्यत्वं, नाऽऽकाशव्यातभेदात, लोष्टस्यावयवविभागादनित्यत्वं नाऽऽकाशसमावेशादिति ॥२२॥

## मूर्त्तिमताञ्च संस्थानोपपत्तेरवयवसद्भावः ॥ २३ ॥

परिच्छिन्नानां हि स्पर्शवतां संस्थानं त्रिकोणं चतुरस्रं समं परिमण्डलमित्युपपद्यते, यत् तत्संस्थानं सोऽवयवसन्निवेशः परिमण्डलाश्चाणवः तस्मात् सावयवा इति ॥ २३ ॥

## संयोगोपपत्तेश्च ॥ २४ ॥

मध्ये सन्नणुः पूर्वापराभ्यामणुभ्यां संयुक्तस्तयोर्व्यवधानं कुरुते व्यवधानेनानुमीयते—पूर्वभागेण पूर्वेणाणुना संयुज्यते परभागेणापरेणाणुना संयुज्यते इति यौ तौ पूर्वापरौ भागौ तावस्यावयवौ एवं सर्वतः संयुज्यमानस्य सर्वतोभागा अवयवा इति। यत्तावन्मूर्त्तिमतां संस्थानोपपत्तेरवयवसद्भाव इति, अत्रोक्तम् किमुक्तम्?—विभागाल्पतरप्रसङ्गस्य, यतो नाल्पीयस्तत्र

सर्वगतत्वम् यदपि मूर्त्तं सूक्ष्मावादिमत् न सम्बध्यते आकाशादधिकरणानुपपत्तेः तथापि त्वन्मते इति पूर्ववत्ता व्याख्येयं ॥ २२ ॥

पूर्वपक्षी युक्त्यन्तरमाशङ्कते।—परमाणवारिति शेषः। हेतुमाह—संस्थानोपपत्तेः संस्थानवत्त्वात् परमाणुहि परिमण्डलाऽऽकारः। संस्थानवत्त्वं मानं सञ्ज्ञा वदति मूर्त्तिमतामिति।—मूर्त्तत्वात् संस्थानवत्त्वं सत्यञ्च। च पूर्वोक्तहेतु समुच्चिनोति मूर्त्तत्वस्य हेतुत्वसमुच्चयार्थो वा चकारः ॥ २३ ॥

युक्त्यन्तरमाह।—अवयवसद्भाव इत्यनुवर्त्तते। संयोगवत्त्वादिति हेत्वर्थः, संयोगवत्त्वात् कुतः सावयवत्वम्? इति चेत्, द्रव्यस्य देशासंयोगव्याप्यवृत्तित्वात्, अव्याप्यवृत्तित्वस्य

निरवयवस्य चाणुतरत्वप्रसङ्गादणुकार्य्यप्रतिषेध इति।
यत् पुनरेतत् संयोगोपपत्तेश्चेति स्पर्शवत्त्वाद्व्यवधानमाश्रयस्य व्याप्त्या भागभक्तिः, उक्तञ्चात्र—स्पर्शवानणुः, स्पर्शवतोरणोः प्रतिघाताद्व्यवधायकः न सावयवत्वात्, किन्तु स्पर्शवत्त्वात्, स्पर्शवत्त्वाच्च व्यवधाने सत्यणुसंयोगो नाऽऽश्रयं व्याप्नोतीति भागभक्तिर्भवति, भागवानिवायमिति उक्तञ्चात्र—विभागेऽल्पतरप्रसङ्गश्च यतो नाल्पीयस्तत्रावस्थानात् तदवयवस्य चाणुतरत्वप्रसङ्गादणुकार्य्यप्रतिषेध इति ॥ २४ ॥

मूर्त्तिमताञ्च संस्थानोपपत्तेः संयोगोपपत्तेश्च परमाणूनां सावयवत्वमिति हेत्वोः —

**अनवस्थाकारित्वादनवस्थाऽनुपपत्तेश्चाप्रतिषेधः ॥२५॥**

यावन्मूर्त्तिमत् यावच्च संयुज्यते तत्सर्वं सावयवमित्यनवस्थाकारिणाविमौ हेतू सा चानवस्था नोपपद्यते, सत्यामनवस्थायां सत्यौ हेतू स्याताम् तस्मादप्रतिषेधोऽयं निरवयवत्वस्येति। विभागस्य विभज्यमानहानिर्नोपपद्यते, तस्मात् प्रलयान्तता नोपपद्यत इति, अनवस्थायाञ्च प्रत्यधिकरणं द्रव्यावयवानामानन्त्यात् परिमाणभेदानां गुरुत्वस्य चाग्रहणम्, समानपरिमाणत्वं चावयवावयविनोः परमाण्ववयवविभागादूर्द्धमिति ॥ २५ ॥

वच्छेदकभेदं विना नोपपद्यते अवच्छेदकश्चावयव इति। ननु परमाण्ववयवेऽप्ययं दोषः स्यात् तथा चानवस्थितपरम्पराप्रसङ्ग इति चेत् त्वमपि तर्हि परमाणुव्यसने, स्वीकुरु शून्यतावादं निरवयवत्वे एकाकाशोऽप्यभावः नाधिकोऽपि भाव ॥ २४ ॥

समाधत्ते।—पूर्वोक्तयुक्त्या परमाणोर्निरवयवत्वप्रतिषेधो न युक्तः कुतः?—अनवस्थाकारित्वात्। प्रामाणिकोऽयमनवस्था स्यादत आह अनवस्थाऽनुपपत्तेश्चेति।—सर्वेषामनवस्थितावयवत्वे मेरुसर्षपयोस्तुल्यपरिमाणत्वाऽऽपत्तिः इत्यस्य एतत्संयोगावच्छेदकादिविभागो न वा शून्यतायुक्ता निष्प्रमाणत्वात् प्रमाणसत्त्वे शून्यत्वविरोधात् निष्प्रमाणकशून्यताऽभ्युपगमं किमपराद्धं पूर्णतया? इति दिक् ॥ २५ ॥

समाप्तं निरवयवप्रकरणम्

यानिदं भवान् बुद्धीराश्रित्य बुद्धिविषया सन्तीति मन्यते, मिथ्याबुद्धय एता, यदि हि तत्त्वबुद्धयः स्युः बुद्ध्या विवेचने क्रियमाणे याथात्म्यं बुद्धिविषयाणामुपलभ्येत,—

**बुद्ध्या विवेचनात्तु भावानां याथात्म्यानुपलब्धिस्तन्त्वपकर्षणे पटसद्भावानुपलब्धिवत् तदनुपलब्धिः ॥ २६ ॥**

यथाऽयं तन्तुरयं तन्तुरिति प्रत्येकं तन्तुषु विविच्यमानेषु नार्थान्तरं किञ्चिदुपलभ्यते यत्पटबुद्धेर्विषयः स्यात् याथात्म्यानुपलब्धेः असति विषये पटबुद्धिर्भवन्तीति मिथ्याबुद्धिर्भवति, एवं सर्वत्रेति ॥ २८ ॥

**व्याहतत्वादहेतुः ॥ २७ ॥**

यदि बुद्ध्या विवेचनं भावानां, न सर्वभावानां याथात्म्यानुपलब्धिः अथ सर्वभावानां याथात्म्यानुपलब्धिः, न बुद्ध्या विवेचनं भावानाम्, बुद्ध्या विवेचनं याथात्म्यानुपलब्धिश्चेति व्याहन्यते, तदुक्तम् — अवयवावयविप्रसङ्गश्चैवमाप्रलयात्” इति॥ २८॥

ननु बाह्यार्थाभावात् कुतोऽवयवावयविचिन्तया ? इति मतमपाकर्त्तुं बाह्यार्थभङ्ग निराकरणमारभते। प्रसङ्गात् ज्ञानत्वव्याप्यं न वाति सत्यं तत्र पूर्वपक्षसूत्रम्।—तु प्रकरणविच्छेदार्थ भावानां बुद्ध्या विवेचनात् पृथग्भावात् याथात्म्यस्य ज्ञानभिन्नत्वेनास्य अनुपलब्धेरनुपपत्तिः घट इति ज्ञानं मन इति ज्ञानमिति ह्यनुभूयते तत्र घट इति ज्ञानमित्यनेन ज्ञानघटयोरभेद उल्लिख्यते ततो न ज्ञानातिरिक्तो विषयः यथा पटे विविच्यमाने तन्तूनामेवापकर्षणादावतिरिक्तो न वस्तु एवं तन्तुरपि नांश्वतिरिक्त इति घटत्वादयस्तु ज्ञानस्यैवाऽऽकारविशेष इति भावः ॥ २६ ॥

समाधत्ते।—उक्तो हेतुर्न युक्तः व्याहतत्वात् न हि बुद्ध्या विवेचने पटस्य तन्तुरूपता सिध्यति तन्तुत पट इति हि प्रतीयते न तु तन्तु पट इति एवं पटेन प्रावरणं न तु तन्तुभिः किञ्च, तन्तुपटविवेचनादेव बाह्यार्थसिद्धिः ज्ञानेन तु ज्ञानस्य पटाभेदो नोल्लिख्यते, ज्ञानविषयकत्वात्, अनुव्यवसायेन तु पटविषयकत्वं व्यवसाये समुल्लिख्यते॥२७॥

तदाश्रयत्वादपृथग्ग्रहणम् ॥ २८ ॥

कार्य्यद्रव्यं कारणद्रव्याऽऽश्रितं, तत् कारणेभ्यः पृथङ्नोपलभ्यते विपर्य्यये पृथग्ग्रहणात्, यत्राऽऽश्रयाऽऽश्रितभावो नास्ति तत्र पृथग्ग्रहणमिति, बुद्ध्या विवेचनात्तु भावानां पृथग्ग्रहणमतीन्द्रियेष्वणुषु, यदिन्द्रियेण गृह्यते, तदेतया बुद्ध्या विविच्यमानमन्यदिति ॥ २८ ॥

प्रमाणतश्चार्थप्रतिपत्तेः ॥ २९ ॥

बुद्ध्या विवेचनाद्भावानां याथात्म्योपलब्धिः। यदस्ति यथा च तत् सर्वं प्रमाणत उपलब्ध्या सिध्यति या च प्रमाणत उपलब्धिः तत् बुद्ध्या विवेचनं भावानाम्, तेन सर्वशास्त्राणि सर्वकर्माणि सर्वे च शरीरिणां व्यवहारा व्याप्ताः। परीक्षमाणो हि बुद्ध्याऽध्यवस्यति इदमस्तीदं नास्तीति, तत्र न सर्वभावानुपपत्तिः ॥ २९ ॥

प्रमाणोपपत्त्यनुपपत्तिभ्याम् ॥ ३० ॥

एवञ्च सति सर्वं नास्तीति नोपपद्यते, कस्मात्?—प्रमाणोपपत्त्यनुपपत्तिभ्याम् यदि सर्वं नास्तीति प्रमाणमुपपद्यते,

ननु तन्तुपटयोर्भेदे पार्थक्येन ग्रहणं स्यादित्यत आह।—पृथग्ग्रहणं यदि तन्तुविषयकप्रत्यक्षविषयत्वं पटस्याऽऽपाद्यते। तन्नेतरं तदाश्रयत्वादिति।—पटो हि तन्त्वाश्रितः तेन सामग्रीसत्त्वात्पटप्रत्यक्षस्य तन्तुविषयकत्वं यदि च भेदप्रत्ययः आपाद्यते तदा भवत्येवेति भावः ॥ २८ ॥

ननु ज्ञानस्योभयवादिसिद्धत्वात् तन्मात्रपदार्थकल्पने लाघवात् तदतिरिक्तपदार्थाभावसिद्धिः स्यादित्यत आह।—पूर्वोक्तहेतुं समुच्चिनोति चकारः अर्थस्य घटादेः प्रतिपत्तेः प्रमाणाधीनत्वात् तथा च प्रामाण्यकल्पे गौरवं न बाधकमिति भावः अन्यथा ज्ञानमपि न सिध्येद्गौरवाऽऽदिशून्यताऽऽपत्तेः ॥ २९ ॥

न वा बाध्याबाधाभावसाधनं सम्भवतीत्याह।—व्याघाताच्च बाध्याभाव इति शेषः। बाध्यं नास्तीत्यत्र यदि प्रमाणमस्ति तदा प्रमाणस्य बाध्यस्य सत्त्वान्न बाध्या

सर्वं नास्तीत्येतद्वाक्यमुच्यते, अथ प्रमाणं नोपपद्यते सर्वं नास्तीत्यस्य कथं सिद्धिः ?—अथ प्रमाणमन्तरेण सिद्धिः, सर्वमस्तीत्यस्य कथं न सिद्धिः ? ॥ ३० ॥

**स्वप्नविषयाभिमानवदयं प्रमाणप्रमेयाभिमानः ॥३१॥**

यथा स्वप्ने न विषयाः सन्ति अथ चाभिमाना भवन्ति एवं न प्रमाणानि प्रमेयाणि च सन्ति अथ च प्रमाणप्रमेयाभिमानो भवति ॥ ३१ ॥

**मायागन्धर्वनगरमृगतृष्णिकावद्वा ॥ ३२ ॥**

**हेत्वभावादसिद्धिः ॥ ३३ ॥**

स्वप्नान्ते विषयाभिमानवत् प्रमाणप्रमेयाभिमानः न पुनः जागरितान्ते विषयोपलब्धिवत्, इत्यत्र हेतुर्नास्ति हेत्वभावाद् सिद्धिः स्वप्नान्ते चासन्तो विषया उपलभ्यन्त इत्यत्रापि हेत्वभावः प्रतिबोधेऽनुपलम्भादिति चेत् प्रतिबोधविषयोपलम्भादप्रतिषेधः । यदि प्रतिबोधेऽनुपलम्भात् स्वप्ने विषया न सन्तीति तर्हि इमे प्रतिबुद्धेन विषया उपलभ्यन्ते, उपलम्भात् सन्तीति, विपर्यये हि हेतुसामर्थ्यम् उपलम्भाभावे सत्यनुपलम्भादभावः सिध्यति, उभयथा त्वभावे नानुपलम्भस्य सामर्थ्य

---

भाव । अथ नास्ति तदा निष्प्रमाणकत्वात् तत्सिद्धाऽस्त्ययम् किञ्च घटाऽऽदौ यदि प्रमाणमस्ति तदा तत एव बाह्यार्थसिद्धिः अथाप्रमाणं तदा कथं घट इति ज्ञानस्य घटाऽऽकारत्वं मन्यसे ? ज्ञानस्यैवानुत्पत्तेरिति ॥ ३ ॥

ननु प्रमाणप्रमेयव्यवहारो न पारमार्थिकः परन्तु विज्ञानानि तत्तदाकाराणि वासनापरिपाकवशादेव स्वाप्नप्रत्ययवदैन्द्रजालिकप्रतीतिवच्चाऽऽविर्भवन्तीत्याशयेन प्रवृत्तं सूत्राभ्याम् ।—स्पष्टम् ॥ ३१ ॥ ३२ ॥

समाधत्ते ।—बाह्याभावज्ञापकाभावात् हेत्वभावात् प्रमाणाभावात् अथवा —हेतौ चक्षुरादिरूपानुपगमे घटोऽयमित्यादिज्ञानानामसिद्धिरित्यर्थः , न च वासनावशात्

मस्ति, यथा प्रदीपस्याभावाद्रूपस्यादर्शनमिति, तत्र भावे नाभाव समर्थ्यत इति । * स्वप्नान्तविकल्पे च हेतुवचनम् ।* स्वप्नविषयाभिमानवदिति ब्रुवता स्वप्नान्तविकल्पे हेतुर्वाच्यः ; कश्चित् स्वप्नो भयोपसंहितः कश्चित् प्रमोदोपसंहितः कश्चिदुभयविपरीतः कदाचित् स्वप्नमेव न पश्यतीति निमित्तवतस्तु स्वप्नविषयाभिमानस्य निमित्तविकल्पाद्विकल्पोपपत्तिः ॥ ३३ ॥

## स्मृतिसङ्कल्पवच्च स्वप्नविषयाभिमानः ॥ ३४ ॥

पूर्वोपलब्धो विषयः । यथा स्मृतिश्च सङ्कल्पश्च पूर्वोपलब्धविषयो न तस्य प्रत्याख्यानाय कल्पते तथा स्वप्ने विषयग्रहणं पूर्वोपलब्धविषयं न तस्य प्रत्याख्यानाय कल्पते एवं दृष्टविषयश्च स्वप्नान्तो जागरितान्तेन, यः सुप्तः स्वप्नं पश्यति, स एव जाग्रत् स्वप्नदर्शनानि प्रतिसन्धत्ते—इदमद्राक्षमिति, तत्र जाग्रद्बुद्धिवृत्तिवशात् स्वप्नविषयाभिमानो मिथ्येति व्यवसायः, सति च प्रतिसन्धाने या जाग्रतो बुद्धिवृत्तिः, तद्वशादयं व्यवसायः—स्वप्नविषयाभिमानो मिथ्येति, * उभयाविशेषे तु साधनानर्थक्यम् ।* यस्य स्वप्नान्तजागरितान्तयोरविशेषः, तस्य स्वप्नविषयाभिमानवदिति साधनमनर्थकं, तदाश्रयप्रत्याख्यानात्, अतस्मिंस्तदिति च व्यवसायः प्रधानाश्रयः अपुरुषे

स्यादिति वाच्यं वासनाया अतिरिक्तत्वे बाह्यापलापप्रसङ्गात्, वासनायाः सन्तन्यमानत्वात् तथा चानुपादेऽपि सन्तानाऽऽपत्तिरिति दिक् ॥ ३३ ॥

नन्वसद्विषया अहेतुका अपि स्वाप्नप्रत्यया इव जाग्रत्प्रत्यया इव परेऽपि प्रत्यया भवन्त्वित्यत आह।—पूर्वोपलब्धविषय इति शेषः । सङ्कल्प उपनीतभानम् यथा स्मृत्यादि पूर्वोपलब्धविषयकं तथा स्वाप्नप्रत्ययोऽपीति न निर्विषयकः । न च स्वप्ने स्वमपि खादति निजशिरश्छेदनमपि पश्यति न त्विदं पूर्वोपलब्धमिति वाच्यं स्वस्य खादनस्य च निजशिरसः छेदनस्य च पूर्वोपलब्धत्वात् संसर्गभानस्य च भ्रमत्वात्, न चाऽहेतुकत्वं धात्वादिदोषाणाम्, संस्कारस्य स्मृतौ स्मृतेश्च ।।

स्थाणौ पुरुष इति व्यवसाय न प्रधानाऽऽश्रय, न खलु पुरुषे ऽनुपलब्धे पुरुष इत्यपुरुषे व्यवसायो भवति एव स्वप्नविषयस्य व्यवसायो हस्तिनमद्राक्षं पर्वतमद्राक्षमिति प्रधानाऽऽश्रयो भवितुमर्हति ॥ ३४ ॥

एवञ्च सति —

## मिथ्योपलब्धिविनाशस्तत्त्वज्ञानात् स्वप्नविषयाभिमानप्रणाशवत् प्रतिबोधे ॥ ३५ ॥

स्थाणौ पुरुषोऽयमिति व्यवसायो मिथ्योपलब्धिरतस्मिं स्तदिति ज्ञानम् स्थाणौ स्थाणुरिति व्यवसायस्तत्त्व ज्ञानम् तत्त्वज्ञानेन च मिथ्योपलब्धिर्निवर्त्तते नार्थः स्थाणुपुरुषसामान्यलक्षणः, यथा प्रतिबोधे या ज्ञानवृत्ति तया स्वप्नविषयाभिमानो निवर्त्तते, नार्थो विषयसामान्यलक्षणः, तथा मायागन्धर्वनगरमृगतृष्णिकानामपि या बुद्धयोऽतस्मिंस्त दिति व्यवसाया तत्राप्यनेनैव कल्पेन मिथ्योपलब्धिविनाश स्तत्त्वज्ञानात् नार्थप्रतिषेध इति। उपादानवच्च मायाऽऽदिषु मिथ्याज्ञानम्। * प्रज्ञापनीयस्वरूपञ्च द्रव्यमुपादाय साधनवान् परस्य मिथ्याऽध्यवसायं करोति सा माया नीहारप्रभृतीनां नगर-स्वरूपसन्निवेशे दूरान्नगरबुद्धिरुत्पद्यते, विपर्य्यये तदभावात्, सूर्य्यमरीचिषु भौमेनोष्मणा संसृष्टेषु स्पन्दमानेषूदकबुद्धिर्भवति, सामान्यग्रहणात् अन्तिकस्थस्य, विपर्य्यये तदभावात्, क्वचित् कदाचित् कस्यचिच्च भावान्नानिमित्तं मिथ्याज्ञानम्। दृष्टञ्च

बुद्धौ च वस्तुत्वस्याभिमतत्वात् तत्र भ्रमे दोष कालावशेषोऽदृष्टविशेषो बाधो वत्यन्यदतत ॥ ३४ ॥

ननु भ्रमस्यापि सविषयकत्वे तत्प्रामाण्यं, अथ स्यात् ? इत्याशङ्क्याऽऽह।—मिथ्यो पलब्धेः मायागन्धर्वनगराऽऽदिज्ञानस्य तत्त्वज्ञानादनारोपितवस्तुप्रत्ययात्, विनाश

बुद्धिद्वैत मायाप्रयोक्तु परस्य च दूरान्तिकस्थयोगन्धर्वनगर-मृगतृष्णिकासु सुप्तप्रतिबुद्धयोश्च स्वप्नविषये, तदेतत् सर्वस्याभावे निरुपाऽऽख्यतायां निरात्मकत्वे नोपपद्यत इति ॥ ३५ ॥

**बुद्धेश्चैव निमित्तसद्भावोपलम्भात् ॥ ३६ ॥**

मिथ्याबुद्धेश्चार्थवदप्रतिषेध, कस्मात्?—निमित्तोपलम्भात् सद्भावोपलम्भाच्च। उपलभ्यते मिथ्याबुद्धिनिमित्तम् मिथ्याबुद्धिश्च प्रत्यात्ममुत्पन्ना गृह्यते संवेद्यत्वात्, तस्मात् मिथ्याबुद्धिरप्यस्तीति ॥ ३६ ॥

**तत्त्वप्रधानभेदाच्च मिथ्याबुद्धेर्द्वैविध्योपपत्ति ॥३७॥**

तत्त्व स्थाणुरिति प्रधान पुरुष इति तत्त्वप्रधानयोरलोपाद्भेदात् स्थाणौ पुरुष इति मिथ्याबुद्धिरुत्पद्यते, सामान्यग्रहणात् एव पताकायां बलाकेति, लोष्टे कपोत इति, न तु समाने विषये मिथ्याबुद्धीनां समावेश, सामान्यग्रहणाव्यवस्थानात्। यस्य तु निरात्मक निरुपाऽऽख्य सर्वं तस्य समावेश प्रसज्यते

प्रतिरोधो भ्रमत्वज्ञान वा। एव स्वप्नप्रत्ययस्यापि स्वप्नसुखाविभ्रमस्य तत्त्वज्ञानेन प्रतिरोधेऽपि भ्रमत्वज्ञान भवत्येवेति भाव ॥ ३५ ॥

माध्यमिकस्तु बाह्यासत्त्व प्रसाध्य तद्दृष्टान्तेन बुद्धेरप्यसत्त्व साधयति त प्रत्याह।—एव बाह्यवद्बुद्धेरपि न प्रतिषेध निमित्तसद्भावोपलम्भात् सहेतुकत्वस्य प्रमितत्वात् न ह्यलीक सहेतुक सम्भवति अहेतुकत्वे च कादाचित्कत्वव्याकोप। केचित्तु— भ्रमस्य सद्विषयत्वे प्रमात्व स्यादित्यत आऽऽह बुद्धेरिति।—एव प्रमात्व निमित्तस्य प्रकारस्य सद्भाव सत्त्व यत्र तथा च शुक्तिरजतयो सत्यत्वेऽपि शुक्तौ रजतत्वाग्रहणाभावान्न तद्बुद्धे प्रमात्वमिति भाव इत्याहु। अत्र चोपलम्भपदमनति प्रयोजनकम् ॥ ३६ ॥

न वा मिथ्याबुद्धिदृष्टान्तेन ज्ञानमात्रस्य सम्भावविषयकत्व सद्विषयकत्वाभावो वा सम्भवतीत्याह।—तत्त्व धर्मिस्वरूपप्रधानम् आरोप्यम् तथा च भ्रमे धर्म्यंशे प्रमात्वमारोप्य रजतत्वांऽशे च भ्रमत्वमिति दृष्टान्तासिद्धिरिति भाव। केचित्तु—

गन्धाऽऽदौ च प्रमेये गन्धाऽऽदिबुद्धयो मिथ्याऽभिमताः, तत्त्वप्रधानयोः सामान्यग्रहणस्य चाभावात् तत्त्वबुद्धय एव भवन्ति, तस्मादयुक्तमेतत् प्रमाणप्रमेयबुद्धयो मिथ्येति ॥ ३७ ॥

दोषनिमित्तानां तत्त्वज्ञानादहङ्कारनिवृत्तिः' इत्युक्तमिति। अथ कथं तत्त्वज्ञानमुत्पद्यत इति ?—

## समाधिविशेषाभ्यासात् ॥ ३८ ॥

स तु प्रत्याहृतस्येन्द्रियेभ्यो मनसो धारकेण प्रयत्नेन धार्यमाणस्याऽऽत्मना संयोगस्तत्त्वबुभुत्साविशिष्टः सति हि तस्मिन्निन्द्रियार्थेषु बुद्धयो नोत्पद्यन्ते तदभ्यासवशात् तत्त्वबुद्धिरुत्पद्यते ॥ ३८ ॥

यदुक्तम्—सति हि तस्मिन्निन्द्रियार्थेषु बुद्धयो नोत्पद्यन्ते" इत्येतत्—

## नार्थविशेषप्राबल्यात् ॥ ३९ ॥

अनिच्छतोऽपि बुद्ध्युत्पत्तेर्नैतद्युक्तम्, कस्मात् ?—अर्थविशेषप्राबल्यात्। अबुभुत्समानस्यापि बुद्ध्युत्पत्तिदृष्टा,

प्रमात्वाप्रमात्वयोर्विरोधात् कथं समावेश इत्यत आह तत्त्वेति।—तथा च विषयभेदान्न विरोध इति भाव इत्याहुः ॥ ३७ ॥

समाप्तं बाह्यार्थभङ्गनिराकरणप्रकरणम्।

ननु शास्त्राभिधानं तत्त्वज्ञानं चापाकर्म अतस्तन्नाशि मिथ्याज्ञानं स्यादेव न हि तादृशं किञ्चिदेव यद् दृढभूमिकवासनामिथ्याज्ञानसमुन्मूलनक्षमम् अतस्तत्त्वज्ञानविवृद्धिप्रकरणमारभते तत्त्वज्ञानविवृद्धिस्तत्त्वज्ञानवासना ततश्चाऽऽत्यन्तिको मिथ्याभिमाननाशः। तत्र तत्त्वज्ञानविवृद्धौ हेतुमाह।—समाधिः चित्तस्याभिमतविषयनिष्ठत्वं तस्य विशेषः प्रकर्षो विषयान्तरानभिष्वङ्गलक्षणः तस्याभ्यासात् पौनःपुन्यात् तत्त्वज्ञानविवृद्धिः तदेव च निदिध्यासनमामनन्ति। तत्त्वज्ञानविवृद्ध्या च मिथ्याज्ञानवासनातिरोभावः तथा च योगसूत्रम्— तज्जः संस्कारोऽन्यसंस्कारप्रतिबन्धी (यो० सू० १। ५० सू०)। प्रतिबन्धः कार्याक्षमतासम्पादनं विनाशो वा ॥ ३८ ॥

यथा स्तनयित्नुशब्दप्रभृतिषु तत्र समाधिविशेषो नोपपद्यत ॥ ३८ ॥

क्षुदादिभिः प्रवर्त्तनाच्च ॥ ४० ॥

क्षुत्पिपासाभ्यां शीतोष्णाभ्यां व्याधिभिश्चानिच्छतोऽपि बुद्धयः प्रवर्त्तन्ते तस्मादैकाग्र्यानुपपत्तिरिति ॥ ४० ॥

अस्त्वेतत् समाधिव्युत्थाननिमित्तं समाधिप्रत्यनीकञ्च, सति त्वेतस्मिन्,—

पूर्वकृतफलानुबन्धात् तदुत्पत्तिः ॥ ४१ ॥

पूर्वकृतो जन्मान्तरोपचितस्तत्त्वज्ञानहेतुर्धर्मप्रविवेकफलानुबन्धो योगाभ्याससामर्थ्यम्, निष्फले हि अभ्यासे नाभ्यासा आद्रियेरन् (प) दृष्टं हि लौकिकेषु कर्मस्वभ्याससामर्थ्यम् ॥ ४१ ॥

ननु रागाऽऽदीनां प्रतिबन्धात् समाधिरेव नोदेतीत्याक्षिपति सूत्राभ्याम्।— अर्थविशेषस्य वनिताऽऽदिरागस्य प्राबल्याच्चिरकालानुबन्धात् तदनुसन्धानमवर्जनीयमिति तद्भावे स्याच्च घनगर्जिताऽऽदिज्ञानेन प्रतिबन्ध एव क्षुत्पिपासाऽऽदिभिः प्रतिकूलज्ञानोपशमाय प्रयतेत ॥ ३९ ॥ ४० ॥

परिहरति।—जन्मान्तरकृतसमाधिजन्यसंस्कारवशात् समाधिसिद्धिरित्यर्थः अत एव चानेकजन्मसंसिद्ध इत्यादि सङ्गच्छते वयन्तु—पूर्वकृतस्य प्रथमतः कृतस्येश्वराऽऽराधनस्य फलं धर्मविशेषः तत्सम्बन्धादित्यर्थः तथा च योगसूत्रं — "समाधिसिद्धिरीश्वरप्रणिधानात्" (यो सू सा पा ४५ सू)। सूत्रान्तरञ्च तत्रैव — "ततः प्रत्यक्चेतनाधिगमोऽप्यन्तरायाभावश्च (यो सू स पा २९ सू)। ततः ईश्वरप्रणिधानात् विषयप्रातिकूल्येन चित्तावस्थानं प्रत्यूहाभावश्चेत्यर्थः ॥ ४१ ॥

(प) "नाभ्यासमाद्रियेरन् इति पाठान्तरम्।

प्रत्यनीकपरिहारार्थञ्च,—

**अरण्यगुहापुलिनाऽऽदिषु योगाभ्यासोपदेशः ॥४२॥**

योगाभ्यासजनितो धर्मो जन्मान्तरेऽप्यनुवर्त्तते प्रचयकाष्ठा-गते तत्त्वज्ञानहेतौ धर्मे प्रकृष्टायां समाधिभावनायां तत्त्वज्ञान-मुत्पद्यत इति, दृष्टश्च समाधिनाऽर्थविशेषप्राबल्याभिभवः, नाह-मेतदश्रौषं नाहमेतदज्ञासिषम् अन्यत्र मे मनोऽभूत् इत्याह लौकिक इति ॥ ४२ ॥

यद्यर्थविशेषप्राबल्यादनिच्छतोऽपि बुद्ध्युत्पत्तिरनुज्ञायते,—

**अपवर्गेऽप्येवं प्रसङ्गः ॥ ४३ ॥**

मुक्तस्यापि बाह्यार्थसामर्थ्याद्बुद्धय उत्पद्येरन्निति ॥ ४३ ॥

**न निष्पन्नावश्यम्भावित्वात् ॥ ४४ ॥**

कर्मवशान्निष्पन्नशरीरे चेष्टेन्द्रियार्थाऽऽश्रये निमित्तभावा-दवश्यम्भावी बुद्धीनामुत्पादः, न च प्रबलोऽपि सन् बाह्योऽर्थ आत्मनो बुद्ध्युत्पादे समर्थो भवति, तस्येन्द्रियेण संयोगाद् बुद्ध्युत्पादे सामर्थ्यं दृष्टमिति ॥ ४४ ॥

**तदभावश्चापवर्गे ॥ ४५ ॥**

तस्य बुद्धिनिमित्ताऽऽश्रयस्य शरीरेन्द्रियस्य धर्माधर्माभावाद-भावोऽपवर्गे तत्र यदुक्तम्—"अपवर्गेऽप्येवं प्रसङ्गः" इति, तदयुक्तम्, तस्मात् सर्वदुःखविमोक्षोऽपवर्गः । यस्मात् सर्व-

---

योगाभ्यासस्थानमुपदिशति ।—तत्र स्थिरचित्तता स्यादिति भावः । इदं न सूत्रं भाष्यमिति केचित् ॥ ४२ ॥

तदत्र शङ्कते ।—एवं प्रसङ्गः यथार्थविशेषप्राबल्याद्बुद्ध्याविर्भावप्रसङ्गः ॥ ४३ ॥

समाधत्ते ।—निष्पन्नस्य शरीराऽऽदेः, अवश्यम्भावित्वात् कारणत्वात्, ज्ञानाऽऽदिष्विति शेषः ॥ ४४ ॥

दुःखबीजं सर्वदुःखाऽऽयतनं चापवर्गे विच्छिद्यते, तस्मात् सर्वेण दुःखेन विमुक्तिरपवर्गः न निर्बीजं निरायतनञ्च दुःखमुत्पद्यत इति ॥ ४५ ॥

## तदर्थं यमनियमाभ्यामात्मसंस्कारो योगा-च्चाध्यात्मविध्युपायैः ॥ ४६ ॥

तस्यापवर्गस्याधिगमाय यमनियमाभ्यामात्मसंस्कारः, यमः

---

ननु किमेतावता ? इत्यत आह ।—तस्य शरीराऽऽदेः अभावे तदारम्भकधर्माधर्मविरहादिति भावः ॥ ४५ ॥

ननु समाधिमात्रादेव निष्पन्नाऽपवर्गः स्यात् ?—साधनान्तरं वाऽपवर्गीयम् अत आह यद्वा —समाधिसाधनान्याह ।—तदर्थमपवर्गार्थमिति भाष्याऽऽदौ तदर्थं समाध्यर्थमिति वा । यमानाह योगसूत्रम् — "अहिंसासत्यास्तेयब्रह्मचर्यापरिग्रहा यमाः" (यो सू सा पा ३ सू )। नियमानाह —"शौचसन्तोषतपःस्वाध्यायेश्वरप्रणिधानानि नियमाः" (यो सू सा पा ३२ सू )। स्वाध्यायः स्वाभिमतमन्त्रजपः । निषिद्धानाचरणविहितसदाश्रमाविहिताचरणे यमनियमाः इत्यन्ये । आत्मसंस्कारः आत्मनाऽपवर्गाधिगमक्षमता । ननु यमनियमावेव साधने उताहो अन्यदपि ? इत्यत आह योगादिति ।—आत्मविधिः आत्मसाक्षात्कारविधायकं वाक्यम् —"आत्मा वा अरे द्रष्टव्यः" (बृह उप ४ अध्या ५ ब्राह्म ६ मन्त्र ) "आत्मानं चाहजानीयात्" (बृह उप ४ अध्या ४ ब्राह्म १२ मन्त्र ) इत्यादि । योगादिति प्रतिपाद्यत्व पञ्चम्यर्थः तथा च योगशास्त्रोक्ताऽऽत्मतत्त्वाधिगमसाधनश्चाऽऽत्मसंस्कारः कर्तव्य इत्यर्थः तथा च योगसूत्रम् — योगाङ्गानुष्ठानादशुद्धिक्षये ज्ञानदीप्तिराविवेकख्यातेः ( यो सू सा पा २८ सू० ) तदर्थश्च — योगाङ्गानां यमनियमाऽऽदीनाम् अनुष्ठानादशुद्धेरविद्याऽऽदिरूपायाः क्षये सति ज्ञानस्य दीप्तिः प्रकर्षः स च विवेकख्यातिपर्यन्तो भवति सा च सत्त्वपुरुषान्यता साक्षात्कारः । अस्मन्मते तु —देहाऽऽदिभिन्नाऽऽत्मसाक्षात्कारः स च नैरात्मिकीमविद्या प्रतिबध्नाति इत्यात्मनीमनश्चतुराद्ययोग्यत्वाच्च, भवति चासौ योगजधर्मात् योगाङ्गानि तत्राङ्गानि — "यमनियमाऽऽसनप्राणायामप्रत्याहारधारणाध्यानसमाधयोऽष्टावङ्गानि" इति ( यो सू सा पा २९ सू ) आसनं पद्माऽऽसनाऽऽदि कुशाऽऽसनाऽऽदि च "चैलाजिनकुशोत्तरम्" ( गी० ६ अध्या० ११ श्लो० ) इति भगवद्वचनात् ।

समानमाश्रमिणा धर्मसाधन, नियमस्तु विशिष्टम आत्मसंस्कार पुनरधर्महान धर्मोपचयश्च, योगशास्त्राच्चाध्यात्मविधि प्रतिपत्तव्य स पुनस्तप प्राणायाम प्रत्याहारो ध्यान धारणा इति। इन्द्रियविषयेषु प्रसङ्ख्यानाभ्यासो रागद्वेषप्रहाणार्थ, उपायस्तु योगाऽऽचारविधानमिति ॥ ४६ ॥

## ज्ञानग्रहणाभ्यासस्तद्विद्यैश्च सह संवाद ॥ ४७ ॥

तदर्थमिति। प्रकृत ज्ञायतेऽनेनेति ज्ञानमात्मविद्याशास्त्र तस्य ग्रहणमध्ययनधारण अभ्यास सततक्रियाऽध्ययनश्रवणचिन्तनानि तद्विद्यैश्च सह संवाद इति प्रज्ञापरिपाकार्थम परिपाकस्तु संशयच्छेदनमविज्ञातार्थावबोधोऽध्यवसिताभ्यनुज्ञानमिति। समया वाद संवाद ॥ ४७ ॥

प्राणायाममाह योगसूत्रम् —"तस्मिन् सति श्वासप्रश्वासयोर्गतिविच्छेद प्राणायाम" (यो सू सा पा ४९ सू)। तस्मिन् आसनस्थैर्ये प्राणवायोरव निःसरणप्रवेशरूपक्रियाविशेषात् श्वासप्रश्वासत्व्यपदेश। बाह्येन्द्रियाणां स्वस्व विषयेभ्यो विमुख्यनावस्थानं प्रत्याहार। धारणामाह योगसूत्रम् — "देशबन्धश्चित्तस्य धारणा" (यो सू वि० पा १ सू)। देश नाभिचक्राऽऽदौ, चित्तस्य बन्धो विषयान्तरविमुख्यनावस्थानम्। ध्यानमाह — तत्र प्रत्ययैकतानता ध्यानम् (यो सू वि० पा २ सू०)। धारणैव धारावाहिनी ध्यानमित्यर्थ। समाधिमाह — तदेवार्थमात्रनिर्भासं स्वरूपशून्यमिव समाधि (यो सू वि पा ३ सू)। ध्येयस्य धर्मो ज्ञानस्वरूपञ्च यदि ध्याने न भासेत तदा समाधिरित्यर्थ। सूत्रान्तरम् — त्रयमन्तरङ्गं पूर्वेभ्य" (यो सू वि पा ७ सू) चरमत्रय साक्षादुपकारकमित्यर्थ ॥ ४६ ॥

नन्वेव किमान्वीक्षिक्या? इत्यत आह।—तदर्थमित्यनुवर्तते। ज्ञायतेऽनेनेति ज्ञान शास्त्र प्रकृत तस्य ग्रहणमध्ययनधारणे तत्राभ्यासो दृढतरसंस्कार तद्विद्यै सहाध्यायिभि संवाद स्वानुभवदार्ढ्याय न हि योगाङ्गज्ञानाय तत्त्वापेक्षत्वेन न प्रकृतशास्त्रस्य फलम् अन्यस्वरूपैव प्रसक्त्यात ॥ ४७ ॥

"तद्विद्यैश्च सह संवादः" इत्यविभक्तार्थं वचनं विभज्यते,—

**तं शिष्यगुरुसब्रह्मचारिविशिष्टश्रेयोऽर्थिभिरनसूयिभिरभ्युपेयात् ॥ ४८ ॥**

एतन्निगदेनैव नीतार्थमिति ॥ ४८ ॥

यदि च मन्येत पक्षप्रतिपक्षपरिग्रहः प्रतिकूलः परस्येति —

**प्रतिपक्षहीनमपि वा प्रयोजनार्थमर्थित्वे ॥ ४९ ॥**

तमभ्युपेयादिति अनुवर्त्तते। परतः प्रज्ञामुपादित्समानस्तत्त्वबुभुत्साप्रकाशनेन स्वपक्षमनवस्थापयन् स्वदर्शनं परिशोधयेदिति ॥ ४९ ॥

अन्योन्यप्रत्यनीकानि च प्रावादुकानां दर्शनानि स्वपक्षरागेण चैके न्यायमतिवर्त्तन्ते तत्र,—

**तत्त्वाध्यवसायसंरक्षणार्थं जल्पवितण्डे बीजप्ररोहसंरक्षणार्थं कण्टकशाखाऽऽवरणवत् ॥ ५० ॥**

अनुत्पन्नतत्त्वज्ञानानामप्रहीणदोषाणां तदर्थं घटमानानामेतदिति। विद्यानिर्वेदाऽऽदिभिश्च परेणावज्ञायमानस्य ताभ्यां

---

संवादप्रकारं दर्शयन्नाह।—तं तादृशं सब्रह्मचारी सहाध्यायी विशिष्टः प्रकृष्टज्ञानवान् श्रेयोऽर्थी मुमुक्षुः विशिष्टः पूर्वोक्ताभिन्न इत्यर्थ इति केचित्। विजिगीषुव्यावृत्त्यर्थम् अनसूयिभिरिति ॥ ४८ ॥

संवादप्रकारमाह।—वाशब्दो नियमार्थः। अर्थित्वे तत्त्वबुभुत्सायां सत्यां प्रयोजनार्थं तत्त्वनिर्णयार्थं प्रतिपक्षहीनं प्रतिकूलपक्षहीनं यथा स्यात् तथाऽभ्युपेयात् तथा च भाष्यम् — स्वपक्षमनवस्थापयन् स्वदर्शनं परिशोधयेत् इति तत्त्वनिर्णिनीषुतया न पक्षपात इति भावः ॥ ४९ ॥

समाप्तं तत्त्वज्ञानविवृद्धिप्रकरणम्।

तद्विद्यैः सह संवाद इत्यत्र वर्गीबाह्यैः सह संवादो न कर्त्तव्य इति भ्रमो मा भूदिति तत्त्वज्ञानपरिपालनप्रकरणमारभते।—तत्त्वाध्यवसायस्य तत्त्वनिर्णयस्य संरक्षणं

विगृह्य कथनम, विगृह्येति विजिगीषया न तत्त्वबुभुत्सयेति, तदेतद्विद्यापालनार्थं न लाभपूजा ख्यात्यर्थमिति ॥ ५० ॥

**ताभ्यां विगृह्य कथनम् ॥ ५० ॥ क ॥**

इति वात्स्यायनीये न्यायभाष्ये चतुर्थाध्यायस्य द्वितीयमाह्निकम् ।

समाप्तश्चायं चतुर्थोऽध्यायः ॥ ४ ॥

---

परोक्तदूषणाऽस्कन्दनेनाप्रामाण्यशङ्काविघटनं तदर्थं जल्पवितण्डे पूर्वमुक्ते इति शेषः ॥ ५ ॥

ननु ताभ्यां किं कार्य्यम् ? इत्यत आह ।—अयमत्र —वर्गीवाह्य तद्दर्शनाभ्यासा दिहतकुज्ञानरपरवा यदि स्वपक्ष आक्षिप्यते तदा ताभ्यां जल्पवितण्डाभ्याम् सावधारण चतत । वस्तुतः पारिनामाचप तु वादजल्पवितण्डाभियथक्क कथाद्वादान भाव । वस्तुतस्तु मुमुक्षोर्न तादृश सह संवाद वीतरागत्वात् न हि शास्त्रपरिपालनमपि तदुद्देश्य न वा तदपेक्षयैव शास्त्रं गच्छति किन्तु शास्त्रमभ्यस्यतीति तत्त्वामात । इति वृत्तिसम्मतम् अधिकसूत्रम् ॥ ५ ॥ क ॥

समाप्तं तत्त्वज्ञानपरिपालनप्रकरणम् ।

इति चतुर्थाध्यायस्य द्वितीयमाह्निकम् ॥ २ ॥

इति महामहोपाध्यायश्रीमद्विद्यानिवासभट्टाचार्य्यात्मज श्रीविश्वनाथसिद्धान्तपञ्चाननभट्टाचार्य्यकृतायां न्यायसूत्रवृत्तौ चतुर्थोऽध्यायः ॥ ४ ॥

---

# पञ्चमाध्यायस्य प्रथममाह्निकम्।

साधर्म्यवैधर्म्याभ्यां प्रत्यवस्थानस्य विकल्पाज्जातिबहुत्वमिति सङ्क्षेपेणोक्तम् तद्विस्तरेण विभज्यते। ता खल्विमा जातयः स्थापनाहेतौ प्रयुक्ते चतुर्विंशतिः प्रतिषेधहेतवः।

**साधर्म्यवैधर्म्योत्कर्षापकर्षवर्ण्यावर्ण्यविकल्प-साध्य-प्राप्त्यप्राप्तिप्रसङ्ग-प्रतिदृष्टान्तानुत्पत्तिसंशय-प्रकरणाहेत्वर्थापत्त्यविशेषोपपत्त्युपलब्ध्यनुपलब्धि--नित्यानित्यकार्यसमाः ॥ १ ॥**

साधर्म्येण प्रत्यवस्थानमविशिष्यमाणं स्थापनाहेतुतः

नत्वा शङ्करचरणं शरणं दीनस्य दुर्गमे तरणम्।
सम्प्रति निरूपयामः पञ्चममध्यायमातनवनम् ॥

अथ जातिनिग्रहस्थानयोरुद्दिष्टयोर्लक्षितयोर्बहुत्वं तद्विकल्पाज्जातिनिग्रहस्थानबहुत्वम् इत्यनेन सूचितं यच्चावश्यकतयाऽनयोः प्रमाणाऽऽदिपरीक्षयाऽवसरे सम्प्रत्यवसरतः प्रपञ्चनीयम् तत्र जातिपरीक्षासहितजातिनिग्रहस्थानविशेषलक्षणम् अध्यायार्थः। जातिपरीक्षासहितजातिविशेषलक्षणं प्रथमाऽऽह्निकार्थः सप्तदश चात्र प्रकरणानि तत्राऽऽदौ सत्प्रतिपक्षदेशनाभासप्रकरणम् अन्यानि च यथास्थानं वक्ष्यन्ते तत्र च विशेषलक्षणार्थं जातिं विभजते।

अत्र च साधर्म्याऽऽदीनां कार्यान्तानां द्वन्द्वे ते समा इत्यर्थात् साधर्म्यसमादयश्चतुर्विंशतिर्जातय इत्यर्थः अत्र च जातिविशेष्यत्वात् स्त्रीलिङ्गसमाशब्दं मन्यन्ते भाष्यवार्त्तिकाऽऽदौ समशब्दः अग्रिमसूत्रेषु तु समशब्दो निर्विवाद एव तत्र जातिशब्दस्य स्त्रीलिङ्गतया यद्यपि नान्वयः तथाऽपि प्रतिषेधो विशेष्य इति भाष्याऽऽदयः। यत्तु — तद्विकल्पात्” इति सूत्रस्थविकल्पस्यैव विशेष्यत्वम् विविधः कल्पः प्रकारो विकल्पः तथा चैते साधर्म्यसमाऽऽदयो जातिविकल्पाः एवमग्रिमसूत्रेष्वपि। इत्यत्र जातिविशेष्यत्वे साधर्म्यसमेत्यपीति ब्रूमः। “समीकरणार्थं प्रयोगः समः” इति वार्त्तिकम्।

साधर्म्यसम अविशेष तत्र तत्रोदाहरिष्याम। एवं वैधर्म्य समप्रभृतयोऽपि निर्वक्तव्या ॥ १ ॥

लक्षणन्तु —

## साधर्म्यवैधर्म्याभ्यामुपसंहारे तद्धर्मविपर्य्ययोपपत्ते साधर्म्यवैधर्म्यसमौ ॥ २ ॥

साधर्म्येणोपसंहारे साध्यधर्मविपर्य्ययोपपत्ते साधर्म्येणैव प्रत्यवस्थानमविशिष्यमाणं स्थापनाहेतुत साधर्म्यसम प्रतिषेध। निदर्शनम् —क्रियावानात्मा, द्रव्यस्य क्रियाहेतुगुणयोगात् द्रव्य लोष्ट क्रियाहेतुगुणयुक्त क्रियावान् तथा चाऽऽत्मा तस्मात् क्रियावानिति। एवमुपसंहृते पर साधर्म्येणैव प्रत्यवतिष्ठते निष्क्रिय आत्मा विभुनो द्रव्यस्य निष्क्रियत्वात् विभु चाऽऽकाशं निष्क्रियञ्च तथा चाऽऽत्मा तस्मान्निष्क्रिय इति। न चास्ति विशेषहेतु क्रियावत्साधर्म्यात् क्रियावता भवितव्य, न पुनरक्रियसाधर्म्यात् निष्क्रियेणेति विशेषहेत्वभावात् साधर्म्यसम

यद्यपि एतावता समीकरणं तथाऽपि समीकरणाद्भूयस्कत्वमस्त्येव अथवा साधर्म्येण सम एव स साधर्म्यसम एकत्र व्याप्तेराधिक्येऽपि साधर्म्यं सममवतीति भाव ॥ १ ॥

साधर्म्यवैधर्म्यसमौ लक्षयति।—उपसंहारे साध्यस्योपसंहरणे वादिना कृते तद्धर्मस्य साध्यरूपधर्मस्य यो विपर्य्ययो व्यतिरेक तस्य साधर्म्यवैधर्म्याभ्यां केवलाभ्यां व्याप्तिनिरपेक्षाभ्यां यदुपपादनं ततो हेतो साधर्म्यवैधर्म्यसमावुच्येते तदयमर्थ — वादिना अन्वयेन व्यतिरेकेण वा साध्ये साधिते प्रतिवादिना साधर्म्यमात्रप्रवृत्तहेतुना तदभावाऽऽपादने साधर्म्यसमा वैधर्म्यमात्रप्रवृत्तहेतुना तदभावाऽऽपादने वैधर्म्यसमा तत्र साधर्म्यसमा यथा —शब्दोऽनित्य कृतकत्वाद्घटवत् व्यतिरेकेण वा व्योमवदित्युपसंहृते नैतदेवम् यद्यनित्यघटसाधर्म्यादनित्य आकाशवैधर्म्याद्वाऽनित्य स्यात् नित्याऽऽकाशसाधर्म्यादमूर्त्तत्वान्नित्य स्यात् विशेषो वा वक्तव्य। वैधर्म्यसमा यथा —शब्दोऽनित्य कृतकत्वाद्घटवत् आकाशवदिति स्थापनायाम् अनित्यघटवैधर्म्यादमूर्त्तत्वान्नित्य स्यात् विशेषो वा वक्तव्य इति। अत्र साधर्म्यत्वमात्रं वैधर्म्यत्वमात्रं वा गमकतौपयिक

प्रतिषेधो भवति। अथ वैधर्म्यसमः,—क्रियाहेतुगुणयुक्तो लोष्टः परिच्छिन्नो दृष्टः न च तथाऽऽत्मा, तस्मान्न लोष्टवत् क्रियावानिति, न चास्ति विशेषहेतुः, क्रियावत्साधर्म्यात् क्रियावता भवितव्यं, न पुनः क्रियावद्वैधर्म्यादक्रियेण, इति विशेषहेत्वभावाद्वैधर्म्यसमः। वैधर्म्येण चोपसंहारः निष्क्रिय आत्मा, विभुत्वात्, क्रियावद्द्रव्यमविभु दृष्टम्, यथा लोष्टः न च तथाऽऽत्मा, तस्मान्निष्क्रिय इति वैधर्म्येण प्रत्यवस्थानम्, निष्क्रियं द्रव्यमाकाशं क्रियाहेतुगुणरहितं दृष्टं, न तथाऽऽत्मा तस्मान्न निष्क्रिय इति, न चास्ति विशेषहेतुः क्रियावद्वैधर्म्यान्निष्क्रियेण भवितव्यं न पुनरक्रियवैधर्म्यात् क्रियावतेति विशेषहेत्वभावाद्वैधर्म्यसमः। क्रियावान् लोष्टः क्रियाहेतुगुणयुक्तो दृष्टः, तथा चाऽऽत्मा तस्मात् क्रियावानिति न चास्ति विशेषहेतुः, क्रियावद्वैधर्म्यान्निष्क्रियो न पुनः क्रियावत्साधर्म्यात् क्रियावानिति विशेषहेत्वभावात् साधर्म्यसमः ॥ २ ॥

अनयोरुत्तरम्—

## गोत्वाद्गोसिद्धिवत् तत्सिद्धिः ॥ ३ ॥

साधर्म्यमात्रेण वैधर्म्यमात्रेण च साध्यसाधने प्रतिज्ञायमाने स्यादव्यवस्था सा तु धर्मविशेषे नोपपद्यते, गोसाधर्म्यात् गोत्वाज्जातिविशेषाद्गौः सिध्यति न तु सास्नाऽऽदिसम्बन्धात् (फ) अश्वाऽऽदिवैधर्म्याद्गोत्वादेव गौः सिध्यति, न गुणादिभेदात्,

मित्यभिमानात् सत्प्रतिपक्षदेशनाभासश्चमे। "अनैकान्तिकदेशनाभासौ" इति वार्त्तिके त्वनैकान्तिकपदं त्यागात् सत्प्रतिपक्षपरम् एकान्ततः साध्यसाधकत्वाभावात् ॥ २ ॥

अनयोरसदुत्तरत्वे बीजमाह।—गोत्वात् गोसिद्धिर्गोव्यवहार इति सम्प्रदायः। वयन्तु —गोत्वाद्भवतरासमवेतत्वे सति गोसमवेतात्साध्यादिति एतेन व्याप्तिपक्षधर्मत्वे दर्शिते गोर्गोत्वस्य तादात्म्येन गोरेव वा सिद्धयथा, तथैव कृतकत्वादपि व्याप्ति

(फ) अश्वादिगुणसावयवानां बहुत्वात्।

तच्चैतत् कृतव्यवस्थानमवयवप्रकरणे, प्रमाणानामभिसम्बन्धाच्चैकार्थकारित्वं समानं वाक्ये इति, हेत्वाभासाऽऽश्रया खल्वियमव्यवस्थेति ॥ ३ ॥

**साध्यदृष्टान्तयोर्धर्मविकल्पादुभयसाध्यत्वाच्चोत्कर्षापकर्षवर्ण्यावर्ण्यविकल्पसाध्यसमा ॥ ४ ॥**

दृष्टान्तधर्मं साध्ये समासञ्जयत उत्कर्षसमः । यदि क्रियाहेतुगुणयोगाल्लोष्टवत् क्रियावानेवाऽऽत्मा, लोष्टवदेव स्पर्श

पक्षधर्मतासाहित्यादनित्यत्वसिद्धिः न तु व्याप्तिपक्षधर्मतारहितात् साधर्म्यमात्रात् तथा सति अदूषकसाधर्म्यात् प्रमेयत्वादेतत्त्वदुक्तमप्यदूषकं स्यादित्ययं विशेषः ॥ ३ ॥

इति सत्प्रतिपक्षदेशनाभासप्रकरणम् ।

क्रमप्राप्तं जातिषट्कं निरूपयति ।—उत्कर्षेण समः उत्कर्षसमः एवमपकर्षसमोऽपि । वर्ण्यावर्ण्यसाध्येति भावप्रधानो निर्देशः वर्ण्यत्वाऽऽदिना समो वर्ण्यसमाऽऽदिः । अविद्यमानधर्माऽऽरोप उत्कर्षः विद्यमानधर्मापचयोऽपकर्षः वर्ण्यत्वं वर्णनीयत्वं तच्च सन्दिग्धसाध्यवत्त्वाऽऽदि तदभावोऽवर्ण्यत्वं विकल्पो वैविध्यं साध्यत्वं पक्षावयवसाधनीयत्वम् साध्यदृष्टान्तयोर्धर्मविकल्पादिति पञ्चानामुत्थानबीजम् उभयसाध्यत्वादिति षष्ठस्य । तदयमर्थः —साध्यतेऽनेनेति साध्यं पक्षः तथा च साध्यदृष्टान्तयोरित्यस्य पक्षदृष्टान्तयोरन्यतरस्मिन्नित्यर्थः धर्मविकल्पो धर्मस्य वाप्रवाम् तत्र क्वचित्सत्त्वं क्वचिदसत्त्वम् प्रकृते साध्यसाधनान्यतररूपस्य धर्मस्य विकल्पात्सत्त्वाद्यथाऽविद्यमानधर्माऽऽरोप स उत्कर्षसमः व्याप्तिमपुरस्कृत्य पक्षदृष्टान्तान्यतरस्मिन् साध्यसाधनान्यतरेणाविद्यमानधर्मप्रसञ्जनम् उत्कर्षसम इति फलितार्थः यथा शब्दोऽनित्यः कृतकत्वादिति स्थापनायाम् अनित्यत्वेन कृतकत्वं घटे रूपसहचरितम् अतः शब्दोऽपि रूपवान् स्यात् तथा च विवक्षितविपरीतसाधनाद्विशेषाविरुद्धो हेतुः तद्देशनाभासो ऽयम् । एवं श्रावणशब्दसाधर्म्यात् कृतकत्वाद् घटोऽपि श्रावणः स्यादविशेषात् वस्तुतस्तु घटे श्रावणत्वाऽऽपादनेऽप्यन्तरम् अत उभयत्र दृष्टान्तपदं साध्यपदञ्च न देयम् । अपकर्षसमायान्तु धर्मविकल्पः धर्मस्य सहचरितधर्मस्य विकल्पोऽसत्त्वं तत अपकर्षः साध्यसाधनान्यतरस्याभावप्रसञ्जनम् तथा च पक्षदृष्टान्तान्यतरस्मिन् व्याप्तिमपुरस्कृत्य सहचरितधर्माभावेन हेतुसाध्यान्यतराभावप्रसञ्जनमपकर्षसमा, यथा शब्दोऽनित्य

वानपि प्राप्नोति, अथ न स्पर्शवान् लोष्टवत् क्रियावानपि न प्राप्नोति, विपर्य्यये वा विशेषो वक्तव्य इति । साध्ये धर्माभाव

कृतकत्वादित्यत्र यद्यनित्यत्वसहचरितघटधर्मात् कृतकत्वादनित्यः शब्दः तदा कृतकत्वान्नित्यत्वसहचरितघटधर्मरूपत्वस्याऽऽपत्त्या शब्दे कृतकत्वस्यानित्यत्वस्य च व्यावृत्तिः स्यात् स्या अभिहितन्यायेन द्वितीये—साधनधर्मेण एव शब्दे कृतकत्वसहचरितश्रावणत्वस्य संयोगाद्यानित्यत्वकृतकत्वसहचरितगुणत्वस्य च व्यावृत्त्या घटेऽनन्वये कृतकत्वस्य व्यावर्त्तनमिति । दृष्टान्तसाध्यसाधनवैकल्यप्रसञ्जनमासाद्योयम् यत्तु वार्त्तिके — शब्दो नीरूपः श्रावणत्वात् घटोऽपि नीरूपः स्यादित्यपकर्ष इति तदसत् घटे नीरूपत्वाऽऽपादने स्याद्यान्तरत्वात् व्याघातस्वरूपाऽप्रसङ्गम् यत्तु वर्ण्यसमाया अवर्ण्यत्वाभाव स्यादिति तन्न उपधेयसङ्करेऽप्युपाधेरसङ्करात् । वर्ण्यसमायान्तु साध्यसिद्ध्यभाववान् सन्दिग्धसाध्यकोऽऽदेवा तस्य धर्म सन्दिग्धसाध्यकोऽऽदित्वाद्धेतु तस्य विकल्पात्मकत्वात् दृष्टान्ते वर्ण्यत्वस्य सन्दिग्धसाध्यकत्वस्याऽऽपादनं वर्ण्यसमा तदयमर्थः —पक्षसाधकहेतुर्हि गमकः पक्षश्च सन्दिग्धसाध्यकः तथा च सन्दिग्धसाध्यकत्वात्तद्धेतुस्तथा दृष्टान्तेऽपि स्वीकार्य्य तथा च दृष्टान्तस्यापि सन्दिग्धसाध्यकत्वात् पक्षतुल्यत्वादसाधारण हेतु तद्दर्शनाभासा चेयं हेतुः सन्दिग्धसाध्यकश्चेद्यदि न दृष्टान्तः तदा गमकहेत्वभावात् साधनावकल्पो दृष्टान्तः स्यादिति भावः । अवर्ण्यसमायान्तु दृष्टान्ते सिद्धसाध्यकया धर्मो हेतुः तस्य सत्त्वात् पक्षे शब्दादावसन्दिग्धसाध्यकत्वाऽऽपादनमवर्ण्यसमा दृष्टान्ते हेतावदर्शनात् तादृशो हेतुरेव गमक इत्यभिमानेन एवमापादनम् दृष्टान्ते यो हेतुः सिद्धसाध्यकवृत्तिः स चेन्न पक्षे तदा गमकहेत्वभावात् स्वरूपासिद्धिः स्यात् अतस्तादृशो हेतुरवश्यं पक्षेऽभिमतः स्वीकार्य्यः तथा च सन्दिग्धसाध्यकत्वस्य पक्षत्वाभावाद्वाश्रयासिद्धिः चासिद्धिदर्शनाभासा चेयम् । विकल्पसमायान्तु पक्षे दृष्टान्ते च यो धर्मः तस्य विकल्पो विरुद्धकल्पो व्यभिचारित्वम् उपलक्षणमेतत् अन्यस्यापि धर्मस्यापि साध्यम् । व्यभिचारोऽपि हेतोर्धर्मान्तरं प्रति धर्मान्तरस्य साध्यं प्रति धर्मान्तरस्य धर्मान्तरं प्रति वा तथा च कस्यचिद्धर्मस्य क्वचिद्व्यभिचारदर्शनेन धर्मत्वाविशेषात् प्रकृतहेतौ प्रकृतसाध्यं प्रति व्यभिचाराऽऽपादनं विकल्पसमा यथा शब्दोऽनित्यः कृतकत्वादित्यत्र कृतकत्वस्य गुरुत्वव्यभिचारदर्शनाद्गुरुत्वस्यानित्यत्वव्यभिचारदर्शनादनित्यत्वस्य मूर्त्तत्वव्यभिचारदर्शनाद्धर्मत्वाविशेषात् कृतकत्वमप्यनित्यत्वं व्यभिचरेत् इत्यनैकान्तिकदर्शनाभासा चेयम् । पक्षदृष्टान्तादौ प्रकृतसाध्यतुल्यताऽऽपादनं साध्यसमा तत्रायमाशयः —एतस्य गोयसाध्यस्यैवानुमितिविषयत्वम्,

दृष्टान्तात् प्रसज्यतोऽपकर्षसमः । लोष्टः खलु क्रियावान-विभुर्दृष्टः काममात्माऽपि क्रियावानविभुरस्तु विपर्यये वा विशेषो वक्तव्य इति । ख्यापनीयो वर्ण्यः, विपर्ययादवर्ण्यः, तावेतौ साध्यदृष्टान्तधर्मौ विपर्ययस्य तौ वर्ण्यावर्ण्यसमौ भवतः । साधनधर्मयुक्ते दृष्टान्ते धर्मान्तरविकल्पात् साध्यधर्मविकल्पं प्रसज्यतो विकल्पसमः । क्रियाहेतुगुणयुक्तं किञ्चिद्गुरु यथा लोष्टः, किञ्चिल्लघु यथा वायुः । एवं क्रियाहेतुगुणयुक्तं किञ्चित् क्रियावत् स्यात् यथा लोष्टः, किञ्चिदक्रियं यथाऽऽत्मा विशेषो वा वाच्य इति । हेत्वाद्यवयवसामर्थ्ययोगी धर्मः साध्यः तं दृष्टान्ते प्रसज्यतः साध्यसमः । यदि यथा लोष्टस्तथाऽऽत्मा प्राप्तस्तर्हि यथाऽऽत्मा तथा लोष्ट इति साध्यश्चायमात्मा क्रियावानिति, कामं लोष्टोऽपि साध्यः, अथ नैवं, न तर्हि यथा लोष्टस्तथाऽऽत्मा ॥ ४ ॥

एतेषामुत्तरम् —

**किञ्चित्साधर्म्यादुपसंहारसिद्धेर्वैधर्म्यादप्रतिषेधः ॥५॥**

अलभ्यः सिद्धस्य निह्नवः, सिद्धञ्च किञ्चित्साधर्म्यादुप

तथा च पक्षाऽऽदेरनुमानविषयत्वात् साध्यवद्दृष्टान्तस्यापि साध्यत्वम् अत साध्यसमः। तथा हि पक्षाऽऽदेः पूर्वं सिद्धत्वे एतत्प्रयोगसाध्यत्वाभावात्तत्रानुमितिविषयत्वम् पूर्वमसिद्धत्वे पक्षाऽऽदेरप्रामाण्यादाश्रयासिद्ध्यादय तद्दूषणाभासा चयम् । सूत्रार्थस्तु उभयसाध्यत्वात् उभयपक्षदृष्टान्तौ तत्समौ इत्वा तत्साध्यत्व तदधीनानुमिति विषयत्वम् साध्यस्यैव पक्षाऽऽदरपीति तुल्यताऽऽपादनम् इति लिङ्गापादितमानमत्र लिङ्गस्याप्यनुमानविषयत्वात् साध्यसमत्व इतीय साध्यत्व हेतुमान दृष्टान्तोऽपि साध्य इत्याशय ॥ ४ ॥

एतेषामसदुत्तरत्वे बीजमाह ।—किञ्चित्साधर्म्यात् साधर्म्यविशेषात् व्याप्ति इत्यात् उपसंहारसिद्धेः साध्यसिद्धेः वैधर्म्यादेतद्विपरीतात् व्याप्तिविरहात् च। व्यभिचारात् भवता क्रियते प्रतिषेधो न संभवतीत्यर्थः अन्यथा प्रमेयत्वरूपासाधक स धर्मः तद्वदन्यस्यासाधकः स्यादिति भाव तथा चाय क्रम —व्याप्तित्वव्याप्यात्

म नम , यथा गौस्तथा गवय इति , तत्र न लभ्यौ गोगवययो धर्मविकल्पश्चोदयितुम् , एवं साधके धर्मे दृष्टान्तादिसामर्थ्ययुक्ते न लभ्यः साध्यदृष्टान्तयोर्धर्मविकल्पाद्वैधर्म्यात् प्रतिषेधो वक्तुमिति ॥ ५ ॥

## साध्यातिदेशाच्च दृष्टान्तोपपत्तेः ॥ ६ ॥

यत्र लौकिकपरीक्षकाणां बुद्धिसाम्यं, तेनाविपरीतोऽर्थोऽतिदिश्यते प्रज्ञापनार्थम् , एवं साध्यातिदेशाद्दृष्टान्त उपपद्यमाने साध्यत्वमनुपपन्नमिति ॥ ६ ॥

कृतकत्वात् शब्दोऽनित्यत्वमुपसंहरामि न तु कृतकत्वं रूपस्यापि व्याप्यं येन ततो रूपमप्यापादनीयं शब्दे एवम् चानित्यत्वं न रूपव्याप्यं येन रूपाभावादनित्यत्वाभावः शब्दे स्यात् एवं वर्ण्यसमेऽपि किञ्चित्साधर्म्यात् व्याप्यतोऽवच्छेदकावच्छिन्नाद्धेतो साध्यसाद्ध तादृशहेतुमत्त्वञ्च दृष्टान्ततापर्योजक न तु पक्षे यावद्धर्मावच्छिन्ना हेतु तावदवच्छिन्नहेतुमत्त्वम् अन्यथा त्वयाऽपि दूषणीया दृष्टान्ता कस्य साऽपि न स्यात् एवमवर्ण्यसमेऽपि व्याप्यतोऽवच्छेदकावच्छिन्नस्य दृष्टान्तहेतोः पक्षे सत्त्वं साध्यसाद्ध न तु दृष्टान्ते निश्चितत्वावच्छिन्नस्य पक्षे सत्त्वम् एवं विकल्पसमेऽपि प्रकृतसाध्यव्याप्यात् प्रकृतहेतो साध्यसिद्धि तद्धर्म्यात् व्यभिचाराभावात् कृत प्रतिषेधो न सम्भवति न हि व्यभिचारादेव प्रकृतहेतो प्रकृतसाध्यसाधकत्वम् प्रतिषिद्धम् एवं साध्यसमेऽपि व्याप्याद्धेतो सिद्धे पक्षे साध्यसाद्ध न तु पक्ष दृष्टान्तादयोऽप्यनेन साध्यन्त तथा सति क्वापि साध्यसाद्धन स्यात् त्वन्मतेऽपि भाप विज्ञेयत ॥ ५ ॥

वर्ण्यावर्ण्यसाध्यसमानां समाधानान्तरमप्याह ।—दृष्टान्तोपपत्तेः साध्यातिदेशे न दृष्टान्ते हि साध्यतातिदिश्यते तावतैव दृष्टान्तत्वमुपपद्यते न त्वशेषधर्म पक्ष दृष्टान्तयोरभेदोऽपेक्ष्यते पक्षेऽपि साध्यसमत्वमितीदं प्रत्युक्तम् । दृष्टान्तो दृष्टान्त एव तस्मात् निश्चितत्वेन पक्षात्कोटिमात् तथा च साध्यस्यातिदेशात् साधनात् च दृष्टान्तत न तु पक्षोऽपि साध्य प्रतिपक्षादि भाव ॥ ६ ॥

*समाप्तं जातिषट्कप्रकरणम् ।

प्राप्य साध्यमप्राप्य वा हेतो प्राप्त्या अविशिष्टत्वादप्राप्त्या असाधकत्वाच्च प्राप्त्यप्राप्तिसमौ ॥ ७ ॥

हेतु प्राप्य वा साध्य साधयेत् ?—अप्राप्य वा ? न तावत् प्राप्य प्राप्त्यामविशिष्टत्वादसाधक , द्वयोर्विद्यमानयो प्राप्तौ सत्यां कि कस्य साधक साध्य वा ? अप्राप्य साधक न भवति नाप्राप्त प्रदीप प्रकाशयतीति प्राप्त्या प्रत्यवस्थान प्राप्तिसम , अप्राप्त्या प्रत्यवस्थानमप्राप्तिसम ॥ ७ ॥

अनयोरुत्तरम —

घटाऽऽदिनिष्पत्तिदर्शनात् पीडने चाभिचारादप्रतिषेध ॥ ८ ॥

उभयथा खल्वयुक्त प्रतिषेध कर्तृकरणाधिकरणानि प्राप्य

क्रमप्राप्तौ प्राप्त्यप्राप्तिसमौ लक्षयति।—हेतोरिति साधकत्वमिति शेष। प्राप्तिपक्षे दोषमाह प्राप्त्याऽविशिष्टत्वादिति।—द्वयोरपि प्राप्तत्वाविशेषात् किं कस्य साधकम् अप्राप्तिपक्षे दोषमाह अप्राप्त्येति।—अप्राप्तस्य साधकत्वेऽतिप्रसङ्गात् साधकत्वञ्चात्र कारकज्ञापकसाधारणम् एवञ्च कारकज्ञापकलक्षणं साधनं कार्यज्ञाप्यलक्षणेन साध्येन सम्बद्ध सत्साधकं चेत् तदा सत्त्वाविशेषात् कार्यकारणभाव तत्सम्बन्धस्य प्रागेव ज्ञातत्वान्न ज्ञाप्यज्ञापकभाव प्राप्त्यैव जन्यजनकभाव। प्राप्तत्वेन लक्षणा दकयोरविभेदादित्याशय इत्यन्ये तथा च प्राप्त्याऽविशेषादनिष्टाऽऽपादनेन प्रत्यवस्थान प्राप्तिसमा। यदि चाप्राप्य लिङ्ग साध्यबुद्धि जनयति साध्याभावबुद्धिमेव किं तन्न जनयेत् ? अप्राप्तत्वाविशेषात् तथा चाप्राप्त्या साधकत्वेऽनिष्टाऽऽपादनमप्राप्तिसमा। प्रतिकूलतर्कदेशनाभासौ चेमौ ॥ ७ ॥

अनयोरसदुत्तरत्वे बीजमाह।—दण्डादितो घटाऽऽदिनिष्पत्तिदर्शनात् सर्वलोकप्रत्यक्षसिद्धत्वात् अभिचारात् श्येनादित शत्रुपीडने च व्यभिचारान्न त्वदुक्त प्रतिषेध सम्भवति, न हि कारणं दण्डाऽऽदि प्रागेव घटाऽऽदिना सम्बद्धम् अपि तु मृदादिना

मृदं घटाऽऽदिकार्यं निष्पादयन्ति, अभिचाराच्च पीडने सति दृष्टमप्राप्य साधकत्वमिति ॥ ८ ॥

**दृष्टान्तस्य कारणानपदेशात् प्रत्यवस्थानाच्च प्रतिदृष्टान्तेन प्रसङ्गप्रतिदृष्टान्तसमौ ॥ ९ ॥**

साधनस्यापि साधनं वक्तव्यमिति प्रसङ्गेन प्रत्यवस्थानं प्रसङ्गसमः प्रतिषेधः। क्रियाहेतुगुणयोगी क्रियावान् लोष्ट इति हेतुर्नापदिश्यते, न च हेतुमन्तरेण सिद्धिरस्तीति। प्रतिदृष्टान्तेन प्रत्यवस्थानं प्रतिदृष्टान्तसमः। क्रियावानात्मा, क्रियाहेतुगुणयोगात् लोष्टवदित्युक्ते प्रतिदृष्टान्त उपादीयते, क्रियाहेतुगुणयुक्तमाकाशं निष्क्रियमिति। कः पुनराकाशस्य क्रियाहेतुर्गुणः ? वायुना संयोगः संस्कारापेक्षः वायुवनस्पतिसंयोगवदिति ॥ ९ ॥

श्येनाऽऽदिरप्यदृश्यतया पीडां जनयति अन्यथा लोकवदासङ्गकार्यकारणभावे दृष्टत्वे को हेतुरप्यसाधकः स्यादिति । ८ ॥

इति प्राप्त्यप्राप्तिसमजातिद्वयप्रकरणम्।

क्रमप्राप्ते प्रसङ्गप्रतिदृष्टान्तसमौ जाती लक्षयति।—दृष्टान्तस्य कारणं प्रमाणं तस्यानपदेशोऽनभिधानम् अभिधानस्यानतिप्रयोजनकम् तथा च दृष्टान्तस्य साध्यवत्त्वे प्रमाणाभावात् प्रत्यवस्थानमेव यद्यपीदं सदुत्तरमेव तथाऽपि दृष्टान्ते प्रमाणं वाच्यं तत्रापि प्रमाणान्तरमित्यनवस्थया प्रत्यवस्थाने तात्पर्यम् तदुक्तमाचार्यैः — अनवस्थाभासप्रसङ्गः प्रसङ्गसम इति। एतस्मात् हेतोर्हेत्वन्तरमित्यनवस्थाऽपि प्रसङ्गसम एव पूर्वमते तु हेत्वनवस्थाऽऽदिकं वक्ष्यमाणाऽऽकृतिगणत्वेनाभिमतमिति विशेषः। अनवस्थादेशनाभासो वचनम्। प्रतिदृष्टान्तेन प्रत्यवस्थानात् प्रतिदृष्टान्तसमः एतच्च सावधारणम्, तेन प्रतिदृष्टान्तमात्रबलेन व्याप्तिमपुरस्कृत्य प्रत्यवस्थानमेव तेन साधर्म्यवैधर्म्याभ्यां भेदः। यदि घटदृष्टान्तबलेनानित्यः शब्दः तदाऽऽकाशदृष्टान्तबलात् नित्य एव स्यात् नित्यः किं न स्यादिति वाऽपि प्रतिरोधो वाऽऽपादनीयः हेतुरनङ्गं दृष्टान्तमात्रबलादेव साध्यसिद्धिरित्यभिमानः। साधप्रतिरोधान्यतरदेशनाभासो वचनम् ॥ ९ ॥

अनयोरुत्तरम् —

**प्रदीपोऽऽदानप्रसङ्गनिवृत्तिवत्तद्विनिवृत्तिः ॥ १०॥**

इदं तावदयं पृष्टो वक्तुमर्हति, अथ के प्रदीपमुपाददते?— किमर्थं वा?—इति, दिदृक्षमाणा दृश्यदर्शनार्थमिति। अथ प्रदीपं दिदृक्षमाणाः प्रदीपान्तरं कस्मान्नोपाददते? अन्तरेणापि प्रदीपान्तरं दृश्यते प्रदीपः तत्र प्रदीपदर्शनार्थं प्रदीपोपादानं निरर्थकम्। अथ दृष्टान्तः किमर्थमुच्यते इति?—अप्रज्ञातस्य ज्ञापनार्थमिति। अथ दृष्टान्ते कारणापदेशः किमर्थं दृश्यते? यदि प्रज्ञापनार्थं प्रज्ञातो दृष्टान्तः स खलु लौकिकपरीक्षकाणां यस्मिन्नर्थे बुद्धिसाम्यं स दृष्टान्त इति तत्प्रज्ञानार्थः कारणापदेशो निरर्थक इति प्रसङ्गसमस्योत्तरम् ॥ १० ॥

अथ प्रतिदृष्टान्तसमस्योत्तरम्,—

**प्रतिदृष्टान्तहेतुत्वे च नाहेतुर्दृष्टान्तः ॥ ११ ॥**

प्रतिदृष्टान्तं ब्रुवता न विशेषहेतुरपदिश्यते—अनेन प्रकारेण प्रतिदृष्टान्तः साधकः, न दृष्टान्त इति, एवं प्रति

प्रसङ्गसमे प्रत्युत्तरमाह —दृष्टान्तो हि निदर्शनस्थानत्वेन साध्यनिश्चयार्थमपेक्ष्यते न तु दृष्टान्तदृष्टान्ताऽद्यनवस्थितपरम्परा लोकसिद्धा युक्तिसिद्धा वा अन्यथा घटाऽऽदिप्रत्यक्षार्थं प्रदीप इव प्रदीपप्रत्यक्षार्थमनवस्थितप्रदीपपरम्परा प्रसज्यते तन्नोऽर्थ साधनमपि व्याहन्येत ॥ १ ॥

प्रतिदृष्टान्तसमे प्रत्युत्तरमाह।—अत्रायमुत्तरक्रमः —प्रतिदृष्टान्तस्त्वया किमर्थमुपादीयते?—मदीयहेतोर्बाधार्थं सत्प्रतिपक्षत्वार्थं वा? नाऽऽद्यः यतः प्रतिदृष्टान्तस्य हेतुत्वे स्वार्थसाधकत्वं मदीयो दृष्टान्तो नाहेतुः नासाधकः, तथा च तुल्यबलत्वान्न बाधः न वा द्वितीयोऽपि यतः प्रतिदृष्टान्तस्य स्वार्थसाधकत्वे उच्यमाने नाहेतुर्दृष्टान्तः मदीयो दृष्टान्तस्तु सहेतुकत्वादाधिक्यबलः। वस्तुतः हेतुं विना दृष्टान्त

दृष्टान्तहेतुत्वे नाहेतुर्दृष्टान्त इत्युपपद्यते, स च कथमहेतुर्न स्यात्? यत्प्रतिषेध साधक स्यादिति ॥ ११ ॥

**प्रागुत्पत्ते कारणाभावादनुत्पत्तिसम ॥१२॥**

अनित्य शब्द प्रयत्नानन्तरीयकत्वात् घटवदित्युक्ते अपर आह—प्रागुत्पत्तेरनुत्पन्ने शब्दे प्रयत्नानन्तरीयकत्वमनित्यत्व कारण नास्ति, तदभावान्नित्यत्व प्राप्त, नित्यस्य चोत्पत्तिनास्ति अनुत्पत्त्या प्रत्यवस्थानमनुत्पत्तिसम ॥ १२ ॥

अस्योत्तरम्—

**तथाभावादुत्पन्नस्य कारणोपपत्तेर्न कारणप्रतिषेध ॥ १३ ॥**

तथाभावादुत्पन्नस्येति उत्पन्न खल्वय शब्द इति भवति

साधक न सत्प्रतिपक्षसम्भावना तदभावस्याप्यवधारणाभावात् हेतुप्रतिषेधे न स तरत्वमिति भाव इति ॥ ११ ॥

इति प्रसङ्गसमप्रतिदृष्टान्तसमप्रकरणम् ।

क्रमप्राप्तमनुत्पत्तिसम लक्षयति।—प्रागुत्पत्तेरिति साधनाङ्गस्येति शेष । कारणाभावात् हेत्वभावात तथा च साधनाङ्गपक्षहेतुदृष्टान्तानामुत्पत्त प्राक हेत्वभाव इत्यनुत्पत्त्या प्रत्यवस्थानमनुत्पत्तिसम यथा घटो रूपवान् गन्धात् पटवदित्युक्ते घटोत्पत्तेर्गन्धोत्पत्तेश्च पूर्व हेत्वभावादसिद्ध पट च गन्धोत्पत्ते पूर्व हेत्वभावेन दृष्टान्तासिद्धि एवम् आद्यक्षणे रूपाभावाद्बाधश्च अनुत्पत्त्या प्रत्यवस्थानस्य तत्रापि सत्त्वात् उत्पत्ते पूर्व हेत्वाद्यभावेन प्रत्यवस्थानस्यैव लक्षणत्वात् जातित्वे सतीति च विशेषणीयम् तदुत्पत्तिकालावच्छिन्नो घटो गन्धवानित्यत्र बाधेन प्रत्यवस्थाने नातिव्याप्ति । असिद्ध्यादिदेशनाभासा चेयम् ॥ १२ ॥

अस्योत्तरमाह।—उत्पन्नस्य तथाभावात् घटाद्याकारत्वात् तत्र कारणस्य हेतो उपपत्ते सत्त्वात् कथ कारणप्रतिषेध ? अयमाशय —पक्ष हेत्वभावोऽसिद्ध न त्वनुत्पन्न हेत्वभाव सम्भवति आधकारणाभावात् न हि हेत्वभाववतासाध्य त्वदीयहेतोरपि क्वचिदभावसत्त्वात्, एतेन दृष्टान्तासिद्धिर्व्याख्याता, यदा कदाचिद्धेतु

प्रागुत्पत्ते शब्द एव नास्ति उत्पन्नस्य शब्दभावात, शब्दस्य सत प्रयत्नानन्तरीयकत्वमनित्यकारणमुपपद्यते, कारणोपपत्तेरयुक्तोऽयं दोष, प्रागुत्पत्ते कारणाभावादिति ॥ १३ ॥

**सामान्यदृष्टान्तयोरैन्द्रियकत्वे समाने नित्यानित्यसाधर्म्यात संशयसम ॥ १४ ॥**

अनित्य शब्द प्रयत्नानन्तरीयकत्वात घटवत इत्युक्ते हेतौ संशयेन प्रत्यवातिष्ठते सति प्रयत्नानन्तरीयकत्वे अस्त्येवास्य नित्येन सामान्येन साधर्म्यमैन्द्रियकत्वम अस्ति च घटेनानित्येन, अतो नित्यानित्यसाधर्म्यादनिवृत्त संशय इति ॥ १४ ॥

अस्योत्तरम —

**साधर्म्यात संशये न संशयो वैधर्म्यादुभयथा वा संशया(ये)ऽत्यन्तसंशयप्रसङ्गो नित्यत्वानभ्युपगमाच्च सामान्यस्याप्रतिषेध ॥ १५ ॥**

विशेषाद्वैधर्म्यादवधार्यमाणेऽर्थे पुरुष इति न स्थाणुपुरुष

सत्त्वेनैव दृष्टान्तत्वोपपत्ते एव कृत्वा ति यदा कार्योत्पत्ते सत्त्वादेव जन्यावभाव न तु सावधिकावतोपपत्तात ॥ १३ ॥

इत्यनुत्पत्तिसमप्रकरणम् ।

क्रमप्राप्तं संशयसमं लक्षयति ।—नित्यानित्यसाधर्म्यादितरि संशयकारणोपन्यासम् तेन समानधर्मदर्शनादिदर्शनाऽऽदया काश्चित्संशयकारणबलात् संशयेन प्रत्यवस्थान संशयसम बाधकन्तु उदाहरणपरम्। तथा हि शब्दोऽनित्य कार्यत्वाद्घटवदित्युक्ते सामान्यगोत्वाऽऽदौ दृष्टान्ते घट ऐन्द्रियकत्व तुल्यम् यथा कार्यत्वात्प्रयत्नकादानित्यत्व निर्णीयते तथा ऐन्द्रियकत्वात संशयकारणादानित्यत्व सान्दिह्यताम् एव शब्दत्वाऽऽद्यसाधर्म्यदर्शनादपि संशयो बोध्य तथा च हेतुज्ञानेऽप्रामाण्यशङ्काऽऽधानद्वारा साध्यसंशयात् सत्प्रतिपक्षदेशनाभासेयम् ॥ १४ ॥

एतदुत्तरम् ।—साधर्म्यात् सामान्यदर्शनात् संशये आपाद्यमानेऽपि न संशय,

साधर्म्यात संशयोऽवकाश लभते एव वैधर्म्याद्विशेषात प्रयत्ना नन्तरीयकत्वादवधार्य्यमाणे शब्दस्यानित्यत्वे नित्यानित्य साधर्म्यात् संशयोऽवकाश न लभते, यदि वै लभेत तत स्थाणुपुरुषसाधर्म्यानुच्छेदादत्यन्त संशय स्यात् गृह्यमाणे च विशेषे नित्यसाधर्म्य संशयहेतुरिति नाभ्युपगम्यते न हि गृह्यमाणे पुरुषस्य विशेषे स्थाणुपुरुषसाधर्म्य संशयहेतु-र्भवति ॥ १५ ॥

## उभयसाधर्म्यात् प्रक्रियासिद्धे प्रकरणसम ॥१६॥

उभयेन नित्यन चानित्येन साधर्म्यात पक्षप्रतिपक्षयो प्रवृत्ति प्रक्रिया, अनित्य शब्द प्रयत्नानन्तरीयकत्वाद्घटवदि त्येक पक्ष प्रवर्त्तयति, द्वितीयश्च नित्यसाधर्म्यात् प्रतिपक्ष प्रवर्त्तयात, नित्य शब्द श्रावणत्वात शब्दत्ववत् इात। एवञ्च सति प्रयत्नानन्तरीयकत्वादिति हेतुरनित्यसाधर्म्येणोच्यमानो न प्रकरणमतिवर्त्तत, प्रकरणानतिवृत्ते निर्णयानतिवर्त्तनम समानश्चैतन्नित्यसाधर्म्येणोच्यमाने हेतौ, तदिद प्रकरणा

वैधर्म्याद्वैधर्म्यदर्शनात यदि च साध्यत्वरूपाविशेषदर्शनेऽपि संशय तं नित्यसंशय प्रसङ्ग संशयानुच्छेदप्रसङ्ग । न च तथाऽभ्युपगन्तु शक्यमन्यथाह नित्यत्वेति ।— सामान्यस्य समानधर्मदर्शनस्य नित्यत्वानभ्युपगमात् नित्यसंशयजनकत्वानभ्युपगमात, तथा सति त्वन्नीत्या हेतुरपि न परपक्षप्रतिषेधक स्यादिति भाव । सामान्यस्य गोत्वादे नित्यत्वानभ्युपगमात नित्यत्वानभ्युपगमप्रसङ्गात तत्रापि साधारणधर्मप्रमेयत्वादिना संशय एव स्यादिति कश्चित् ॥ १५ ॥

इति संशयसमप्रकरणम् ।

क्रमप्राप्त प्रकरणसम लक्षयति ।—उभयसाधर्म्यात् अन्वयसहचारात् व्यतिरेक सहचाराद्वा प्रक्रिया प्रकर्षेण क्रियासाधन विपरीतसाधनमिति फलितार्थ, तत्सिद्धस्तस्य पूर्वमेव सिद्ध तथा चाधकत्वलेनाऽऽरोपितप्रमाणान्तरस्य बाधेन

नतिवृत्त्या प्रत्यवस्थानं प्रकरणसमः। समानश्चैतद्वैधर्म्येऽपि, उभयवैधर्म्यात् प्रक्रियासिद्धेः प्रकरणसम इति ॥ १६ ॥

अस्योत्तरम् —

**प्रतिपक्षात् प्रकरणसिद्धेः प्रतिषेधानुपपत्तिः प्रतिपक्षोपपत्तेः ॥ १७ ॥**

उभयसाधर्म्यात् प्रक्रियासिद्धिं ब्रुवता प्रतिपक्षात् प्रक्रियासिद्धिरुक्ता भवति यद्युभयसाधर्म्यं, तत्रैकतरः प्रतिपक्ष इति एवं सत्युपपन्नः प्रतिपक्षो भवति प्रतिपक्षोपपत्तेरनुपपन्नः प्रतिषेधः, यतः प्रतिपक्षोपपत्तिः प्रतिषेधोपपत्तिश्चेति विप्रतिषिद्धमिति, तत्त्वानवधारणाच्च प्रक्रियासिद्धिर्विपर्यये प्रकरणावसानात् तत्त्वावधारणे ह्यवसितं प्रकरणं भवतीति ॥ १७ ॥

**त्रैकाल्यासिद्धेर्हेतोरहेतुसमः ॥ १८ ॥**

हेतुः साधनम्, तत् साध्यात् पूर्वं पश्चात् सह वा भवेत्?

प्रत्यवस्थानं प्रकरणसमः यथा शब्दोऽनित्यः कृतकत्वादित्युक्ते नैतदेवं श्रावणत्वेन नित्यत्वसाधकेन बाधात्। बाधदूषणाभासोऽयम् ॥ १६ ॥

अस्योत्तरमाह।—प्रतिपक्षादिति। साध्यसाधकत्वेनाभिमताद्धेतोर्विपक्षत्वाद्… प्रकरणसिद्धौ सदोषसाध्यस्य यः प्रतिषेधस्त्वया क्रियते तस्यानुपपत्तिः कुतः —प्रतिपक्षोपपत्तेः त्वत्पक्षापेक्षया प्रतिपक्षस्य मयोपपक्षस्य उपपत्तेः साधनात्। अयमाशयः —श्रावणत्वेन पूर्वं नित्यत्वस्य साधनं यो बाध उच्यते स नोपपद्यते पूर्वं साधितस्य बलवत्त्वाभावात् कदाचित् कृतकत्वेनानित्यत्वस्यापि पूर्वं साधनादिति त्वत्पक्षप्रतिषेधोऽपि स्यात् ॥ १७ ॥

इति प्रकरणसमप्रकरणम्।

क्रमप्राप्तमहेतुसमं लक्षयति।—त्रैकाल्यं कार्यकालात् पूर्वापरकालौ तत्र हेतोरसिद्धेः हेतुत्वासिद्धेः अयमर्थः —दण्डादिनैकः घटोऽस्ति पूर्ववर्त्तितया कारणम् तदानीं घटाद्यभावात् कस्य कारणं स्यात्? अत एव न घटाद्युत्तरकालवर्त्तितयाऽपि

यदि पूर्वं साधनम् असति साध्ये कस्य साधनम्? अथ पश्चात् असति साधने कस्येदं साध्यम्? अथ युगपत् साध्यसाधने द्वयोर्विद्यमानयोः किं कस्य साधनं? किं कस्य साध्यम्? इति हेतुना न विशिष्यते, अहेतुना साधर्म्यात् प्रत्यवस्थानमहेतुसमः ॥ १८ ॥

अस्योत्तरम् —

## न हेतुतः साध्यसिद्धेस्त्रैकाल्यासिद्धिः ॥ १९ ॥

न त्रैकाल्यासिद्धिः, कस्मात्?—हेतुतः साध्यसिद्धेः। निर्वर्त्तनीयस्य निर्वृत्तिः विज्ञेयस्य विज्ञानम् उभयं कारणतो दृश्यते सोऽयं महान् प्रत्यक्षविषय उदाहरणमिति। यत्तु खल्वुक्तम् असति साध्ये कस्य साधनम् इति?—यत्तु निर्वर्त्यते, यच्च विज्ञाप्यते तस्येति ॥ १९ ॥

## प्रतिषेधानुपपत्तेश्च प्रतिषेद्धव्याप्रतिषेधः ॥ २० ॥

पूर्वं पश्चात् युगपद्वा प्रतिषेध इति नोपपद्यते, प्रतिषेधानुपपत्तेः स्थापनाहेतुः सिद्ध इति ॥ २० ॥

न वा समानकालवर्त्तितया तुल्यकालवर्त्तिनोः सव्येतरविषाणयोरिवाविशेषगमनाऽऽपत्तेः तथा च कालत्रयेऽप्यसम्भवेनाहेतुतया प्रत्यवस्थानमहेतुसमः कारणमात्रखण्डनेन ज्ञापकहेतोरपि खण्डनात् तदसङ्करः। प्रतिकूलतर्कदेशनाभासोऽयम् ॥ १८ ॥

अत्रोत्तरमाह।—त्रैकाल्यासिद्धेस्त्रैकाल्येन याऽसिद्धिरुक्ता सा न कुतः?—हेतुतः साध्यसिद्धेः यथाऽभ्युपगमात् ॥ १९ ॥

पूर्ववर्त्तितामात्रस्यैव हेतुत्वाभ्युपगमात् अन्यथा त्वदीयहेतोरपि साध्यं न सिध्येदित्याह।—हेतुफलभावखण्डने प्रतिषेधस्याप्यनुपपत्तेः प्रतिषेद्धव्यस्य परकीयहेतोर्न प्रतिषेध इत्यर्थः ॥ २० ॥

इति अहेतुसमप्रकरणम्।

**अर्थापत्तितः प्रतिपक्षसिद्धेरर्थापत्तिसमः ॥२१॥**

अनित्यः शब्दः प्रयत्नानन्तरीयकत्वाद् घटवदिति स्थापिते पक्षे अर्थापत्त्या प्रतिपक्षं साधयतोऽर्थापत्तिसमः, यदि प्रयत्नानन्तरीयकत्वादनित्यसाधर्म्यादनित्यः शब्द इति अर्थादापद्यते नित्यसाधर्म्यान्नित्य इति, अस्ति तु अस्य नित्येन साधर्म्यम् अस्पर्शत्वमिति ॥ २१ ॥

अस्योत्तरम् —

**अनुक्तस्यार्थापत्तेः पक्षहानेरुपपत्तिरनुक्तत्वा-दनैकान्तिकत्वाच्चार्थापत्तेः ॥ २२ ॥**

अनुपपाद्य सामर्थ्यमनुक्तमर्थादापद्यत इति ब्रुवतः पक्षहानेरुपपत्तिः अनुक्तत्वात् अनित्यपक्षसिद्धावर्थादापन्नं नित्यपक्षस्य हानिरिति अनैकान्तिकत्वाच्चार्थापत्तेः, उभयपक्षसमा चेयमर्थापत्तिः यदि नित्यसाधर्म्यादस्पर्शत्वादाकाशवच्च नित्यः शब्दः, अर्थादापन्नमनित्यसाधर्म्यात् प्रयत्नानन्तरीयकत्वादनित्य इति, न चेयं विपर्ययमात्रादेकान्तेनार्थापत्तिः, न खलु वै

क्रमप्राप्तमर्थापत्तिसमं लक्षयति।—अर्थापत्तिरर्थापत्त्याभासः तया अर्थापत्त्याभासेन प्रतिपक्षसाधनाय प्रत्यवस्थानमर्थापत्तिसमः अयमाशयः—अर्थापत्तिर्हि उक्तेनानुक्तमाक्षिपति यथा शब्दोऽनित्य इत्युक्तेऽर्थादापद्यतेऽन्यत् नित्यम् तथा च दृष्टान्तासिद्धिर्विरोधश्च। कृतकत्वादनित्य इत्युक्तेऽर्थादापन्नम् अन्यस्मादुक्तोबाधो सत्प्रतिपक्षो वा। अनुमानादनित्य इत्युक्ते प्रत्यक्षान्नित्य इति च बाधः विशेषविधेः शेषनिषेधफलकत्वमित्यभिमानः। सर्वदोषदेशनाभासा चेयम् ॥ २१ ॥

अस्योत्तरम्।—किमुक्तेन अनुक्तं यत्किञ्चिदेवार्थादापद्यते ?—उक्तोपपादकं वा ? आद्ये—त्वत्पक्षहानिरप्यापाद्यता त्वयाऽनुक्तत्वात् अन्त्ये—अस्या अर्थापत्तेरनैकान्तिकत्वम् ऐकान्तिकत्वम् एकपक्षसाधकत्वं बलं, तन्नास्ति न हि अनित्य इत्युक्तोपपादक

घटस्य ग्राव्णः पतनमित्यर्थादापद्यते द्रवाणामपां पतनाभाव इति ॥ २२ ॥

**एकधर्मोपपत्तेरविशेषे सर्वाविशेषप्रसङ्गात् सद्भावोपपत्तेरविशेषसमः ॥ २३ ॥**

एको धर्मः प्रयत्नानन्तरीयकत्वं शब्दघटयोरुपपद्यत इत्यविशेषे उभयोरनित्यत्वे सर्वस्याविशेषः प्रसज्यते, कथम्?— सद्भावोपपत्तेः, एको धर्मः सद्भावः सर्वस्योपपद्यते सद्भावोपपत्तेः सर्वाविशेषप्रसङ्गात् प्रत्यवस्थानमविशेषसमः ॥ २३ ॥

अस्योत्तरम्,—

**क्वचित्तद्धर्मानुपपत्तेः क्वचिच्चोपपत्तेः प्रतिषेधाभावः ॥ २४ ॥**

यथा साध्यदृष्टान्तयोरेकधर्मस्य प्रयत्नानन्तरीयकत्वस्योप

नित्यत्वमिति न हि विशेषविधिमात्रं प्रतिनिषेधफलकम् अपि तु क्वचित् तात्पर्यं क्वचित् न हि नीलो घट इत्युक्ते सर्वमन्यदनीलमिति क्वचित् प्रतिपद्यते ॥ २२ ॥

इति अर्थापत्तिसमप्रकरणम् ।

अविशेषसमं लक्षयति ।—एकस्य धर्मस्य कृतकत्वादेः शब्दे घटे चोपपत्तेः अस्मात् यदि शब्दघटयोरनित्यत्वेनाविशेष उच्यते तदा सर्वेषामविशेषप्रसङ्गः कुतः?—सद्भावोपपत्तेः (१) सत् सद्भावः ये भावा धर्माः सत्त्वप्रमेयत्वादयः, तेषामुपपत्तेः अस्त्वात् तथा च सर्वेषामभेदे पदार्थविभागः सर्वेषामेकजातीयत्वेऽवान्तरजात्युच्छेदः सर्वेषामनित्यत्वं आत्मादिविलयः इत्यादि । तथा च सद्भावहेतुकसर्वाविशेषापादनमविशेषसम इति फलितम् । अत्र चाविशेषसम इति लक्ष्यनिर्देशः, सद्भावोपपत्तेः सर्वाविशेषप्रसङ्गादिति लक्षणं शेषं व्युत्पादकम् । प्रतिकूलतर्कदेशनाभासो वाऽयम् ॥ २३ ॥

अस्योत्तरमाह ।—तद्धर्मस्य इमौ धर्मौ व्याप्त्यादि तस्य क्वचित् कृतकत्वादेः

---

(१) सत्तैकमात्रात् ।

पत्तेरनित्यत्वधर्मान्तरमविशेषे न एव सर्वभावानां सद्भावोपपत्तिनिमित्तं धर्मान्तरमस्ति, येनाविशेषः स्यात्, अथ मतम्, अनित्यत्वमेव धर्मान्तरं सद्भावोपपत्तिनिमित्तं भावानां सर्वत्र स्यात् इत्येवं खलु वै कल्प्यमाने अनित्याः सर्वे भावाः सद्भावोपपत्तेरिति पक्षः प्राप्नोति तत्र प्रतिज्ञार्थव्यतिरिक्तमन्यदुदाहरणं नास्ति अनुदाहरणश्च हेतुर्नास्तीति प्रतिज्ञैकदेशस्य च उदाहरणत्वमनुपपन्नं न हि साध्यमुदाहरणं भवति, ततश्च नित्यानित्यभावादनित्यानित्यत्वानुपपत्तिः तस्मात् सद्भावोपपत्तेः सर्वाविशेषप्रसङ्ग इति निरभिधेयमेतद्वाक्यमिति। सर्वभावानां सद्भावोपपत्तेरनित्यत्वमिति ब्रुवतानुज्ञातं शब्दस्यानित्यत्वं तत्रानुपपन्नः प्रतिषेध इति ॥ २४ ॥

उभयकारणोपपत्तेरुपपत्तिसमः ॥ २५ ॥

यद्यनित्यत्वकारणमुपपद्यते शब्दस्येत्यनित्यः शब्दः नित्यत्वकारणमप्युपपद्यते अस्यास्पर्शत्वमिति नित्यत्वमप्युपपद्यते, उभयस्यानित्यत्वस्य नित्यत्वस्य च कारणोपपत्त्या प्रत्यवस्थानमुपपत्तिसमः ॥ २५ ॥

उपपत्तेः सत्त्वात् क्वाचित्कस्याऽऽदौ अनुपपत्तेः अभावात् त्वदुक्तस्य प्रतिषेधस्याभावोऽसम्भव इत्यर्थः ॥ २४ ॥

इति अविशेषसमप्रकरणम्।

उपपत्तिसमं लक्षयति।—उभयपक्षप्रतिपक्षौ तयोः कारणस्य प्रमाणस्य उपपत्तेः सत्त्वात् तथा च व्याप्तिमपुरस्कृत्य युक्तिप्रसङ्गमात्रेण परपक्षदृष्टान्तेन स्वपक्षसाधनं प्रत्यवस्थानम् उपपत्तिसमः यथा—शब्दोऽनित्यः कृतकत्वादित्युक्ते यथा त्वत्पक्षेऽनित्यत्वे प्रमाणमस्ति तथा मत्पक्षेऽपि सप्रमाणकं नित्यत्वमन्यतरपक्षस्यान्यतरत्वात् तुल्यत्वम्। तथा च बाधः प्रतिरोधो वा तदुद्भावनाभासो चेयम् ॥ २५ ॥

अथान्तरम्,—

## उपपत्तिकारणाभ्यनुज्ञानादप्रतिषेध ॥ २६ ॥

उभयकारणोपपत्ते' इति ब्रुवता नानित्यत्वकारणोपपत्तेर नित्यत्वं प्रतिषिध्यते, यदि प्रतिषिध्येत, नाभयकारणोपपत्ति स्यात, उभयकारणोपपत्तिवचनादनित्यत्वकारणोपपत्तिरभ्यनु ज्ञायते अभ्यनुज्ञानादनुपपन्न प्रतिषेध, व्याघातात प्रतिषेध इति चेत्? समानो व्याघात, एकस्य नित्यत्वानित्यत्वप्रसङ्ग व्याहत ब्रुवतोक्त प्रतिषेध इति चेत?—स्वपक्षपरपक्षयो समानो व्याघात स च नैकतरस्य साधक इति ॥ २६ ॥

## निर्दिष्टकारणाभावेऽप्युपलम्भादुपलब्धिसम ॥२७॥

निर्दिष्टप्रयत्नानन्तरीयकत्वस्यानित्यत्वकारणस्याभावेऽपि वायुनोदनात वृक्षशाखाभङ्गजस्य शब्दस्यानित्यत्वमुपलभ्यते, निर्दिष्टस्य साधनस्याभावेऽपि साध्यधर्मोपलब्ध्या प्रत्यवस्थान मुपलब्धिसम ॥ २७ ॥

अथान्तरम् इ।—अयं त्व प्रतिषेधो न सम्भवति कुत?—सत्पक्षे उपपत्ति कारणस्य सत्त्वसाधकप्रमाणस्य त्वयाऽभ्यनुज्ञानात् त्वया हि सत्पक्षस्य दृष्टान्तो कारणेन सप्रमाणकत्वमनुज्ञातम् अत कथं तत्प्रतिषेधः शक्यते कर्तुम्? अनुज्ञाने स्यापि प्रतिषेधे स्वपक्ष एव किं न प्रतिषिध्यते? ॥ २६ ॥

इति उपपत्तिसमप्रकरणम् ।

उपलब्धिसम लक्षयति।—वादिना निर्दिष्टस्य कारणस्य साधनस्य अभावेऽपि साध्यस्योपलम्भात प्रत्यवस्थानमुपलब्धिसम इत्यर्थ तथा हि पर्वतो वह्निमान धूमादित्यादिके वह्न्यवधारणाय धूमनुच्यते न च तत सम्भवति धूम विना आलोका ऽऽदितोऽपि वह्निसिद्धे तथा च न तस्य साधकत्वमिति प्रतिकूलतर्क न वा धूमा द्वाक्यस्यैव अवधारणं द्रव्यत्वादेरपि धर्मिण साधनात् न वा पर्वत एव वह्निमाने त्यादिकम् अवधारयितुं शक्यते महानसादेरपि वह्निमत्त्वात अन्यथा दृष्टान्तासिद्धि स्यात्। एवं वह्निशून्यपर्वतस्यापि सत्त्वाबाध इत्यादि। तदिदमाभासो चेत्यम् ॥ २७ ॥

अस्योत्तरम्,—

**कारणान्तरादपि तद्धर्मोपपत्तेरप्रतिषेधः ॥ २८ ॥**

प्रयत्नानन्तरीयकत्वादिति ब्रुवता कारणत उत्पत्तिरभिधीयते न कार्यस्य कारणनियमः, यदि च कारणान्तरादप्युपपद्यमानस्य शब्दस्य तदनित्यत्वमुपपद्यते, किमत्र प्रतिषिध्यत इति? न प्रागुच्चारणात् विद्यमानस्य शब्दस्यानुपलब्धिः कस्मात्?—आवरणाद्यनुपलब्धेः, यथा विद्यमानस्योदकादेरर्थस्याऽऽवरणादेरनुपलब्धिः, नैवं शब्दस्याग्रहणकारणेनाऽऽवरणाऽऽदिनाऽनुपलब्धिः, गृह्येत चैतदस्याग्रहणकारणमुदकाऽऽदिवत् न गृह्यते, तस्मादुदकाऽऽदिविपरीतः शब्दोऽनुपलभ्यमान इति ॥ २८ ॥

**तदनुपलब्धेरनुपलम्भादभावसिद्धौ तद्विपरीतोपपत्तेरनुपलब्धिसमः ॥ २९ ॥**

तेषामावरणाऽऽदीनामनुपलब्धिर्नोपलभ्यते, अनुपलम्भान्ना

अत्रोत्तरमाह।—कारणान्तरात् साधनान्तरादात्माकाशादितोऽपि तस्य धर्मस्य साध्यस्य उपलब्धेस्तदुक्त प्रतिषेधो न सम्भवति अयमाशयः—न हि वयमेव कारणाद् वह्निमान् धूमादित्यादिकं प्रयुञ्ज्महे, अपि तु सन्दिग्धस्य वह्नेः सिद्ध्यर्थम् अन्यथा तदुक्तमसाधकतासाधनमपि न स्यात्, असाधकतासाधकान्तरस्यापि सत्त्वात् ॥ २८ ॥

इति उपलब्धिसमप्रकरणम्।

अनुपलब्धिसमं लक्षयति।—यद्यपि चेयं द्वितीयाध्याये दर्शिता दूषिता च तथाऽप्यनुपलब्धिसमजातिः एवम् इति तथानुक्तत्वात् सम्प्रत्यत्राभिधीयते तथाहि अत्र —तथा यदि कण्ठाद्यभिघातजन्यत्वादनित्यत्वमेव साध्यते यः शब्दो नित्यः स्यात् उच्चारणात् प्राक् कुतो नोपलभ्यते? न हि घटाऽऽद्यावरणकुड्याऽऽदिवच्छब्दस्याऽऽवरणमस्ति तदनुपलब्धेरिति। तदेव जातिवादी प्रत्यवतिष्ठते —यथावरणानुपलब्धेरावरणाभाव

स्तीत्यभावोऽस्या सिध्यति, अभावसिद्धौ हेत्वभावात् तद्विपरीत-मस्तित्वमावरणाऽऽदीनामवधार्य्यते तद्विपरीतोपपत्तेर्यत् प्रतिज्ञात—"न प्रागुच्चारणाद्विद्यमानस्य शब्दस्यानुपलब्धि" इत्येतन्न सिध्यति सोऽयं हेतुरावरणाद्यनुपलब्धेरित्यावरणा-ऽऽदिषु चाऽऽवरणाद्यनुपलब्धौ च समयानुपलब्ध्या प्रत्यवस्थिता-ऽनुपलब्धिसमो भवति ॥ २९ ॥

अस्योत्तरम् —

अनुपलम्भाऽऽत्मकत्वादनुपलब्धेरहेतुः ॥३०॥

आवरणाऽऽद्यनुपलब्धिर्नास्ति अनुपलम्भात् इत्यहेतुः कस्मात्?—अनुपलम्भाऽऽत्मकत्वादनुपलब्धेः उपलम्भाभावमात्रत्वादनुपलब्धेः यदस्ति, तदुपलब्धेर्विषयः, उपलब्ध्या तदस्तीति प्रतिज्ञायते, यन्नास्ति, तदनुपलब्धेर्विषयः, अनुपलभ्यमानं नास्तीति प्रतिज्ञायते, सोऽयमावरणाऽऽद्यनुपलब्धेरनुपलम्भाभावोऽनुपलब्धौ स्वविषये प्रवर्त्तमानो न स्वविषयं प्रतिषेधति। अप्रतिषिद्धा चाऽऽवरणाद्यनुपलब्धिर्हेतुत्वाय कल्पते, आवरणा

सिध्यति तदा आवरणानुपलब्धेरप्यनुपलम्भादावरणानुपलब्धेरप्यभाव सिध्येत् तथा चाऽऽवरणानुपलब्धिप्रमाणक आवरणाभावो न स्यात् अपि त्वावरणोपपत्तिरेव स्यात् इति शब्दानित्यत्व नोक्त बाधकं युक्तम्। नन्वनुपलब्धेरनुपलब्ध्यन्तरानपेक्षणात कथमेवम्? इति चेत् इत्थम् अनुपलब्धेरनुपलब्ध्यन्तरानपेक्षत्वे स्वयमेव स्वस्मिन्ननुपलब्धिरूपेति वाच्यम् तथा च तथैवानुपलब्ध्याऽनुपलब्धत्वसम्भवात् तदभावसिद्ध स्याऽऽत्मन्यनुपलब्धिरूपस्याभावऽनुपलब्धित्वमेव न स्यात अनुपलब्धेरनुपलब्ध्यन्तरापेक्षायोऽनवस्था स्पष्टैव। इत्यत्रावरूपस्य प्रत्यवस्थानमनुपलब्धिसम इत्यर्थ। प्रतिकूलतर्कदेशनाभासा चेयम् ॥ २९ ॥

अस्योत्तरमाह।—अनुपलम्भ आत्मन्यनुपलब्धिरिति कोऽर्थ?—स्वयमनुपलब्धिरूपेति चेत भवत्येव स्वविषयाऽऽद्यनुपलब्धिरिति चेत् नेद प्रसक्तम् अनुपलब्धेरनुपलम्भाऽऽत्मकत्वात उपलम्भाभावाऽऽत्मकत्वात् अभावस्य च निर्विषयकत्वात्।

ऽऽदीनि तु विद्यमानत्वादुपलब्धेर्विषयाः, तेषामुपलब्ध्या भावितव्यम्, यत्तानि नोपलभ्यन्ते, तदुपलब्धेः स्वविषयप्रतिपादिकाया अभावादनुपलम्भादनुपलब्धेर्विषयो गम्यते, न सन्त्यावरणाऽऽदीनि शब्दस्याग्रहणकारणानीति अनुपलम्भादनुपलब्धिः सिध्यति विषयः स तस्येति ॥ २० ॥

**ज्ञानविकल्पानाञ्च भावाभावसंवेदनादध्यात्मम् ॥ ३१ ॥**

अहेतुरिति अनुवर्त्तते। शरीरे शरीरिणां ज्ञानविकल्पानां भावाभावौ संवेदनीयौ—अस्ति मे संशयज्ञानं नास्ति मे संशयज्ञानमिति एवं प्रत्यक्षानुमानाऽऽगमस्मृतिज्ञानेषु सेयमावरणाऽऽद्यनुपलब्धिरुपलब्ध्यभावः स्वसंवेद्यः नास्ति मे शब्दस्याऽऽवरणाऽऽद्यनुपलब्धिरिति नोपलभ्यन्ते शब्दस्याग्रहणकारणान्यावरणाऽऽदीनीति। तत्र यदुक्तं—तदनुपलब्धेरनुपलम्भाद् भावसिद्धिरिति, एतन्नोपपद्यते ॥ ३१ ॥

स्याऽऽत्मन्यनुपलब्धित्वाभावेऽनुपलब्धित्वमेव कथमस्याः ? इति चेत् कतमो विरोधः ? न हि घटः स्वविषयो न भवतीति नायं घटः आवरणाभावः कथमनुपलब्ध्यविषयः ? इति चेत् क एवमाह ? किन्त्वनुपलब्ध्यसहकृतेन्द्रियग्राह्यत्वादनुपलब्धिग्राह्य इत्युपपद्यते अत तदनुपलब्धेरनुपलम्भात् इत्यादिकमहेतुः अन्यथा त्वत्साधनमपि दोषानुपलब्धेरनुपलम्भात् सदोषमेव स्यादिति ॥ २ ॥

नन्वनुपलब्धेः स्वस्मिन्ननुपलब्धित्वाभावेऽनुपलब्धिरपि केन सिध्येत ? अत आह।— अध्यात्मम् आत्मन्यधि ज्ञानविकल्पानां ज्ञानविशेषाणां भावाभावयोर्मनसा संवेदनात् 'घटं साक्षात्करोमि वह्निमनुमिनोमि नानुमिनोमि' इत्येवं ज्ञानविशेषतदभावानां मनसैव ग्रहणादिति भावः ॥ २१ ॥

इति अनुपलब्धिसमप्रकरणम्।

**साधर्म्यात् तुल्यधर्मोपपत्तेः सर्वानित्यत्वप्रसङ्गादनित्यसमः ॥ ३२ ॥**

अनित्येन घटेन साधर्म्यादनित्यः शब्द इति ब्रुवतः, अस्ति घटेनानित्येन सर्वभावानां साधर्म्यमिति सर्वस्यानित्यत्वमनिष्टं सम्पद्यते, सोऽयमनित्यत्वेन प्रत्यवस्थानादनित्यसम इति ॥ ३२ ॥

अस्योत्तरम् —

**साधर्म्यादसिद्धेः प्रतिषेधासिद्धिः प्रतिषेध्यसाधर्म्याच्च ॥ ३३ ॥**

प्रतिज्ञाऽऽद्यवयवयुक्तं वाक्यं पक्षनिवर्तकं प्रतिपक्षलक्षणं प्रतिषेधः तस्य पक्षेण प्रतिषेध्येन साधर्म्यं प्रतिज्ञाऽऽदियोगः

अनित्यसमं लक्षयति।—यदि दृष्टान्तघटसाधर्म्यात् कृतकत्वात् तेन सह तुल्यधर्मतोपपद्यते इत्यतः शब्देऽनित्यत्वं साध्यते तदा सर्वस्यैवानित्यत्वं स्यात् सत्त्वाऽऽदिरूपसाधर्म्यसम्भवात्। न चेदमर्थान्तरयुक्तामात्रं वाच्यं सर्वस्यानित्यत्वे व्यतिरेकाप्रसिद्ध्याऽनुमानदूषणे तात्पर्यात् परस्यान्वयव्यतिरेकिण एवानुमानत्वादित्याशयः। तथा च व्याप्तिमपुरस्कृत्य यत्किञ्चिद्दृष्टान्तसाधर्म्येण सर्वस्य साध्यवत्त्वाऽऽपादनमनित्यसमा। साध्यपदादविशेषसमातो व्यवच्छेदः तत्र सर्वाविशेष एवाऽऽपाद्यते न तु सर्वस्य साध्यवत्त्वम्। यत्तु अनित्यत्वेन समाऽनित्यसमेति भावप्रधानो निर्देशः तथा च अन्वयलक्ष्यमेव लक्षणमिति तन्न वह्निमान् धूमादित्यादौ महानससाधर्म्यात् सत्त्वात्सर्वस्य वह्निमत्त्वं स्यात् इत्यस्य जात्यन्तरत्वाऽऽपत्तेः। आचार्यास्तु—"साधर्म्यं वैधर्म्यस्याप्युपलक्षकम् यथाऽऽकाशवैधर्म्यात् कृतकत्वाच्छब्दोऽनित्यः तथाऽऽकाशवैधर्म्यादाकाशभिन्नत्वाऽऽदिना सर्वमेवानित्यं स्यात् इत्यत्र लक्षणे यत्किञ्चिद्धर्मेणेत्येव वाच्यम्" इत्याहुः। अत्र च वैधर्म्यस्य विपक्षाद्व्यावृत्तत्वान्न सर्वस्य साध्यवत्त्वाऽऽपादनं किन्त्वात्माऽऽदीनामप्यनित्यत्वं स्यादिति तत्र जात्यन्तरमित्यवधेयम्। प्रतिकूलतर्कदेशनाभासा चेयम् ॥ ३२ ॥

अस्योत्तरमाह।—यदि यत्किञ्चित्साधर्म्यात् सर्वस्य साध्यवत्त्वमापादयतस्तव साधर्म्यस्यासाधकत्वमभिमतं तदा त्वत्कृतप्रतिषेधस्याप्यसिद्धिः तस्यापि प्रतिषेध्य

तत् यथानित्यसाधर्म्यादनित्यत्वस्यासिद्धि, साधर्म्यादसिद्धे प्रतिषेधस्याप्यसिद्धि, प्रतिषेध्येन साधर्म्यादिति ॥ ३३ ॥

**दृष्टान्ते च साध्यसाधनभावेन प्रज्ञातस्य धर्मस्य हेतुत्वात्तस्य चोभयथाभावान्नाविशेष ॥३४॥**

दृष्टान्ते य खलु धर्म साध्यसाधनभावेन प्रज्ञायते, स हेतुत्वेनाभिधीयते, स चोभयथा भवति—केनचित् समान कुतश्चिद्विशिष्ट, सामान्यात साधर्म्य विशेषाच्च वैधर्म्यम्, एव साधर्म्यविशेषो हेतु नाविशेषेण साधर्म्यमात्र वैधर्म्य मात्र वा, साधर्म्यमात्र वैधर्म्यमात्र चाऽऽश्रित्य भवानाह— साधर्म्यात्तुल्यधर्मोपपत्ते सर्वानित्यत्वप्रसङ्गादनित्यमम इति एतदयुक्तमिति, अविशेषसमप्रतिषेधे च यदुक्त तदपि वेदितव्यम् ॥ ३४ ॥

**नित्यमनित्यभावादनित्ये नित्यत्वोपपत्तेर्नित्य-सम ॥ ३५ ॥**

अनित्य शब्द इति प्रतिज्ञायते तदनित्यत्व कि शब्दे

---

साधर्म्यस्य प्रवृत्तत्वात् त्वया ह्य साध्यते कृतकत्व न च घटे दृष्टान्तसाधर्म्यरूपत्वात् सत्त्वाऽऽदिवत् अत्र च त्वदीयहेतुस्वप्रतिषेध्येन मदीयहेतुना कृतकत्वेन सत्त्वेन च सह साधर्म्यरूप तथा चाऽसाधकं न साधक स्यात ॥ ३३ ॥

यदि च साधर्म्यमात्र न साधकम् अपि तु व्याप्तिसहितमभिमत तदा कृतकत्व तदस्ति न तु सत्त्व इति विशेष इत्याह।—साध्यसाधनभावेन व्याप्यव्यापकभावेन दृष्टान्ते प्रज्ञातस्य प्रमितस्य धर्मस्य कृतकत्वस्य हेतुत्वात् साधकत्वात् तस्य हेतुत्वस्य उभयथा अन्वयेन व्यतिरेकेण च भावात् सदोऽहेतौ सत्त्वात् सत्त्वाऽऽदिनाऽविशेष इति यदुक्त तन्न भवति ॥ ३४ ॥

इत्यनित्यसमप्रकरणम्।

नित्यसम लक्षयति।—अनित्यस्य भाव अनित्यत्व, तस्य नित्य सर्वकाल, स्वीकारे

नित्यम ? अथानित्यम ? यदि तावत् सदा भवति, धमस्य सदाभावाद्धर्मिणोऽपि सदाभाव इति नित्य शब्द इति , अथ न सर्वदा भवति, अनित्यत्वस्याभावान्नित्य शब्द । एव नित्यत्वेन प्रत्यवस्थानान्नित्यसम ॥ ३५ ॥

अस्योत्तरम,—

**प्रतिषेध्ये नित्यमनित्यभावादनित्येऽनित्यत्वोपपत्ते प्रतिषेधाभाव ॥ ३६ ॥**

प्रतिषेध्ये शब्दे नित्य(त्व)मनित्यत्वस्य भावादित्युच्यमान ऽनुज्ञात शब्दस्यानित्यत्वम, अनित्यत्वोपपत्तेश्च नानित्य शब्द इति प्रतिषेधो नोपपद्यते, अथ नाभ्युपगम्यते नित्य(त्व)मनित्यत्वस्य भावादिति हेतुर्न भवतीति हेत्वभावात् प्रतिषेधानुपपत्तिरिति। उत्पन्नस्य निरोधादभाव शब्दस्यानित्यत्वम् , तत्र परिप्रश्नानुपपत्ति , सोऽय प्रश्न ,—तदा नित्यत्व कि शब्दे सर्वदा भवति ? अथ न ? इत्यनुपपन्न , कस्मात् ?—उत्पन्नस्य

---

अनित्ये शब्दे नित्यत्व स्यादित्यापादन नित्यसमा जयमाशय —अनित्यत्वस्य नित्यत्वम स्वीकारेऽनित्यत्वाभावदशायां तस्यानित्यत्वम् न तस्यापि नित्यत्वाऽऽपत्ति । न हि तच्छा भावदशाया दण्डोत्पत्त्यन अतोऽनित्यत्वस्य नित्यत्वमेव स्वीकार इत्यभ्युपगन्तव्यम् तथा च शब्दस्यापि नित्यत्वाऽऽपत्ति तेन बाध सत्प्रतिपक्षो वा तद्धेत्वनाभासा चेयम एवमनित्यत्व यदि नित्य कथ शब्दस्यानित्यता कुर्यात ? न हि रक्त मञ्जारजन रक्तस्य गौरतां सम्पादयति , यथानित्य तथा तदभावदशायाम् अनित्यत्व न स्यादि त्यादिकमूह्यम् एतदनुसारेण लक्षणमपि कार्यमित्याचाख्या । वयन्तु,—अनित्यस्य भावो धम तस्य नित्यत्वमभ्युपगमेऽनित्यत्वनाभ्युपगतस्य नित्यत्वं स्यात यथा घटादि रूपवत्ता इत्यत्र अनित्यघटवृत्तिधर्मस्य रूपवत्त्व त्वया किं नित्यमुपेयत न वा ? न चेत तदा साध्याभावादसता बाध अथ चेत् नित्यमेव रूपवत्त्व तदा विरुद्धम् तद्धेत्वनाभासा चेयमिति मम ॥ ३५ ॥

अस्योत्तरमाह।—प्रतिषेध्ये सत्पक्षे शब्दे सर्वदा अनित्यभावात् अनित्यत्वात् अनित्ये

धर्मो निरोधादभाव, शब्दस्य तदनित्यत्वम्, एवञ्च सत्यधिकरणाऽऽधेयविभागो व्याघातान्नास्तीति नित्यानित्यविरोधाच्च नित्यत्वमनित्यत्वं चैकस्य धर्मिणो धर्मौ विकल्पेन न सम्भवतः, तत्र यदुक्तं — नित्यमनित्यत्वस्य भावान्नित्य एव तदवर्त्तमानार्थमुक्तमिति ॥ ३६॥

## प्रयत्नकार्य्यानेकत्वात्कार्य्यसमः ॥ ३७ ॥

प्रयत्नानन्तरीयकत्वादनित्यः शब्द इति यस्य प्रयत्नानन्तरमात्मलाभः, तत् खल्वभूत्वा भवति, यथा घटाऽऽदिकार्य्यम्, अनित्यमिति च भूत्वा न भवतीत्येतद्विज्ञायते, एवमवस्थिते प्रयत्नकार्य्यानेकत्वादिति प्रतिषेध उच्यते प्रयत्नानन्तरमात्मलाभश्च दृष्टो घटाऽऽदीनां, व्यवधानापोहाच्चाभिव्यक्तिर्व्यवहितानां तत् किं प्रयत्नानन्तरमात्मलाभः शब्दस्य? —आहोऽभिव्यक्तिः? इति विशेषो नास्ति। कार्य्याविशेषेण प्रत्यवस्थानं कार्य्यसमः ॥ ३७॥

शब्दे अनित्यत्वमुपपद्यते न हि सम्भवति अनित्यत्वं नित्यमस्ति अथ च तन्नित्यमिति व्याघातात् न च नित्यमिति सर्वकालासत्त्वम् तथा च शब्दस्यानित्यत्वं कथं सर्वकाले अनित्यत्वसम्बन्धः? इति वाच्यं सर्वकालासत्त्वस्य यावत्सत्त्वमित्यर्थात् अत एवोक्तेन प्रतिषेधो न सम्भवति। मतान्तरे तु —अनित्यत्वेऽनित्यत्वोपपत्तेः इत्यादिना यो प्रतिषेधः कृतः स न सम्भवतीत्यर्थः ॥ २६ ॥

इति नित्यसमप्रकरणम्।

कार्य्यसमं लक्षयति।—प्रयत्नकार्य्यस्य प्रयत्नसम्पाद्यमौत्पत्त्य अनेकत्वात् अनेकविधत्वात् अयमर्थः —शब्दोऽनित्यः प्रयत्नानन्तरीयकत्वादित्युक्ते प्रयत्नानन्तरीयकत्वं प्रयत्नकार्य्यं घटाऽऽदौ प्रयत्नानन्तरोपलभ्यमानं कीलकाद्यावापकृष्टम् तत्र किं नीत० न तदनित्यत्वसाधकम् आद्यन्तु असिद्धम् तथा च सामान्यतः उक्तहेतोरन्यतमत्विशेष निराकरणेन प्रत्यवस्थानं कार्य्यसमा। असदुत्तराभासा चेयम्। अथवा —प्रयत्नकार्य्याणां प्रयत्नकर्त्तृत्वानां कर्त्तव्यप्रयत्नानामनिर्द्धारणात् तादृशानाम् अनेकविधत्वादुक्तस्य व्याघातकमुत्तरं कार्य्यसमा तथा चाद्या आकृतिगणत्वात् सूत्रानुल्लिखितानामपि परिग्रहः यथा त्वत्पक्षे किं दूषणं भविष्यतीति शङ्का पिशाचीसमा कार्य्यकारणभावस्योपकारनियतत्वेऽनवस्थेत्यनुपकारसमा इत्यादि ॥ ३७ ॥

अस्योत्तरम्,—

**कार्यान्यत्वे प्रयत्नाहेतुत्वमनुपलब्धिकारणोपपत्तेः ॥ ३८ ॥**

सति कार्यान्यत्वे अनुपलब्धिकारणोपपत्तेः प्रयत्नस्याहेतुत्वं शब्दस्याभिव्यक्तौ यत्र प्रयत्नानन्तरमभिव्यक्तिस्तत्रानुपलब्धिकारणं व्यवधानमुपपद्यते, व्यवधानापोहाच्च प्रयत्नानन्तरभाविनोऽर्थस्योपलब्धिलक्षणाभिव्यक्तिर्भवतीति, न तु शब्दस्यानुपलब्धिकारणं किञ्चिदुपपद्यते यस्य प्रयत्नानन्तरमपोहाच्छब्दस्योपलब्धिलक्षणाभिव्यक्तिर्भवतीति, तस्मादुत्पद्यते शब्दः, नाभिव्यज्यत इति ॥ ३८ ॥

हेतोश्चेदनैकान्तिकत्वमुपपाद्यते अनैकान्तिकत्वादसाधकः स्यात् इति यदि चानैकान्तिकत्वादसाधकत्वम् —

**प्रतिषेधेऽपि समानो दोषः ॥ ३९ ॥**

प्रतिषेधोऽप्यनैकान्तिकः, किञ्चित् प्रतिषेधति किञ्चिन्नेति अनैकान्तिकत्वादसाधक इति। अथवा शब्दस्यानित्यत्वपक्षे प्रयत्नानन्तरमुत्पादः, नाभिव्यक्तिरिति विशेषहेत्वभावः,

---

अत्रोत्तरम्।—शब्दस्य कार्यान्यत्वेऽकार्यत्वे प्रयत्नस्य कारणस्य अहेतुत्वम् अकारणत्वम् इदञ्च तदा स्यात् यद्यनुपलब्धिकारणमावरणादिकमुपपद्येत न च तच्छब्देऽस्तीत्यर्थः, जातिवादिपक्षे तु —कार्याणां जातीनाम् अन्यत्वे नानाविधत्वे इदमुत्तरम् —प्रयत्नस्य त्वदीयदूषणप्रयत्नस्य अहेतुत्वम् असाधकतासाधकत्वाभावः, उपलब्धिकारणस्य प्रमाणस्य निर्दोषवाक्यस्य या उपपत्तिः निर्दोषवाक्यार्थोपपादनं तदभावात् तद्वाक्यस्य स्वपक्षव्याघातकत्वादित्यर्थः ॥ ३८ ॥

इति कार्यसमप्रकरणम्।

एवं तावज्जातिवादिनं प्रति स्वयं सदुत्तरं विनोद्भावितं कार्य इत्याभिहितं तन्निश्चयविजयफलकत्वं कथायां सम्पद्यते असदुत्तरोद्भावने तु वन्ध्या। सम्प्रयोगवत्साभिमतफलाभावादिति व्युत्पादयितुं कथाभासरूपां षट्पक्षीं शिष्यशिक्षायै प्रदर्शयति।—

नित्यत्वपक्षेऽपि प्रयत्नानन्तरमभिव्यक्ति नोत्पाद इति विशेष-हेत्वभाव , सोऽयमुभयपक्षसमो विशेषहेत्वभाव इत्युभयमप्य नैकान्तिकत्वमिति ॥ ३९ ॥

## सर्वत्रैवम् ॥ ४० ॥

सर्वेषु साधर्म्यप्रभृतिषु प्रतिषेधहेतुषु यत्र विशेषो दृश्यते, तत्रोभयो पक्षयो समं प्रसज्यत इति ॥ ४० ॥

## प्रतिषेधविप्रतिषेधे प्रतिषेधदोषवद्दोषः ॥ ४१ ॥

योऽय प्रतिषेधेऽपि समानो दोषोऽनैकान्तिकत्वमापाद्यते, सोऽय प्रतिषेधस्य प्रतिषेधेऽपि समान , तत्रानित्य शब्द प्रयत्नानन्तरीयकत्वादिति साधनवादिन स्थापना प्रथम पक्ष , "प्रयत्नकार्य्यानेकत्वात् कार्य्यसम' इति दूषणवादिन प्रतिषेधहेतुना द्वितीय पक्ष , स च प्रतिषेध इत्युच्यते ,

प्रयत्नानन्तरीयकत्व न शब्दो नित्यत्व साधयति अनैकान्तिकत्वादिति यो दोष स त्वत्पक्षेऽपि तुल्य प्रयत्नाभिव्यङ्ग्यत्वस्याप्यसाधकत्वात अथवा —अनैकान्तिकत्वाद साधक इति त्वया प्रतिषेध कृत तत्राप्यय दोष समान स ह्यनैकान्तिकत्व स्वस्यैवासाधकत्व साधयति स्वस्यैवासाधकत्वासाधनत्वात् ॥ ३९ ॥

सेयं मतानुज्ञा किं कार्य्यसमायामेव ? नेत्याह ।—एवंविधमसदुत्तरं सर्वत्र आत्तौ सम्भवतीत्यर्थ यथा शब्दोऽनित्य शब्दत्वादित्यत्र नित्याऽऽकाशसाधर्म्याद मूर्त्तत्वान्नित्य स्यात इति साधर्म्यसमायाम् आकाशसाधर्म्यान्नित्यत्वे आकाशवच्छब्दे परममहत्त्वं स्यादित्यत्रापि समा एवमन्यत्राप्यूह्यम् । यद्यप्ययमतिदेश षटपक्ष्यनन्तरमेव कर्त्तमुचित तथाऽपि विपक्ष्यादावपि सूचयितुमत्रैवाक्त उभयानुज्ञत्वबोधकता हि षटपक्षी विपक्ष्यादावपि तत्फलकत्व तुल्यमिति भाव तर्हि विपक्ष्यामेव मध्यस्थेन पर्य्यनुयोज्योपेक्षणसोद्भावने कथासमाप्तौ कुत षट्पक्षी ? इति चेत् पुत्रां स्फुरत्वविशेषाय तदभ्युपगमात् ॥ ४० ॥

तुल्यबलविरोधो विप्रतिषेध तथा च प्रतिषेधस्य यो विप्रतिषेध तत्र, प्रतिषेध नैकान्तिकदोष इत्यर्थ तथा हि, शब्दोऽनित्य प्रयत्नानन्तरीयकत्वादिति स्थापना

तस्याश्च "प्रतिषेधेऽपि समानो दोष" इति तृतीय पक्षो विप्रतिषेध उच्यते, तस्मिन् प्रतिषेधविप्रतिषेधेऽपि समानो दोषोऽनैकान्तिकत्वं चतुर्थं पक्ष ॥ ४१ ॥

**प्रतिषेधं सदोषमभ्युपेत्य प्रतिषेधविप्रतिषेधे समानो दोषप्रसङ्गो मतानुज्ञा ॥ ४२ ॥**

प्रतिषेध द्वितीय पक्ष सदोषमभ्युपेत्य तदुद्धारमनुद्धृत्याऽनुज्ञाय प्रतिषेधविप्रतिषेधे तृतीये पक्षे समानमनैकान्तिकत्वमिति समान दूषणं प्रसञ्जयतो दूषणवादिना मतानुज्ञा प्रसज्यत इति पञ्चम पक्ष ॥ ४२ ॥

**स्वपक्षलक्षणापेक्षोपपत्त्युपसंहारे हेतुनिर्देशे परपक्षदोषाभ्युपगमात् समानो दोष इति ॥४३॥**

स्थापनापक्षे प्रयत्नकार्यानेकत्वादिति दोष स्थापनाहेतुवादिन स्वपक्षलक्षणो भवति, कस्मात्?—स्वपक्षसमुत्थत्वात्, सोऽयं स्वपक्षलक्षणं दोषमपेक्षमाणोऽनुद्धृत्यानुज्ञाय प्रतिषेधेऽपि समानो दोष इत्युपपद्यमानं दोषं परपक्षे उपसंहरति, इत्थं चाऽनैकान्तिकः प्रतिषेध इति हेतुं निर्दिशति तत्र स्वपक्षलक्षणापेक्षयोपपद्यमानदोषोपसंहारे हेतुनिर्देशे च सत्यनेन परपक्षोऽभ्युपगतो भवति, कथं कृत्वा?—यः परेण,—

---

वादिनः प्रथमः पक्षः। "प्रयत्नकार्यानेकत्वात् कार्यसमः" इति प्रतिवादिना द्वितीयः पक्षः। प्रतिषेधेऽप्यनैकान्तिकत्वं तुल्यमिति वादिनस्तृतीयः पक्षः। योऽयं विप्रतिषेधः तत्रापि तथैवानैकान्तिकत्वं तत्समानदोषोद्भावनं वा चतुर्थः पक्षः ॥ ४१ ॥

पञ्चमं पक्षमाह।—प्रतिषेधं द्वितीयं पक्षं सदोषमभ्युपेत्य तत्र मदुक्तं दोषमनुद्धृत्य प्रतिषेधविप्रतिषेधे मदीयपक्षे तृतीये समानं दोषं प्रसञ्जयतस्तव मतानुज्ञा नामकं निग्रहस्थानमित्यर्थः ॥ ४२ ॥

षष्ठं पक्षमाह।—स्वपक्षः स्थापनारूपः प्रथमः पक्षः, तं लक्षीकृत्य प्रवृत्तो

“प्रयत्नकार्य्यानेकत्वात्” इत्यादिनाऽनैकान्तिकदोष उक्त , तम नुद्धत्य “प्रतिषेधेऽपि समानो दोष” इत्याह, एव स्थापना सदोषामभ्युपेत्य प्रतिषधेऽपि समान दोष प्रसञ्जयत परपक्षा भ्युपगमात् समानो दोषो भवति , यथा परस्य प्रतिषेध सदोष मभ्युपेत्य प्रतिषेधविप्रतिषेधेऽपि समानो दोषप्रसङ्गो मतानुज्ञा प्रसज्यत तथाऽस्यापि स्थापना सदोषामभ्युपेत्य प्रतिषेधेऽपि समान दोष प्रसञ्जयतो मतानुज्ञा प्रसज्यत इति स खल्वय षष्ठ पक्ष । तत्र खलु स्थापनाहेतुवादिन प्रथमतृतीयपञ्चम पक्षा प्रतिषधहेतुवादिनो द्वितीयचतुर्थषष्ठपक्षा , तषा साध्वसाधुतायां मीमांस्यमानायां चतुर्थषष्ठयोरविशेषात् पुन रुक्तदोषप्रसङ्ग । चतुर्थपक्षे समानदोषत्व परस्योच्यत प्रतिषध विप्रतिषेधे प्रतिषेधदोषवद्दोष इति । षष्ठेऽपि परपक्षाभ्युपगमात् समानो दोष इति समानदोषत्वमवोच्यत, नार्थविशेष कश्चि दस्ति समानस्तृतीयपञ्चमयो पुनरुक्तदोषप्रसङ्ग । तृतीयपक्षे ऽपि प्रतिषधेऽपि समानो दोष इति समानत्वमभ्युपगम्यत । पञ्चमपक्षेऽपि प्रतिषेधविप्रतिषेधे समानो दोषप्रसङ्गोऽभ्युपगम्यत नार्थविशेष कश्चिदुच्यत इति , तत्र पञ्चमषष्ठपक्षयोरर्थाविशेषात पुनरुक्तदोष तृतीयचतुर्थयोर्मतानुज्ञा प्रथमद्वितीययोर्विशेष हेत्वभाव इति , षटपक्ष्यामुभयोरसिद्धि । कदा षटपक्षी ?— यदा प्रतिषेधेऽपि समानो दोष इत्येव प्रवर्त्तत तदोभयो पक्षयोरसिद्धि , यदा तु,—‘कार्य्यान्यत्वे प्रयत्नाहेतुत्वमनुप लब्धिकारणोपपत्ते” इत्यनेन तृतीयपक्षो युज्यत, तदा विशेष

।तृतीयपक्ष स्वपक्षलक्षण मस्थापेक्षा समाधर मम दोषानुद्धावनमिति फलिताथ यथा च मदीयपक्षे दोषमनुद्धाव्यत्र स्वपक्षोपपादन क्रतु यत्त्वया हेतुनिर्दिष्ट प्रतिषधेऽपि समानो दोष इति वत्त तथापि मतानुज्ञा हत्तवेत्यथ तदेव षट

हेतुवचनात् प्रयत्नानन्तरमात्मलाभ शब्दस्य, नाभिव्यक्तिरिति सिद्ध ( त्वे ) प्रथमपक्ष (स) न षट्पक्षी प्रवर्त्तत इति ॥ ४३ ॥

इति वात्स्यायनीये न्यायभाष्ये पञ्चमाध्यायस्याऽऽद्यमाह्निकम्।

---

## पञ्चमाध्यायस्य द्वितीयमाह्निकम्।

"विप्रतिपत्त्यप्रतिपत्त्योर्विकल्पान्निग्रहस्थानबहुत्वम्' इति सङ्क्षेपणोक्तं, तदिदानीं विभजनीयम्। निग्रहस्थानानि खलु पराजयवस्तून्यपराधाधिकरणानि प्रायेण प्रतिज्ञाऽऽद्यवयवाऽऽश्रयाणि तत्त्ववादिनमतत्त्ववादिनञ्चाभिसम्प्लवन्ते, तेषां विभागः।—

**प्रतिज्ञाहानिः प्रतिज्ञाऽन्तरं प्रतिज्ञाविरोधः प्रतिज्ञासन्न्यासो हेत्वन्तरमर्थान्तरं निरर्थकमविज्ञातार्थमपार्थकमप्राप्तकालं न्यूनमधिकं पुनरुक्तमननुभाषणमज्ञानमप्रतिभा विक्षेपो मतानुज्ञा पर्य्यनुयोज्योपेक्षणं निरनुयोज्यानुयोगोऽपसिद्धान्तो हेत्वाभासाश्च निग्रहस्थानानि ॥ १ ॥**

तानीमानि द्वाविंशतिधा विभज्य लक्ष्यन्ते ॥ १ ॥

---

पञ्चासुभ ग्रेऽप्ययुक्तवादित्वान्नोत्सिद्धि यदि तु स्थापनावादी ज्ञातवा ... यदुत्तरेणैव दूषयति तदा षट्पक्षी न प्रवर्त्तत इति ॥ ४३ ॥

इति कथाभासप्रकरणम्।

इति श्रीविश्वनाथभट्टाचार्य्यकृतायां न्यायसूत्रवृत्तौ पञ्चमाध्यायस्याऽऽद्यमाह्निकम् ॥१॥

---

अथेदानीं निग्रहस्थानविशेषलक्षणाभिधानं तदेव चाऽऽह्निकार्थः तत्र चाष्ट प्रकरणानि तत्र चाऽऽद्यं प्रतिज्ञाहान्यन्यतराऽऽश्रित निग्रहस्थानपञ्चकविशेषलक्षण प्रकरणम्, अन्यानि च यथास्थानं वक्ष्यन्ते। तत्र विशेषलक्षणायनादौ विभजते।—

**प्रतिदृष्टान्तधर्माभ्यनुज्ञा स्वदृष्टान्ते प्रतिज्ञा-हानि ॥ २ ॥**

साध्यधर्मप्रत्यनीकेन धर्मेण प्रत्यवस्थिते प्रतिदृष्टान्तधर्मं स्वदृष्टान्तेऽभ्यनुजानन् प्रतिज्ञां जहातीति प्रतिज्ञाहानिः निदर्शनम् —ऐन्द्रियकत्वादनित्यः शब्दो घटवदिति कृते, अपर आह,—दृष्टमैन्द्रियकत्वं सामान्ये नित्ये कस्मान्न तथा शब्दे ? इति प्रत्यवस्थिते इदमाह,—यद्यैन्द्रियकं सामान्यं नित्यं कामं घटो नित्योऽस्त्विति स खल्वयं साधकस्य दृष्टान्तस्य नित्यत्वं प्रसञ्जयन् निगमनान्तमेव पक्षं जहाति पक्षं जहत् प्रतिज्ञां जहातीत्युच्यते प्रतिज्ञाऽऽश्रयत्वात् पक्षस्येति ॥ २ ॥

अत्र वक्तव्यं तत्र एतानि तु निग्रहस्थानानि न पुनरप्रतिभाऽज्ञानाऽननुभाषणादिकं न वा अर्थान्तरमवस्थान विरोधिता च वाधीत्यर्थो लभ्यत इति प्राञ्चः अन्ये तु चकारोऽनुक्तसमुच्चये तेन दृष्टान्तसाधनवैकल्यादीनां परिग्रह ॥ १ ॥

तत्र क्रमेण प्रतिज्ञाहान्यादीनां लक्षणानि वक्ष्यन्तु प्रथमोद्दिष्टां प्रतिज्ञाहानिं लक्षयति ।—प्रतिकूलो दृष्टान्तो यत्र स प्रतिदृष्टान्तः परपक्षः स्वः स्वीयो दृष्टान्तो यत्र स स्वदृष्टान्तः स्वपक्षः तथा च स्वपक्षे परपक्षधर्माभ्यनुज्ञा प्रतिज्ञाहानिः स्वयं विवक्षिताभिमतपरित्याग इति फलितार्थः । सिद्धान्तस्तु स्वयं विवक्षितो नाभिधीयत इति नापसिद्धान्तसाङ्कर्यम् । सा च पक्षहेतुदृष्टान्तसाध्यतदन्यहानिभेदात् पञ्चधा भवति यथा शब्दोऽनित्यः कृतकत्वादित्युक्ते प्रत्यभिज्ञया बाधितविषयोऽयमित्युक्ते अस्तु तर्हि घट एव पक्ष इति एवं तत्रैव ऐन्द्रियकत्वादिति हेतौ एकान्तिकत्वाभावात् प्रत्युक्ते अस्तु कृतकत्वादिति हेतुरिति एवं पर्वतो वह्निमान् धूमात् यथा गोलक इत्युक्ते दृष्टान्तः साधनविकल इति प्रत्युक्ते अस्तु तर्हि महानसवदिति एवम् अत्रैव सिद्धसाधने च प्रत्युक्ते अस्तु तर्हि द्रव्यवानिति । अन्यहानिस्तु विशेषणहान्यादि यथा तत्रैव नीलधूमादित्युक्ते, असमर्थविशेषणत्वेन प्रत्युक्ते, अस्तु तर्हि धूमादिति हेतुरित्यादि ॥ २ ॥

**प्रतिज्ञातार्थप्रतिषेधे धर्मविकल्पात् तदर्थनिर्देशः प्रतिज्ञाऽन्तरम् ॥ ३ ॥**

प्रतिज्ञातार्थोऽनित्यः शब्द ऐन्द्रियकत्वात् घटवदित्युक्ते योऽस्य प्रतिषेधः प्रतिदृष्टान्तेन हेतुव्यभिचारः सामान्यमैन्द्रियकं नित्यमिति तस्मिंश्च प्रतिज्ञातार्थप्रतिषेधे धर्मविकल्पादिति दृष्टान्तप्रतिदृष्टान्तयोः साधर्म्ययोगे धर्मभेदात् सामान्यमैन्द्रियकं सर्वगतम् ऐन्द्रियकस्त्वसर्वगतो घट इति धर्मविकल्पात् तदर्थनिर्देश इति साध्यसिद्ध्यर्थम् कथम्?—यथा घटोऽसर्वगत एवं शब्दोऽप्यसर्वगतो घटवदेवानित्य इति, तत्रानित्यः शब्द इति पूर्वा प्रतिज्ञा असर्वगत इति द्वितीया प्रतिज्ञा प्रतिज्ञाऽन्तरं तत् कथं निग्रहस्थानमिति? न प्रतिज्ञायाः साधनं प्रतिज्ञाऽन्तरं किन्तु हेतुदृष्टान्तौ साधनं प्रतिज्ञायाः, तदेतदसाधनोपादानमनर्थकमिति आनर्थक्यान्निग्रहस्थानमिति ॥ ३ ॥

प्रतिज्ञाऽन्तरं लक्षयति।—प्रतिज्ञातस्यार्थस्य प्रतिषेधे कृते तद्दूषणोद्दिधीर्षया धर्मस्य धर्मान्तरस्य विशिष्टः कल्पो विकल्पः तस्माद्विशेषणान्तरविशिष्टतया प्रतिज्ञा-तार्थस्य कथनमिति फलितार्थः प्रतिषेध इत्यनेन घटितः सप्तम्या विलक्षण[illegible] त्वस्य दूषणं विभाव्य विशेषणे न दोष इत्यर्थकम् प्रतिज्ञातार्थस्येत्युपलक्षणं हेत्वन्त-रस्यापीति तत्त्वम् तेन उदाहरणान्तरमुपनयान्तरञ्च प्रतिज्ञाऽन्तरवत् [illegible] भवति। इदञ्च पञ्चानामवयवानां भेदात् प्रत्येकं द्विविधम् यथा शब्दो नित्य इत्युक्ते [illegible] बाधके परेण [illegible] वर्णः [illegible] शब्दः पक्ष इति प्रतिज्ञाऽन्तरम् न [illegible] [illegible]तोपयोगात न चेत् प्रतिज्ञाहानिः पूर्वोक्तस्यापरित्यागात् एवं परेण [illegible] [illegible]नित्यधर्मवत्त्वादित्युक्ते [illegible] च परेण प्रयुक्ते [illegible] [illegible] [illegible] [illegible] [illegible] साध्यः [illegible] [illegible]नित्यधर्मवान् [illegible] [illegible] [illegible] न्यूनत्वेन [illegible] [illegible] [illegible]नित्यम् एवमन्यदप्यूह्यम् ॥ ३ ॥

**प्रतिज्ञाहेत्वोर्विरोधः प्रतिज्ञाविरोधः ॥ ४ ॥**

गुणव्यतिरिक्तं द्रव्यमिति प्रतिज्ञा, रूपादितोऽर्थान्तरस्यानुपलब्धेरिति हेतुः, सोऽयं प्रतिज्ञाहेत्वोर्विरोधः कथम्? यदि गुणव्यतिरिक्तं द्रव्यं, रूपादिभ्योऽर्थान्तरस्यानुपलब्धिर्नोपपद्यते, अथ रूपादिभ्योऽर्थान्तरस्यानुपलब्धिः, गुणव्यतिरिक्तं द्रव्यमिति नोपपद्यते गुणव्यतिरिक्तञ्च द्रव्यं रूपादिभ्यश्चार्थान्तरस्यानुपलब्धिरिति विरुध्यते व्याहन्यते न सम्भवतीति ॥ ४ ॥

**पक्षप्रतिषेधे प्रतिज्ञातार्थापनयनं प्रतिज्ञासन्न्यासः ॥ ५ ॥**

अनित्यः शब्द ऐन्द्रियकत्वादित्युक्ते परो ब्रूयात् – सामान्यमैन्द्रियकं न चानित्यम् एवं शब्दोऽप्यैन्द्रियको न चानित्य इति एवं प्रतिषिद्धे पक्षे यदि ब्रूयात् — कः पुनराह अनित्यः शब्द इति सोऽयं प्रतिज्ञातार्थनिह्नवः प्रतिज्ञासन्न्यास इति ॥ ५ ॥

**अविशेषोक्ते हेतौ प्रतिषिद्धे विशेषमिच्छतो हेत्वन्तरम् ॥ ६ ॥**

निदर्शनम् — एकप्रकृतीदं व्यक्तमिति प्रतिज्ञा, कस्मा

---

प्रतिज्ञाविरोधं लक्षयति।—स्वं च प्रतिज्ञाहेतुपदं कथाकालीनवाक्यपरं। तथा च कथायां स्ववचनार्थविरोधः प्रतिज्ञाविरोधः यथापि काञ्चनमयः पर्वतो वह्निमान् पर्वतः काञ्चनमयो वह्निमान् ह्रदो वह्निमान् ह्रदत्वात् पर्वतो वह्निमान्, काञ्चनमयधूमादित्यादौ हेत्वाभासान्तरसाङ्कर्य्यम् तथाऽप्युपधेयसङ्करेऽपि उपाधेरसाङ्कर्य्यान्न दोषः न चासङ्कीर्णस्थलाभावः पर्वतो वह्निमान् धूमात् यो यो धूमवान् स निरग्निरित्युदाहरणे निरग्निश्चायमित्युपनये च तत्सत्त्वात् एवं निगमनेऽपि बोध्यम् ॥ ४ ॥

प्रतिज्ञासन्न्यासं लक्षयति।—पक्षस्य स्वाभिहितस्य परेण प्रतिषेधे कृते सति तत्परिजिहीर्षया प्रतिज्ञातार्थस्यापनयनमपलापः इत्यर्थः यथा शब्दोऽनित्य ऐन्द्रियकत्वादित्युक्ते सामान्ये व्यभिचारेण परेण प्रत्युक्ते क एवमाह शब्दोऽनित्य इति ॥ ५ ॥

हेत्वन्तरं लक्षयति।—स्वेन च हेतावविशेषेण हेत्ववयवाभिमते विवक्षित, अवि

हेतौ १—एकप्रकृतीनां विकाराणां परिमाणात, मृत्पूर्वकाणां शरावाऽऽदीनां दृष्टं परिमाणम्, यावान् प्रकृतेर्व्यूहो भवति, तावान् विकार इति, दृष्टञ्च प्रतिविकारं परिमाणम्, अस्ति चेदं परिमाणं प्रतिव्यक्तं, तदेकप्रकृतीनां विकाराणां परिमाणात् पश्यामो व्यक्तमिदमेकप्रकृतीति। अस्य व्यभिचारेण प्रत्यवस्थानं, नानाप्रकृतीनामेकप्रकृतीनाञ्च विकाराणां दृष्टं परिमाणमिति, एवं प्रत्यवस्थित आह—एकप्रकृतिसमन्वये सति शरावाऽऽदिविकाराणां परिमाणदर्शनात्, सुखदुःखमोहसमन्वितं हीदं व्यक्तं परिमितं गृह्यते, तत्र प्रकृत्यन्तररूपसमन्वयाभावे सत्येकप्रकृतित्वमिति तदिदमविशेषोक्ते हेतौ प्रतिषिद्धे विशेषं ब्रुवतो हेत्वन्तरं भवति, सति च हेत्वन्तरभावे पूर्वस्य हेतोरसाधकत्वान्निग्रहस्थानम्, हेत्वन्तरवचने सति यदि हेत्वर्थनिदर्शनो दृष्टान्त उपादीयते नेदं व्यक्तमेकप्रकृतिकं भवति प्रकृत्यन्तरोपादानात, अथ नोपादीयते, दृष्टान्ते हेत्वर्थस्यानिदर्शितस्य साधकभावानुपपत्तेरानर्थक्याद्धेतोरनिवृत्तं निग्रहस्थानमिति ॥ ६ ॥

नु साधकांशे स च हेत्ववयवस्य उदाहरणादिरूपो वा अविशेषोक्त इति पूर्वोक्तं इत्यत्र विशेषमिच्छत इति साभिप्रायम्, तत्र परीक्षादूषणोद्दिधीर्षया तत्तत्र हेतौ विशेषणान्तरप्रक्षेपोऽन्यहेतुकरणं वा द्वयमपि हेत्वन्तरम्, तथा च परीक्षादूषणोद्दिधीर्षया पूर्वोक्तहेतुतोऽवच्छेदकातिरिक्तहेतुतोऽवच्छेदकावच्छिन्नवचनं हेत्वन्तरम्, हेतौ विशेषणदाने एव हेत्वन्तरमिति प्राचः, पूर्वोक्तान्य हेत्ववयवे उदाहरणाऽऽदौ वा, यथा शब्दोऽनित्यो बाह्येन्द्रियप्रत्यक्षत्वादित्युक्ते सामान्येऽनैकान्तिकत्वेन च प्रत्युक्ते सामान्यवत्त्वे सतीति विशेषणम्, एवं विशिष्टहेतुमुक्त्वा यत् बाह्येन्द्रियप्रत्यक्षं तदनित्यमित्युदाहरणे व्यभिचारेण प्रत्युक्ते विशिष्टोक्तौ एवमुपनयविशेषणेऽपि ॥ ६ ॥

समाप्तं प्रतिज्ञाहेत्वन्तराऽऽश्रितनिग्रहस्थानविशेषलक्षणप्रकरणम्।

## प्रकृतादर्थादप्रतिसम्बद्धार्थमर्थान्तरम् ॥ ७ ॥

यथोक्तलक्षणे पक्षप्रतिपक्षपरिग्रहे हेतुतः साध्यसिद्धौ प्रकृतायां ब्रूयात्, नित्यः शब्दोऽस्पर्शत्वादिति हेतुः हेतुर्नाम हिनोतेर्धातोस्तुनिप्रत्यये कृदन्तं पदम्, पदञ्च नामाऽऽख्यातोपसर्गनिपाताः, अभिधेयस्य क्रियाऽन्तरयोगाद्विशिष्यमाणरूपः शब्दो नाम क्रियाकारकसमुदायः कारकसंख्याविशिष्टक्रियाकालयोगाभिधाय्याख्यातम् धात्वर्थमात्रञ्च कालाभिधानविशिष्टम् योगेष्वर्थादभिद्यमानरूपा निपाताः उपसृज्यमानाः क्रियाऽवद्योतका उपसर्गा इत्येवमादि तदर्थान्तरं वेदितव्यमिति ॥ ७ ॥

## वर्णक्रमनिर्देशवन्निरर्थकम् ॥ ८ ॥

यथा नित्यः शब्दः कचटतपा जबगडदशत्वात् झभञ घढधषवदिति एवं प्रकारं निरर्थकम् अभिधानाभिधेयभावानुपपत्तौ अर्थगतेरभावात् वर्णा एव क्रमेण निर्दिश्यन्त इति ॥ ८ ॥

अर्थान्तरं लक्षयति।—प्रकृतात् प्रकृतोपयुक्तात् ल्यब्लोपे पञ्चमी तत्र प्रकृतोपयुक्तमर्थमुपेत्यासम्बद्धार्थाभिधानम् अर्थान्तरं प्रकृतानाकाङ्क्षिताभिधानमिति फलितार्थः यथा शब्दो नित्यः कृतकत्वादित्युक्त्वा शब्दो गुणः स चाऽऽकाशस्येत्यादि ॥ ७ ॥

निरर्थकं लक्षयति।—वर्णानां क्रमेण निर्देशो जबगडेत्यादिप्रयोगः तत्तुल्यो निर्देशो निरर्थकं निग्रहस्थानम् अवाचकपदप्रयोग इति फलितार्थः वाचकत्वं शक्त्या निरूढलक्षणया शास्त्रपरिभाषया वा बोध्यम् समयबन्धव्यतिरेकेणेति विशेषणीयम् तेन गूढाभिप्रायेण विचारे कर्त्तव्ये इति समयबन्धे तथाप्रयोगे न दोषः झटिति अस्फुरणे तु न दोष इत्युक्तप्रायः अस्य सम्भवः प्रमादादित्यवधेयम् ॥ ८ ॥

**परिषत्प्रतिवादिभ्यां त्रिरभिहितमप्यविज्ञातमविज्ञातार्थम् ॥ ९ ॥**

यद्वाक्यं परिषदा प्रतिवादिना च (भ) त्रिरभिहितमपि न विज्ञायते श्लिष्टशब्दमप्रतीतप्रयोगमतिद्रुतोच्चारितमित्येवमादिना कारणेन तदविज्ञातमविज्ञातार्थमसामर्थ्यसंवरणाय प्रयुक्तमिति निग्रहस्थानम् ॥ ९ ॥

**पौर्वापर्यायोगादप्रतिसम्बद्धार्थमपार्थकम् ॥ १० ॥**

यत्रानेकस्य पदस्य वाक्यस्य वा पौर्वापर्येणान्वययोगो नास्तीत्यसम्बद्धार्थकत्वं गृह्यते तत्समुदायोऽर्थस्यापायादपार्थं

अविज्ञातार्थं लक्षयति।—त्रिरभिहितं वाऽपीति ग्रन्थ दिरभिधाने वाऽनेन चानाऽऽदेन बाधनिरासाय परिषत्प्रतिवादिभ्यामपरेण विज्ञाने तु नाविज्ञातार्थमिति भाव तथा च त्रिरभिहितार्थकस्यापि परिषत्प्रतिवादिभ्यामज्ञानं पाश्चात्यजनकवाचक वाक्यप्रयोगोऽविज्ञातार्थमिति वाचकत्वेन निरर्थकापार्थकाभ्यां भेदः। अत्र च परा ज्ञानाऽऽपादनं सम्भवं यथा भविष्यतीति भ्रमात्सम्भवः। न च यथाकथञ्चित्पराज्ञातत्व कृत्यज्ञानाऽऽपादनं भाष्यमिनति वाच्यम् तथा सति मन्त्रकाले परमन्दबोधयात्काज्जल्पि तानेनैव सर्वत्र जयसम्भवात् एतस्य त्रेधा सम्भवः —अप्रसिद्धार्थकतन्त्रमात्रप्रसिद्धम् यथा पञ्चस्कन्धाऽऽन्तर्या बौद्धानाम् तत्र रूपाऽऽश्रयः पञ्चेन्द्रियाणि च रूपस्कन्धः सविकल्पक संज्ञास्कन्धः रागद्वेषाभिनिवेशाः संस्कारस्कन्धः सुखदुःखे वेदनास्कन्धः निर्विकल्पक ज्ञानस्कन्धः। द्वितीयम्—आतप्रसक्तयोगमनपेक्षतरूढकम् यथा काश्यपतनय द्युतिहेतु रय विनतयनसमाननामधेयवान् तत्केतुमत्त्वादित्यादि। तृतीय—श्लिष्टम् यथा श्वेतो धावतीत्यादि। एवम् अतिद्रुतोच्चारिताऽऽदिकमपीति भाष्यम्। अथ नाऽऽद्यस्य सम्भव उभयतन्त्राभिज्ञमध्यस्थे सति उभयतन्त्राभिज्ञ एव विचारमध्यवादिनि चेत् ? सत्यम् तथाऽपि यत्र नैयायिकमीमांसकयोर्विचारेऽन्यतरो बौद्धतन्त्राऽऽदिपरिभाषया वदति तत्र निग्रहस्थानमेव तथापि चेत् यथा कथञ्चित् परिभाषा ज्ञायतामिति परः प्रोक्त्वा वदति न तत्राऽऽद्यस्यापादानमिति उत्तरयोस्तु सर्वथैवेति ॥ ९ ॥

अपार्थकं लक्षयति।—पौर्वापर्यं कार्यकारणभावः तदयोगादसम्बन्धात्

---

(भ) वादिनेति क्वच।

क्रमः, यथा दश दाडिमानि षडपूपाः कुण्डमजाजिनं पललपिण्डः अथ रौरुकमेतत् कुमार्य्याः पाय्यं तस्याः पिता अप्रतिशीन इति ॥ १० ॥

## अवयवविपर्य्यासवचनमप्राप्तकालम् ॥ ११ ॥

प्रतिज्ञाऽऽदीनामवयवानां यथालक्षणमर्थवशात् क्रमः, तत्रावयवविपर्य्यासेन वचनमप्राप्तकालमसम्बद्धार्थकं निग्रहस्थानमिति ॥ ११ ॥

## हीनमन्यतमेनाप्यवयवेन न्यूनम् ॥ १२ ॥

प्रतिज्ञाऽऽदीनामवयवानामन्यतमेनाप्यवयवेन हीनं न्यूनं निग्रहस्थानं साधनाभावे साध्यासिद्धिरिति ॥ १२ ॥

---

शाब्दबोधजनकाऽऽकाङ्क्षाऽऽदीनाऽऽदिभावादिति फलितार्थः अप्रतिसम्बद्धाऽसम्बद्ध अथ प्रयोजनं शाब्दबोधरूपं यत्र यद्यपि दशदाडिमानि षडपूपाः कुण्डमजाजिनमित्याद्यवान्तरवाक्यादर्थबोधसत्त्वादव्याप्तिरतिव्याप्तिश्च निरर्थके तथाऽप्यभिमतवाक्यार्थबोधानुकूलाऽऽकाङ्क्षाऽऽदिशून्यबोधजनकपदत्वं तत् अविज्ञातार्थे तु स्वस्य बोधाभावत्वात् नातिव्याप्तिः उदाहरणन्तु अयोग्यानासन्नानाकाङ्क्षवाक्यम् ॥ १ ॥

समाप्तमभिमतवाक्यार्थाप्रतिपादकनिग्रहस्थानचतुष्टयप्रकरणम् ।

अप्राप्तकालं लक्षयति ।—अवयवस्य कथकादेश्च विपर्य्यासो वैपरीत्यम् तथा च समयबन्धादिपर्य्याभूतकथाक्रमविपरीतक्रमेणाभिधानं पर्य्यवसन्नम् तत्रायं क्रमः —वादिना साधनमुक्त्वा सामान्यतो हेत्वाभासा उद्धरणीया इत्येकः पादः प्रतिवादिनश्च तत्रोपालम्भो द्वितीयः पादः प्रतिवादिनः स्वपक्षसाधनं तत्र हेत्वाभासोद्धरणञ्चेति तृतीयः पादः जयपराजयव्यवस्था चतुर्थः पादः एवं प्रतिज्ञाहेत्वादीनां क्रमः —तत्र सभापतिभ्यामीहाऽऽदिना व्युत्क्रमाभिधानमप्राप्तकालमिति ॥ ११ ॥

न्यूनं लक्षयति ।—अवयवेन स्वशास्त्रसिद्धेन तेन सौगतस्य द्व्यवयवाभिधानेऽपि न न्यूनत्वम् । नन्ववयवहीनत्वम् अवयवत्वावच्छिन्नाभावः तथा चाकथनमेव स्यात् अत आह अन्यतमेनापीति ।—तथा च यत्किञ्चिदवयवशून्यावयवाभिधानं फलितम् । न चायमपसिद्धान्तः सिद्धान्तविरुद्धानभ्युपगमात् अपि तु सभापतिभ्याऽऽदिनाऽनभिधानात् ॥ १२ ॥

### हेतूदाहरणाधिकमधिकम् ॥ १३ ॥

एकेन कृतत्वादन्यतरस्याऽऽनर्थक्यमिति, तदेतन्नियमाभ्युपगमे वेदितव्यमिति ॥ १३ ॥

### शब्दार्थयोः पुनर्वचनं पुनरुक्तमन्यत्रानुवादात् ॥ १४ ॥

अन्यत्रानुवादात् शब्दपुनरुक्तमर्थपुनरुक्तं वा, नित्यः शब्दो नित्यः शब्द इति शब्दपुनरुक्तम्, अर्थपुनरुक्तम्—अनित्यः शब्दो निरोधधर्मको ध्वनिरिति ॥ १४ ॥

### अनुवादे त्वपुनरुक्तं शब्दाभ्यासादर्थविशेषोपपत्तेः ॥ १५ ॥

यथा हेत्वपदेशात् प्रतिज्ञायाः पुनर्वचनं निगमनमिति ॥ १५ ॥

### अर्थादापन्नस्य स्वशब्देन पुनर्वचनम् ॥ १६ ॥

पुनरुक्तमिति प्रकृतम्। निदर्शनम्—उत्पत्तिधर्मकत्वाद-

---

साधकं लक्षयति।—हेतूदाहरणान्युपलक्षणं दृष्टान्ताद्यधिकमपि बोध्यम्। तथा च कृतकृत्यस्यापुनरुक्ताभिधानाभाव इति फलितम्। अनुवादस्तु न कृतकृत्यस्य साभिप्रायत्वात् प्रतिज्ञाऽऽनर्थक्यञ्च पुनरुक्तम्। धर्मादिनाऽऽकाङ्क्षित महानसवत्त्वरवाऽन्यत्वाऽऽकान्तु विना समर्थनस्य न्यायाऽऽदिसमाप्तावधिकम्। यथा महानसं महानसवदिति न नाधिकं किन्तु पुनरुक्तम् ॥ १३ ॥

समाप्तं स्वसिद्धान्तानुपयोगाऽऽभासाभ्युपगमाधिकप्रकरणम्।

पुनरुक्तं लक्षयति।—पुनर्वचनं पुनरुक्तं तस्य विभागाय शब्दार्थयोरिति तेन शब्दपुनरुक्तमर्थपुनरुक्तञ्च लभ्यते। अनुवादेऽतिव्याप्तिवारणायान्यत्रानुवादादिति अनुवादान्यत्वे सतीत्यर्थः। निष्प्रयोजनं पुनरभिधानं हि पुनरुक्तम्, अनुवादस्तु व्याख्यारूपः सप्रयोजनक एवेति भावः। तथा च समानानुपूर्वीकशब्दप्रयोगः शब्दपुनरुक्तं, समानार्थकभिन्नाऽऽनुपूर्वीकशब्दस्य निष्प्रयोजनं पुनरभिधानमर्थपुनरुक्तम्। आद्यं यथा—घटो घट इति, द्वितीयं यथा—घटः कलश इति, एतस्य प्रमादाऽऽदिना सम्भवः ॥ १४ ॥

पुनरुक्तप्रभेदान्तरमाह।——पुनरुक्तमित्यनुवर्त्तते। यस्मिन्नुक्ते यस्यार्थस्योत्थानं कौ

नित्यमित्युक्ते। अर्थादापन्नस्य योऽभिधायकः शब्दः तेन स्वशब्देन ब्रूयादनुत्पत्तिधर्मकं नित्यमिति तच्च पुनरुक्तं वेदितव्यम्। अर्थसम्प्रत्ययार्थे शब्दप्रयोगे प्रतीतः सोऽर्थोऽर्थापत्त्येति ॥ १६ ॥

**विज्ञातस्य परिषदा त्रिरभिहितस्याप्यनुच्चारण-मननुभाषणम् ॥ १७ ॥**

विज्ञातस्य वाक्यार्थस्य परिषदा प्रतिवादिना त्रिरभिहितस्य यदप्रत्युच्चारणं तदननुभाषणं नाम निग्रहस्थानमिति। अप्रत्युच्चारयन् किमाश्रयं परपक्षप्रतिषेधं ब्रूयात् ? ॥ १७ ॥

**अविज्ञातञ्चाज्ञानम् ॥ १८ ॥**

विज्ञातार्थस्य परिषदा प्रतिवादिना त्रिरभिहितस्य यद

---

प्रतिपन्नत्वात् तस्य तेन रूपेण पुनरभिधानं पुनरुक्तम्, इदमेव च अर्थपुनरुक्तमभिधीयते, यथा शङ्खरूपः हात पूर्वपक्षाऽऽक्षिप्तोच्चारणम्, तथा वह्निरिति उत्तरपक्षाऽऽक्षिप्तोक्तिः, एवं बहिरास्ते गेहे नास्तीति विध्याक्षिप्तोक्तिः, जीवन् गेहे नास्ति बहिरस्तीति निषेधाऽऽक्षिप्तोक्तिः पुनरुक्तत्वावच्छेदः भाष्याऽऽदिसम्मतम्। अन्ये तु — शब्दपुनरुक्तं द्विविधं तस्यैव शब्दस्य पुनरभिधानं पर्यायेणाभिधानम्, अन्यत् पुनरर्थपुनरुक्तम् इत्याहुः ॥ १६ ॥

अननुभाषणं लक्षयति।—परिषदा विज्ञातस्य विशिष्य बुद्धार्थस्य वादिना त्रिरभिहितस्य तथा च प्रथमवचनेऽननुभाषणे वादिना वारत्रयं वाक्यमिति दर्शितम्, तथा च त्रिरभिधानेऽपि यथाऽनुभाषणविरोधी व्यापारः तथाऽननुभाषणं निग्रहस्थानमित्यर्थः। अज्ञानं साङ्ख्यानिरासायाज्ञानमनाविष्कुर्वतीति विशिष्य साङ्ख्यनिरासाय कथामविच्छिन्दतीति च विशेषणीयमित्याचार्य्याः। न चाप्रतिभासाङ्कर्य्यम् उत्तरप्रतिपत्तावपि सभाक्षोभाऽऽदिनाऽननुभाषणसम्भवात् तदिदं चतुर्द्धा — एकदेशानुवादाद्विपरीतानुवादात् केवलदूषणोक्त्या सर्वथैव चेति। सर्वनामपदेनानुवादात् पञ्चममित्याचार्य्याः। क्वचिदज्ञानाप्रतिभाऽननुभाषणसाङ्कर्य्ये यन्निवेतु शक्यते, भदे ऽऽद्व्यम् ॥ १७ ॥

अज्ञानं लक्षयति।—भावे तु। अर्थस्य परिषदा विज्ञातस्येत्याद्युक्तवार्थे ,

विज्ञानं, तदज्ञानं निग्रहस्थानमिति। अथ खल्वविज्ञाय कस्य प्रतिषेधं ब्रूयादिति ? ॥ १८ ॥

## उत्तरस्याप्रतिपत्तिरप्रतिभा ॥ १९ ॥

परपक्षप्रतिषेध उत्तरं, तत् यदा न प्रतिपद्यते, तदा निगृहीतो भवति ॥ १९ ॥

## कार्य्यव्यासङ्गात् कथाविच्छेदो विक्षेपः ॥ २० ॥

यत्र कर्त्तव्यं व्यासज्य कथां व्यवच्छिनत्ति,—इदं मे करणीयं विद्यते, तस्मिन्नवसिते कथयिष्यामि, इति विक्षेपो नाम निग्रहस्थानम्। एकनिग्रहावसानायां कथायां स्वयमेव कथान्तरं प्रतिपद्यत इति ॥ २० ॥

---

तथा च परिषदा विज्ञातस्य वादिना त्रिरभिहितस्याप्यविज्ञानमित्यर्थः। इदञ्च किन्नाम श्रूयत एव तथाऽप्यवधारणेन ज्ञातुं न शक्यत इति ॥ १८ ॥

अप्रतिभां लक्षयति।—उत्तरार्हेण परोक्ते बुद्धेऽपि यदोत्तरसमये उत्तरं न प्रतिपाद्यते तदाऽप्रतिभा निग्रहस्थानम्। न चाननुभाषणस्याऽऽवश्यकत्वात् तदन्तर्भूषणमात्रत्वात् वाच्यं परीक्ष्यमनुवादे हि सति यत्र परीक्षमनस्यापि नोत्तरं प्रतिपद्यते तत्रासाङ्कर्य्यात् स्वसूचनश्लोकपाठादिमुद्रया चेयम् ॥ १९ ॥

विक्षेपं लक्षयति।—कार्य्यव्यासङ्गात्कार्य्यव्यासङ्गमुद्भाव्येत्यर्थः। ल्यब्लोपे पञ्चमी। कार्य्यव्यासङ्गश्चावश्यकत्वात्कालान्तरकर्त्तव्येनाऽऽरोपितः। तेन तादृशकथाविच्छेदो विक्षेपः। तेन राजपुरुषाऽऽदिभिराकारणे गृहजनाऽऽदिभिर्वाऽऽवश्यककार्य्यार्थमाकारणे स्वगृहदाहेऽऽन्यत्र पश्यतो गमने वा शिरोरोगाऽऽदिना प्रतिबन्धे वा न विक्षेपः। ननु कार्य्यव्यासङ्गाभावे कुतः—सभाक्षोभाऽऽदिना चेत् अननुभाषणमेव उत्तराप्रतिपत्त्या चेत् अप्रतिभैवेति चेत् न उत्तरावसराभावात्। व्युत्पन्नस्योत्तरस्फूर्त्तावपि सदूषणसम्भावनया विक्षेपसम्भवात्। यथा,— क्षितिः सकर्त्तृका कार्य्यत्वात् इत्युक्ते अङ्कुरे व्यभिचारसम्भावनया उद्भाव्य तत्र चेदयं पक्षसमत्वं ब्रूयात् तदा न किमुत्तरम् ? अतोऽत्र महार्णवलिखितं मया च विचारितं किञ्चित् कार्य्यमुद्भाव्य गृहं गत्वा दृश्यत इत्येवं विक्षेपसम्भवात् ॥ २ ॥

**स्वपक्षदोषाभ्युपगमात् परपक्षदोषप्रसङ्गो मतानुज्ञा ॥ २१ ॥**

य परेण चोदित दोष स्वपक्षेऽभ्युपगम्यानुद्धृत्य वदति,— भवत्पक्षे समान दोष इति स स्वपक्षे दोषाभ्युपगमात्परपक्षे दोष प्रसञ्जयन पर मतमनुजानातीति मतानुज्ञा नाम निग्रह स्थानमापद्यत इति ॥ २१ ॥

**निग्रहस्थानप्राप्तस्यानिग्रह पर्य्यनुयोज्योपेक्षणम्॥२२।**

पर्य्यनुयोज्यो नाम निग्रहोपपत्त्या चोदनीय तस्योपेक्षण निग्रहस्थान प्राप्तोऽसीत्यननुयोग , एतच्च कस्य पराजय ? इत्यनुयुक्तया परिषदा वचनीयम , न खलु निग्रह प्राप्त स्वकौपीन विवृणुयादिति ॥ २२ ॥

**अनिग्रहस्थाने निग्रहस्थानाभियोगो निरनुयोज्यानुयोग ॥ २३ ॥**

निग्रहस्थानलक्षणस्य मिथ्याऽध्यवसायादनिग्रहस्थाने निग्र

---

मतानुज्ञां लक्षयति।— दोषाभ्युपगमात दोषमनुद्धृत्येत्यर्थ यथा शब्दो नित्य श्रावणत्वादित्युक्ते अनैकान्तिकत्वेन हेत्वाभासोऽयमित्युक्तौ शब्दोऽनित्य कृतकत्वादिति साधिते त्वयापि पक्षसमत्वान्न दोष इत्युक्तौ स्वस्य त्वापि तथा हेत्वाभासोऽयमित्युक्तौ सोऽयं मतानुज्ञया निगृहीत स्यात् परमतस्याप्रतिषिद्धमनुमत भवतीति स्वपक्षे दोषाभ्युपगमात ॥ २१ ॥

पर्य्यनुयोज्योपेक्षणं लक्षयति।—निग्रहस्थान प्राप्तवतोऽनिग्रह निग्रहस्थानानुद्भावन मित्यर्थ । यत्र त्वनेकनिग्रहस्थानपाते एकतरोद्भावन तत्र न पर्य्यनुयोज्योपेक्षणावसर निग्रहस्थानोद्भावनत्वावच्छिन्नाभावस्यैव तत्त्वात । ननु वादिना कथमिदमुद्भाव्य स्वकौपीनविवरणस्यायुक्तत्वादिति चेत ?— सत्यम् मध्यस्थेनैवेदमुद्भाव्य वादे च स्वयमुद्भावनेऽप्यदोष ॥ २२ ॥

निरनुयोज्यानुयोगं लक्षयति।—अवसरे यथार्थनिग्रहस्थानोद्भावनादितरत् यत्, निग्रहस्थानोद्भावन तदित्यर्थ एतेनानवसरे निग्रहस्थानोद्भावने एकनिग्रहस्थान

गृहीतोऽसीति परं ब्रुवन् निरनुयोज्यानुयोगान्निगृहीतो वेदितव्य इति ॥ २३ ॥

## सिद्धान्तमभ्युपेत्यानियमात् कथाप्रसङ्गोऽपसिद्धान्त ॥ २४ ॥

कस्यचिदर्थस्य तथाभाव प्रतिज्ञाय प्रतिज्ञातार्थविपर्य्ययादनियमात कथा प्रसञ्जयतोऽपसिद्धान्तो वेदितव्य यथा न सदात्मा न जहाति न सतो विनाश, नासदात्मान लभते नासदुत्पद्यत इति सिद्धान्तमभ्युपत्य स्वपक्ष व्यवस्थापयति एकप्रकृतीद व्यक्त, विकाराणामन्वयदर्शनात, मृदन्वितानां शरावाऽऽदीना दृष्टमेकप्रकृतिकत्वम, तथा चाय व्यक्तभेद सुखदुःखमोहान्वितो दृश्यते, तस्मात समन्वयदर्शनात सुखाऽऽदिभिरेकप्रकृतीद शरीरमिति, एवमुक्तवाननुयुज्यते,—अथ प्रकृति विकार इति कथ लक्षितव्यमिति ? यस्यावस्थितस्य धर्मान्तर निवृत्तौ धर्मान्तर प्रवर्त्तते सा प्रकृति यच्च धर्मान्तर प्रवर्त्तते स विकार इति सोऽय प्रतिज्ञातार्थविपर्य्यासादनियमात

---

निग्रहस्थानान्तराणि न च मातानि । सोऽयं चतुर्धा —कृत्यान्तराभासोऽनवसर ग्रहणञ्च आभासो व्यभिचारादावासङ्गाद्युद्भावनम् अनवसरग्रहणञ्चाकाल एवोद्भावनम् यथा स्वस्यापि चेत प्रतिज्ञाहानि विशेषयामि चेत हेत्वन्तरम् एवमवसरमतीत्य कथनमपि यथा उच्यमानग्राह्यस्यापशब्दाऽऽदेः पारसमाप्तौ एवमनुक्तग्राह्याज्ञानादावननुभाषणावसरेऽनुद्भाव्य बोधाऽऽविष्करणानुभाषणप्रवृत्त वादिनि तदुद्भावनमित्यादिकमूह्यम् ॥ २३ ॥

अपसिद्धान्त लक्षयति।—सिद्धान्त स्वशास्त्रकाराभ्युपगतमर्थ स्वीकृत्य अनियमात् तान्नियमप्रच्यवात् कथाप्रसङ्ग इति तथा च कथायां स्वीकृतसिद्धान्तप्रच्यवोऽपसिद्धान्त तथा च साङ्ख्यमतमाह वादिनाभौत्यभ्युपेत्याऽऽरब्धायां कथायाम आविर्भावस्याऽऽविर्भावाभ्युपगमेऽनवस्थात दूषणोद्धाराया ऽऽविर्भावस्यार त उत्पत्ति यदभ्युपैति, तदाऽपसिद्धान्त यस्तु कदाचिन्मतेन कथामारभते तस्य स्वीकाराभ्युप

कथां प्रसञ्जयति, प्रतिज्ञातं खल्वनेन नासदाविर्भवति, न सत् तिरोभवतीति सदसतोश्च तिरोभावाऽऽविर्भावमन्तरेण न कस्यचित् प्रवृत्ति प्रवृत्त्युपरमश्च भवति, मृदि खल्ववस्थिताया भविष्यति शरावाऽऽदिलक्षण धर्मान्तरमिति प्रवृत्तिर्भवति, अभूदिति च प्रवृत्त्युपरम, तदेतन्मृद्धर्माणामपि न स्यात्, एवं प्रत्यवस्थितो यदि सतश्चाऽऽत्महानमसतश्चाऽऽत्मलाभमभ्युपैति, तदस्यापसिद्धान्तो निग्रहस्थान भवति अथ नाभ्युपैति, पक्षोऽस्य न सिध्यति ॥२४॥

## हेत्वाभासाश्च यथोक्ता ॥ २५ ॥

हेत्वाभासाश्च निग्रहस्थानानि, किं पुनर्लक्षणान्तरयोगात् हेत्वाभासा निग्रह स्थानत्वमापन्ना, यथा प्रमाणानि प्रमेयत्वम् ? इत्यत आह यथोक्ता इति।—हेत्वाभासलक्षणेनैव निग्रह स्थानभाव इति। त इमे प्रमाणाऽऽदय पदार्था उद्दिष्टा लक्षिता परीक्षिताश्चेति ॥ २५ ॥

इति वात्स्यायनीये न्यायभाष्ये पञ्चमाध्यायस्य द्वितीयाऽऽह्निकम्।
समाप्तश्चाय पञ्चमोऽध्याय ॥ ५ ॥

समानत्रा नापसिद्धान्त इत विभाषयितुमभ्युपत्यत्यक्तम सोगतास्त्वपसिद्धान्त पक्ष न मन्यन्त इत्यन्यदतत ॥ २४ ॥

क्रमप्रसहेत्वाभासलक्षण वक्तव्ये तदकथनबीजमाह — च सरा हेत्वाभासा पूनयथा येन रूपेण पूर्वमुक्ता तनैव रूपेण तथा निग्रहस्थानानि न तु लक्षणान्तर मपाक्षितामाति। अत्र चकारस्य दृष्टान्त साधनवकल्य समुच्चा य स इ जीवन तत्र यथोक्ता इत्यस्यानन्वयाऽऽपत्तोरात ॥ २५ ॥

सनप्र निग्रहस्थानावज पत्ला न म।

समाप्त पञ्चमाध्यायस्य द्वितीयाऽऽह्निकम।

एषा मुनिप्रवरगोतमसूत्रवृत्ति श्रीविश्वनाथकृतिना सुगमाऽल्पवर्णा।
श्रीकृष्णचन्द्रचरणाब्जचञ्चरीकश्रीमच्छिरोमणिवचःप्रचयैरकारि॥

इति श्रीमहामहोपाध्यायश्रीविद्यानिवासभट्टाचार्यात्मजश्रीविश्वनाथ भट्टाचार्यकृताया न्यायसूत्रवृत्तौ पञ्चमोऽध्याय ।

समाप्तश्चेदं शास्त्रम्।